CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BOOK-LAND
65, Halwasiya Market,
HAZRATGANJ, LUCKNOW.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

THE NEW VEDIC SELECTION

BY

PT. N. KANTA NATH SHASTRY TELANG, M. A.

Reader, Department of Sanskrit & Pali

Banaras Hindu University

AND

DR. BRAJ BIHARI CHAUBEY, M.A., PH. D.

Mayurbhañja Fellow

Banaras Hindu University,

Varanasi

WITH FOREWORD

BY

DR. SIDDHESHWAR BHATTACHARYA,

Mayurbhañja Professor & Head of the Department of Sanskrit & Pali

Banaras Hindu University

PRACHYA BHARATI PRAKASHANA

VARANASI

1965

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Published by
© PRACHYA BHARATI PRAKASHANA
KAMACHHA, VARANASI.



First Edition, 1965
Popular Ed. Price Rs. 12-50
Library Ed. Rs. 16-00

Printed at
Text Portion—Jyotish Prakash Press, Varanasi
Notes Portion —LAKSHMI DAS
Banaras Hindu University Press,
Varanasi
Appendix Etc.—Tara Printing Works, Varanasi.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Dedicated to

Honourable

Dr. Siddhesvara Bhattācārya

"त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये"

राज्य संग्रहालय पुस्तकालय, लखनऊ
क्रम संख्या 3523
प्राप्ति तिथि 30-1-68
State Museum, Library, Lko.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

FOREWORD

Close in the trail of the *Prākṛta-praveśikā* by Sri K. C. Jain and the *Introduction to Pali* by Sri A. Barua (Bhikkhu) of the Department of Sanskrit and Pali, Banaras Hindu University, appears *The New Vedic Selection* by Sri N. K. S. Telang, Reader in Sanskrit, and Dr. Braj Bihari Chaubey, a worthy student of the Department. With this, the first phase of the publication programme under the auspices of the Department comes to a successful conclusion.

In spite of all that has been done by modern scholarship in the sphere of Vedic studies, Vedic literature is now at its low ebb. The interest of the University students in its study has noticeably languished. Its thoughts and language with all their splendour and richness have receded to an anachronism.

Vedic studies must be rescued from such predicament. It is the responsibility of India, especially of the Banaras Hindu University, the citadel of India's past and present. The University has taken due cognizance of its importance in the curriculum of the Under-graduate as well as of the Post-graduate.

At once the old problem had to be faced. *Peterson's* and *Macdonell's* have silently disappeared from the market. Further, with all their merits they could present only the partial view as they were exclusively concerned with the Ṛg-veda.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

The present venture is intended to serve as a window to the grand pa orama of Vedic literature through the ages in its different facades. Modelled on the *Peterson's*, it is broadly divided into three parts—The Text, the Annotations and the Appendixes. The text is an epitome of the entire range of Vedic literature together with its ancillaries. The old emphasis on the Ṛg-veda with its teeming variegated materials is kept intact. In the Annotations both Sāyaṇa and the modern scholars are set in grand poise. Word-by-word meaning in Hindi attended with translations both in Hindi and English do cater to the modern needs. As many as four Appendixes embrace a vast arena from Vedic grammar to the Vedic deity—all that is necessary for a student of Vedic literature.

In brief, Sri Telang and Dr. Chaubey have not spared themselves to make this work useful. It is earnestly hoped that this fruit of their sincere labour will remove a long-felt want as it will go a long way to recapturing the glory that India was.

Banaras Hindu University S. BHATTACHARYA
8-8-65

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

PREFACE

The Vedic language is one of the oldest languages of the world. The literature in this language is a valuable treasure for a student of history and culture. Modern scholars also have recognised its importance. Some portions of it are prescribed in the courses of Degree and Post-graduate examinations of Indian Universities.

For a long time Peterson's 'Hymns from the Ṛg-Veda' was a popular Vedic reader in India. It was prescribed in B.A. and M.A. courses of most of the Indian Universities. But for several year it has been out of print. No Vedic Reader suitable for students of Indian Universities is available in the market. This has created a great difficulty before the teachers and students of Vedic language and literature in India. To meet this desideratum Dr. Siddheshwara Bhattacharya, the Head of the Department of Sanskrit, Banaras Hindu University, advised us to prepare a a Vedic Selection, selecting pieces from all important works of the Vedic field for the use of the students of the Indian Universities. Being encouraged by him, we undertook the work and are glad to present 'The New Vedic Selection' to the learned public.

'The New Vedic Selection' consists of representative pieces from the Saṁhitās, Brāhmaṇas, Āraṇyakas, Upaniṣads and important Vedāṅgas. In our anxiety to bring out the book soon, so that it may be used by students from the 1965 session, the printing

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

work of different parts of the book had to be got done from different printing establishments. Owing to this, the numbering of pages could not be made continued. This has divided the book into three sections in a way. The first section consists of the original text of the pieces selected. The second section contains the Pada text (wherever available), the Sāyaṇa Bhāṣya (wherever available), word meanings in Hindi, English and Hindi translations, and grammatical and critical notes in English (wherever necessary). The Pada-text and the Sāyaṇa Bhāṣya on pieces selected from Sāma-Saṁhitā could not be given because books with correct readings were not available. The third section consists of four Appendices on grammar, accent, metre and deity. We hope the book will prove useful for students of Indian Universities.

Now, we feel it our duty to acknowledge obligations of those scholars from whom we drew inspiration and help in our work. First of all our thanks are due to Dr. Siddheshwar Bhattacharya, Head of the Dept. of Sanskrit and Pali, B.H.U., but for whose help we could not have completed our work in such a short span of time as was at our disposal. He was very kind to help us in preparing the general plan of the book and selecting pieces from the extent of Vedic literature. He also gave valuable help in preparing Notes and Appendices. Our thanks are due also to Shri Svami Ramnarayana Das Shastri, Sital Das Ka Akhara, Varanasi, and our esteemed colleagues Prof. A. Barua (Bhikkhu) and

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Pt. Kashinath Pande, Lecturer, in the Department of Sanskrit and Pali, and Shri Pran Lal Acharya, Banaras Hindu University Press, for helping in many ways in preparing the Selection and bringing it out. We are indebted to all the scholars whose works we consulted and used in preparing the present Selection. Finally, we offer our hearty thanks to the Publisher, Pracya Bharati Prakashan, Kamachha, Varanasi, who kindly agreed to print and publish this book and left no stone unturned to bring out the book in time and make it free from printing errors.

In spite of all pains taken by us and the Publisher, owing to hurry with which the book has been printed, some mistakes may have crept in. We hope, the learned readers will correct them and draw our attention to them so that the book may be improved and made more useful in the second edition.

N. Kanta Nath Shastry Telang
Braj Bihari Chaubey

August 15, 1965,
Banaras Hindu University,
Varanasi.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CONTENTS

A. Text

Sel. No.		Ref. No.	Pages
Ṛg veda			
1	Varuṇa	I.24	i–iii
2	Indra	I.32	iv–vii
3	Savitṛ	I.35	vii–ix
4	Maruts	I.38	ix–xii
5	Uṣas	I.48	xii–xv
6	Aśvinā	I.116	xvi–xxi
7	Viṣṇu	I.154	xxi–xxii
8	Indra	II.12	xxii–xxv
9	Brahmaṇaspati	II.23	xxv–xxix
10	Rudra	II.33	xxix–xxxii
11	Apāṁ Napāt	II.35	xxxiii–xxxvi
12	Savitṛ	II.38	xxxvi–xxxviii
13	Nadyaḥ (Viśvāmitra-Nadī-Saṁvāda)	III.33	xxxviii–xli
14	Agni	IV.7	xli–xliii
15	Agni	IV.12	xliii–xlv
16	Parjanya	V.83	xlv–xlvii
17	Pūṣan	VI.54	xlvii–xlix
18	Varuṇa	VII.86	xlix–l
19	Maṇḍūka	VII.103	li–liii
20	Soma	IX.80	liii–liv
21	Kitava	X.34	liv–lvii
22	Jñāna	X.71	lvii–lix
23	Deva	X.72	lx–lxi

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Sel. No.		Ref. No.	Pages
Ṛg-veda			
24	Manyu	X.84	Lxii–Lxiii
25	Puruṣa	X.90	Lxiii–Lxvi
26	Saramā-Paṇi-Saṁvāda	X.108	Lxvii–Lxix
27	Hiraṇyagarbha	X.121	Lxix–Lxxi
28	Nāṣadīya	X.129	Lxxi–Lxxiii
29	Śraddhā	X.154	Lxxiii–Lxxiv
30	Saṁjñāna	X.191	Lxxiv–Lxxv
Śukla-Yajur-veda			
31	Yoga-Kṣema	XXII.22	Lxxv
32	Prajāpati	XXXII.1-5	Lxxvi–Lxxvii
33	Śiva-Saṁkalpa	XXXIX.1-6	Lxxvii–Lxxviii
Sāma-veda			
34	Agni	I.1.4	Lxxviii–Lxxxii
35	Indra	III.1.1	Lxxxii–Lxxxiv
36	Soma	VI.1.4	Lxxxv–Lxxxviii
Atharva veda			
37	Rājya-kāmanā	I.29	Lxxxviii–Lxxxix
38	Ṣāmmanasya	III.30	xc–xci
39	Takman	VI.20	xci–xcii
Śatapatha-Brāhmaṇa			
40	Vedi	I.2.5.1-10	xcii–xciii
41	Vāk-Manaḥ -Saṁvāda	I.4.5.8-13	xciv
Aitareya-Āraṇyaka			
42	Puruṣa Vibhūti	II.1.7	xcv–xcvi

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Sel. No.		Ref. No.	Pages
Taittirīya-Āraṇyaka			
43	Pañca Mahāyajña	II.10	xcvi
Bṛhadāraṇyaka-Upaniṣad			
44	Ātma-Tattva-Vivecana	II.4	xcvii–xcviii
Śvetāśvatara Upaniṣad			
45	Puruṣa-Svarūpa	III.7-21	xcix–cii
Nirukta			
46	Śabda-Nirvacana-Siddhānta	II.1	cii–ciii
47	Devatā-Ākāra-Cintana	VII.2	civ–cv
Bṛhaddevatā			
48	Dadhyaṅ and Madhuvidyā	III.17-24	cvi–cvii
49	Purūravā-Urvaśī-Vṛtta	VII.145-152	cviii–cix
Mahābhāṣya			
50	Śabdānuśāsana-Prayojana		cix–cx

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

I.

B. Notes

Sel. No.		Pages
1	... ...	1—26
2	... ...	27—55
3	... ...	56—74
4	... ...	75—89
5	... ...	90—114
6	... ...	115—154
7	... ...	155—165
8	... ...	166—185
9	... ...	186—210
10	... ...	211—228
11	... ...	229—246
12	... ...	247—262
13	... ...	263—282
14	... ...	283—295
15	... ...	296—302
16	... ...	303—313
17	... ...	314—320
18	... ...	321—331
19	... ...	332—343
20	... ...	344—349
21	... ...	350—365
22	... ...	366—382
23	... ...	383—391
24	... ...	392—399
25	... ...	400—416
26	... ...	417—431

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Sel. No.		Pages
27	... ...	432—445
28	... ...	446—459
29	... ...	460—464
30	... ...	465—468
31	... ...	469—471
32	... ...	472—476
33	... ...	477—484
34	... ...	485—491
35	... ...	492—497
36	... ...	498—506
37	... ...	507—514
38	... ...	515—521
39	... ...	522—525
40	... ...	526—534
41	... ...	535—539
42	... ...	540—547
43	... ...	548—552
44	... ...	553—563
45	... ...	564—574
46	... ...	575—589
47	... ...	590—601
48	... ...	602—606
49	... ...	607—609
50	... ...	610—616
Appendix—A	Vedic Grammar	... 1—40
Appendix—B	Vedic Accent	... 41—57
Appendix—C	Vedic Metre	... 58—72
Appendix—D	Vedic Deity	... 73—108
Bibliography		... 109—112

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

VARUNA

कस्य नूनं कतमस्यामृतानां
मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दा-
त्पितरं च दृशेयं मातरं च ॥ १ ॥

अग्नेर्वयं प्रथमस्यामृतानां
मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दा-
त्पितरं च दृशेयं मातरं च ॥ २ ॥

अभि त्वा देव सवितरीशानं वार्याणाम् ।
सदावन्भागमीमहे ॥ ३ ॥

यश्चिद्धि त इत्था भगः शशमानः पुरा निदः ।
अद्वेषो हस्तयोर्दधे ॥ ४ ॥

भगभक्तस्य ते वयमुदशेम तवावसा ।
मूर्धानं राय आरभे ॥ ५ ॥

नहि ते क्षत्रं न सहो न मन्युं
वयश्चनामी पतयन्त आपुः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नेमा आपो अनिमिषं चरन्ती-
र्न ये वातस्य प्रमिनन्त्यभ्वम् ॥ ६ ॥

अबुध्ने राजा वरुणो वनस्यो-
र्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषा-
मस्मे अन्तर्निहिताः केतवः स्युः ॥ ७ ॥

उरुं हि राजा वरुणश्चकार
सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽक-
रुतापवक्ता हृदयाविधश्चित् ॥ ८ ॥

शतं ते राजन्भिषजः सहस्र-
मुर्वी गभीरा सुमतिष्टे अस्तु ।
बाधस्व दूरे निर्ऋतिं पराचैः
कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥ ९ ॥

अमी य ऋक्षा निहितास उच्चा
नक्तं ददृश्रे कुह चिद्दिवेयुः ।
अदब्धानि वरुणस्य व्रतानि
विचाकशच्चन्द्रमा नक्तमेति ॥१०॥

तत्त्वा यामि ब्रह्मणा वन्दमान-
स्तदा शास्ते यजमानो हविर्भिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अहेळमानो वरुणेह बोध्यु-
रुशंस मा न आयुः प्र मोषीः ॥११॥

तदिन्नक्तं तद्दिवा मह्यमाहु-
स्तदयं केतो हृद आ वि चष्टे।
शुनःशेपो यमह्वद्गृभीतः
सो अस्मान् राजा वरुणो मुमोक्तु ॥१२॥

शुनःशेपो ह्यह्वद्गृभीत-
स्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्या-
द्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥१३॥

अव ते हेळो वरुण नमोभि-
रव यज्ञेभिरीमहे हविर्भिः ।
क्षयन्नस्मभ्यमसुर प्रचेता
राजन्नेनांसि शिश्रथः कृतानि ॥१४॥

उदुत्तमं वरुण पाशमस्म-
दवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवा-
नागसो अदितये स्याम ॥१५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 2 I. 32

INDRA

इन्द्रस्य नु वीर्याणि प्र वोचं
यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द
प्र वक्षणा अभिनत्पर्वतानाम् ॥ १ ॥

अहन्नहिं पर्वते शिश्रियाणं
त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्राइव धेनवः स्यन्दमाना
अञ्जः समुद्रमव जग्मुरापः ॥ २ ॥

वृषायमाणोऽवृणीत सोमं
त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्र-
महन्नेनं प्रथमजामहीनाम् ॥ ३ ॥

यदिन्द्राहन्प्रथमजामहीना-
मान्मायिनाममिनाः प्रोत मायाः ।
आत्सूर्यं जनयन्द्यामुषासं
तादीत्ना शत्रुं न किला विवित्से ॥ ४ ॥

अहन्वृत्रं वृत्रतरं व्यंस-
मिन्द्रो वज्रेण महता वधेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कन्धांसीव कुलिशेना विवृक्णा-
हिः शयत उपपृक्पृथिव्याः ॥ ५ ॥

अयोद्धेव दुर्मद आ हि जुह्वे
महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां
सं रुजानाः पिपिष इन्द्रशत्रुः ॥ ६ ॥

अपादहस्तो अपृतन्यदिन्द्र-
मास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूष-
न्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥

नदं न भिन्नममुया शयानं
मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठ-
त्तासामहिः पत्सुतःशीर्बभूव ॥ ८ ॥

नीचावया अभवद्वृत्रपुत्रे-
न्द्रो अस्या अव वधर्जभार ।
उत्तरा सूरधरः पुत्र आसी-
द्दानुः शये सहवत्सा न धेनुः ॥ ९ ॥

अतिष्ठन्तीनामनिवेशनानां
काष्ठानां मध्ये निहितं शरीरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृत्रस्य निण्यं वि चरन्त्यापो
दीर्घं तम आशयदिन्द्रशत्रुः ॥१०॥

दासपत्नीरहिगोपा अतिष्ठ-
न्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासी-
द्वृत्रं जघन्वाँ अप तद्वेवार ॥११॥

अश्न्यो वारो अभवस्तदिन्द्र
सृके यत्त्वा प्रत्यहन्देव एकः ।
अजयो गा अजयः शूर सोम-
मवासृजः सर्तवे सप्त सिन्धून् ॥१२॥

नास्मै विद्युन्न तन्यतुः सिषेध
न यां मिहमकिरद्ध्रादुनिं च ।
इन्द्रश्च यद्युयुधाते अहिं-
श्चोतापरीभ्यो मघवा वि जिग्ये ॥१३॥

अहेर्यातारं कमपश्य इन्द्र
हृदि यत्ते जघ्नुषो भीरगच्छत् ।
नव च यन्नवतिं च स्रवन्तीः
श्येनो न भीतो अतरो रजांसि ॥१४॥

इन्द्रो यातोऽवसितस्य राजा
शमस्य च शृङ्गिणो वज्रबाहुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सेदु राजा क्षयति चर्षणीना-
मरान्न नेमिः परि ता बभूव ॥१५॥

No. 3 I. 35

SAVITR

ह्वयाम्यग्निं प्रथमं स्वस्तये
ह्वयामि मित्रावरुणाविहावसे ।
ह्वयामि रात्रीं जगतो निवेशनीं
ह्वयामि देवं सवितारमूतये ॥ १ ॥

आ कृष्णेन रजसा वर्तमानो
निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना
देवो याति भुवनानि पश्यन् ॥ २ ॥

याति देवः प्रवता यात्युद्वता
याति शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतो-
ऽप विश्वा दुरिता बाधमानः ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभीवृतं कृशनैर्विश्वरूपं
हिरण्यशम्यं यजतो बृहन्तम् ।
आस्थाद्रथं सविता चित्रभानुः
कृष्णा रजांसि तविषीं दधानः ॥ ४ ॥

वि जनाञ्छ्यावाः शितिपादो अख्य-
न्रथं हिरण्यप्रउगं वहन्तः ।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे
विश्वा भुवनानि तस्थुः ॥ ५ ॥

तिस्रो द्यावः सवितुर्द्वा उपस्थाँ
एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थु-
रिह ब्रवीतु य उ तच्चिकेतत् ॥ ६ ॥

वि सुपर्णो अन्तरिक्षाण्यख्यद्-
गभीरवेपा असुरः सुनीथः ।
क्वेदानीं सूर्यः कश्चिकेत
कतमां द्यां रश्मिरस्या ततान ॥ ७ ॥

अष्टौ व्यख्यत्ककुभः पृथिव्या-
स्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगा-
द्दधद्रत्ना दाशुषे वार्याणि ॥ ८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिरण्यपाणिः सविता विचर्षणि-
रुभे द्यावापृथिवी अन्तरीयते ।
अपामीवां बाधते वेति सूर्य-
मभि कृष्णेन रजसा द्यामृणोति ॥ ९ ॥

हिरण्यहस्तो असुरः सुनीथः
सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधाना-
नस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥

ये ते पन्थाः सवितः पूर्व्यासो-
ऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी
रक्षा च नो अधि च ब्रूहि देव ॥११॥

No. 4 I. 38

MARUTS

कद्ध नूनं कधप्रियः
पिता पुत्रं न हस्तयोः ।
दधिध्वे वृक्तबर्हिषः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्व नूनं कद्वो अर्थं
गन्ता दिवो न पृथिव्याः ।
क्व वो गावो न रण्यन्ति ॥ २ ॥

क्व वः सुम्ना नव्यांसि
मरुतः क्व सुविता ।
क्वो३ विश्वानि सौभगा ॥ ३ ॥

यद्यूयं पृश्निमातरो
मर्तासः स्यातन ।
स्तोता वो अमृतः स्यात् ॥ ४ ॥

मा वो मृगो न यवसे
जरिता भूदजोष्यः ।
पथा यमस्य गादुप ॥ ५ ॥

मो षु णः परापरा
निर्ऋतिर्दुर्हणा वधीत् ।
पदीष्ट तृष्णया सह ॥ ६ ॥

सत्यं त्वेषा अमवन्तो
धन्वञ्चिदा रुद्रियासः ।
मिहं कृण्वन्त्यवाताम् ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वाश्रेव विद्युन्मिमाति
वत्सं न माता सिषक्ति।
यदेषां वृष्टिरसर्जि ॥ ८ ॥

दिवा चित्तमः कृण्वन्ति
पर्जन्येनोदवाहेन ।
यत्पृथिवीं व्युन्दन्ति ॥ ९ ॥

अध स्वनान्मरुतां
विश्वमा सद्म पार्थिवम् ।
अरेजन्त प्र मानुषाः ॥१०॥

मरुतो वीळुपाणिभि-
श्चित्रा रोधस्वतीरनु ।
यातेमखिद्रयामभिः ॥११॥

स्थिरा वः सन्तु नेमयो
रथा अश्वास एषाम् ।
सुसंस्कृता अभीशवः ॥१२॥

अच्छा वदा तना गिरा
जरायै ब्रह्मणस्पतिम् ।
अग्निं मित्रं न दर्शतम् ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिमीहि श्लोकमास्ये
पर्जन्यइव ततनः ।
गाय गायत्रमुक्थ्यम् ॥१४॥

वन्दस्व मारुतं गणं
त्वेषं पनस्युमर्किणम् ।
अस्मे वृद्धा असन्निह ॥१५॥

No. 5 I. 48

USAS

सह वामेन न उषो
व्युच्छा दुहितर्दिवः ।
सह द्युम्नेन बृहता विभावरि
राया देवि दास्वती ॥ १ ॥

अश्वावतीर्गोमतीर्विश्वसुविदो
भूरि च्यवन्त वस्तवे ।
उदीरय प्रति मा सूनृता
उषश्चोद राधो मघोनाम् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उवासोषा उच्छाच नु
देवी जीरा रथानाम् ।
ये अस्या आचरणेषु दध्रिरे
समुद्रे न श्रवस्यवः ॥ ३ ॥

उषो ये ते प्र यामेषु युञ्जते
मनो दानाय सूरयः ।
अत्राह तत्कण्व एषां कण्वतमो
नाम गृणाति नृणाम् ॥ ४ ॥

आ घा योषेव सूनर्युषा याति प्रभुञ्जती ।
जरयन्ती वृजनं पद्वदीयत
उत्पातयति पक्षिणः ॥ ५ ॥

वि या सृजति समनं व्यर्थिनः
पदं न वेत्योदती ।
वयो नकिष्टे पप्तिवांस आसते
व्युष्टौ वाजिनीवति ॥ ६ ॥

एषायुक्त परावतः
सूर्यस्योदयनादधि ।
शतं रथेभिः सुभगोषा इयं
वि यात्यभि मानुषान् ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वमस्या नानाम चक्षसे
जगज्ज्योतिष्कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव
उषा उच्छदप स्रिधः ॥ ८ ॥

उष आ भाहि भानुना
चन्द्रेण दुहितर्दिवः ।
आवहन्ती भूर्यस्मभ्यं सौभगं
व्युच्छन्ती दिविष्टिषु ॥ ९ ॥

विश्वस्य हि प्राणनं जीवनं त्वे
वि यदुच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि
श्रुधि चित्रामघे हवम् ॥१०॥

उषो वाजं हि वंस्व
यश्चित्रो मानुषे जने ।
तेना वह सुकृतो अध्वराँ उप
ये त्वा गृणन्ति वह्नयः ॥११॥

विश्वान्देवाँ आ वह सोमपीतये-
ऽन्तरिक्षादुषस्त्वम् ।
सास्मासु धा गोमदश्वावदुक्थ्य-
मुषो वाजं सुवीर्यम् ॥१२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्या रुशन्तो अर्चयः
प्रति भद्रा अदृक्षत ।
सा नो रयिं विश्ववारं सुपेशस-
मुषा ददातु सुग्म्यम् ॥१३॥

ये चिद्धि त्वामृषयः पूर्व ऊतये
जुहूरेऽवसे महि ।
सा नः स्तोमाँ अभि गृणीहि राध-
सोषः शुक्रेण शोचिषा ॥१४॥

उषो यदद्य भानुना
वि द्वारावृणवो दिवः ।
प्र नो यच्छतादवृकं पृथु छर्दिः
प्र देवि गोमतीरिषः ॥१५॥

सं नो राया बृहता विश्वपेशसा
मिमिक्ष्वा समिळाभिरा ।
सं द्युम्नेन विश्वतुरोषो महि
सं वाजैर्वाजिनीवति ॥१६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No 6 I. 116

AŚVINĀ

नासत्याभ्यां बर्हिरिव प्र वृञ्जे
स्तोमाँ इयर्म्यभ्रियेव वातः ।
यावर्भगाय विसदाय जायां
सेनाजुवा न्यूहतू रथेन ॥ १ ॥

वीळुपत्मभिराशुहेमभिर्वा
देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्र-
माजा यमस्य प्रधने जिगाय ॥ २ ॥

तुग्रो ह भुज्युमश्विनोदमेघे
रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभि-
रन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ३ ॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भि-
र्नासत्या भुज्युमूहथुः पतङ्गैः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे
त्रिभी रथैः शतपद्भिः षळश्वैः ॥ ४ ॥

अनारम्भणे तदवीरयेथा-
मनास्थाने अग्रभणे समुद्रे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदश्विना ऊहथुर्भुज्युमस्तं
शतारित्रां नावमातस्थिवांसम् ॥ ५ ॥

यमश्विना ददथुः श्वेतमश्व-
मघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भू-
त्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥ ६ ॥

युवं नरा स्तुवते पज्रियाय
कक्षीवते अरदतं पुरन्धिम् ।
कारोतराच्छफादश्वस्य वृष्णः
शतं कुंभाँ असिञ्चतं सुरायाः ॥ ७ ॥

हिमेनाग्निं घ्रंसमवारयेथां
पितुमतीमूर्जमस्मा अधत्तम् ।
ऋबीसे अत्रिमश्विनावनीत-
मुन्निन्यथुः सवगणं स्वस्ति ॥ ८ ॥

परावतं नासत्यानुदेथा-
मुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये
सहस्राय तृष्यते गोतमस्य ॥ ९ ॥

जुजुरुषो नासत्योत वव्रिं
प्रामुञ्चतं द्रापिमिव च्यवानात् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

प्रातिरतं जहितस्यायुर्दस्रा-
दित्पतिमकृणुतं कनीनाम् ॥१०॥

तद्वां नरा शंस्यं राध्यं
चाभिष्टिमन्नासत्या वरूथम् ।
यद्विद्वांसा निधिमिवापगूळ्ह-
मुद्दर्शतादुपथुर्वन्दनाय ॥११॥

तद्वां नरा सनये दंस उग्र-
माविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वा-
मश्वस्य शीर्ष्णा प्र यदीमुवाच ॥१२॥

अजोहवीन्नासत्या करा वां
महे यामन्पुरुभुजा पुरन्धिः ।
श्रुतं तच्छासुरिव वध्रिमत्या
हिरण्यहस्तमश्विनावदत्तम् ॥१३॥

आस्नो वृकस्य वर्तिकामभीके
युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह
कृपमाणमकृणुतं विचक्षे ॥१४॥

चरित्रं हि वेरिवाच्छेदि पर्ण-
माजा खेलस्य परितक्म्यायाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सद्यो जङ्घामायसीं विश्पलायै
धने हिते सर्तवे प्रत्यधत्तम् ॥१५॥

शतं मेषान्वृक्ये चक्षदान-
मृज्राश्वं तं पितान्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष
आधत्तं दस्रा भिषजावनर्वन् ॥१६॥

आ वां रथं दुहिता सूर्यस्य
काष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः
समु श्रिया नासत्या सचेथे ॥१७॥

यदयातं दिवोदासाय वर्ति-
र्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां
वृषभश्च शिंशुमारश्च युक्ता ॥१८॥

रयिं सुक्षत्रं स्वपत्यमायुः
सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजै-
स्त्रिरह्नो भागं दधतीमयातम् ॥१९॥

परिविष्टं जाहुषं विश्वतः सीं
सुगेभिर्नक्तमूहथू रजोभिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विभिन्दुना नासत्या रथेन
वि पर्वताँ अजरयू अयातम् ॥२०॥

एकस्या वस्तोरावतं रणाय
वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता
पृथुश्रवसो वृषणावरातीः ॥२१॥

शरस्य चिदार्चत्कस्यावतादा
नीचादुच्चा चक्रथुः पातवे वाः ।
शयवे चिन्नासत्या शचीभि-
र्जसुरये स्तर्यं पिप्यथुर्गाम् ॥२२॥

अवस्यते स्तुवते कृष्णियाय
ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय
विष्णाप्वं ददथुर्विश्वकाय ॥२३॥

दश रात्रीरशिवेना नव द्यू-
नवनद्धं श्रथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्त-
मुन्निन्यथुः सोममिव स्रुवेण ॥२४॥

प्र वां दंसांस्यश्विनाववोच-
मस्य पतिः स्यां सुगवः सुवीरः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत पश्यन्नश्नुवन्दीर्घमायु-
रस्तमिवेज्जरिमाणं जगम्याम् ॥२५॥

No. 7 I. 154

VISNU

विष्णोर्नु कं वीर्याणि प्र वोचं
यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं
विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥

प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा ॥ २ ॥

प्र विष्णवे शूषमेतु मन्म
गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थ-
मेको विममे त्रिभिरित्पदेभिः ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्य त्री पूर्णा मधुना पदा-
न्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्या-
मेको दाधार भुवनानि विश्वा ॥ ४ ॥

तदस्य प्रियमभि पाथो अश्यां
नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था
विष्णोः पदे परमे मध्व उत्सः ॥ ५ ॥

ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमव भाति भूरि ॥ ६ ॥

No. 8 II. 12

INDRA

यो जात एव प्रथमो मनस्वा-
न्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां
नृम्णस्य मह्ना स जनास इन्द्रः ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यः पृथिवीं व्यथमानामदृंहद्-
यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो
यो द्यामस्तभ्नात्स जनास इन्द्रः ॥ २ ॥

यो हत्वाहिमरिणात्सप्त सिन्धू-
न्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान
संवृक्समत्सु स जनास इन्द्रः ॥ ३ ॥

येनेमा विश्वा च्यवना कृतानि
यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवां लक्षमाद-
दर्यः पुष्टानि स जनास इन्द्रः ॥ ४ ॥

यं स्मा पृच्छन्ति कुह सेति घोर-
मुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विजइवा मिनाति
श्रदस्मै धत्त स जनास इन्द्रः ॥ ५ ॥

यो रध्रस्य चोदिता यः कृशस्य
यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो योऽविता सुशिप्रः
सुतसोमस्य स जनास इन्द्रः ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्याश्वासः प्रदिशि यस्य गावो
यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान
यो अपां नेता स जनास इन्द्रः ॥ ७ ॥

यं क्रन्दसी संयती विह्वयेते
परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा
नाना हवेते स जनास इन्द्रः ॥ ८ ॥

यस्मान्न ऋते विजयन्ते जनासो
यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव
यो अच्युतच्युत्स जनास इन्द्रः ॥ ९ ॥

यः शश्वतो मह्येनो दधानान्
नमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां
यो दस्योर्हन्ता स जनास इन्द्रः ॥१०॥

यः शम्बरं पर्वतेषु क्षियन्तं
चत्वारिंश्यां शरद्यन्वविन्दत् ।
ओजायमानं यो अहिं जघान
दानुं शयानं स जनास इन्द्रः ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यः सप्तरश्मिर्वृषभस्तुविष्मा-
नवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहु-
र्द्यामारोहन्तं स जनास इन्द्रः ॥१२॥

द्यावा चिदस्मै पृथिवी नमेते
शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहु-
र्यो वज्रहस्तः स जनास इन्द्रः ॥१३॥

यः सुन्वन्तमवति यः पचन्तं
यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो
यस्येदं राधः स जनास इन्द्रः ॥१४॥

यः सुन्वते पचते दुध्र आ चि-
द्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः
सुवीरासो विदथमा वदेम ॥१५॥

II. 23

No. 9

BRAHMANASPATI

गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः शृण्वन्नूतिभिः सीद सादनम् ॥ १ ॥

देवाश्चित्ते असुर्य प्रचेतसो
बृहस्पते यज्ञियं भागमानशुः ।
उस्राइव सूर्यो ज्योतिषा महो
विश्वेषामिज्जनिता ब्रह्मणामसि ॥ २ ॥

आ विबाध्या परिरापस्तमांसि च
ज्योतिष्मन्तं रथमृतस्य तिष्ठसि ।
बृहस्पते भीममभित्रदम्भनं
रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ ३ ॥

सुनीतिभिर्नयसि त्रायसे जनं
यस्तुभ्यं दाशान्न तमंहो अश्नवत् ।
ब्रह्मद्विषस्तपनो मन्युमीरसि
बृहस्पते महि तत्ते महित्वनम् ॥ ४ ॥

न तमंहो न दुरितं कुतश्चन
नारातयस्तितिरुर्न द्वयाविनः ।
विश्वा इदस्माद्ध्वरसो वि बाधसे
यं सुगोपा रक्षसि ब्रह्मणस्पते ॥ ५ ॥

त्वं नो गोपाः पथिकृद्विचक्षण-
स्तव व्रताय मतिभिर्जरामहे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बृहस्पते यो नो अभि ह्वरो दधे
स्वा तं मर्मर्तु दुच्छुना हरस्वती ॥ ६ ॥

उत वा यो नो मर्चयादनागसो-
ऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः
सुगं नो अस्यै देववीतये कृधि ॥ ७ ॥

त्रातारं त्वा तनूनां हवामहे-
ऽवस्पर्तरधिवक्तारमस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय
मा दुरेवा उत्तरं सुम्नमुन्नशन् ॥ ८ ॥

त्वया वयं सुवृधा ब्रह्मणस्पते
स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयो-
ऽभि सन्ति जम्भया ता अनप्नसः ॥ ९ ॥

त्वया वयमुत्तमं धीमहे वयो
बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुरीशत
प्र सुशंसा मतिभिस्तारिषीमहि ॥ १० ॥

अनानुदो वृषभो जग्मिराहवं
निष्टप्ता शत्रुं पृतनासु सासहिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असि सत्य ऋणया ब्रह्मणस्पत
उग्रस्य चिद्दमिता वीळुहर्षिणः ॥११॥

अदेवेन मनसा यो रिषण्यति
शासामुग्रो मन्यमानो जिघांसति ।
बृहस्पते मा प्रणक्तस्य नो वधो
नि कर्म मन्युं दुरेवस्य शर्धतः ॥१२॥

भरेषु हव्यो नमसोपसद्यो
गन्ता वाजेषु सनिता धनंधनम् ।
विश्वा इदर्यो अभिदिप्स्वो३ मृधो
बृहस्पतिर्वि ववर्हा रथाँइव ॥१३॥

तेजिष्ठया तपनी रक्षसस्तप
ये त्वा निदे दधिरे दृष्टवीर्यम् ।
आविस्तत्कृष्व यदसत्त उक्थ्यं
बृहस्पते वि परिरापो अर्दय ॥१४॥

बृहस्पते अति यदर्यो अर्हाद्
द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्रजात
तदस्मासु द्रविणं धेहि चित्रम् ॥१५॥

मा नः स्तेनेभ्यो ये अभि द्रुहस्पदे
निरामिणो रिपवोऽन्नेषु जागृधुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आ देवानामोहते वि व्रयो हृदि
बृहस्पते न परः साम्नो विदुः ॥१६॥

विश्वेभ्यो हि त्वा भुवनेभ्यस्परि
त्वष्टाजनत्साम्नःसाम्नः कविः ।
स ऋणचिदृणया ब्रह्मणस्पति-
र्द्रुहो हन्ता मह ऋतस्य धर्तरि ॥ १७ ॥

तव श्रिये व्यजिहीत पर्वतो
गवां गोत्रमुदसृजो यदङ्गिरः ।
इन्द्रेण युजा तमसा परीवृतं
बृहस्पते निरपामौब्जो अर्णवम् ॥१८॥

ब्रह्मणस्पते त्वमस्य यन्ता
सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद्भद्रं यदवन्ति देवा
बृहद्वदेम विदथे सुवीराः ॥१९॥

No. 10 II. 33

RUDRA

आ ते पितर्मरुतां सुम्नमेतु
मा नः सूर्यस्य सन्दृशो युयोथाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभि नो वीरो अर्वति क्षमेत
प्र जायेमहि रुद्र प्रजाभिः ॥ १ ॥

त्वादत्तेभी रुद्र शन्तमेभिः
शतं हिमा अशीय भेषजेभिः ।
व्य१स्मद्द्वेषो वितरं व्यंहो
व्यमीवाश्चातयस्वा विषूचीः ॥ २ ॥

श्रेष्ठो जातस्य रुद्र श्रियासि
तवस्तमस्तवसां वज्रबाहो ।
पर्षि णः पारमंहसः स्वस्ति
विश्वा अभीती रपसो युयोधि ॥ ३ ॥

मा त्वा रुद्र चुक्रुधामा नमोभि-
र्मा दुष्टुती वृषभ मा सहूती ।
उन्नो वीराँ अर्पय भेषजेभि-
र्भिषक्तमं त्वा भिषजां शृणोमि ॥ ४ ॥

हवीमभिर्हवते यो हविर्भि-
रव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै
बभ्रुः सुशिप्रो रीरधन्मनायै ॥ ५ ॥

उन्मा ममन्द वृषभो मरुत्वा-
न्त्वक्षीयसा वयसा नाधमानम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

घृणीव च्छायामरपा अशीया
विवासेयं रुद्रस्य सुम्नम् ॥ ६ ॥

क्व१स्य ते रुद्र मृळयाकु-
र्हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्या-
भी नु मा वृषभ चक्षमीथाः ॥ ७ ॥

प्र बभ्रवे वृषभाय श्वितीचे
महो महीं सुष्टुतिमीरयामि ।
नमस्या कल्मलीकिनं नमोभि-
र्गृणीमसि त्वेषं रुद्रस्य नाम ॥ ८ ॥

स्थिरेभिरङ्गैः पुरुरूप उग्रो
बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरे-
र्न वा उ योषद्रुद्रादसुर्यम् ॥ ९ ॥

अहन्निबभर्षि सायकानि धन्वाहं-
निष्कं यजतं विश्वरूपम् ।
अहन्निदं दयसे विश्वमभ्वं
न वा ओजीयो रुद्र त्वदस्ति ॥१०॥

स्तुहि श्रुतं गर्तसदं युवानं
मृगं न भीममुपहत्नुमुग्रम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृळा जरित्रे रुद्र स्तवानो-
ऽन्यं ते अस्मन्नि वपन्तु सेनाः ॥११॥

कुमारश्चित्पितरं वन्दमानं
प्रति नानाम रुद्रोपयन्तम् ।
भूरेर्दातारं सत्पतिं गृणीषे
स्तुतस्त्वं भेषजा रास्यस्मे ॥१२॥

या वो भेषजा मरुतः शुचीनि
या शंतमा वृषणो या मयोभु ।
यानि मनुरवृणीता पिता न-
स्ता शं च योश्च रुद्रस्य वश्मि ॥१३॥

परि णो हेती रुद्रस्य वृज्याः
त्वेषस्य दुर्मतिर्मही गात् ।
अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृळ ॥१४॥

एवा बभ्रो वृषभ चेकितान
यथा देव न हृणीषे न हंसि ।
हवनश्रुन्नो रुद्रेह बोधि
बृहद्वदेम विदथे सुवीराः ॥१५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 11 II. 35

APĀṀ NAPĀT

उपेमसृक्षि वाजयुर्वचस्यां
चनो दधीत नाद्यो गिरो मे ।
अपां नपादाशुहेमा कुवित्स
सुपेशसस्करति जोषिषद्धि ॥ १ ॥

इमं स्वस्मै हृद आ सुतष्टं
मन्त्रं वोचेम कुविदस्य वेदत् ।
अपां नपादसुर्यस्य मह्ना
विश्वान्यर्यो भुवना जजान ॥ २ ॥

समन्या यन्त्युप यन्त्यन्याः
समानमूर्वं नद्यः पृणन्ति ।
तमू शुचिं शुचयो दीदिवांस-
मपां नपातं परि तस्थुरापः ॥ ३ ॥

तमस्मेरा युवतयो युवानं
मर्मृज्यमानाः परि यन्त्यापः ।
स शुक्रेभिः शिक्वभी रेवदस्मे
दीदायानिध्मो घृतनिर्णिगप्सु ॥ ४ ॥

अस्मै तिस्रो अव्यथ्याय नारी-
र्देवाय देवीर्दिधिषन्त्यन्नम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृताइवोप हि प्रसर्से अप्सु
स पीयूषं धयति पूर्वसूनाम् ॥ ५ ॥

अश्वस्यात्र जनिमास्य च स्व-
र्द्रुहो रिषः सम्पृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं
नारातयो वि नशन्नानृतानि ॥ ६ ॥

स्व आ दमे सुदुघा यस्य धेनुः
स्वधां पीपाय सुभ्वन्नमत्ति ।
सो अपां नपादूर्जयन्नप्स्वन्त-
र्वसुदेयाय विधते वि भाति ॥ ७ ॥

यो अप्स्वा शुचिना दैव्येन
ऋतावाजस्र उर्विया विभाति ।
वया इदन्या भुवनान्यस्य
प्र जायन्ते वीरुधश्च प्रजाभिः ॥ ८ ॥

अपां नपादा ह्यस्थादुपस्थं
जिह्मानामूर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठं महिमानं वहन्ती-
र्हिरण्यवर्णाः परि यन्ति यह्वीः ॥ ९ ॥

हिरण्यरूपः स हिरण्यसन्दृ-
गपां नपात्सेदु हिरण्यवर्णः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिरण्ययात्परि योनेर्निषद्या
हिरण्यदा ददत्यन्नमस्मै ॥१०॥

तदस्यानीकमुत चारु नामा-
पीच्यं वर्धते नप्तुरपाम् ।
यमिन्धते युवतयः समित्था
हिरण्यवर्णं घृतमन्नमस्य ॥११॥

अस्मै बहूनामवमाय सख्ये
यज्ञैर्विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मै-
र्दधाम्यन्नैः परि वन्द ऋग्भिः ॥१२॥

स ईं वृषाजनयत्तासु गर्भं
स ईं शिशुर्धयति तं रिहन्ति ।
सो अपां नपादनभिम्लातवर्णो-
ऽन्यस्येवेह तन्वा विवेष ॥१३॥

अस्मिन्पदे परमे तस्थिवांस-
मध्वस्मभिर्विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतमन्नं वहन्तीः
स्वयमत्कैः परि दीयन्ति यह्वीः ॥१४॥

अयांसमग्ने सुक्षितिं जनाया-
यांसमु मघवद्भ्यः सुवृक्तिम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वं तद्भद्रं यदवन्ति देवा
बृहद्वदेम विदथे सुवीराः ॥१५॥

No. 12 II. 38

SAVITR

उदु ष्य देवः सविता सवाय
शश्वत्तमं तदपा वह्निरस्थात् ।
नूनं देवेभ्यो वि हि धाति
रत्नमथाभजद्वीतिहोत्रं स्वस्ती ॥ १ ॥

विश्वस्य हि श्रुष्टये देव ऊर्ध्वः
प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश्चिदस्य व्रत आ निमृग्या
अयं चिद्वातो रमते परिज्मन् ॥ २ ॥

आशुभिश्चिद्यान्वि मुचाति नून-
मरीरमदत्तमानं चिदेतोः ।
अह्यर्षूणां चिन्नयया अविष्या-
मनु व्रतं सवितुर्मोक्यागात् ॥ ३ ॥

पुनः समव्यद्वितततं वयन्ती
मध्या कर्तोर्न्यधाच्छक्म धीरः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्संहायास्थाद्वृषतूँरदर्ध-
ररमतिः सविता देव आगात् ॥ ४ ॥

नानौकांसि दुर्यो विश्वमायु-
र्वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठं माता सूनवे भागमाधा-
दन्वस्य केतमिषितं सवित्रा ॥ ५ ॥

समावर्वर्ति विष्ठितो जिगीषु-
र्विश्वेषां कामश्चरतामभूत् ।
शश्वाँ अपो विकृतं हित्व्यागा-
दनु व्रतं सवितुर्दैव्यस्य ॥ ६ ॥

त्वया हितमप्यमप्सु भागं
धन्वान्वा मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिरस्य तानि
व्रता देवस्य सवितुर्मिनन्ति ॥ ७ ॥

याद्राध्यं वरुणो योनिमप्य-
मनिशितं निमिषि जर्भुराणः ।
विश्वो मार्ताण्डो व्रजमा पशुर्गा-
त्स्थशो जन्मानि सविता व्याकः ॥ ८ ॥

न यस्येन्द्रो वरुणो न मित्रो
व्रतमर्यमा न मिनन्ति रुद्रः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नारातयस्तमिदं स्वस्ति
हुवे देवं सवितारं नमोभिः ॥ ९ ॥

भगं धियं वाजयन्तः पुरन्धिं
नराशंसो ग्नास्पतिर्नो अव्याः ।
आये वामस्य सङ्गथे रयीणां
प्रिया देवस्य सवितुः स्याम ॥१०॥

अस्मभ्यं तद्दिवो अद्भ्यः पृथिव्या-
स्त्वया दत्तं काम्यं राध आ गात् ।
शं यत्स्तोतृभ्य आपये भवा-
त्युरुशंसाय सवितर्जरित्रे ॥११॥

No. 13 III. 33

NADYAH

प्र पर्वतानामुशती उपस्था-
दश्वेइव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे
विपाट्छुतुद्री पयसा जवेते ॥ १ ॥

इन्द्रेषिते प्रसवं भिक्षमाणे
अच्छा समुद्रं रथ्येव याथः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाराणे ऊर्मिभिः पिन्वमाने
अन्या वामन्यामप्येति शुभ्रे ॥ २ ॥

अच्छा सिन्धुं मावृतमामयासं
विपाशमुर्वीं सुभगामगन्म ।
वत्समिव मातरा संरिहाणे
समानं योनिमनु सञ्चरन्ती ॥ ३ ॥

एना वयं पयसा पिन्वमाना
अनु योनिं देवकृतं चरन्तीः ।
न वर्तवे प्रसवः सर्गतक्तः
किंयुर्विप्रो नद्यो जोहवीति ॥ ४ ॥

रमध्वं मे वचसे सोम्याय
ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषा-
वस्युरह्वे कुशिकस्य सूनुः ॥ ५ ॥

इन्द्रो अस्माँ अरदद्वज्रबाहु-
रपाहन्वृत्रं परिधिं नदीनाम् ।
देवोऽनयत्सविता सुपाणि-
स्तस्य वयं प्रसवे याम उर्वीः ॥ ६ ॥

प्रवाच्यं शश्वधा वीर्यं१त-
दिन्द्रस्य कर्म यदहिं विवृश्चत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वि वज्रेण परिषदो जघाना-
यन्नापोऽयनमिच्छमानाः ॥ ७ ॥

एतद्वचो जरितर्मापि मृष्ठा
आ यत्ते घोषानुत्तरा युगानि ।
उक्थेषु कारो प्रति नो जुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥ ८ ॥

ओ षु स्वसारः कारवे शृणोत
ययौ वो दूरादनसा रथेन ।
नि षू नमध्वं भवता सुपारा
अधोअक्षाः सिन्धवः स्रोत्याभिः ॥ ९ ॥

आ ते कारो शृणवामा वचांसि
ययाथ दूरादनसा रथेन ।
नि ते नंसै पीप्यानेव योषा
मर्यायेव कन्या शश्वचै ते ॥१०॥

यदङ्ग त्वा भरताः सन्तरेयु-
र्गव्यन्ग्राम इषित इन्द्रजूतः ।
अर्षादह प्रसवः सर्गतक्त
आ वो वृणे सुमतिं यज्ञियानाम् ॥११॥

अतारिषुर्भरता गव्यवः स-
मभक्त विप्रः सुमतिं नदीनाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्र पिन्वध्वमिषयन्तीः सुराधा
आ वक्षणाः पृणध्वं यात शीभम् ॥१२॥

उद्वः ऊर्मिः शम्या हन्-
त्वापो योक्त्राणि मुञ्चत ।
माऽदुष्कृतौ व्येनसा-
ऽघ्न्यौ शूनमारताम् ॥१३॥

No. 14 IV. 7

AGNI

अयमिह प्रथमो धायि धातृभि-
र्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचु-
र्वनेषु चित्रं विभ्वं विशेविशे ॥ १ ॥

अग्ने कदा त आनुष-
ग्भुवद्देवस्य चेतनम् ।
अधा हि त्वा जगृभ्रिरे-
मर्तासो विक्ष्वीड्यम् ॥ २ ॥

ऋतावानं विचेतसं
पश्यन्तो द्यामिव स्तृभिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वेषामध्वराणां
हस्कर्तारं दमेदमे ॥ ३ ॥

आशुं दूतं विवस्वतो
विश्वा यश्चर्षणीरभि ।
आ जभ्रुः केतुमायवो
भृगवाणं विशेविशे ॥ ४ ॥

तमीं होतारमानुष-
क्चिकित्वांसं नि षेदिरे ।
रण्वं पावकशोचिषं
यजिष्ठं सप्त धामभिः ॥ ५ ॥

तं शश्वतीषु मातृषु
वन आ वीतमश्रितम् ।
चित्रं सन्तं गुहा हितं
सुवेदं कूचिदर्थिनम् ॥ ६ ॥

ससस्य यद्वियुता सस्मिन्नूर्ध-
न्नृतस्य धामन्त्रणयन्त देवाः ।
महाँ अग्निर्नमसा रातहव्यो
वेरध्वराय सदमिद्दतावा ॥ ७ ॥

वेरध्वरस्य दूत्यानि विद्वा-
नुभे अन्ता रोदसी सञ्चिकित्वान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दूत ईयसे प्रदिवः उराणो
विदुष्टरो दिव आरोधनानि ॥ ८ ॥

कृष्णं त एम रुशतः पुरो भा-
श्चरिष्ण्वर्चिर्वपुषामिदेकम् ।
यदप्रवीता दधते ह गर्भं
सद्यश्चिज्जातो भवसीदु दूतः ॥ ९ ॥

सद्यो जातस्य ददृशानमोजो
यदस्य वातो अनुवाति शोचिः ।
वृणक्ति तिग्मामतसेषु जिह्वां
स्थिरा चिदन्ना दयते वि जम्भैः ॥१०॥

तृषु यदन्ना तृषुणा ववक्ष
तृषुं दूतं कृणुते यह्वो अग्निः ।
वातस्य मेळिं सचते निजूर्वै-
न्नाशुं न वाजयते हिन्वे अर्वा ॥११॥

No. 15 IV. 12

AGNI

यस्त्वामग्न इनधते यतस्रुक्
त्रिस्ते अन्नं कृणवत्सस्मिन्नहन् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स सु द्युम्नैरभ्यस्तु प्रसक्षत्त्व क्रत्वा जातवेदश्चिकित्वान् ॥ १ ॥

इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा संपर्यन् ।
स इधानः प्रति दोषामुषासं पुष्यन्नयिं संचते घ्नन्नमित्रान् ॥ २ ॥

अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः ।
दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥ ३ ॥

यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।
कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥ ४ ॥

महश्चिदग्न एनसो अभीकऊर्वाद्देवानामुत मर्त्यानाम् ।
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥ ५ ॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवो ष्व१स्मन्मुञ्चता व्यंहः
प्र तार्यग्ने प्रतरं न आयुः ॥ ६ ॥

No. 16 V. 83

PARJANYA

अच्छा वद तवसं गीर्भिराभिः
स्तुहि पर्जन्यं नमसा विवास ।
कनिक्रदद्वृषभो जीरदानू
रेतो दधात्योषधीषु गर्भम् ॥ १ ॥

वि वृक्षान् हन्त्युत हन्ति रक्षसो
विश्वं बिभाय भुवनं महावधात् ।
उतानागा ईषते वृष्ण्यावतो
यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः ॥ २ ॥

रथीव कशयाश्वाँ अभिक्षिप-
न्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।
दूरात्सिंहस्य स्तनथा उदीरते
यत्पर्जन्यः कृणुते वर्ष्यं१ नभः ॥ ३ ॥

प्र वाता वान्ति पतयन्ति विद्युत
उदोषधीर्जिहते पिन्वते स्वः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इरा विश्वस्मै भुवनाय जायते
यत्पर्जन्यः पृथिवीं रेतसावति ॥ ४ ॥

यस्य व्रते पृथिवी नन्नमीति
यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः
स नः पर्जन्य महि शर्म यच्छ ॥ ५ ॥

दिवो नो वृष्टिं मरुतो ररीध्वं
प्र पिन्वत वृष्णो अश्वस्य धाराः ।
अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥ ६ ॥

अभि क्रन्द स्तनय गर्भमा धा
उदन्वता परि दीया रथेन ।
दृतिं सु कर्ष विषितं न्यञ्चं
समा भवन्तूद्वतो निपादाः ॥ ७ ॥

महान्तं कोशमुदचा नि षिञ्च
स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।
घृतेन द्यावापृथिवी व्युन्धि
सुप्रपाणं भवत्वघ्न्याभ्यः ॥ ८ ॥

यत्पर्जन्य कनिक्रद-
त्स्तनयन् हंसि दुष्कृतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतीदं विश्वं मोदते
यत्किं च पृथिव्यामधि ॥ ९ ॥

अवर्षीर्वर्षमुदु षू गृभाया-
कर्धन्वान्यत्येतवा उ ।
अजीजन ओषधीर्भोजनाय क-
मुत प्रजाभ्योऽविदो मनीषाम् ॥१०॥

No. 17 VI. 54

PŪSAN

सं पूषन् विदुषा नय
यो अञ्जसानुशासति ।
यं एवेदमिति ब्रवत् ॥ १ ॥

समु पूष्णा गमेमहि
यो गृहाँ अभिशासति ।
इम एवेति च ब्रवत् ॥ २ ॥

पूष्णश्चक्रं न रिष्यति
न कोशोऽव पद्यते ।
नो अस्य व्यथते पविः ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यो अस्मै हविषाविधन्
न तं पूषापि मृष्यते ।
प्रथमो विन्दते वसु ॥ ४ ॥

पूषा गा अन्वेतु नः
पूषा रक्षत्वर्वतः ।
पूषा वाजं सनोतु नः ॥ ५ ॥

पूषन्ननु प्र गा इहि
यजमानस्य सुन्वतः ।
अस्माकं स्तुवतामुत ॥ ६ ॥

माकिर्नेशन्माकीं रिषन्
माकीं सं शारि केवटे ।
अथारिष्टाभिरा गहि ॥ ७ ॥

शृण्वन्तं पूषणं वय-
मिर्यमनष्टवेदसम् ।
ईशानं राय ईमहे ॥ ८ ॥

पूषन्तव व्रते वयं
न रिष्येम कदा चन ।
स्तोतारस्त इह स्मसि ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परि पूषा परस्ता-
द्धस्तं दधातु दक्षिणम् ।
पुनर्नो नष्टमाजतु ॥१०॥

No. 18 VII. 86

VARUNA

धीरा त्वस्य महिना जनूंषि
वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं
द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥

उत स्वया तन्वा३ सं वदे त-
त्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत
कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥

पृच्छे तदेनो वरुण दिदृ-
क्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहु-
रयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किमाग आस वरुण ज्येष्ठं
यत्स्तोतारं जिघांससि सखायम्।
प्र तन्मे वोचो दूळभ स्वधावो-
ऽव त्वानेना नमसा तुर इयाम् ॥ ४ ॥

अव द्रुग्धानि पित्र्या सृजा नो-
ऽव या वयं चकृमा तनूभिः।
अव राजन्पशुतृपं न तायुं
सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥

न स स्वो दक्षो वरुण ध्रुतिः सा
सुरा मन्युर्विभीदको अचित्तिः।
अस्ति ज्यायान्कनीयस उपारे
स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥

अरे दासो न मीळ्हुषे करा-
ण्यहं देवाय भूर्णयेऽनागाः।
अचेतयदचितो देवो अर्यो
गृत्सं राये कवितरो जुनाति ॥ ७ ॥

अयं सु तुभ्यं वरुण स्वधावो
हृदि स्तोम उपश्रितश्चिदस्तु।
शं नः क्षेमे शमु योगे नो अस्तु
यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 19 VII. 103

MANDŪKA

संवत्सरं शशयाना
ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां
प्र मण्डूका अवादिषुः ॥ १ ॥

दिव्या आपो अभि यदेनमाय-
न्दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां
मण्डूकानां वग्नुरत्रा समेति ॥ २ ॥

यदीमेनाँ उशतो अभ्यवर्षी-
त्तृष्यावतः प्रावृष्यागतायाम् ।
अख्खलीकृत्या पितरं न पुत्रो
अन्यो अन्यमुप वदन्तमेति ॥ ३ ॥

अन्यो अन्यमनु गृभ्णात्येनो-
रपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्क्र-
न्पृश्निः सम्पृङ्क्ते हरितेन वाचम् ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदेषामन्यो अन्यस्य वाचं
शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व
यत्सुवाचो वदथनाध्यप्सु ॥ ५ ॥

गोमायुरेको अजमायुरेकः
पृश्निरेको हरित एक एषाम् ।
समानं नाम बिभ्रतो विरूपाः
पुरुत्रा वाचं पिपिशुर्वदन्तः ॥ ६ ॥

ब्राह्मणासो अतिरात्रे न सोमे
सरो न पूर्णमभितो वदन्तः ।
संवत्सरस्य तदहः परि ष्ठ
यन्मण्डूकाः प्रावृषीणं बभूव ॥ ७ ॥

ब्राह्मणासः सोमिनो वाचमक्रत
ब्रह्म कृण्वन्तः परिवत्सरीणम् ।
अध्वर्यवो घर्मिणः सिष्विदाना
आविर्भवन्ति गुह्या न के चित् ॥ ८ ॥

देवहितिं जुगुपुर्द्वादशस्यं
ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां
तप्ता घर्मा अश्नुवते विसर्गम् ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोमायुरदादजमायुरदा-
त्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि
सहस्रसावे प्र तिरन्त आयुः ॥१०॥

No. 20 IX. 80

SOMA

सोमस्य धारा पवते नृचक्षस
ऋतेन देवान्हवते दिवस्परि ।
बृहस्पतेरवथेना वि दिद्युते
समुद्रासो न सवनानि विव्यचुः ॥ १ ॥

यं त्वा वाजिन्नघ्न्या अभ्यनूषता-
योहतं योनिमा रोहसि द्युमान् ।
मघोनामायुः प्रतिरन्महि श्रव
इन्द्राय सोम पवसे वृषा मदः ॥ २ ॥

एन्द्रस्य कुक्षा पवते मदिन्तम
ऊर्जं वसानः श्रवसे सुमङ्गलः ।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे
क्रीळन्हरिरत्यः स्यन्दते वृषा ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं त्वा देवेभ्यो मधुमत्तमं नरः
सहस्रधारं दुहते दश क्षिपः ।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो
विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥ ४ ॥

तं त्वा हस्तिनो मधुमन्तमद्रिभि-
र्दुहन्त्यप्सु वृषभं दश क्षिपः ।
इन्द्रं सोम मादयन्दैव्यं जनं
सिन्धोरिवोर्मिः पवमानो अर्षसि ॥ ५ ॥

No. 21 X. 34

KITAVA

प्रावेपा मा बृहतो मादयन्ति
प्रवातेजा इरिणे वर्वृतानाः
सोमस्येव मौजवतस्य भक्षो
विभीदको जागृविर्मह्यमच्छान् ॥ १ ॥

न मा मिमेथ न जिहीळ एषा
शिवा सखिभ्य उत मह्यमासीत् ।
अक्षस्याहमेकपरस्य हेतो-
रनुव्रतामप जायामरोधम् ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वेष्टि श्वश्रूरप जाया रुणद्धि
न नाथितो विन्दते मर्डितारम् ।
अश्वस्येव जरतो वस्न्यस्य
नाहं विन्दामि कितवस्य भोगम् ॥ ३ ॥

अन्ये जायां परि मृशन्त्यस्य
यस्यागृधद्वेदने वाज्यक्षः ।
पिता माता भ्रातर एनमाहु-
र्न जानीमो नयता बद्धमेतम् ॥ ४ ॥

यदादीध्ये न दविषाण्येभिः
परायद्भ्योऽव हीये सखिभ्यः ।
न्युप्ताश्च बभ्रवो वाचमक्रतँ
एमीदेषां निष्कृतं जारिणीव ॥ ५ ॥

सभामेति कितवः पृच्छमानो
जेष्यामीति तन्वा शूशुजानः ।
अक्षासो अस्य वि तिरन्ति कामं
प्रतिदीव्ने दधत आ कृतानि ॥ ६ ॥

अक्षास इदङ्कुशिनो नितोदिनो
निकृत्वानस्तपनास्तापयिष्णवः ।
कुमारदेष्णा जयतः पुनर्हणो
मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिपञ्चाशः क्रीळति व्रात एषां
देवइव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमन्ते
राजा चिदेभ्यो नम इत्कृणोति ॥ ८ ॥

नीचा वर्तन्त उपरि स्फुर-
न्त्यहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अङ्गारा इरिणे न्युप्ताः
शीताः सन्तो हृदयं निर्दहन्ति ॥ ९ ॥

जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानो-
ऽन्येषामस्तमुप नक्तमेति ॥१०॥

स्त्रियं दृष्ट्वाय कितवं ततापा-
न्येषां जायां सुकृतं च योनिम् ।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रू-
न्त्सो अग्नेरन्ते वृषलः पपाद ॥११॥

यो वः सेनानीर्महतो गणस्य
राजा व्रातस्य प्रथमो बभूव ।
तस्मै कृणोमि न धना रुणध्मि
दशाहं प्राचीस्तदृतं वदामि ॥१२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अक्षैर्मा दीव्यः कृषिमित्कृषस्व
वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः ॥१३॥

मित्रं कृणुध्वं खलु मृळता नो
मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर्विशतामरातिः
रन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥

No. 22 X. 71

JNĀNA

बृहस्पते प्रथमं वाचो अग्रं
यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासी-
त्प्रेणा तदेषां निहितं गुहाविः ॥ १ ॥

सक्तुमिव तितउना पुनन्तो
यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यज्ञेन वाचः पदवीयमाय-
न्तामन्वविन्दन्नृषिषु प्रविष्टाम् ।
तामाभृत्या व्यदधुः पुरुत्रा
तां सप्त रेभा अभि सं नवन्ते ॥ ३ ॥

उत त्वः पश्यन्न ददर्श वाचं-
मुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं ऽ वि सस्रे
जायेव पत्य उशती सुवासाः ॥ ४ ॥

उत त्वं सख्ये स्थिरपीतमाहु-
र्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति मायया एष
वाचं शुश्रुवाँ अफलामपुष्पाम् ॥ ५ ॥

यस्तित्याज सचिविदं सखायं
न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति
नहि प्रवेद सुकृतस्य पन्थाम् ॥ ६ ॥

अक्षण्वन्तः कर्णवन्तः सखायो
मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे
ह्रदाइव स्नात्वा उ त्वे ददृश्रे ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हृदा तष्टेषु मनसो जवेषु
यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभि-
रोहब्रह्माणो वि चरन्त्युत्वे ॥ ८ ॥

इमे ये नार्वाङ् न परश्चरन्ति
न ब्राह्मणासो न सुतेकरासः ।
त एते वाचमभिपद्य पापया
सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ॥ ९ ॥

सर्वे नन्दन्ति यशसागतेन
सभासाहेन सख्या सखायः ।
किल्बिषस्पृत्पितुषणिर्ह्येषा-
मरं हितो भवति वाजिनाय ॥१०॥

ऋचां त्वः पोषमास्ते पुपुष्वा-
न्गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां
यज्ञस्य मात्रां वि मिमीत उ त्वः ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 23 X. 72

DEVA

देवानां नु वयं जाना
प्र वोचाम विपन्यया ।
उक्थेषु शस्यमानेषु
यः पश्यादुत्तरे युगे ॥ १ ॥

ब्रह्मणस्पतिरेता
सं कर्मारइवाधमत् ।
देवानां पूर्व्ये युगे-
ऽसतः सदजायत ॥ २ ॥

देवानां युगे प्रथमे-
ऽसतः सदजायत ।
तदाशा अन्वजायन्त
तदुत्तानपदस्परि ॥ ३ ॥

भूजैज्ञ उत्तानपदो
भुव आशा अजायन्त ।
अदितेर्दक्षो अजायत
दक्षाद्वदितिः परि ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अदितिर्ह्यजनिष्ट
दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त
भद्रा अमृतबन्धवः ॥ ५ ॥

यद्देवा अदः सलिले
सुसंरब्धा अतिष्ठत ।
अत्रा वो नृत्यतामिव
तीव्रो रेणुरपायत ॥ ६ ॥

यद्देवा यतयो यथा
भुवनान्यपिन्वत ।
अत्रा समुद्र आ गूळ्ह-
मा सूर्यमजभर्तन ॥ ७ ॥

अष्टौ पुत्रासो अदिते-
र्ये जातास्तन्वः स्परि ।
देवाँ उप प्रैत्सप्तभिः
परा मार्तण्डमास्यत् ॥ ८ ॥

सप्तभिः पुत्रैरदिति-
रुप प्रैत्पूर्व्यं युगम् ।
प्रजायै मृत्यवे त्व-
त्पुनर्मार्तण्डमाभरत् ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 24 X. 84

MANYU

त्वया मन्यो सरथमारुजन्तो
हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना
अभि प्र यन्तु नरो अग्निरूपाः ॥ १ ॥

अग्निरिव मन्यो त्विषितः सहस्व
सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून्वि भजस्व वेद
ओजो मिमानो वि मृधो नुदस्व ॥ २ ॥

सहस्व मन्यो अभिमातिमस्मे
रुजन्मृणन्प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे
वशी वशं नयस एकज त्वम् ॥ ३ ॥

एको बहूनामसि मन्यवीळितो
विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं
द्युमन्तं घोषं विजयाय कृण्महे ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विजेषकृदिन्द्रइवानवब्रवोऽ-
स्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि
विद्मा तमुत्सं यत आबभूथ ॥ ५ ॥

आभूत्या सहजा वज्र सायक
सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि
महाधनस्य पुरुहूत संसृजि ॥ ६ ॥

संसृष्टं धनमुभयं समाकृत-
मस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधाना हृदयेषु शत्रवः
पराजितासो अप नि लयन्ताम् ॥ ७ ॥

No. 25 X. 90

PURUSA

सहस्रशीर्षा पुरुषः
सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा-
त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरुष एवेदं सर्वं
यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥ २ ॥

एतावानस्य महिमा-
तो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उदैत्पुरुषः
पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्राम-
त्साशनानशने अभि ॥ ४ ॥

तस्माद्विराळजायत
विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत
पश्चाद्भूमिमथो पुरः ॥ ५ ॥

यत्पुरुषेण हविषा
देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं
ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं यज्ञं बर्हिषि प्रौक्ष-
न्पुरुषं जातमग्रतः ।
तेन देवा अयजन्त
साध्या ऋषयश्च ये ॥ ७ ॥

तस्माद्यज्ञात्सर्वहुतः
सम्भृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्या-
नारण्यान्ग्राम्याश्च ये ॥ ८ ॥

तस्माद्यज्ञात्सर्वहुत
ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्मा-
द्यजुस्तस्मादजायत ॥ ९ ॥

तस्मादश्वा अजायन्त
ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मा-
त्तस्माज्जाता अजावयः ॥१०॥

यत्पुरुषं व्यदधुः
कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू
का ऊरू पादा उच्येते ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्राह्मणोऽस्य मुखमासीद्
बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः
पद्भ्यां शूद्रो अजायत ॥१२॥

चन्द्रमा मनसो जात-
श्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च
प्राणाद्वायुरजायत ॥१३॥

नाभ्या आसीदन्तरिक्षं
शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रा-
त्तथा लोकाँ अकल्पयन् ॥१४॥

सप्तास्यासन्परिधय-
स्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना
अबध्नन्पुरुषं पशुम् ॥१५॥

यज्ञेन यज्ञमयजन्त देवा-
स्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 26 X. 108

SARAMĀ-PANI SAṀVĀDA

किमिच्छन्ती सरमा प्रेदमानड्
दूरे ह्यध्वा जगुरिः पराचैः ।
कास्मेहितिः का परितक्म्यासी-
त्कथं रसाया अतरः पयांसि ॥ १ ॥

इन्द्रस्य दूतीरिषिता चरामि
मह इच्छन्ती पणयो निधीन्वः ।
अतिष्कदो भियसा तन्न आव-
त्तथा रसाया अतरं पयांसि ॥ २ ॥

कीदृङ्ङिन्द्रः सरमे का दृशीका
यस्येदं दूतीरसरः पराकात् ।
आ च गच्छान्मित्रमेना दधा-
माथा गवां गोपतिर्नो भवाति ॥ ३ ॥

नाहं तं वेद दभ्यं दभत्स
यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा
हता इन्द्रेण पणयः शयध्वे ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इमा गावः सरमे या ऐच्छः
परि दिवो अन्तान्त्सुभगे पतन्ती।
कस्त एना अव सृजादयु-
ध्व्युतास्माकमायुधा सन्ति तिग्मा ॥ ५ ॥

असेन्या वः पणयो वचां-
स्यनिषव्यास्तन्वः सन्तु पापीः।
अधृष्टो व एतवा अस्तु पन्था
बृहस्पतिर्व उभया न मृळात् ॥ ६ ॥

अयं निधिः सरमे अद्रिबुध्नो
गोभिरश्वेभिर्वसुभिर्न्यृष्टः।
रक्षन्ति तं पणयो ये सुगोपा
रेकुं पदमलकमा जगन्थ ॥ ७ ॥

एह गमन्नृषयः सोमशिता
अयास्यो अङ्गिरसो नवग्वाः।
त एतमूर्वं वि भजन्त गोना-
मथैतद्वचः पणयो वमन्नित् ॥ ८ ॥

एवा च त्वं सरम आजगन्थ
प्रबाधिता सहसा दैव्येन।
स्वसारं त्वा कृणवै मा पुनर्गा
अप ते गवां सुभगे भजाम ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाहं वेद भ्रातृत्वं नो स्वसृत्व-
मिन्द्रो विदुरङ्गिरसश्च घोराः ।
गौकामा मे अच्छदयन्यदाय-
मपात इत पणयो वरीयः ॥१०॥

दूरमित पणयो वरीय उ-
द्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळ्हाः
सोमो ग्रावाण ऋषयश्च विप्राः ॥११॥

No. 27 X 121

HIRANYAGARBHA

हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥ १ ॥

य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यः प्राणतो निमिषतो महि-
त्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ॥ ३ ॥

यस्येमे हिमवन्तो महित्वा
यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू
कस्मै देवाय हविषा विधेम ॥ ४ ॥

येन द्यौरुग्रा पृथिवी च दृळ्हा
येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः
कस्मै देवाय हविषा विधेम ॥ ५ ॥

यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति
कस्मै देवाय हविषा विधेम ॥ ६ ॥

आपो ह यद् बृहतीर्विश्वमाय-
न्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः
कस्मै देवाय हविषा विधेम ॥ ७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्चिदापो महिना पर्यपश्य-
दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसी-
त्कस्मै देवाय हविषा विधेम ॥ ८ ॥

मा नो हिंसीज्जनिता यः पृथिव्या
यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान
कस्मै देवाय हविषा विधेम ॥ ९ ॥

प्रजापते न त्वदेतान्यन्यो
विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणाम् ॥१०॥

No. 28 X 129

NĀSADĪYA

नासदासीन्नो सदासीत्तदानीं
नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्म-
न्नम्भः किमासीद्गहनं गभीरम् ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न मृत्युरासीदमृतं न तर्हि
न रात्र्या अह्न आसीत्प्रकेतः ।
आनीदवातं स्वधया तदेकं
तस्माद्धान्यन्न परः किं चनास ॥ २ ॥

तम आसीत्तमसा गूळ्हमग्रे-
ऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासी-
त्तपसस्तन्महिनाजायतैकम् ॥ ३ ॥

कामस्तदग्रे समवर्तताधि
मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्द-
न्हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥

तिरश्चीनो विततो रश्मिरेषा-
मधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आस-
न्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ५ ॥

को अद्धा वेद क इह प्र वोच-
त्कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेना-
था को वेद यत आबभूव ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इयं विसृष्टिर्यत आबभूव
यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योम-
न्त्सो अङ्ग वेद यदि वा न वेद ॥ ७ ॥

No. 29 X. 151

ŚRADDHĀ

श्रद्धयाग्निः समिध्यते
श्रद्धया हूयते हविः ।
श्रद्धां भगस्य मूर्धनि
वचसा वेदयामसि ॥ १ ॥

प्रियं श्रद्धे ददतः
प्रियं श्रद्धे दिदासतः ।
प्रियं भोजेषु यज्व-
स्विदं म उदितं कृधि ॥ २ ॥

यथा देवा असुरेषु
श्रद्धामुग्रेषु चक्रिरे ।
एवं भोजेषु यज्व-
स्वस्माकमुदितं कृधि ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रद्धां देवा यजमाना
वायुगोपा उपासते ।
श्रद्धां हृदय्य१याकूत्या
श्रद्धया विन्दते वसु ॥ ४ ॥

श्रद्धां प्रातर्हवामहे
श्रद्धां मध्यन्दिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि
श्रद्धे श्रद्धापयेह नः ॥ ५ ॥

No. 30 X. 191

SAJÑĀNA

संसमिद्युवसे वृष-
न्नग्ने विश्वान्यर्य आ ।
इळस्पदे समिध्यसे
स नो वसून्या भर ॥ १ ॥

सङ्गच्छध्वं सं वदध्वं
सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे
सञ्जानाना उपासते ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समानो मन्त्रः समितिः समानी
समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः
समानेन वो हविषा जुहोमि ॥ ३ ॥

समानी व आकूतिः
समाना हृदयानि वः ।
समानमस्तु वो मनो
यथा वः सुसहासति ॥ ४ ॥

No. 31 XXII. 22

YOGA-KSEMA

आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्युः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥२२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 32 XXXII. 1-5

PRAJĀPATI

तदेवाग्निस्तदादित्य-
स्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म
ता आपः स प्रजापतिः ॥ १ ॥

सर्वे निमेषा जज्ञिरे
विद्युतः पुरुषादधि ।
नैनमूर्ध्वं न तिर्यञ्चं
न मध्ये परिजग्रभत् ॥ २ ॥

न तस्य प्रतिमा अस्ति
यस्य नाम महद्यशः ।
हिरण्यगर्भ इत्येष मा मा हिंसी-
दित्येषा यस्मान्न जात इत्येषः ॥ ३ ॥

एषो ह देवः प्रदिशोऽनु सर्वाः
पूर्वो ह जातः स उ गर्भे अन्तः ।
स एव जातः स जनिष्यमाणः
प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्माज्जातं न पुरा किं च नैव
य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि
ज्योतीꣳषि सचते स षोडशी ॥ ५ ॥

No. 33 XXXIV. 1-6

ŚIVA-SAṀKALPA

यज्जाग्रतो दूरमुदैति दैवं
तदु सुप्तस्य तथैवैति ।
दूरंगमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसंकल्पमस्तु ॥ १ ॥

येन कर्माण्यपसो मनीषिणो
यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां
तन्मे मनः शिवसंकल्पमस्तु ॥ २ ॥

यत्प्रज्ञानमुत चेतो धृतिश्च
यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किंच न कर्म क्रियते
तन्मे मनः शिवसंकल्पमस्तु ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

येनेदं भूतं भुवनं भविष्य-
त्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता
तन्मे मनः शिवसंकल्पमस्तु ॥ ४ ॥

यस्मिन्नृचः साम यजूꣳषि यस्मि-
न्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिꣳश्चित्तꣳसर्वमोतं प्रजानां
तन्मे मनः शिवसंकल्पमस्तु ॥ ५ ॥

सुषारथिरश्वानिव यन्मनुष्या-
न्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं
तन्मे मनः शिवसंकल्पमस्तु ॥ ६ ॥

No. 34 I. 1. 4

AGNI

३ १ २ ३ १ २
यज्ञायज्ञा वो अग्नये
३ १ २ ३ १ २
गिरागिरा च दक्षसे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१ २ ३ २ ३ १ २ ३ १ २
प्रप्र वयममृतं जातवेदसं

३ २ ३ १र २ र
प्रियं मित्रं न शꣳसिषम् ॥ १ ॥

३ १ २ ३ १ २
पाहि नो अग्न एकया

३ २ २ ३ १ २
पाह्यू३त द्वितीयया ।

३ २ ३ २ ३ १ २
पाहि गीर्भिस्तिसृभिरूर्जां पते

३ १ २ ३ १ २
पाहि चतसृभिर्वसो ॥ २ ॥

३ १ २ ३ १ २
बृहद्भिरग्ने अर्चिभिः

३ १ २ ३ १ २
शुक्रेण देव शोचिषा ॥

३ १ २ ३ १ २
भरद्वाजे समिधानो यविष्ठ

३ १ २
रेवत्पावक दीदिहि ॥ ३ ॥

१ २
त्वे अग्ने स्वाहुत

३ १ २ ३ १ २
प्रियासः सन्तु सूरयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३ २ ३ २ ३ १ २ ३
यन्तारो ये मघवानो

१ २ ३ १र २र ३ १ २
जनानामूर्वं दयन्त गोनाम् ॥ ४ ॥

२ ३ १ २ ३ १ २
अग्ने जरितर्विश्पति-

३ १ २ ३ १ २
स्तपानो देव रक्षसः ।

१ २ ३ १
अप्रोषिवान् गृहपते महाँ

२ ३ २ ३ १ २ ३ २
असि दिवस्पायुर्दुरोणयुः ॥ ५ ॥

१ ३ १ २ ३ १ २
अग्ने विवस्वदुषस-

३ १र २र
श्चित्रँ राधो अमर्त्य ।

२ ३ १ २ ३
आ दाशुषे जातवेदो वहा

२ ३ २ ३ १ २ ३ १ २
त्वमद्या देवाँ उषर्बुधः ॥ ६ ॥

१ २ ३ २ ३ २र
त्वं नश्चित्र ऊत्या

३ १ २
वसो राधाँसि चोदय ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३ २ ३ १र ३ १ २
अस्य रायस्त्वमग्ने रथीरसि

३ २ ३ २ ३ २र २र
विदा गाधं तुचे तु नः ॥ ७ ॥

२उ ३ १ २ ३ १ २
त्वमित्सप्रथा अस्यग्ने

३ २ ३ २
त्रातर्ऋतः कविः ।

१र २र ३
त्वां विप्रासः समिधान दीदिव

१ २ ३ १ २
आ विवासन्ति वेधसः ॥ ८ ॥

१ २ ३ १ २
आ नो अग्ने वयोवृधꣳ

३ १ २ ३ १ २
रयिं पावक शꣳस्यम् ।

१ २ ३ १ ३
रास्वा च न उपमाते पुरुस्पृहꣳ

१ २ ३ १ २
सुनीती सुयशस्तरम् ॥ ९ ॥

२उ ३ १ २ ३ २ ३
यो विश्वा दयते वसु

१ २ ३ १र २र
होता मन्द्रो जनानाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२ ३१र २र ३ १ २ ३
मधोर्न पात्रा प्रथमान्यस्मै

१र २र ३ १ २
प्र स्तोमा यंत्वग्नये ॥१०॥

No. 35 III 1. 1.

INDRA

१ २ ३ १ २
उत्त्वा मंदन्तु सोमाः

३ १र २३
कृषुष्व राधो अद्रिवः ।

१ २ ३ १ २
अव ब्रह्मद्विषो जहि ॥ १ ॥

१ २ ३ १ २ ३२उ
गिर्वणः पाहि नः सुतं

३ १ २
मधोर्धाराभिरज्यसे ।

२ ३ १ २ ३ १र २र
इन्द्र त्वादातमिद्यशः ॥ २ ॥

१ २ ३ २ ३ १ २३
सदा व इन्द्रश्चर्कृष-

२उ ३ १र २र३२
दा उपो नु स सपर्यन् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२ ३ २ ३२उ ३ १ २
न देवो वृतः शूर इन्द्रः ॥ ३ ॥

१ २ ३ १ २
आ त्वा विशन्त्विन्दवः
३ १ २ ३ १ २
समुद्रमिव सिन्धवः ।
२उ ३ १ २
न त्वामिन्द्राति रिच्यते ॥४॥

२ ३ २ ३ १ २ ३ १र
इन्द्रमिद्गाथिनो बृह-
२र ३ १ २ ३ १ २
दिन्द्रमर्केभिरर्किणः ।
१ ३ १ २
इन्द्रं वाणीरनूषत ॥ ५ ॥

१ २ २१ २
इन्द्र इषे ददातु न
३ १ २ ३ २ ३ २
ऋभुक्षणमृभुꣳ रयिम् ।
३ १ २ ३ १ २
वाजी ददातु वाजिनम् ॥ ६ ॥

१ २ ३ २ ३ २ ३ २
इन्द्रो अङ्ग महद्भय-
३१र २र
मभी षदप चुच्यवत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२उ ३१र २र
स हि स्थिरो विचर्षणि ॥ ७ ॥

२ १ २ ३ १ २३
इमा उ त्वा सुतेसुते
१ २ ३ १ २
नक्षन्ते गिर्वणो गिरः ।
१ २ ३ २उ ३ १ २
गावो वत्सं न धेनवः ॥ ८ ॥

२ ३ २ ३ १ २
इन्द्रा नु पूषणा
३ २ ३ १ २ ३ १ २
वयꣳ सख्याय स्वस्तये ।
३ २ ३ १ २
हुवेम वाजसातये ॥ ९ ॥

१ २ ३ १र २र ३
न कि इन्द्र त्वदुत्तर
१र २र
न ज्यायो अस्ति वृत्रहन् ।
२ ३ २उ ३ २
न क्येवं यथा त्वम् ॥१०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 36 VI. 1. 4

SOMA

१र २र३ २ ३ २ ३ १ २ ३
प्र तु द्रव परिकोशं निषीद

१ २ ३ २ ३ १र २र
नृभिः पुनानो अभि वाजमर्ष ।

२ ३ १ २ ३ १ २ ३ २ ३ १
अश्व न त्वा वाजिनं मर्जयन्तो

२ ३ १ २ ३ १ २
ऽच्छा बर्ही रशनाभिर्नयन्ति ॥ १ ॥

१र २र ३ १ २ ३ २
प्र काव्यमुशनेव ब्रुवाणो

३ २ ३ २ ३ १ २
देवो देवानां जनिमा विवक्ति ।

१ २ ३ १ १ २ ३ २
महिव्रतः शुचिबन्धुः पावकः

३ १ २ ३ २ ३क २र ३ १ २
पदा वराहो अभ्येति रेभन् ॥ २ ॥

३ १ र २र ३ १र २र
तिस्रो वाच ईरयति प्र वह्नि

३ १ २ ३ १र २र ३ २
ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१ २ ३ १ २ ३ १ २ ३
गावो यन्ति गोपतिं पृच्छमानाः
१ २ ३ १ २ ३ २
सोमं यन्ति मतयो वावशानाः ॥ ३ ॥

३ २ ३ २ ३ १ २ ३ १ २
अस्य प्रेषा हेमना पूयमानो
३ २ ३ २ ३ १ २ ३ १ २
देवो देवेभिः समपृक्त रसम् ।
३ २ ३ २ ३ १ २ ३ १ २
सुतः पवित्रं पर्य्येति रेभ-
३ २ ३ १ २ ३ २ ३ १ २
न्मितेव सद्म पशुमन्ति होता ॥ ४ ॥

१ २ ३ १ २ ३ १
सोमः पवते जनिता मतीनां
२ ३ २ ३ १ २ ३ १ २ ३ २
जनिता दिवो जनिता पृथिव्याः ।
३ १र २र ३ १र २र
जनिताग्नेर्जनिता सूर्य्यस्य
३ १ २ ३ १र २र
जनितेन्द्रस्य जनितोत विष्णोः ॥ ५ ॥

३ १ २ ३ १र २र ३ १
अभि त्रिपृष्ठं वृषणं वयोधा-
२ ३ १ २ ३ १ ३
मङ्गोषिणमवावशन्त वाणीः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२ ३ १ २ ३ १ २ ३ २उ ३
वना वशानो वरुणो न सिन्धु-
१ २ ३ १ २ ३ १ २
विं रत्नधा दयते वार्य्याणि ॥ ६ ॥

१ २ ३ १ २ ३ १र २र
अक्रान्त्समुद्रः प्रथमे विधर्मन्
३ १ २ ३ १र २र ३ २
जनयन् प्रजा भुवनस्य गोपाः ।
१ २ ३ २ ३ २ ३ २ ३ १ २
वृषा पवित्रे अधि सानो अव्ये
३ १र २र ३ १र २र
वृहत्सोमो वावृधे स्वानो अद्रिः ॥ ७ ॥

१ २ ३ २ ३ २ ३ १ २ ३
कनिक्रन्ति हरिरा सृज्यमानः
२ ३ १ २ ३ १ २ ३ २
सीदन् वनस्य जठरे पुनानः ।
१ २ ३ १ २ ३ २ ३ १र
नृभिर्यतः कृणुते निर्णिजं गा-
२र ३ १ २ ३ १ २
मतो मतिं जनयत स्वधाभिः ॥ ८ ॥

३ २उ ३ १ २ ३ २ ३
एष स्य ते मधुमा॑ इन्द्र सोमो
२ ३ २ ३ १ २ ३ १ २
वृषा वृष्णः परि पवित्रे अक्षाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३ १ २ ३ १ २ ३ १ २
सहस्रदाः शतदा भूरिदावा
३ २ ३ २उ ३क २र
शश्वत्तमं बर्हिरा वाज्यस्थात् ॥ ९ ॥

१ २ ३ १ २ ३ २ ३
पवस्व सोम मधुमाँ ऋतावा-
१र २र ३ २ ३ २ ३ १ २
पो वसानो अधि सानो अव्ये ।
२ ३ १ २ ३ १ २
अव द्रोणानि घृतवन्ति रोह
३ १ २ ३ १ २ ३ १ २
मदिन्तमो मत्सर इन्द्रपानः ॥१०॥

No. 37 I. 29

RĀJYA-KĀMANĀ

अभीवर्तेन मणिना
येनेन्द्रो अभिवावृधे ।
तेनास्मान् ब्रह्मणस्पते-
ऽभि राष्ट्राय वर्धय ॥ १ ॥

अभिवृत्य सपत्ना-
नभि या नो अरातयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभि पृतन्यन्तं
तिष्ठाभि यो नो दुरस्यति ॥ २ ॥

अभि त्वा देवः सविता-
ताभि सोमो अवीवृधत् ।
अभि त्वा विश्वा भूता-
न्यभीवर्तो यथाससि ॥ ३ ॥

अभीवर्तो अभिभवः
सपत्नक्षयणो मणिः ।
राष्ट्राय मह्यं बध्यतां
सपत्नेभ्यः पराभुवे ॥ ४ ॥

उदसौ सूर्यो अगा-
दुदिदं मामकं वचः ।
यथाहं शत्रुहोऽसा-
न्यसपत्नः सपत्नहा ॥ ५ ॥

सपत्नक्षयणो वृषा-
भिराष्ट्रो विषासहिः ।
यथाहमेषां वीराणां
विराजानि जनस्य च ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 38 III. 30

SĀṀMANASYA

सहृदयं सांमनस्य-
मविद्वेषं कृणोमि वः ।
अन्यो अन्यमभि हर्यत
वत्सं जातमिवाघ्न्या ॥ १ ॥

अनुव्रतः पितुः पुत्रो
माता भवतु संमनाः ।
जाया पत्ये मधुमतीं
वाचं वदतु शन्तिवाम् ॥ २ ॥

मा भ्राता भ्रातरं द्विक्ष-
न्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा
वाचं वदत भद्रया ॥ ३ ॥

येन देवा न वियन्ति
नो च विद्विषते मिथः ।
तत्कृण्मो ब्रह्म वो गृहे
संज्ञानं पुरुषेभ्यः ॥ ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्यायस्वन्तश्चित्तिनो
मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः ।
अन्यो अन्यस्मै वल्गु वदन्त
एत सध्रीचीनान् वः संमनसस्कृणोमि ॥५॥

समानी प्रपा सह वोऽन्नभागः
समाने योक्त्रे सह वो युनज्मि ।
सम्यञ्चोऽग्निं सपर्यतारा
नाभिमिवाभितः ॥ ६ ॥

सध्रीचीनान् वः संमनसस्कृणो-
म्येकश्नुष्टीन्त्संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः
सायंप्रातः सौमनसो वो अस्तु ॥ ७ ॥

No. 39 VI. 20

TAKMAN

अग्निरिवास्य दहत एति शुष्मिणं
उतेव मत्तो विलपन्नपायति ।
अन्यमस्मदिच्छतु कं चिदव्रत-
स्तपुर्वधाय नमो अस्तु तक्मने ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमो रुद्राय नमो अस्तु तक्मने
नमो राज्ञे वरुणाय त्विषीमते ।
नमो दिवे नमः पृथिव्यै
नम ओषधीभ्यः ॥ २ ॥

अयं यो अभिशोचयिष्णु-
र्विश्वा रुपाणि हरिता कृणोषि ।
तस्मै तेऽरुणाय बभ्रवे
नमः कृणोमि वन्याय तक्मने ॥ ३ ॥

No. 40 I. 2. 5. 1–10

VEDI

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवाऽअनुव्यमिवासुरथ हासुरा मेनिरेऽस्माकमेवेदं खलु भुवनमिति ॥ १ ॥ ते होचुः । हन्तेमां पृथिवीं विभजामहै तां व्विभज्योपजीवामेति तामौक्ष्णैश्चर्मभिः पश्चात्प्राञ्चो व्विभजमानाऽअभीयुः ॥ २ ॥ तद्वै देवाः शुश्रुवुः । व्विभजन्ते ह वाऽइमामसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमामसुरा व्विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव व्विष्णुं पुरस्कृत्येयुः ॥ ३ ॥ ते होचुः । अनु नोऽस्यां पृथिव्यामाभजतास्त्वेव नोऽप्यस्यां भाग-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽइति ते हासुराऽअसूयन्तऽइवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्मऽइति ॥ ४ ॥ वामनो ह विष्णुरास । तद्देवा न जिहीडिरे महद्वै नोऽदुर्य्ये नो यज्ञसम्मितमदुरिति ॥ ५ ॥ ते प्राञ्चं विष्णुं निपाद्य । च्छन्दोभिरभितः पर्यगृह्णन्गायत्रेण त्वा च्छन्दसा परिगृह्णामीति दक्षिणतस्त्रैष्टुभेन त्वा च्छन्दसा परिगृह्णामीति पश्चाज्जागतेन त्वा च्छन्दसा परिगृह्णामीत्युत्तरतः ॥ ६ ॥ तं च्छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात्समाधाय तेनार्च्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सर्व्वां पृथिवीं ँ समविन्दन्त तद्यदेनेनेनाꣳ सर्व्वां ँ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्य्यावती व्वेदिस्तावती पृथिवीत्येतया हीमाꣳ सर्वां ँ समविन्दन्तैवꣳ ह वाऽइमाꣳ सर्वां ँ सपत्नानांꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्यऽएवमेतद्वेद ॥ ७ ॥ सोऽयं विष्णुर्ग्लानः । च्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमास स ततऽएवौषधीनां मूलान्युपमुम्लोच ॥ ८ ॥ ते ह देवाऽऊचुः । क्व न विष्णुरभूत्क्व नु यज्ञोऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यत्रैवान्विच्छतेति तं खनन्तऽइवान्वीषुस्तं त्र्यङ्गुलेऽन्वविन्दंस्तस्मात्त्र्यङ्गुला व्वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य व्वेदिं चक्रे ॥ ९ ॥ तदु तथा न कुर्यात् । ओषधीनां वै स मूलानन्युपाम्लोचत्तस्मादोषधीनामेव मूलान्युच्छेतवै ब्रूयाद्यन्न्वेवात्र विष्णुमन्वविन्दंस्तस्माद्वेदिर्नाम ॥ १० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

NO. 41 I. 4. 5. 8-13

VĀK-MANA-SAṀVĀDA

अथातो मनसश्चैव व्वाचश्च । अहं भद्रऽउदितं मनश्च ह वै व्वाक्चाहं भद्रऽऊदाते ॥ ८ ॥ तद्ध मन ऽउवाच । अहमेव त्वच्छ्रेयोऽस्मि न वै मया त्वं किञ्च नानभिगतं व्वदसि सा यन्मम त्वं कृतानुकरानुवर्त्मास्यहमेव त्वच्छ्रेयोऽस्मीति ॥ ९ ॥ अथ ह व्वागुवाच । अहमेव त्वच्छ्रेयस्यस्मि । यद्वै त्वं व्वेत्थाहं तद्विज्ञापयाम्यहꣳ सञ्ज्ञपयामीति ॥ १० ॥ ते प्रजापतिं प्रति प्रश्नमेयतुः । स प्रजापतिर्मनसऽएवानूवाच मनऽएव त्वच्छ्रेयो मनसो वै त्वं कृतानुकरानुवर्त्मासि श्रेयसो वै पापीयान्कृतानुकरोऽनुवर्त्मा भवतीति ॥ ११ ॥ सा ह व्वाक् परोक्ता व्विसिष्मिये । तस्यै गर्भः पपात सा ह व्वाक्प्रजापतिमुवाचाहव्यवाडेवाहं तुभ्यं भूयासं यां मा परावोच ऽइति तस्माद्यत्किञ्च प्राजापत्यं यज्ञे क्रियत ऽउपाꣳश्वेव तत्क्रियतेऽहव्यवाड्ढि व्वाक्प्रजापतयऽआसीत् ॥१२॥ तद्धैतद्देवाः रेतश्चर्मन्वा यस्मिन्वा बभ्रुस्तद्ध स्म पृच्छन्त्यत्रैवत्या३दिति ततोऽत्रिः सम्बभूव तस्मादप्यात्रेय्या योषितैनस्व्येतस्यै हि योषायै व्वाचो देवतायाऽ एते सम्भूताः ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 42 II. 1. 7

PURUṢA-VIBHŪTI

अथातो विभूतयोऽस्य पुरुषस्य । तस्य वाचा सृष्टौ पृथिवी चाग्निश्चास्यामोषधयो जायन्तेऽग्निरेनाः स्वदयतीदमाहरतेदमाहरतेत्येवमेतौ वाचं पितरं परिचरतः पृथिवी चाग्निश्च ।

यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च य एवमेतां वाचो विभूतिं वेद ।

प्राणेन सृष्टावन्तरिक्षं च वायुश्चान्तरिक्षं वा अनु चरन्त्यन्तरिक्षमनु शृण्वन्ति वायुरस्मै पुण्यं गन्धमावहत्येवमेतौ प्राणं पितरं परिचरतोऽन्तरिक्षं च वायुश्च यावदन्वन्तरिक्षं यावदनु वायुस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यन्ते (ते) ऽन्तरिक्षस्य च वायोश्च य एवमेतां प्राणस्य विभूतिं वेद ।

चक्षुषा सृष्टौ द्यौश्चाऽऽदित्यश्च द्यौर्हास्मै वृष्टिमन्नाद्यं संप्रयच्छत्यादित्योऽस्य ज्योतिः प्रकाशं करोत्येवमेतौ चक्षुः पितरं परिचरतो द्यौश्चाऽऽदित्यश्च यावदनु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते दिवश्चाऽऽदित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद ।

श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च दिग्भ्यो हैनमायती ँ३ दिग्भ्यो विशृणोति चन्द्रमा अस्मै पूर्वपक्षापरपक्षान्विचिनोति पुण्याय कर्मण एवमेते श्रोत्रं पितरं परिचरन्ति दिशश्च चन्द्रमाश्च यावदनु दिशो यावदनु चन्द्रमास्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते दिशां च चन्द्रमसश्च य एवमेतां श्रोत्रस्य विभूतिं वेद ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनसा सृष्टा आपश्च वरुणश्चाऽऽपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे वरुणोऽस्य प्रजां धर्मेण दाधारैवमेते मनः पितरं परिचरन्त्यापश्च वरुणश्च यावदन्वापो यावदनु वरुणस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यतेऽपां च वरुणस्य च य एवमेतां मनसो विभूतिं वेद ॥

No. 43 X. 10

PAÑCA MAHĀYAJÑYA

पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति संतिष्ठन्ते । देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः संतिष्ठते यत्पितृभ्यः स्वधा करोत्यप्यपस्तत्पितृयज्ञः संतिष्ठते यद्भूतेभ्यो बलि ँ हरति तद्भूतयज्ञः संतिष्ठते यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते यदृचोऽधीते पयसः कूल्या अस्य पितॄन्स्वधा अभिवहन्ति यद्यजूँषि घृतस्य कूल्या यत्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कूल्या यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशँसीर्मेदसः कूल्या अस्य पितॄन्स्वधा अभिवहन्ति यदृचोऽधीते पयआहुतिभिरेव तद्देवाँस्तर्पयति यद्यजूँषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशँसीर्मेदाहुतिभिरेव तद्देवाँस्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 44 II. 4

ĀTMA TATTVA-VIVECANA

मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा अरेऽहमस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्याऽन्तं करवाणीति ॥ १ ॥ सा होवाच मैत्रेयी यन्नु म इयम्भगोः सर्व्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामिति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवित ँ स्यादमृतत्वस्य तु नाऽऽशाऽस्ति वित्तेनेति ॥ २ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्य्यां यदेव भगवान्वेद तदेव मे ब्रूहीति ॥ ३ ॥ स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति; न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति; न वा अरे सर्व्वस्य कामाय सर्व्वं प्रियं भवत्यात्मनस्तु कामाय सर्व्वं प्रियं भवति । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेद ँ सर्व्वं विदितम् ॥ ५ ॥ भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद; सर्व्वं तं परादाद्योऽन्यत्राऽऽत्मनः सर्व्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीद ँ सर्व्वं यदयमात्मा ॥ ६ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्याँ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्छब्दाञ्च्छक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥ स यथार्द्रेन्धाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्व्वाणि निश्वसितानि ॥ १० ॥ स यथा सर्व्वासामपाᳬ समुद एकायनमेवᳬसर्व्वेषाᳬसङ्कल्पानां मन एकायनमेवᳬसर्व्वासां विद्यानाᳬहृदयमेकायनमेवᳬसर्व्वेषां वेदानां वागेकायनम् ॥११॥ स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद्यतो यतस्त्वाददीत लवणमेवैवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवाऽनुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥१२॥ सा होवाच मैत्रेय्यत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञाऽस्तीति स होवाच याज्ञवल्क्यो न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥१३॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति यत्र वा अस्य सर्व्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येद्येनेदᳬसर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति ॥१४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 45 III. 7–21

PURUṢA SVARŪPA

ततः परं ब्रह्म परं बृहन्तं
यथा निकायं सर्वभूतेषु गूढम् ।
निश्वस्यैकं परिवेष्टितारं
ईशं तं ज्ञात्वाऽमृता भवन्ति ॥ ७ ॥

वेदाहमेतं पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति
नान्यः पन्था विद्यतेऽयनाय ॥ ८ ॥

यस्मात्परं नापरमस्ति किंचित्
यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्वम् ॥ ९ ॥

ततो यदुत्तरतरं
तदरूपमनामयम् ।
य एतद्विदुरमृतास्ते भव-
न्त्यथेतरे दुःखमेवापि यन्ति ॥१०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्व्वाननशिरोग्रीवः
सर्वभूतगुहाशयः ।
सर्व्वव्यापी स भगवान्
तस्मात् सर्वगतः शिवः ॥११॥

महान् प्रभुर्वै पुरुषः
सत्त्वस्यैष प्रवर्त्तकः ।
सुनिर्मलामिमां प्राप्ति-
मीशानो ज्योतिरव्ययः ॥१२॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
सदा जनानां हृदये सन्निविष्टः ।
हृदा मनीषा मनसाभिक्लृप्तो
य एतद्विदुरमृतास्ते भवन्ति ॥१३॥

सहस्रशीर्षा पुरुषः
सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा-
त्यतिष्ठद्दशाङ्गुलम् ॥१४॥

पुरुष एवेदꣳसर्वं
यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो
यदन्नेनातिरोहति ॥१५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वतःपाणिपादं तत्
सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके
सर्वमावृत्य तिष्ठति ॥१६॥

सर्व्वेन्द्रियगुणाभासं
सर्व्वेन्द्रियविवर्जितम् ।
सर्व्वस्य प्रभुमीशानं
सर्व्वस्य शरणं बृहत् ॥१७॥

नवद्वारे पुरे देही
हꣳसो लेलायते बहिः ।
वशी सर्वस्य लोकस्य
स्थावरस्य चरस्य च ॥१८॥

अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता
तमाहुरग्र्यं पुरुषं महान्तम् ॥१९॥

अणोरणीयान् महतो महीया-
नात्मा गुहायां निहितोऽस्य जन्तोः ।
तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशम् ॥२०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेदाहमेतमजरं पुराणं
सर्वात्मानं सर्वगतं विभुत्वात् ।
जन्मनिरोधं प्रवदन्ति यस्य
ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥२१॥

No. 46 II. 1

ŚABDA NIRVACANA SIDDHĀNTA

अथ निर्वचनम् । तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्याताम्, तथा तानि निर्ब्रूयात् । अथ अनन्विते अर्थे, अप्रादेशिके विकारे अर्थनित्यः परीक्षेत केनचित् वृत्तिसामान्येन । अविद्यमाने सामान्येऽपि अक्षरवर्णसामान्यात् निर्ब्रूयात् । न तु एव न निर्ब्रूयात् । न संस्कारमाद्रियेत् । विशयवत्यो हि वृत्तयो भवन्ति । यथार्थं विभक्तीः संनमयेत् ।

प्रत्तम् अवत्तम् इति धात्वादी एव शिष्येते । अथापि अस्तेः निवृत्तिस्थानेषु आदिलोपो भवति—स्तः सन्तीति । अथापि अन्तलोपो भवति—गत्वा गतमिति । अथापि उपधालोपो भवति—जग्मतुः, जग्मुः इति । अथापि उपधाविकारो भवति—राजा, दण्डी इति । अथापि वर्णलोपो भवति—'तत्त्वा यामि' (ऋ० सं० १।२४।११) इति । अथापि द्विवर्णलोपः—तृचः इति । अथापि आदिविपर्ययो भवति—ज्योतिः, घनः वाट्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति। अथापि आद्यन्तविपर्ययो भवति—स्तोकाः, रज्जुः, सिकताः, तर्कुः इति। अथापि अन्तव्यापत्तिः भवति। ओघः, मेघः, नाधः, गाधः, वधूः, मधु इति। अथापि वर्णोपजनः—आस्थत्, द्वारः, भरुजा इति। तद् यत्र स्वरात् अनन्तरान्तस्थान्तर्धातुः भवति तद् द्विप्रकृतीनां स्थानमिति प्रदिशन्ति। तत्र सिद्धायामनुपपद्यमानायाम् इतरया उपपिपादयिषेत्। तत्रापि एके अल्पनिष्पत्तयः भवन्ति। तद् यथा एतत्—ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति।

अथापि भाषिकेभ्यः धातुभ्यः नैगमाः कृतः भाष्यन्ते—दमूनाः क्षेत्रसाधाः इति। अथापि नैगमेभ्यः भाषिकाः—उष्णं घृतमिति। अथापि प्रकृतयः एव एकेषु भाष्यन्ते, विकृतयः एकेषु—शवति गतिकर्मा कम्बोजेष्वेव भाष्यते। कम्बोजाः कम्बलभोजाः। कमनीयभोजाः वा। कम्बलः कमनीया भवति। विकारमस्य आर्येषु भाषन्ते शव इति। दातिः लवनार्थे प्राच्येषु। दात्रम् उदीच्येषु। एवं एकपदानि निर्ब्रूयात्।



CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 47 VII. 2

DEVATĀ-ĀKĀRA-CINTANA

तिस्रः एव देवताः इति नैरुक्ताः। अग्निः पृथिवीस्थानः वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः तासां माहाभाग्यात् एकैकस्याः अपि बहूनि नामधेयानि भवन्ति। अपि वा, कर्मपृथक्त्वात्। यथा होता, अध्वर्युः, ब्रह्मा, उद्गाता, इति, अपि एकस्य सतः। अपि वा पृथगेव स्युः पृथक् हि स्तुतयः भवन्ति। तथा अभिधानानि।

यथो एतत्—'कर्मपृथक्त्वात्' इति, बहवोऽपि विभज्य कर्माणि कुर्युः। तत्र संस्थानैकत्वं संभोगैकत्वं च उपेक्षितव्यम्। यथा, पृथिव्यां मनुष्याः, पशवः, देवाः इति स्थानैकत्वं संभोगैकत्वं च दृश्यते। यथा पृथिव्याः पर्जन्येन च, वाय्वादित्याभ्यां च संभोगः। अग्निना च इतरस्य लोकस्य। तत्र एतत् नरराष्ट्रमिव।

अथ आकारचिन्तनं देवतानाम्। पुरुषविधाः स्युः इत्येकम्। चेतनावद्वत् हि स्तुतयो भवन्ति, तथा अभिधानानि। अथापि पौरुषविधिकैः अङ्गैः संस्तूयन्ते—'ऋष्वा त इन्द्र स्थविरस्य बाहू' (ऋ० सं० ६।४७।८)। 'यत्संगृभ्णा मघवन् काशिरित्ते' (ऋ० सं० ३।३०।५)। अथापि पौरुषविधिकैः द्रव्यसंयोगैः—'आ द्वाभ्यां हरिभ्यामिन्द्र याहि' (ऋ०सं० २।१८।४)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'कल्याणीर्जाया सुरणं गृहे ते' (ऋ० सं० ३।५३।६)। अथापि पौरुषविधिकैः कर्मभिः—अद्रीन्द्र पिब च प्रस्थितस्य' (ऋ० सं० १०।११६।७)। 'आश्रुत्कर्ण श्रुधी हवम्' (१।१०।९)।

अपुरुषविधाः स्युः इत्यपरम्। अपि तु यद् दृश्यते अपुरुषविधं तत्। यथा अग्निः, वायुः, आदित्यः, पृथिवी, चन्द्रमाः इति।

यथो एतत्। 'चेतनावद्वत् हि स्तुतयो भवन्ति' इति। अचेतनानि अपि एवं स्तूयन्ते। यथा अक्षप्रभृतीनि ओषधिपर्यन्तानि (नि० ५।३।४-२२)। यथो एतत्—'पौरुषविधिकैः अङ्गैः संस्तूयन्ते' इति। अचेतनेष्वपि एतत् भवति—'अभिक्रन्दन्ति हरितेभिरासभिः' (ऋ० सं० १०।९४।२) इति ग्रावस्तुतिः। यथो एतत्—'पौरुषविधिकैः द्रव्यसंयोगैः' इति। एतदपि तादृशमेव—'सुखं रथं युयुजे सिन्धुरश्विनम्' (ऋ० सं० (१०।७५।९) इति नदीस्तुतिः। यथो एतत्—'पौरुषविधिकैः कर्मभिः' इति। एतदपि तादृशमेव—'होतुश्चित्पूर्वे हविरद्यमाशत' (ऋ० सं० १०।९४।२) इति ग्रावस्तुतिः एव।

अपि वा उभयविधाः स्युः। अपि वा अपुरुषविधानाम् एव सतां कर्मात्मानः एते स्युः। यथा यज्ञो यजमानस्य। एष च आख्यानसमयः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 48 III. 17–24

DADHYAṄ AND MADHU-VIDYĀ

यः सहस्रतमो रश्मी
रवेश्चन्द्रमुपाश्रितः ।
सोऽपि त्वष्टारमेवाग्निं
परं चेह च यन्मधु ॥१७॥

प्रादाद्ब्रह्मापि सुप्रीतः
सुताय तदथर्वणः ।
स चाभवदृषिस्तेन
ब्रह्मणा दीप्तिमत्तरः ॥१८॥

तमृषिं निषिषेधेन्द्रो
मैवं वोचः क्वचिन्मधु ।
न हि प्रोक्ते मधुन्यस्मि-
ञ्जीवन्तं त्वोत्सृजाम्यहम् ॥१९॥

तमृषिं त्वश्विनौ देवौ
विविक्ते मध्वयाचताम् ।
स च ताभ्यां तदाचष्टे
यदुवाच शचीपतिः ॥२०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तमब्रूतां तु नासत्या-
वाश्व्येन शिरसा भवान् ।
मध्वाशु ग्राहयत्वावां
मेन्द्रश्च त्वा वधीत्ततः ॥२१॥

आश्व्येन शिरसा तौ तु
दध्यङ्डाह यदश्विनौ ।
तदस्येन्द्रोऽहरत्स्वं तन्-
न्यधत्तामस्य यच्छिरः ॥२२॥

दधीचश्च शिरश्चाश्व्यं
कृत्तं वज्रेण वज्रिणा ।
पपात सरसो मध्ये
पर्वते शर्यणावति ॥२३॥

तदभ्यस्तु समुत्थाय
भूतेभ्यो विविधान्वरान् ।
प्रादाय युगपर्यन्तं
तास्वेवाप्सु निमज्जति ॥२४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

No. 49 VII. 147–52

PURŪRAVĀ-URVAŚĪ-VṚTTA

पुरूरवसि राजर्षा-
वप्सरास्तूर्वशी पुरा ।
न्यवसत्संविदं कृत्वा
तस्मिन्धर्मं चचार च ॥१४७॥

तया तस्य च संवासम्
असूयन् पाकशासनः ।
पैतामहं चानुरागम्
इन्द्रवच्चापि तस्य तु ॥१४८॥

स तयोस्तु वियोगार्थं
पार्श्वस्थं वज्रमब्रवीत् ।
प्रीतिं भिन्द्धि तयोर्वज्र
मम चेदिच्छसि प्रियम् ॥१४९॥

तथेत्युक्त्वा तयोः प्रीतिं
वज्रोऽभिनत्स्वमायया ।
ततस्तया विहीनस्तु
चचारोन्मत्तवन्नृपः ॥१५०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरन्सरसि सोऽपश्यद्
अभिरूपामिवोर्वशीम् ।
सखीभिरभिरूपाभिः
पञ्चभिः पार्श्वतो वृताम् ॥१५१॥

तामाह पुनरेहीति
दुःखात्सा त्वब्रवीन्नृपम् ।
आप्राप्याहं त्वयाद्येह
स्वर्गे प्राप्स्यसि मां पुनः ॥१५२॥

No. 50 I

ŚABDĀNUŚĀSANA PRAYOJANA

कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? रक्षोहागमलघ्वसन्देहाः प्रयोजनम् । रक्षार्थं वेदानामध्येयं व्याकरणम् । लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति ।

ऊहः खल्वपि—न सर्वैर्लिङ्गैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः । ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः । तान्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् ।

आगमः खल्वपि—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेदोऽध्येयो ज्ञेयश्च' इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।

लघ्वर्थं चाध्येयं व्याकरणम्—'ब्राह्मणेनावश्यं शब्दा ज्ञेयाः' इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या जातुम्।

असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति—'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति—यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुष इति॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

NOTES

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथममण्डलस्य षष्टे अनुवाके सप्त सूक्तानि। तत्र 'कस्य नूनम्' इति पञ्चदशर्चं प्रथमं सूक्तम्। अजीगर्तपुत्रस्य शुनःशेपस्य आर्षं त्रैष्टुभम्। 'अभित्वा देव' इति तृचो गायत्रः। आद्याया अनिरुक्तत्वात् प्रजापतिर्देवता। 'अग्नेर्वयम्' इत्यस्य अग्निः। 'अभि त्वा देव' इत्यस्य तृचस्य सविता। 'भगभक्तस्य' इत्येषा भगदेवताका वा। शेषा वारुण्यः। तथा च अनुक्रान्तं —'कस्य पञ्चोनाजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमादौ काय्याग्नेय्यौ सावित्रस्तृचो गायत्रोऽस्यान्त्या भागी वा' इति। राजसूये अभिषेचनीयेऽहनि मरुत्वतीये परिसमाप्ते सति एतदादिकं सूक्तसप्तकम् अभिषिक्तस्य पुत्रादिभिः परिवृतस्य राज्ञः पुरस्तात् होत्राख्यातव्यम्। तथा च सूत्रेऽभिहितम्—'संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेपमाचक्षीत' (आश्व० श्रौ० ९. ३) इति। ब्राह्मणं च भवति-तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति (ऐ० ब्रा० ७. १८) इति॥

कस्य। नूनम्। कतमस्य। अमृतानाम्। मनामहे। चारु। देवस्य। नाम। कः। नः। मह्यै। अदितये। पुनः। दात्। पितरम्। च। दृशेयम्। मातरम्। च॥१॥

सा० भा०—'कस्य' इत्यनयर्चा शुनःशेपो यूपे बद्धः कांदिशीकः कं देवम् उपधावानि इति विचिकित्सति। तथा च आम्नायते— 'हन्ताहं देवता उपधावामीति स प्रजापतिमेव प्रथमं देवतानामुपससार' (ऐ० ब्रा० ७·१६) इति। वयं शुनःशेपनामकाः अमृतानां देवतानां मध्ये कतमस्य किंजातीयस्य कस्य देवस्य चारु शोभनं नाम मनामहे उच्चारयामः। कः देवो मां मुमूर्षुं पुनः अपि मह्यै महत्यै अदितये पृथिव्यै दात् दद्यात्। तेन दानेन अहममृतः सन्, पितरं मातरं च दृशेयं पश्येयम्। 'को वै नाम प्रजापतिः' (ऐ० ब्रा० ३·२१) इति श्रुतेः कस्य इति शब्दसामान्यात् अनया प्रजापतिरेव उपसृतः इति गम्यते। कतमस्य। किंशब्दात् 'वा बहूनां जातिपरिप्रश्ने डतमच्' (पा० सू० ५·३·९३)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'चितः' इत्यन्तोदात्तत्वम्। अमृतानाम्। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्। मनामहे। 'मन ज्ञाने'। व्यत्ययेन शप्। पादादित्वादनिघातः। मह्यै। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम्। दात्। 'गातिस्था०' (पा० सू० २·४·७७) इति सिचो लुक्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडागमाभावः। दृशेयम्। 'दृशिर् प्रेक्षणे'। आशीर्लिङि मिपः अम्। 'दृशेरग्वक्तव्यः' (पा० म० ३·१·८६·२) इति अक्प्रत्ययः शपोऽपवादः। कित्त्वात् लघूपधगुणाभावः। 'लिङ्याशिष्यङ्' (पा० सू० ३·१·८६) इति अङि हि सति 'ऋदृशोऽङि गुणः' (पा० सू० ७·४·१६) इति गुणः स्यात्। यासुट्। सलोपः। 'अतो येयः'। 'आद्गुणः'। यासुटः स्वरेण एकार उदात्तः। मातरं च इत्यत्र चशब्दात् दृशेयम् इति अनुषज्यते। अतः तदपेक्षयैषा तिङ्विभक्तिः प्रथमा इति 'चवायोगे प्रथमा' इति न निहन्यते।

शब्दा०—कस्य=किसका, नूनम्=अब, कतमस्य=किसका, अमृतानाम्=देवताओं में, मनामहे=पुकारें, चारु=सुन्दर, देवस्य=देव का, नाम=नाम, कः=कौन, नः=हमको, मह्यै=महान्, अदितये=अदिति को, पुनः=फिर, दात्=देगा, पितरम्=पिता को, च=और, दृशेयम्=देखूं, मातरं=माता को, च=और।

हि० अ०—किसका, देवताओं में किस देव का सुन्दर नाम, अब हम पुकारें? कौन हमें पुनः श्रेष्ठ अदिति को सौंपेगा? (जिससे) मैं (अपने) पिता तथा (अपनी) माता को देखूं।

Trans.—Of whom, the auspicious name of which God among the immortals, now we should invoke? Who will restore us to the great Aditi, that I may see (my) father and (my) mother.

Notes—**कतमस्य**—From **किम्** by adding the suffix **डतमच्** implying question regarding class. The suffix being **चित्** the last syllable of **कतम** is accented. **अमृतानाम्**—The first syllable of **मृत** is accented, when it comes after the negative particle **'अ'** in a Bahuvrīhi compd. (**नञो जरमरमित्रमृताः**—Pāṇ. VI. 2. 116). **मनामहे**—√*man* to think; mid. pres. 1rst, plu.; accented because beginning of the pāda. Sāyana explains **मनामहे** by **उच्चारयामः**; Wilson

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

takes it to mean 'shall invoke', and Griffith 'may bethink' चारु—Yāska derives it from √*ruc* to shine; this change of the place of letter is called metathesis (चारु रुचेः विपरीतस्य Nir. XI. 5). नः—The optional forms of युष्मद् and अस्मद् (viz. मे, मा, नौ, नः; त्वा, ते, वाम्, वः) are regularly unaccented (अनुदात्तं सर्वमपादादौ—Pāṇ VIII. 1. 18). अदितये—Yāska takes Aditi to mean 'undivided' (अदिति अदीना—Nir. IV. 22). In the Nighaṇṭu (III. 30. 21) it is enumerated in the list of the names of Dyāvāpṛthivī. According to Sāyaṇa अदिति means 'earth'. Max Müller takes it to mean 'infinite'. J. Muir understands it to mean 'nature'. Roth explains अदिति as 'freedom' or 'security'. Benfey understands it as 'sinlessness'. दात्—√*dā* to give, root-aorist, subju. 3rd. sing.; unaccented because it is not at the beginning of the pāda (तिङ्ङतिङः—Pāṇ VIII. 1. 28). दृशेयम्—√*dṛś* to see, a-aorist, opt. 1rst. sing.; accented because of the particle च. In the fourth foot of the verse one दृशेयम् is understood after मातरं च; hence, दृशेयम् after पितरं च, being first of the series and connected with च, is not unaccented. The general rule is when more than one verb is used with one agent, and each of them is connected with च or वा, the finst verb of the series is not unaccented (चवायोगे प्रथमा—Pāṇ. VIII. 1. 49).

अग्नेः । वयम् । प्रथमस्य । अमृतानाम् । मनामहे । चारु । देवस्य । नाम ॥ स । नः । मह्यै । अदितये । पुनः । दात् । पितरम् । च । दृशेयम् । मातरम् । च ॥२॥

सा० भा०—इत्थं प्रथमया ऋचा विचिकित्सां कृत्वा प्रजापतेः सकाशात् तं देवम् अग्निं निश्चित्य अनया तुष्टाव । तथा च श्रूयते—'तं प्रजापति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससारागनेर्वयं प्रथमस्यामृतानामित्येतयर्चा' (ऐ० ब्रा० ७.१६) इति। पूर्ववत् योजना। दात् ददातु दृशेयं पश्यानि इत्येवम् आशीःपरत्वेन पदद्वयं योज्यम्।

प्रथमे छन्दोमे वैश्वदेवशस्त्रे 'अभि त्वा देव सवितः, इति सावित्रस्तृचः सूक्तस्थानीयः। 'अथ च्छन्दोमाः' इति खण्डे 'अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवा' (आश्व० श्रौ० ८.९) इति सूत्रितम्। 'अभि त्वा' इत्येषा अग्निमन्थनेऽपि विनियुक्ता। 'प्रातर्वैश्वदेव्याम्' इति खण्डे 'अभि त्वा देव सवितर्मही द्यौः पृथिवी च नः' (आश्व० श्रौ० २.१६) इति सूत्रितम्। श्रूयते च--'अभि त्वा देव सवितरिति सावित्रीमन्वाह' (ऐ० ब्रा० १.१६) इति। तथा प्रवर्ग्येऽपि एषैव विनियुक्ता। 'अथोत्तरम्, इति खण्डे 'अभि त्वा देव सवितः समी वत्सं न मातृभिः' (आश्व० श्रौ० ४.७) इति सूत्रितम्। तथा ग्रावस्तोत्रेऽपि। 'एतस्मिन् काले ग्रावस्तुत्' इति खण्डे 'मध्यमस्वरेणेदं सवनमभि त्वा देव सवितः' (आश्व० श्रौ० ५.१६) इति सूत्रितम्।

शब्दा०--अग्नेः=अग्नि का, वयम्=हम लोग, प्रथमस्य=प्रथम का, अमृतानाम्=देवताओं में, मनामहे=पुकारें, चारु=सुन्दर, नाम=नाम, सः=वह, नः=हम लोगों को, मह्यै=महान्, अदितये=अदिति को, पुनः=फिर, दात्=सौंपेगा, पितरम्=पिता को, च=और, दृशेयम्=देखूं, मातरम्=माता को, च=और।

हि० अ०—देवताओं में प्रथम, अग्नि देव का शुभ नाम हम लोग पुकारें; वह हम लोगों को पुनः अदिति को सौंपेगा; (जिससे) मै (अपने) पिता तथा (अपनी) माता को देखूं।

Trans.—Let us invoke the auspicious name of Agni, the first God among the immortals. He will restore us again to the great Aditi, that I may see (my) father and (my) mother.

अभि। त्वा। देव। सवितः। ईशानम्। वार्याणाम्। सदा। अवन्। भागम्। ईमहे ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—अथ अग्निना प्रेरितः सन् सवितारम् 'अभि त्वा' इत्यनेन तृचेन प्रार्थयते। तथैव श्रूयते—'तमग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेन' (ऐ० ब्रा० ७.१६) इति। हे सदावन् सदा सर्वदा रक्षक हे सवितः देव वार्याणां वरणीयानां धनानाम् ईशानं स्वामिनं त्वां प्रति भागं भजनीयं धनम् अभि सर्वतः ईमहे याचामहे॥ ईशानम्। 'ईश ऐश्वर्ये'। लटः शानच्। 'तास्यनुदात्तेत्' इति लसार्वधातुकानुदात्तत्वे धातुस्वरः। वार्याणाम्। 'वृङ् संभक्तौ'। 'ऋहलोर्ण्यत्'। 'ईडवन्द' इत्यादिनाद्युदात्तत्वम्। अवन्। आमन्त्रितनिघातः। भागम्। 'कर्षात्वतः' इति घञोऽन्तः उदात्तः॥

शब्दा०—अभि त्वा=तुम्हारे पास, देव=ओ देव, सवितः=ओ सवितृ, ईशानम्=मालिक, वार्याणाम्=अभिलषित धनों के, सदा=सर्वदा अवन्=ओ रक्षा करने वाले, भागम्=हिस्से के लिये, ईमहे=आते हैं।

हि० अ०—ओ सदा रक्षा करने वाले सविता देवता, सम्पूर्ण अभिलषित धनों के मालिक तुम्हारे पास (अपने) हिस्से के लिये (हम) आते हैं।

Trans.—O everprotecting God sayitar, we come to thee, the lord of riches, for (our) share.

Notes—**अभि**—A particle used in the sense of 'towards' (**अभित्याभिमुख्यम्**—Nir. 1. 3). **देव सवितः**—Both the words are vocatives and do not come at the beginning of the pāda ; hence, unaccented (**आमन्त्रितस्य च**—Pāṇ. VIII 1.19). **ईशानम्**—√*īś* to be master perf. part. acc. sing. **वार्याणाम्**—From √*vṛ*. to choose ; the words derived from **ईड्, वन्द्, वृ, शंस्** and **दुह्**, and ending in **ण्यत्**, accent the first syllable (**ईडवन्दवृशंसदुहां ण्यतः**—Pāṇ. VI.1.214). **अवन्**—From √*av* to protect ; vocative, not coming at the beginning of the pāda, is unaccented. **भागम्**—Words ending in **घञ्** accent the last syllable (**कर्षात्वतो घञोऽन्त उदात्तः**—Pāṇ. VI. 1.159). **ईमहे**—√*i* to go, mid. pres. I rst plu.; verbs of the principal clause., not coming in the beginning of the pāda, are unaccented (**तिङ्ङतिङः**—Pāṇ. VIII. 1.28).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यः । चित् । हि । ते । इत्था । भगः । शशमानः । पुरा । निदः । अद्वेषः । हस्तयोः । दधे ॥४॥

सा० भा०--हे सवितः यः भगः भजनीयो धनविशेषः ते तव हस्तयोर्दधे धृतोऽभूत् तं धनविशेषम् ईमहे इति पूर्वत्रान्वयः । चिच्छब्दः पूजार्थे हिशब्दः प्रसिद्धौ । धनस्य पूज्यत्वं सर्वत्र प्रसिद्धम् । तामेव पूज्यत्वप्रसिद्धिं विशदयति । इत्था शशमानः अनेन प्रकारेण शस्यमानः स्तूयमानः । धनस्तुतिप्रकारं च सर्वे जानन्ति । ननु स्वकीये धने वैरिभिः अपहृते सति वैरिगृहीतं धनं सर्वो लोको निन्दति देष्टि च । अतो धनस्तुतिः न नियता इत्याशङ्क्याह । निदः पुरा अद्वेषः निन्दायाः पूर्वं स्वकीयत्वेन व्यवस्थिते सति तदानीं द्वेषरहितः । तस्मात् स्वकीयत्वाभिप्रायेण स्तूयमानत्वमुक्तमित्यर्थः ॥ इत्था । प्रकारवचने 'इदमस्थमुः' (पा० सू० ५.३.२४) । 'सुपां सुलुक्' इति व्यत्ययेन विभक्तेः डादेशः । टिलोपे उदात्तनिवृत्तिस्वरेण आकार उदात्तः । शशमानः । 'शश प्लुतगतौ' । इह तु स्तुत्यर्थः । 'ताच्छील्यवयोवचन०' (पा० सू० ३.२.१२९) इति ताच्छीलिकश्चानश् । कर्तरि शप् । 'चितः' इत्यन्तोदात्तत्वम् । निदः । 'णिदि कुत्सायाम्' । संपदादिलक्षणः क्विप् । 'सावेकाचः' इति पञ्चम्या उदात्तत्वम् । अद्वेषः । न विद्यते द्वेषोऽस्य इति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । दधे । कर्मणि लिट् । तस्य आर्धधातुकत्वेन 'अभ्यस्तानामादिः' इत्याद्युदात्तो न भवति । प्रत्ययस्वर एव शिष्यते । यद्वृत्तयोगात् निघाताभावः ।

शब्दा०—यः=जो, चित्=भी, हि=प्रसिद्ध अर्थ का वाचक निपात, ते=तुम्हारे, इत्था=इस प्रकार, भगः=धन, शशमानः=प्रशंसनीय, पुरा निदः=अनिन्दित, अद्वेषः=द्वेष रहित, हस्तयोः=हाथों में, दधे=रखा हुआ है ।

हि०अ०—(ओ सविता), प्रशंसनीय, अनिन्दित, द्वेषरहित जो कुछ भी धन तुम्हारे हाथों में इस प्रकार रखा हुआ है (उसके लिये हम तुम्हारे पास आते हैं ।

Trans—(O Savitar), whatever wealth, adorable, ere reproach, and free from enemy, is thus retained in thy hands (we come to thee for that).

Notes—चित्—An enclitic particle very frequently used

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

to emphasize the preceding word. According to Yāska it is used in the sense of reverence, comparison and utter contempt. It is always unaccented (चिदिति निपातोऽनुदात्तः—Nir. V. 5). हि—An emphatic particle employed throughout as a subordinating conjunction. It regularly throws the accent on the verb. इत्था—Adverb of manner, formed from the pronominal stem 'इ' with the suttix 'था'. The meaning it expresses is 'thus'; 'so'. भगः—Wealth, fortune; derived from √*bhaj* (भगो भजतेः—Nir. I. 7), शशमानः—√*śaś* to praise, pres. part. अद्वेषः–One who has no enemy; Bahuvrīhi compd. accented on the final syllable of the second member (नञ्सुभ्याम्—Pāṇ. VI. 2. 172). दधे—√*dhā* to put, mid perf. 3rd. sing; accented because the particle हि is there in the same clause (हि च—Pāṇ. VIII. 1. 34).

भगऽभक्तस्य । ते । वयम् । उत् । अशेम । तव । अवसा । मूर्धानम् । रायः । आऽरभे ॥५॥

सा० भा०—हे सवितः ते त्वदीयाः वयं शुनःशेपनामानः भगभक्तस्य धनेन संयुक्तस्य तवावसा रक्षणेन उदशेम उत्कर्षेण व्याप्नुमः । किं कर्तुम् । रायः धनस्य मूर्धानम् उत्कर्षम् आरभे प्रारब्धुम् । धनिकत्वप्रसिद्ध्या व्याप्ता भूयामेत्यर्थः ॥ भगशब्दो वृषादित्वादाद्युदात्तः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । अशेम । 'अशू व्याप्तौ' । लिङि व्यत्ययेन परस्मैपदम् । शप् । रायः । 'ऊडिदम्' इति षष्ठ्या उदात्तत्वम् । आरभे । 'कृत्यार्थे तवैकेन्' इति तुमर्थे केन्प्रत्ययः । नित्स्वरेणाद्युदात्तत्वम् ॥५॥

शब्दा०—भगभक्तस्य=प्रचुर धन से सम्पन्न, ते=तुम्हारे, वयम्=हम लोग, उत् अशेम=प्राप्त करें, तव=तुम्हारी, अवसा=रक्षा से, मूर्धानम्=श्रेष्ठ, रायः=धन के हिस्से को, आरभे=पाने के लिये ।

हि० अ०—तुम्हारे (भक्त) हम लोग, प्रचुर धन से सम्पन्न (जो तुम हो) उस तुम्हारी सहायता से धन के श्रेष्ठ अंश को पाने के लिये आये हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans—We thy (men) have come to attain the loftiest of wealth with the protection of thee, who art endowed with prosperity.

Notes—**भगमक्तस्य**—Endowed with prosperity or fortune-favoured. Sāyaṇa construes it with **तवावसा** and accordingly wilson renders as 'through the protection of thee who art the possessor of wealth'. Griffith takes it in apposition of **रायः** and translates as 'the highest of affluence which Bhaga has dealt out to us'; Tatpuruṣa compd. in its instrumental form accents the first member, if the second member has **क्त** ending. (**तृतीया कर्मणि**—Pāṇ.-VI.2.48). **उत्**—A particle and prefix to verbs and nouns implying superiority or separation and disjunction. It is not used as a separable adverb or preposition ; in those rare cases in which it appears uncompounded with verb the latter has to be supplied from the context. **अशेम**—√*aṁś* to attain 'a'—aorist 1rst plu. **अवसा**—With protection ; derived from √*av* to protect. **आरभे**—Dat. infinitive in 'ए' from √*rabh* to grasp ; radical infinitives, compounded with preposition, accent the root ; the preposition, being unaccented, is separated by avagraha in the Padatext.

नहि । ते । क्षत्रम् । न । सहः । न । मन्युम् । वयः । चन । अमी इति । पतयन्तः । आपुः । न । इमाः । आपः । अनिऽमिषम् । चरन्तीः । न । ये । वातस्य । प्रऽमिनन्ति । अभ्वम् ॥६॥

सा० भा० —अथ सवित्रा प्रेरितः शुनःशेपः एतदादिसूक्तशेषेण उत्तरेण च सूक्तेन वरुणं तुष्टाव । तथा च श्रूयते—'तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति स वरुणं राजानमुपससारात उत्तराभिरेकत्रिंशता'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ऐ० ब्रा० ७. १६) इति। हे वरुण पतयन्तः प्रौढ़े वियत्युत्पतन्तः अमी दृश्यमानाः वयश्चन श्येनादयः पक्षिणोऽपि ते क्षत्रं त्वदीयं शरीर बलं नहि आपुः नैव प्राप्ताः। त्वत्सदृशं शरीरबलं पक्षिणामपि नास्तीत्यर्थः। तथा सहः त्वदीयं पराक्रमं तव सामर्थ्यमपि न प्रापुः। तथा मन्युं त्वदीयं कोपमपि न प्रापुः। त्वयि क्रुद्धे सति सोढुमशक्ता इत्यर्थः। अनिमिषं सर्वदा चरन्तीः प्रवाहरूपेण गच्छन्त्यः आपः त्वदीयं बलं न प्रापुः। वातस्य वायोः ये गतिविशेषाः त्वदीयम् अभ्वं वेगं न प्रमिनन्ति न हिंसन्ति। अतिक्रमं कर्तुं न शक्ता इत्यर्थः। तेऽपि न प्रापुरिति पूर्वत्रान्वयः॥ पतयन्तः। 'पत गतौ'। चुरादिरदन्तः। लटः शतृ। शप्। गुणायादेशौ। अदुपदेशाल्लसर्वधातुकानुदात्तत्वे णिचः स्वरः। आपुः। 'आप्लृ व्याप्तौ'। लिट्युसि द्विर्भावहलादिशेषौ। 'अत आदेः' (पा० सू० ७. ४. ७०) इत्यात्वं। अत्र न सहो न मन्युमित्यादिभिरापुरित्यस्य संबंधात्तदपेक्षया प्राथम्यात् 'चादिलोपे विभाषा' इति प्रथमा तिङ्विभक्तिर्न निहन्यते। चरन्तीः। 'वा छन्दसि' इति पूर्वसवर्णदीर्घः। प्रमिनन्ति। 'मीञ् हिंसायाम्। 'क्र्यादिभ्यः श्ना'। 'श्नाभ्यस्तयोरातः' (पा० सू० ६. ४. ११२) इति आकारलोपः। 'मीनातेर्निगमे' (पा० सू० ७. ३. ८१) इति ह्रसत्वम्। प्रत्ययस्वरः। 'तिङि चोदात्तवति' (पा० सू० ८. १. ७१) इति गतिरनुदात्तः। यद्वृत्तयोगादनिघातः।

शब्दा०—नहि=नतो, ते=तुम्हारे, क्षत्रम्=आधिपत्य को, न=नहीं, सहः=शक्ति को, न=नहीं, मन्युम्=क्रोध को, वयः=पक्षी, चन=भी, अमी=ये, पतयन्तः=उड़ने वाले, आपुः=प्राप्त करते हैं, न=नहीं, इमाः=ये, आपः=जल, अनिमिषम्=सदा, चरन्तीः=बहता हुआ, न=नहीं, ये=जो, वातस्य=वायु के प्रचण्ड तूफान, प्रमिनन्ति=उलंघन करते हैं, अभ्वम्=विशाल शक्ति का।

हि० अ०—(ओ वरुण), ये उड़ने वाले पक्षी भी न तो तुम्हारे आधिपत्य को, न तो शक्ति को, न तो क्रोध को ही प्राप्त करते हैं; न ये सदा बहने वाला जल, न तो वायु के जो प्रचण्ड तूफान हैं वे ही (तुम्हारी) विशाल शक्ति का उलंघन करते हैं।

Trans.—(O Varuṇa), even these birds flying can attain neither thy sovereignty, nor the prowess, nor the wrath; nor these waters, moving without waiting even for a winkling of eye (i.e. unceasingly), nor these gales of wind can resist (thy) immense power.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—क्षत्रम्—Derived from √*kṣi* to possess; क्षत्रम् is especially applied to the power of Varuṇa. चन—A particle usually employed after a negative particle and is rendered as 'not even'. In a few passages it loses its negative sense and is rendered as 'even'. It is placed after the word to which it gives the force. It accents the preceding verb in the sentence or pāda in which it occurs. अमी—Final ई is pragṛhya; hence, इति is added to it in the Padatext. पतयन्तः—√*pat* to fly, pres. part. आपुः—√āp to obtain perf. 3rd plu.; accented because in the first hemistich, न क्षत्रम्, न सहः, न मन्युम् which are syntactically connected with आपुः, have no conjunctive च. The general rule is that in a hemistich when च, वा, हा, अह, एव are silent the verb is not unaccented (चादिलोपे विभाषा—Pāṇ VIII. 1.63). अनिमिषम्—Not waiting even for a winkling of eye, i. e. unceasingly; Bahuvrīhi compd. accents the final syllable of the second member, if the first member is a prohibitive particle 'अ' or सु (नञ्सुभ्याम्—Pāṇ VI. 2.172). चरन्तीः—√*car* to move pres. part. वातस्य—The word वातस्य in genitive indicates that the subject of प्रमिनन्ति is understood. Sāyaṇa Supplies 'ये गतिविशेषाः,' Wilson 'gales' and Griffith 'wild fury'. प्रमिनन्ति—√*mī* to damage, pres. 3rd plu.; not-unaccented because connected with conjunctive ये (निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्—Pāṇ. VIII. 1.30). In such subordinate clauses the preposition is generally compounded with the verb and is unaccented (तिङि चोदात्तवति—Pāṇ. VIII.1.2). Preposition is separated from the root by avagraha in the Padatext.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अबुध्ने । राजा । वरुणः । वनस्य । ऊर्ध्वम् । स्तूपम् । ददते । पूतऽदक्षः ॥ नीचीनाः । स्थुः । उपरि । बुध्नः । एषाम् । अस्मे इति । अन्तः । निऽहिताः । केतवः । स्युरिति स्युः ॥७॥

सा० भा०—पूतदक्षः शुद्धबलः वरुणः राजा अबुध्ने मूलरहिते अन्तरिक्षे तिष्ठन् वनस्य वननीयस्य तेजसः स्तूपं संघम् ऊर्ध्वम् उपरिदेशे ददते धारयति । नीचीनाः स्थुः । ऊर्ध्वदेशे वर्तमानस्य वरुणस्य रश्मय इत्यध्याहार्यम् । ते ह्यधोमुखास्तिष्ठन्ति । एषां रश्मीनां बुध्नः मूलम् उपरि तिष्ठतीति शेषः । तथा सति केतवः प्रज्ञापकाः प्राणाः अस्मे अस्मासु अन्तर्निहिताः स्थापिताः स्युः । मरणं न भविष्यतीत्यर्थः । अबुध्ने न विद्यते बुध्नः मूलमस्येति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । 'स्त्यै शब्दसंघातयोः' । 'स्त्यः संप्रसारणमूच्च' इति पप्रत्ययः ; तत्संनियोगेन यकारस्य संप्रसारणं परपूर्वत्वे ऊकारादेशश्च । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् । ददते । भौवादिकः । नीचीनाः । निपूर्वादञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन् । 'अनिदिताम्' इति नलोपः । न्यच्शब्दात्स्वार्थे 'विभाषाञ्चेरदिक्स्त्रियाम्' (पा०सू० ५.४.८) इति खः । 'आयन्०' इत्यादिना तस्य ईनादेशः । 'आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्' (पा० सू ७.१.२.१) इति वचनात् ईकार उदात्तः । 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम् । स्थुः । 'गातिस्था०' (पा०सू०२.४.७७ इत्यादिना सिचो लुक् । 'आतः' (पा०सू०३.४.११०) इति झेः जुसादेशः । 'उस्यपदान्तात्' (पा०सू० ६.१.९६) इति पररूपत्वम् । 'बहुलंन्छदस्यमाङ्योगेऽपि इति अडागमाभावः । अस्मे । सुपां सुलुक्' इति सप्तम्याः शेआदेशः । निहिताः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । अस्तेर्लिङि 'श्नसोरल्लोपः' ।

शब्दा०—अबुध्ने=आधार रहित, राजा=राजा, वरुणः=वरुण देवता, वनस्य=प्रकाश के, ऊर्ध्वम्=उपर, स्तूपम्=पुञ्ज को, समूह को, ददते=धारण करता है, पूतदक्षः=पवित्र सामर्थ्यवाला, नीचीनाः=नीचे जाने वाली, स्थुः=स्थित रहती हैं, उपरि=उपर, बुध्नः=स्रोत, एषाम्=इनका, अस्मे=हमारे, निहिताः स्युः=पड़ी रहें, केतवः=किरणें ।

हि० अ०—पवित्र सामर्थ्य वाला राजा वरुण आश्रयरहित (अन्तरिक्ष) में (रहता हुआ) प्रकाश के पुञ्ज को उपर धारण करता है; इस (प्रकाशपुञ्ज सूर्य) की किरणें नीचे की तरफ जाने वाली हैं, (यद्यपि) उनका स्रोत उपर है । (प्राण संचार करने वाली) रश्मियां हमारे अन्दर पड़ी रहें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans—King Varuṇa of pure Vigour, (residing) in the baseless (region) holds high a heap of light; its rays are directed downwards the base being above. May the rays be placed within us.

Notes.—**अबुध्ने**—Bahuvrīhi compd. accents the final syllable, if its first member is **नञ्** or **सु** (**नञ्सुभ्याम्**—Pāṇ VI 2.172). Wilson following Sāyaṇa connects **अबुध्ने** with **वरुण** and renders 'abiding in the baseless firmament'. Grittith construes it with **ऊर्ध्वं स्तूपम्**. According to him Varuṇa sustains erect the tree's stem in the baseless region. **स्तूपम्**—'Heap' (Wilson); 'stem' (Griffith). Sāyaṇa derives it from √*styai* to pile; the Samprasāraṇa of '**य्**' is '**इ**', but this '**इ**' has changed into '**ऊ**'. **ददते**—√*dā* to give, pres. mid. 3rd. sing. **पूतदक्षः**—of pure vigour; Bahuvrīhi compd. accented on the first member (**बहुव्रीहौ प्रकृत्या पूर्वपदम्**—Pāṇ. VI. 2.1). **नीचीनाः**—From **नि**+√*añc* to go downward. **स्थुः**—√*sthā* to stand, root-aorist, injun. 3rd. plu. Generally the injunctive is used with the prohibitive particle **मा**, but it is also used even without **मा** (**बहुलं छन्दस्यमाङ्योगेऽपि**—Pāṇ. VI. 4.75). **एषाम्**—All the cases of the pronoun **एन** are unaccented. **अस्मे**—For **अस्मासु**; final **ए** is pragṛhya; hence, **इति** is added to it in the Padatext. **निहिता**—Past pass. part. from **नि**+√*dhā* to put. Past pass. part. is always accented on the final syllable, but when it is compounded with a preposition the latter is accented (**गतिरनन्तरः**—Pāṇ VI. 2.49). **केतवः**—Sāyaṇa renders it by **प्रज्ञापकाः प्राणाः**; Wilson following Sāyaṇa takes it to mean 'the sources of existence; Griffith renders it as 'rays'. **स्युः**—√*as* to be,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

pres. opt. 3rd. plu. In the Padatext इति is added to it and it is again repeated after इति ; for general rule see Appendix—'B' under rules of adding इति in the Padatext. (II, B, (c))

उरुम् । हि । राजा । वरुणः । चकार । सूर्याय । पन्थाम् । अनुऽएतवै । ऊं इति ॥ अपदे । पादा । प्रतिऽधातवे । अकः । उत । अपऽवक्ता । हृदयऽविधः । चित् ॥८॥

सा० भा०—वरुणः राजा सूर्याय सूर्यस्य पन्थां मार्गम् उरुं विस्तीर्णं चकार । हि शब्दः प्रसिद्धौ । उत्तरायणदक्षिणायनमार्गस्य विस्तारः प्रसिद्धः । किमर्थमेवं कृतवान् इति तदुच्यते । अन्वेतवा उ अनुक्रमेणोदयास्तमयौ गन्तुमेव । तथा अपदे पादरहिते अन्तरिक्षे पादा प्रतिधातवे पादौ प्रक्षेप्तुम् । अकः मार्गं कृतवान् । पूर्वत्र रथस्य मार्गः अत्र पादयोरिति विशेषः । यद्वा । अपदे यूपे बद्धेन मया गन्तुमशक्ये भूप्रदेशे पादौ प्रक्षेप्तुमुपायं बन्धविमोचनरूपं करोत्वित्यर्थः । उत अपि च हृदयाविधश्चित् अस्मदीयवेधकस्य शत्रोरपि अपवक्ता अपवदिता निराकर्ता भवतु ॥ चकार । लित् स्वरेण आकार उदात्तः । 'हि च' इति निघातप्रतिषेधः । पन्थाम् । 'पथिमथ्यृभुक्षामात्' (पा०सू० ७.१.८५)। इति द्वितीयायामपि व्यत्ययेन आत्वम् । पथिन्शब्दस्य 'पतेस्थ च' (उ० सू० ४.४५२) इति प्रत्ययान्तत्वेन अन्तोदात्तत्वे प्राप्ते 'पथिमथोः सर्वनामस्थाने' (पा०सू०६.१.१९९) इत्याद्युदात्तत्वम् । अन्वेतवै । अनुपूर्वात् एतेः 'तुमर्थे सेसेन्' इति तवैप्रत्ययः । 'तवैचान्तश्च युगपत्' (पा०सू०६.२.५१) इति आद्यन्तयोरुदात्तत्वम् । पादा । 'सुपां सुलुक्' इति आकारः । प्रतिधातवे । दधातेः 'तुमर्थ०' इति सूत्रेणैव तवेन्प्रत्ययः । 'तादौ च निति०' (पा० सू०६.२.५०) इति गतेः प्रकृतिस्वरत्वम् । अकः । करोतेः 'छन्दसि लुङ्लङ्लिटः' इति लोडर्थे लुङ् । तस्य तिप् । 'मन्त्रे घस' (पा०सू० २.४.८०) इत्यादिना च्लेर्लुक् । गुणो रपरत्वम् । 'हल्ङ्याब्भ्यः' (पा०सू०६.१.६८) इति तिपो लोपः । अडागमः । हृदयाविधः । 'हृञ् हरणे' । 'वृह्रोः षुग्दुकौ च' (उ० ४.५४०) इति कयन् । 'व्यध ताडने' । क्विप् । 'नहिवृति' (पा०सू०६.३.११६) इत्यादिना पूर्वपदस्य दीर्घत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ।

शब्दा०—उरुम्=विस्तृत, हि=प्रसिद्धि का वाचक निपात, राजा=राजा, वरुणः=वरुण देवता, चकार=बनाया है, सूर्याय=सूर्य के लिये, पन्थाम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=मार्ग, अन्वेतवै=चलने के लिये, उ=निश्चित अर्थ का वाचक निपात, अपदे=आश्रयरहित अन्तरिक्ष में, पादा=पैरों के, प्रतिधातवे=रखने के लिये, अकः=निर्माण किया है, उत=और, अपवक्ता=दूर करने वाला, हृदयाविधः=हृदय को चोट पहुँचाने वाले को, चित्=भी।

हि० अ०—राजा वरुण ने सूर्य के चलने के लिये विस्तृत मार्ग बनाया है; आश्रयरहित (अन्तरिक्ष) में पैर रखने के लिये (मार्ग का) निर्माण किया है; तथा जो कोई (हमारे) हृदय को चोट पहुँचाने वाला हो उसको (वरुण) दूर करने वाला होवे।

Trans—The King Varuṇa has made the path for sun wide to travel on; (he) has made (the path) to place the foot in footless (region); and may (Varuṇa) be the repeller of him who torments our heart.

Notes—उरुम्—From √*vṛ* to cover by Samprasāraṇa. हि—See notes I.24.4. चकार—√*kṛ* to make perf. 3rd sing; not unaccented because preceded by the emphatic particle हि in the same clause (हि च—Pāṇ. VIII.I.34). अन्वेतवै—एतवै is a dative infinitive in तवै from √*i* to go, so it has double accent, one on the root and other on the final syllable (तवै चान्तश्च युगपत्—pāṇ. VI.2.5); but when compounded with preposition, the preposition and the last syllable are accented; and the preposition is separated by avagraha in the Padatext (पद्यादींस्तुद्वद्युदातानामसंहितवदुत्तरान्—Rg. Prāt. III.25). उ—An enclitic particle always unaccented. In the Padatext इति is added to it, but before इति it becomes lengthened and nasalized (उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितः शाकलेन—Rg. Prāt. I.75). अपदे—Bahuvrīhi compd. accented on the second member. प्रतिधातवे—Dative infinitive in तवे from प्रति+√*dhā* to put. अकः—√*kṛ* to make, root-aorist

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3rd. sing. उत—A conjunctive-particle meaning 'and'. It is generally placed at the beginning of the second sentence. अपवक्ता—Sāyaṇa supplies भवतु to it and explains by 'अपवादिता निराकर्ता भवतु'; Wilson following Sāyaṇa translates as 'be repeller'. Griffith does not take it in imperative sense. He renders it with 'warned afar'. हृदयाविधः—Tatpuruṣa compd. (first member in accusative), accented on the second member. चित्—See notes I.24.4.

शतम् । ते । राजन् । भिषजः । सहस्रम् । उर्वी । गभीरा । सुऽमतिः । ते । अस्तु ॥ बाधस्व । दूरे । निःऽऋतिम् । पराचैः । कृतम् । चित् । एनः । प्र । मुमुग्धि । अस्मत् ॥९॥

सा० भा०—हे राजन् वरुण ते तव शतं भिषजः बंधनिवारकाणि शतसंख्याकान्यौषधानि वैद्या वा सन्ति । ते तव सुमतिः अस्मदनु ग्रहबुद्धिः उर्वी विस्तीर्णा गभीरा गाम्भीर्योपेता स्थिरा अस्तु । निर्ऋतिम् अस्मदनिष्टकारिणीं निर्ऋतिं पापदेवतां पराचैः पराङ्मुखां कृत्वा दूरे अस्मत्तो व्यवहिते देशे स्थापयित्वा तां बाधस्व । कृतं चित् अस्माभिरनुष्ठितमपि एनः पापम् अस्मत् प्र मुमुग्धि प्रकर्षेण मुक्तं नष्टं कुरु ॥ सुमतिः । 'तादौ च' इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'मन्क्तिन्' इत्यादिनोत्तरपदान्तोदात्तत्वम् । संहितायां विसर्जनीयसकारस्य 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' (पा० सू० ८. ३. १०३) इति षत्वम् । बाधस्व । 'बाधृ विलोडने' । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । निर्ऋतिम् । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । मुमुग्धि । 'मुच्लृ मोक्षणे' । 'बहुलं छन्दसि' इति श्लुः । 'हुझल्भ्यो हेर्धिः' (पा० ६. ४. १०१) । तस्य अपित्त्वेन ङित्त्वाद्गुणाभावः । 'चोः कुः' (पा० सू० ८. २. ३०) इति कुत्वम् ।

शब्दा०—शतम्=सैकड़ों, ते=तुम्हारी, राजन्=ओ राजा, भिषजः=औषधियाँ, सहस्रम्=हजारों, उर्वी=विशाल, गभीरा=गम्भीर, सुमतिः=सुन्दर मति, ते=तुम्हारी, अस्तु=होवे, बाधस्व=रोको, दूरे=बहुत दूर, निर्ऋतिम्=पाप को, पराचैः=हमसे अलग करके, कृतम्=किये गये,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चित्=भी, एनः=पापों को, प्र मुमुग्धि=अच्छी प्रकार से नष्ट करो, अस्मत्=हमसे।

हि० अ०—ओ राजन्, सैकड़ों तथा सहस्रों तुम्हारी ओषधियाँ हैं; तुम्हारी सुन्दर मति (हमारे प्रति) विशाल एवं गम्भीर होवे; पाप देवता को बहुत दूर (हमसे) अलग कर रोको; हमारे द्वारा किये गये पापों को भी हमसे अच्छी प्रकार नष्ट करो।

Trans—O King, a hundred and a thousand are thy medicines; wide and deep be thy well-disposed mind; remove afar (from us) Nirṛti; release from us the sin even we have committed.

Notes—**शतम्** and **सहस्रम्** are used in agreement with plurals. They are generally treated as adjectives. According to Yāska **सहस्रम्** means powerful (**सहस्रं सहस्वत्**). Durgā in his commentary breaks **सहस्रम्** in to **सहस्** and **रम्**; **सहस्** means strength (**बलम्**—Nigh. II. 9.17) and **रम्** means 'endowed with'. (**सह इति बलनाम, तेन तद्वत् दुर्बलानामपि सहस्रं समुदितं बलवदेव भवति सङ्घात् बलीयस्त्वात्**—Durgā on Nir. III.11). **सुमति**—Bahuvrīhi compd. accented on the second member, because the first member is **सु**. **अस्तु**—√*as* to be pres. impv. 3rd sing. **बाधस्व**—√*bādh* to oppress mid. pres. impv. 2nd sing; beginning of the pāda; hence, not unaccented. **दूरे**—From √*dru* to flee. Yāska derives it also from √*i* to go (**दूरयं वा**—Nir. III.19). Thus according to this derivation **दूर** is 'that going to which is difficult'. According to Kṣīra-swāmī it is derived from √*dū* to torment (**दूयते अत्र दूरम्**—Amara. III. 1.69). **निर्ऋतिम्**—According to Sāyaṇa Nirṛti is the deity of sin. In the Nighaṇṭu (I. 1.16) it is enumerated in the list of the names of earth. Yāska derives it from **नि** √*ram* or **नि** √ṛ (**तत्र निर्ऋतिर्निरमणात्। ऋच्छतेः कृच्छ्रापत्तिरितरा**—Nir. II. 7).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Griffith takes it to mean 'decay' or 'destruction'. कृतम् –√*kṛ* to make, past part. प्र—A particle mostly connected with a verb which is often to be supplied. In the principal clause preposition is generally detached from the verb and is accented. मुमुग्धि –√*muc* to release, perf. impv. 2nd. sing. अस्मत्—Abl. plu. of अस्मद्.

अमी इति । ये । ऋक्षाः । निऽहितासः । उच्चा । नक्तम् । ददृश्रे । कुह । चित् । दिवा । ईयुः ॥ अदब्धानि । वरुणस्य । व्रतानि । विऽचाकशत् । चन्द्रमाः । नक्तम् । एति ॥१०॥

सा० भा०—अमी रात्रावस्माभिर्दृश्यमानाः ऋक्षाः सप्त ऋषयः । तथा च वाजसनेयिन आमनन्ति—'ऋक्षाः इति ह स्म वै पुरा सप्त ऋषीनाचक्षते' इति । यद्वा । ऋक्षाः सर्वेऽपि नक्षत्रविशेषाः । 'ऋक्षाः स्तृभिरिति नक्षत्राणाम्' (नि० ३.२०) इति यास्केनोक्तत्वात् । उच्चा उच्चैः उपरि द्युप्रदेशे निहितासः स्थापिताः ये सन्ति ते ऋक्षाः नक्तं रात्रौ ददृश्रे सर्वैरपि दृश्यन्ते । दिवा अहनि कुह चित् ईयुः क्वापि गच्छेयुः । न दृश्यन्ते इत्यर्थः । वरुणस्य राज्ञः व्रतानि कर्माणि नक्षत्रदर्शनादिरूपाणि अदब्धानि केनाप्यहिंसितानि । किंच वरुणस्याज्ञयैव चन्द्रमाः नक्तं रात्रौ विचाकशत् विशेषेण दीप्यमानः एति गच्छति ॥ निहितासः । 'आज्जसेरसुक्' । थाथादिस्वरेणोत्तरपदान्तोदात्तत्वे (पा० सू० ६.२.१४४) प्राप्ते 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । ददृश्रे । दृशेर्लिटि 'इरयो रे' (पा० सू० ६.४.७६) इति रे-आदेशः । व्यत्ययेनाद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । कुह । 'वा ह च्छन्दसि' (पा० सू० ५.३.१३) । इति किंशब्दादुत्तरस्य त्रलो हादेशः । 'कु तिहोः' (पा० सू० ७.२.१०४) इति किंशब्दस्य कुआदेशः । स्थानिवद्भावात् लित्वरेणाद्युदात्तत्वम् । विचाकशत् । कशेर्दीप्त्यर्थात् यङ्लुगन्तात् शतृप्रत्ययः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । समासे कृत्स्वरः । यद्वा । काशतेर्वा व्यत्ययेनोपधाह्रस्वत्वम् । चन्द्रमाः । चन्द्रे+मो+डित् (उ० सू० ४.६६७) इति असिप्रत्ययः । कृदुत्तर पदप्रकृतिस्वरत्वे प्राप्ते दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ।

शब्दा०—अमी=ये, ये=जो, ऋक्षाः=नक्षत्र, निहितासः=रखे गये थे, उच्चा=ऊंचे, नक्तम्=रात्रि में, ददृश्रे=दिखाई पड़ते थे, कुह=कहाँ,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चिन्=भी, दिवा=दिन में, ईयुः=चले गये, अदब्धानि=अक्षत, वरुणस्य=वरुण के, व्रतानि=पवित्र कार्य, विचाकशन्=प्रकाशित होता हुआ, चन्द्रमाः=चन्द्रमा, नक्तम्=रात्रि में, एति=विचरण करता है।

हि० अ०—ऊँचे रखे गये ये नक्षत्र जो रात्रि में दिखाई पड़ते थे, दिन में कहाँ चले गये? वरुण के पवित्र कार्य अक्षत हैं; चन्द्रमा प्रकाशित होता हुआ रात्रि में विचरण करता है।

Trans.—These constellations, placed on high, which were seen by night, whither did go by day? Unharmed are the holy acts of Varuṇa; the moon diffusing its light profoundly, moves by night.

Notes—अमी—See notes I. 24.6. ऋक्षाः—It is enumerated with स्तृभिः in the Nighaṇṭu (III. 29.9). Yāska takes it to mean constellations (Nir. III. 20). Kṣīraswāmī derives it from √*ṛṣ* to rush (ऋषति गच्छति। ऋक्षणोति तमः वा ऋक्षम्). निहितासः—From √*dhā* to put, आसस् ending in nom. plu; for accent see निहिताः (I.24.7.) ददृश्रे—√*dṛś* to see, mid. perf. 3rd. plu.; not unaccented because connected with ये. Verbs, when reduplicated, accent the reduplicated syllable (अभ्यस्तानामादिः—Pāṇ—VI. 1.189). ईयुः—√*i* to go, perf. 3rd. plu. अदब्धानि—√*dabh* to harm, past. pass. part.; accented on the negative particle अ (अव्यये नञ्कुनिपातानाम्—Vārtika on Pāṇ. VI.2.2). व्रतानि—It is enumerated in the list of the synonyms of act (Nigh. II.1.7). Yāska derives it from (i) √*vṛ* to cover or (2) √*vāraya* to forbid (व्रतमिति कर्मनाम। निवृतिकर्म वारयतीति सतः। इदमपीतरद्व्रतमेतस्मादेव। वृणोतीति सतः। अन्नमपि व्रतमुच्यते। यदावृणोति शरीरम्—Nir. II.13); 'holy acts' (Wilson); 'holy laws' (Griffith). विचाकशत्—√*kāś* to shine, intensive, pres. part. accented on reduplicated syllable 'चा'. चन्द्रमाः—Yāska variously derives this word—चन्द्रमाः चायन् द्रमति। चन्द्रः माता। चान्द्रं मानम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अस्य इति वा। चन्द्रः चन्दतेः कान्तिकर्मणः। चन्दनम् इत्यपि अस्य भवति। चारु द्रमति। चिरं द्रमति। चमेः वा पूर्वम् (Nir.—XI.5) एति—√*i* to go, pres. 3rd. sing.

तत्। त्वा। यामि। ब्रह्मणा। वन्दमानः। तत्। आ। शास्ते। यजमानः। हविःऽभिः॥ अहेळमानः। वरुण। इह। बोधि। उरुशंस। मा। नः। आयुः। प्र। मोषीः॥११॥

सा० भा०—एकादशिनस्य वारुणस्य पशोर्वपापुरोडाशयोः 'तत्त्वा यामि' इति द्वे ऋचौ याज्ये। सूत्रितं च—'तत्त्वा यामि ब्रह्मणा वन्दमान इति द्वे अस्तभ्नाद्द्वयाम्' (आश्व० श्रौ० ३. ७) इति। वरुणप्रघासेषु वारुणस्य हविषो याज्या 'तत्त्वा यामि'इत्येषा 'पञ्चम्यां पौर्णमास्याम्' इत्यत्र सूत्रितम्—'इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वन्दमानः' (आश्व० श्रौ० २. १७) इति।

हे वरुण मुमूर्षुरहं त्वां प्रति तत् आयुः यामि याचे। कीदृशः। ब्रह्मणा प्रौढेन स्तोत्रेण वन्दमानः स्तुवन्। सर्वत्र यजमानः अपि हविर्भिः तत् आयुः आ शास्ते प्रार्थयते। त्वं च इह कर्मणि अहेळमानः अनादरमकुर्वन् बोधि अस्मदपेक्षितं बुध्यस्व। हे उरुशंस बहुभिः स्तुत्य नः अस्मदीयम् आयुः मा प्र मोषीः प्रमुषितं मा कुरु। सप्तदशसंख्याकेषु याञ्चाकर्मसु 'ईमहे यामि' (नि० ३. १९. १) इति पठितम्। चाशब्दलोपश्छान्दसः अहेळमानः। 'हेडृ अनादरे'। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे सति धातुस्वरः शिष्यते। ततो नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। बोधि। 'बुध अवगमने'। लोटः सेर्हिः। 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'वा छन्दसि' (पा० सू० ३. ४. ८८) इत्यपित्त्वाभावेन ङित्त्वाभावात् लघूपधगुणः। 'हुझल्भ्यो हेर्धिः इति हेर्धिरादेशः। धातोरन्त्यलोपश्छान्दसः। मोषीः। 'मुष् स्तेये'। लोडर्थे छान्दसो लुङ्। 'वदव्रज' (पा० सू० ७. २. ३) इति प्राप्ताया वृद्धेः'नेटि' (पा० सू० ७. २. ४) इति प्रतिषेधे सति लघूपधगुणः। 'बहुलं छन्दस्यमाङ्योगेऽपि इत्यडभावः॥

शब्दा०—तत्=उस आयु के लिये, त्वा=तुम्हारे पास, यामि=याचना करता हूँ, ब्रह्मणा=स्तुति द्वारा, वन्दमानः=वन्दना करता हुआ, तत्=उस आयु के लिये, आ शास्ते=कामना करता है, यजमानः=यज्ञ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करने वाला, हविर्भिः=हवि द्वारा, अहेळमानः=क्रोधित न होते हुये, वरुण=ओ वरुण, इह=यहां, बोधि=समझो, उरुशंस=ओ विस्तृत रूप से स्तुत्यमान, मा=मत, नः=हमारी, आयुः=उम्र, प्र मोषी=चुरावो।

हि० अ०—(ओ वरुण), प्रार्थना द्वारा वन्दना करता हुआ उस (आयु) के लिये तुम्हारे पास याचना करता हूँ; यजमान हवि द्वारा उसी (आयु) की कामना करता है। ओ वरुण, (हमपर) क्रोधित न होते हुये यहाँ (हमारे अभिप्राय को) समझो; ओ विस्तृत रूप से स्तुत्यमान (वरुण), हमारी आयु को न चुरावो।

Trans.—(O Varuṇa), praising with prayer, I beseach thee for that (life); the sacrificer craves that with oblations. O Varuṇa, not-being angry with (me) do acknowledge (our desire) here; o praised by many, do not steal our life.

Notes—यामि—√*yā* to go, pres. 1rst. sing. Yāska in his Nirukta quotes this word to illustrate his theory that sometimes a syllable in a word is omitted; thus according to him यामि ought to be याचामि which due to some reason has dropped च्. But Rājavāde is of the view that the root √*yā* from which यामि is derived was used in the Ṛ.V. to mean 'beg'. वन्दमानः—√*vand* to greet, mid. pres. part. आ शास्ते—आ+√*śās* to desire, pres. 3rd. sing. For accent on आ see note on प्र (I.24.9). हविर्भिः—The terminations भिस् भ्याम्, भ्यस्, are separated from the stem by avagraha, if the preceding syllable is not long. अहेळमानः—√*hīḍ* to be hostile, mid. pres. part. बोधि—√*budh* to know, root-aorist, impv. 2nd. sing. उरुशंस—Vocative at the beginning of the pāda; hence, the first member is accented. मा—A prohibitive particle regularly used with the injunctive. मोषी—√*muṣ* to steal 'iṣ'-aorist, injun. 2nd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत् । इत् । नक्तम् । तत् । दिवा । मह्यम् । आहुः । तत् । अयम् । केतः । हृदः । आ । वि । चष्टे ॥ शुनःशेपः । यम् । अह्वत् । गृभीतः । सः । अस्मान् । राजा । वरुणः । मुमोक्तु ॥१२॥

सा० भा०—तदित् तदेव वरुणविषयं स्तोत्रं नक्तं रात्रौ मह्यं शुनःशेपाय आहुः कर्तव्यत्वेनाभिज्ञाः कथयन्ति । तथा दिवा अपि तत् एव आहुः । हृदः मदीयमनसो निष्पन्नः अयं केतः प्रज्ञाविशेषोऽपि तत् एव कर्तव्यत्वेन आ वि चष्टे सर्वतो विशेषेण प्रकाशयति । गृभीतः गृहीतः यूपे बद्धः शुनःशेपः एतन्नामको जनः यं वरुणम् अह्वत् आहूतवान् सः वरुणः राजा अस्मान् शुनःशेपान् मुमोक्तु बन्धात् मुक्तं करोतु ॥ मह्यम् । 'ङयि च' इत्याद्युदात्तत्वम् । आहुः । 'ब्रूवः पञ्चानाम्' (पा० सू०३.४.८४) इति ब्रूञो लटि झेः उसादेशः, धातोः आहादेशश्च । हृदः । 'पद्यन्' (पा० सू० ६.१.६३) इत्यादिना हृदयशब्दस्य हृदादेशः । 'ऊडिदंपदादि' इति पञ्चम्या उदात्तत्वम् । शुनःशेपः । शुन इव शेपो यस्य इति समासे 'शुनःशेपपुच्छलाङ्गूलेषु संज्ञायां षष्ठ्या अलुग्वक्तव्यः' (पा० सू०६.३.२१.४) इति अलुक् । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'उभे वनस्पत्यादिषु' (पा० सू०६.२.१४०) इति पूर्वोत्तरपदयोः युगपत् प्रकृतिस्वरत्वम् । अह्वत् । ह्वञो लुङि 'लिपिसिचिह्वश्च' (पा० सू०३.१.५३) इति च्लेः अङादेशः । 'आतो लोप इटि च' (पा० सू०६.४.६४) इति आकारलोपः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । गृभीतः । 'हृग्रहोर्भः' इति भत्वम् । सो अस्मान् । 'प्रकृत्यान्तःपादम्' इति प्रकृतिभावः । मुमोक्तु । 'बहुलं छन्दसि' इति विकरणस्य श्लुः ।

शब्दा० तत्=वह, इत्=पूर्ववर्ती शब्द पर जोर देने वाला निपात, नक्तम्=रात को, तत् =वही, दिवा=दिन को, मह्यम्=मुझसे, आहुः=कहते हैं, तत्=वही, अयम् =यह, केतः=प्रज्ञा, हृदः=अन्तःकरण से उत्पन्न, आ वि चष्टे =कहती है, शुन शेपः=शुनःशेप ने, यम्=जिसको, अह्वत्=बुलाया है, गृभीतः=पाशों में बँधा हुआ, सः=वह, अस्मान्=हम लोगों को, राजा=राजा, वरुणः=वरुण देवता, मुमोक्तु=मुक्त करे ।

हि० अ०—वही (बात) रात को तथा वही दिन को (वे) मुझसे कहते हैं; अन्तःकरण से उद्भूत हमारी बुद्धि भी वही (बात) कहती है । वह राजा वरुण जिसको पाशों में बधा शुनःशेपः ने बुलाया है, हमको (पाशों से) मुक्त करे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Verily this by night, this by day (they) speak to me; the intuition of my heart, too, repeates the same. May that king Varuṇa, whom the fettered Sunaḥśepa has invoked, release us (from this bondage).

Notes—इत्—A particle which emphasizes the preceding word of all kinds. आहुः—√*ah* to say, perf. 3rd. plu. केतः—From √*cit* to know. Sāyaṇa renders it by प्रज्ञाविशेषः. आ वि चष्टे—√*caks* to see, mid. pres. 3rd. sing; in the principal clause when there are more than one preposition with an unaccented verb, they are treated as independent; hence, they are accented. अह्वत्—√*hū* to call, 'a'-aorist, 3rd. sing.; accented because preceded by यम्. गृभीतः—√*grabh* to seize, past part. मुमोक्तु—√*muc* to release, perf. impv. 3rd. sing.

शुनःशेपः । हि । अह्वत् । गृभीतः । त्रिषु । आदित्यम् । द्रुऽपदेषु बद्धः ॥ अव । एनम् । राजा । वरुणः । ससृज्यात् । विद्वान् । अदब्धः । वि । ममोक्तु । पाशान् ॥१३॥

सा० भा०—गृभीतः बन्धनाय गृहीतः त्रिसंख्याकेषु द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः शुनःशेपः आदित्यम् अदितेः पुत्रं यं वरुणं अह्वत् आहूतवान् हि यस्मादेवं तस्मात् सः वरुणः राजा एनं शुनःशेपम् अव ससृज्यात् अवसृष्टं बन्धनात् विमुक्तं करोतु । विमोकप्रकार एव स्पष्टीक्रियते । विद्वान् विमोकप्रकाराभिज्ञः अदब्धः केनाप्यहिंसितः वरुणः पाशान् बन्धनरज्जुविशेषान् वि मुमोक्तु विच्छिद्यैनं मुक्तं करोतु । त्रिषु । 'षट्त्रिचतुर्भ्यो हलादिः' (पा० सू० ६.१. १७९) इति विभक्तेरुदात्तत्वम् । संहितायाम् 'उदातस्वरितयोर्यणः' इति परः आकारः स्वर्यते । ससृज्यात् । 'सृज विसर्गे' । प्रार्थनायां लिङ् । 'बहुलं छन्दसि' इति विकरणस्य श्लुः । विद्वान् । 'विद ज्ञाने' । 'विदेः शतुर्वसुः' (पा० सू० ७.१.३६) । 'उगिदचाम्' इति नुम् । हल्ङ्यादिसंयोगान्तलोपौ । संहितायां 'दीर्घादटि समानपादे' इति नकारस्य रुत्वम् । 'आतोऽटि नित्यम्' इति सानुनासिक आकारः । अदब्धः । 'दम्भु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दम्भे'। निष्ठायाम् 'अनिदिताम्' इति नलोपे 'झषस्तथोर्धोऽधः' (पा० सू० ८.२.४०) इति धत्वम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥

शब्दा०—शुनःशेपः=शुनःशेप ने, हि=चूंकि, अह्वत्=आह्वान किया है, गृभीतः=पकड़ा हुआ, त्रिषु=तीन, आदित्यम्=अदिति के पुत्र का, द्रुपदेषु=यूपों में, बद्धः=बंधा हुआ, एनम्=इसको, राजा=राजा, वरुणः=वरुण, अव ससृज्यात्=मुक्त कर दे, विद्वान्=बुद्धिमान्, अदब्धः=कभी कष्ट न पहुँचाये जाने वाला, वि मुमोक्तु=बन्धन रहित करे, पाशान्=पाशों से।

हि० अ०—पकड़ा हुआ तथा तीन यूपों में बधा हुआ शुनःशेपः ने चूंकि अदिति के पुत्र का आह्वान किया है, राजा वरुण उसको मुक्त करे; बुद्धिमान, कभी कष्ट न पहुँचाये जाने वाला (वरुण) अपने पाशों से बंधन रहित करे।

Trans.—Since, Śunaḥśepa, seized and fettered to the three pillars, has invoked the son of Aditi, may the King Varuṇa set him free; may the wise, the unharmed one, unfetter the bonds.

Notes—अह्वत्—√*hū* to call, 'a'—aorist 3rd. sing.; not unaccented because preceded by हि in the same pāda (हि च—Pāṇ. VIII. 1.34). आदित्यम्—Son of Aditi; Varuṇa is one of the seven Ādityas. Yāska in his Nirukta has variously derived this word taking it to mean the sun—आदित्यः कस्मात्। आदत्ते रसान्। आदत्ते भासं ज्योतिषाम्। आदीप्तो भासेति वा। अदितेः पुत्रः इति वा (Nir. II. 13). According to Yāska the word Āditya has also been employed for Mitra, Varuṇa, Aryaman, Dakṣa, Bhaga and Aṁśa (Ibid. II. 13). द्रुपदेषु—Pillar of the wood; Tatpuruṣa compd. accented on the last member. बद्धः—√*bandh* to bind, past part. अव—As a prefix to verbs, and verbal nouns, it expresses 'off' 'away', 'down; here it would be construed with

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ससृज्यात्. एनम्—All the oblique cases of एन are unaccented. ससृज्यात्—√*sṛj* to emit; perf. opt. 3rd. sing. विद्वान्—√*vid* to know, pres. part. अदब्ध—See अदब्धानि (I.24.10).

अव । ते । हेळः । वरुण । नमःऽभिः । अव । यज्ञेभिः । ईमहे । हविःऽभिः ॥ क्षयन् । अस्मभ्यम् । असुर । प्रचेत इति प्रऽचेतः । राजन् । एनांसि । शिश्रथः । कृतानि ॥१४॥

सा० भा०—अवभृथे 'अव ते हेळः' इति द्वे ऋचौ वारुणस्य हविषो याज्यानुवाक्ये। 'पत्नीसंयाजैश्चरित्वा' इति खण्डे सूत्रितम्—'अव ते हेळो वरुण नमोभिरिति द्वे' (आश्व० श्रौ० ६. १३) इति ॥

हे वरुण ते तव हेळः क्रोधं नमोभिः नमस्कारैः अव ईमहे अवनयामः। तथा यज्ञैः साङ्गानुष्ठानेन पूज्यैः हविर्भिः अव ईमहे वरुणं परितोष्य क्रोधमपनयामः। हे असुर अनिष्टक्षेपणशील प्रचेतः प्रकर्षेण प्रज्ञायुक्त राजन् दीप्यमान वरुण अस्मभ्यम् अस्मदर्थं क्षयन् अस्मिन् कर्मणि निवसन् कृतानि अस्माभिरनुष्ठितानि एनांसि पापानि शिश्रथः श्रथितानि शिथिलानि कुरु ॥ हेळः। असुनो नित्त्वादाद्युदात्तत्वम्। यज्ञेभिः। 'बहुलं छन्दसि' इति ऐसभावः। ईमहे। 'ईङ् गतौ'। विकरणस्य लुक्। क्षयन्। 'क्षि निवासगत्योः'। लटः शतृ। व्यत्ययेन शप्। आमन्त्रिताद्युदात्तत्वम्। असुर। 'असेरुरन्' (उ० सू० १. ४२)। आमन्त्रितनिघातः। शिश्रथः। 'श्रथ दौर्बल्ये'। चुरादिः अदन्तः। छान्दसे लुङि 'णिश्रिद्रुस्रुभ्यः' (पा० सू० ३. १. ४८) इति च्लेः चङ्। द्विर्भावहलादिशेषौ। अग्लोपित्वात् सन्वद्भावाभावेऽपि (पा० सू० ७. ४. ९३) 'बहुलं छन्दसि' (पा० सू० ७. ४. ७८) इति अभ्यासस्य इत्वम्। पूर्ववत् अडभावः ॥

शब्दा०—ते=तुम्हारे, हेळः=क्रोध को, वरुण=ओ वरुण, नमोभिः=नमस्कारों द्वारा, यज्ञेभिः=यज्ञों द्वारा, अव ईमहे=दूर करते हैं, हविर्भिः=हवि द्रव्यों द्वारा, क्षयन्=निवास करते हुये, अस्मभ्यम्=हमारे बीच, असुर=ओ प्राण देने वाले, प्रचेतः=ओ प्रकृष्ट ज्ञान वाले, राजन्=ओ राजा, एनांसि=पापों को, शिश्रथः=नष्ट करो, कृतानि=किये हुये।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ वरुण, तुम्हारे क्रोध को नमस्कारों द्वारा यज्ञों द्वारा, तथा हवि द्रव्यों द्वारा हमलोग दूर करते हैं; ओ प्राण देने वाले, ओ प्रकृष्ट ज्ञान वाले, ओ राजा, हमारे बीच निवास करते हुये (हमारे) किये हुये पापों को नष्ट करो।

Trans.—O Varuṇa (we) depricate thy wrath with salutations, with sacrifices, with oblations; o life-giver, o wise, abiding for us, o king, loosen sins committed (by us).

Notes.—हेळः—Derived from √*hīḍ* to be hostile. ईमहे—√*i* to go, mid. pres. 1rst. plu. क्षयन्—√*kṣi* to dwell, irr. pres. part. असुर—Sāyaṇa renders असुर by अनिष्टक्षेपणशील, Wilson as 'averter of misfortune' and Griffith as 'incorporeal, spiritual, divine being'. Macdonell and Peterson rendder it as 'divine' (cf. zend. ahura). प्रचेतः—From √*cit* to know. The visarjanīya is rhotasized; hence, इति in the Padatext. The repetition of प्रचेतः after इति is to separate the preposition from the stem by avagraha. Due to Niyata Sandhi visarjanīya has been dropped and the penultimate vowel is lengthened (रेफोदयो लुप्यते। द्राघितोपधा ह्रस्वस्य—Ṛg. Prāt. IV. 28-29). शिश्रथः—√*śrath* to slacken, 'red'-aorist, 2nd. sing.

उत्। उत्ऽतमम्। वरुण। पाशम्। अस्मत्। अव। अधमम्। वि। मध्यमम्। श्रथय॥ अथ। वयम्। आदित्य। व्रते। तव। अनागसः। अदितये। स्याम॥१५॥

सा० भा०—हे वरुण उत्तमम् उत्कृष्टं शिरसि बद्धं पाशम् अस्मत् अस्मत्तः उत् श्रथाय उत्कृष्य शिथिलं कुरु। अधमं निकृष्टं पादेऽवस्थितं पाशम् अव श्रथाय अधस्तादवकृष्य शिथिलीकुरु। मध्यमं नाभिप्रदेशगतं पाशं वि श्रथाय वियुज्य शिथिलीकुरु। अथ अनन्तरं हे आदित्य अदितेः पुत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वरुण वयं शुनःशेपाः तव व्रते त्वदीये कर्मणि अदितये खण्डनराहित्याय अनागसः अपराधरहिताः स्याम भवेम ॥ उत्तमम् । तमपः पित्त्वादनुदात्तत्वेन आद्युदात्तत्वे प्राप्ते 'उत्तमशश्वत्तमौ सर्वत्र' (पा० सू० ६. १. १६० ग०) इति उञ्छादिषु पाठादन्तोदात्तत्वम् । अधमम् । 'अवद्यावमाधमावरेफाः कुत्सिते' (उ० सू० ५. ७३२) इति अवतेः अमच्; वस्य धः । श्रथाय । 'श्रथ दौर्बल्ये' । संहितायां छान्दसो दीर्घः । तव । युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम् । अनागसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । 'नञ्सुभ्याम्' इति तु व्यत्ययेन प्रवर्तते । यद्वा । आगस्शब्दात् 'अस्मायामेधा' (पा० सू० ५. २. १२१) इति मत्वर्थीयो विनिः । तस्य 'विन्मतोर्लुक्' (पा० सू० ५. ३. ६५) इति लुक् । नञ्समासे अव्यय-पूर्वपदप्रकृतिस्वरत्वम् ॥

शब्दा०—उत्=उपर करके, उत्तमम्=सबसे उपर वाले, वरुण=ओ वरुण, पाशम्—पाश को, अस्मत्=हमसे, अव=नीचे करके, अधमम्=सबसे नीचे वाले को, वि=अलग करके, मध्यमम्=बीच वाले को, श्रथाय=ढीला करो, अथ=ताकि, वयम्=हमलोग, आदित्य=ओ अदिति के पुत्र, व्रते=पवित्र नियम में, तव=तुम्हारे, अनागसः=पापरहित, अदितय=अदिति के सम्मुख, स्याम=होवें ।

हि० अ०—ओ वरुण, सबसे उपर वाले पाश को, सबसे नीचे वाले तथा बीच वाले को हमसे ढीला करो; ताकि ओ अदिति के पुत्र, तुम्हारे पवित्र नियम के अन्दर हमलोग अदिति के सम्मुख पापरहित होवें ।

Trans.—O Varuṇa, slacken the highest fetter from us, slacken the lowest and slacken the middle-most ; so that, o son of Aditi, under thy holy ordinance may we be sinless before Aditi.

Notes—**उत्तमम्** –In the Padatext **त्व**, **ता**, **तरप्** and **तमप्** are separated by avagraha from the stem. **श्रथाय** √*śrath* to slacken, pres. impv. 2nd sing.; second syllable is metrically lengthened. **स्याम** –√*as* to be, pres. opt. 1rst. plu.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'इन्द्रस्य नु वीर्याणि' इति पञ्चदशर्चं द्वितीयं सूक्तम्। आङ्गिरसो हिरण्यस्तूप ऋषिः। त्रिष्टुप् छन्दः। इन्द्रो देवता। 'इन्द्रस्य पञ्चोना' इत्यनुक्रमणिका। अग्निष्टोमे माध्यंदिने सवने निष्केवल्यशस्त्रे 'इन्द्रस्य नु वीर्याणि' इति निविद्धानीयं सूक्तम्। 'निष्केवल्यस्य' इति खण्डे 'इन्द्रस्य नु वीर्याणीत्येतस्मिनैन्द्रीं निविदं दध्यात् (आश्व० श्रौ० ५. १५) इति। विषुवत्यपि तस्मिन् शस्त्रे एतत् विनियुक्तम्। 'विषुवान्दिवा कीर्त्यः' इति खण्डे सूत्रितम्—'इन्द्रस्य नु वीर्याणीति एतस्मिन्नैन्द्रीं निविदं शस्त्वा' (आश्व० श्रौ० ८. ६) इति। महाव्रते निष्केवल्येऽप्येतदेव विनियुक्तम्। 'रायन्तरो दक्षिणः पक्षः' इति खण्डे 'चतस्रः सतीः षड् बृहतीः करोतीन्द्रस्य नु वीर्याणि प्र वोचम्' (ऐ० आ० ५. २. २) इति ॥

इन्द्रस्य। नु। वीर्याणि। प्र। वोचम्। यानि। चकार। प्रथमानि। वज्री॥ अहन्। अहिम्। अनु। अपः। ततर्द। प्र। वक्षणाः। अभिनत्। पर्वतानाम्॥१॥

सा० भा०—वज्री वज्रयुक्तः इन्द्रः प्रथमानि पूर्वसिद्धानि मुख्यानि वा यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार तस्य इन्द्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्रवीमि। कानि वीर्याणीति तदुच्यते। अहिं मेघम् अहन् हतवान्। तदेतदेकं वीर्यम्। अनु पश्चात् अपः जलानि ततर्द हिंसितवान् भूमौ पातितवानित्यर्थः। इदं द्वितीयं वीर्यम्। पर्वतानां संबन्धिनीः वक्षणाः प्रवहणशीलाः नदीः प्र अभिनत् भिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यम्। एवमुत्तरत्रापि द्रष्टव्यम्॥ वीर्याणि। 'शूरवीर विक्रान्तौ'। ण्यन्तात् 'अचो यत्' इति यत्। 'णेरनिटि' इति णिलोपः। 'तित्स्वरितम्' इति स्वरितत्वम्। 'यतोऽनावः' इत्याद्युदात्तत्वं न भवति। आद्युदात्तत्वे हि सुशब्देन बहुव्रीहौ 'आद्युदात्तं द्व्यच्छन्दसि' इत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वात् 'वीरवीर्यौ च' इति पुनस्तद्विधानमनर्थकं स्यात्। अतोऽवगम्यते 'यतोऽनावः' इत्याद्युदात्तत्वं वीरशब्दे न प्रवर्तते इति। अतः परिशेषात् 'तित्स्वरितम्' इति प्रत्ययस्य स्वरितत्वमेव। वोचम्। 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेः अङादेशः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। चकार। णलि लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्। यद्वृत्तयोगादनिघातः। अहन्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लङि 'इतश्च' इति इकारलोपे हल्ङ्याब्भ्यः० इति तकारलोपः। अहिम्। आङ्पूर्वात् हन्तेः 'आङिश्रिहनिभ्यां ह्रस्वश्च' (उ० सू० ४.५७७) इति इत्प्रत्ययः; आङो ह्रस्वत्वं च। च शब्देन 'वेञो डित् समाने ख्यश्चोदात्तः' इति डित्वं पूर्वपदोदात्तत्वं चानुकृष्यते। ततः टिलोपे पूर्वपदस्योदात्तत्वम्। ततर्द। 'उतृदिर् हिंसानादरयोः'। तिङ्ङतिङः' इति निघातः। वक्षणाः। वक्ष रोषे क्रुधमण्डार्थेभ्यश्च (पा० सू० ३.२.१५१) इति युच्। चित्स्वरं बाधित्वा व्यत्ययेन प्रत्ययस्वरः॥

शब्दा०—इन्द्रस्य=इन्द्र के, नु=अभी, वीर्याणि=पराक्रम युक्त कार्य, प्रवोचम्=उच्च स्वर से कहूंगा, यानि=जिनको, चकार=किया था, प्रथमानि=पहिले, वज्री=वज्र धारण करने वाले ने, अहन्=मारा, अहिम्=बादल को, अपः=जल, ततर्द=काटा, वक्षणा=नदियों को, प्र अभिनत्=काट कर प्रवाहित किया, पर्वतानाम्=पर्वतों के।

हि० अ०—अब मैं इन्द्र के पराक्रमयुक्त कार्यों का कथन करूंगा, जिनको वज्र धारण करने वाले ने पहले किया था। उसने अहि (बादल) को मारा, जल का भेदन किया तथा पर्वतों के बीच नदियों को काटकर प्रवाहित किया।

Trans.—Now I shall proclaim Indra's heroic deeds which the wielder of the thunderbolt has achieved first; (he) smote the dragon, pierced the waters, split the channels of the mountains.

Notes—नु—An emphatic particle that never comes in the beginning of a sentence. It's use as an interrogative or an expletive particle is also common in the R.V. वीर्याणि—Derived from √*vīr* with the suffix यत्. The suffix being तित् the final syllable is स्वरित (तित्स्वरितम्—Pāṇ. VI. 1.185). वोचम्—√*vac* to speak, 'red'.-aorist, subju. 1rst. sing.; verb, not coming in the beginning of a pāda or a sentence, is unaccented (तिङ्ङतिङः Pāṇ.—VIII.1.28). चकार—√*kṛ* to make, perf. 3rd. sing.; not unaccented because preceded by यानि (यद्वृत्तान्नित्यम् —Pāṇ. VIII.1.66). अहन्—√*han* to kill, impf. 3rd, sing.; not unaccented because it comes in

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the beginning of the pāda. **अहिम्**—Yāska derives it from √i to go (**अहि अयनात्**—Nir. II. 17) ; cloud is called **अहि** for it moves in the sky (**एति अन्तरिक्षे**—Ibid. II.17). Sāyaṇa following Yāska renders **अहिम्** by **मेघम्**. Griffith, Macdonell and Peterson take it to literally mean 'serpent dragon' which is no other than Vṛtra. **अनु**—A preposition used independently and gives the same sense which the verb combined with it, gives. **ततर्द**—√*tṛd* to split, perf. 3rd. sing. **वक्षणाः**—Sāyaṇa followed by Grassmann, derives it from √*vakṣ* to swell. Griffith thinks **वक्षणा** to mean 'channels' and Peterson as 'belies' **अभिनत्**—√*bhid* to split, 3rd. sing.

अहन्। अहिम्। पर्वते। शिश्रियाणम्। त्वष्टा। अस्मै। वज्रम्। स्वर्यम्। ततक्ष॥ वाश्राःऽइव। धेनवः। स्यन्दमानाः। अञ्जः। समुद्रम्। अव। जग्मुः। आपः॥२॥

सा० भा०—पर्वते शिश्रियाणम् आश्रितम् अहिं मेघम् अहन् हतवान्। अस्मै इन्द्राय स्वर्यं सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यं त्वष्टा विश्वकर्मा वज्रं ततक्ष तनूकृतवान्। तेन वज्रेण मेघे भिन्ने सति स्यन्दमानाः प्रस्रवणयुक्ताः आपः समुद्रम् अञ्जः सम्यक् अव जग्मुः प्राप्ताः। तत्र दृष्टान्तः। वाश्राः वत्सान्प्रति हम्भारवोपेताः धेनवः इव। यथा धेनवः सहसा वत्सगृहे गच्छन्ति तद्वत्॥ शिश्रियाणम्। 'श्रिञ् सेवायाम्'। लिटः कानच्। द्विर्भावहलादिशेषेयङादेशाः। 'चितः' इत्यन्तोदात्तत्वम्। स्वर्यम्। 'ऋ गतौ'। अस्मात् सुपूर्वात् 'ऋहलोर्ण्यत्' इति ण्यत्। 'संज्ञापूर्वको विधिरनित्यः' इति वृद्ध्यभावः। यद्वा। 'स्वृ शब्दोपतापयोः' इत्यस्मात् ण्यति पूर्ववत् वृद्ध्यभावः। 'तित्स्वरितम्' इति स्वरितत्वम्। वाश्यन्ते इति वाश्राः। 'वाशृ शब्दे'। 'स्फायिताञ्चि०' इत्यादिना रक्। जग्मुः। उसि 'गमहन' इति उपधालोपः॥

शब्दा०—अहन्=मारा, अहिम्=बादल को, पर्वते=पर्वत पर, शिश्रियाणम्=निवास करने वाले को, त्वष्टा=त्वष्टा ने, अस्मै=उसके लिये,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वज्रम् =वज्र, स्वर्यम् =शब्द करने वाले, गरजने वाले, ततक्ष=निर्माण किया; वाश्रव=रम्भाती हुई की तरह, धेनवः=गायें, स्यन्दमानाः=बहता हुआ, अञ्जः=सीधे, तेजी से, समुद्रम्=समुद्र की ओर, अव=नीचे, जग्मुः=जाने लगा, आपः=जल।

हि० अ०—पर्वत पर निवास करने वाले अहि (बादल) को (उसने) मारा; त्वष्टा ने इसके लिये गरजने वाले वज्र का निर्माण किया; रम्भाती हुई (बछड़े की तरफ तेजी से जाने वाली) गायों की तरह, बहता हुआ जल तेजी से नीचे समुद्र की ओर जाने लगा।

Trans.—(He) smote the dragon (cloud) resorting on the mountain; Tvaṣṭā fashioned a resounding thunderbolt for him. Gliding like bellowing kine (towards their calves) the waters flowed suddenly downwards to the ocean.

Notes—शिश्रियाणम् —√*śri* to resort. mid. perf. part. acc. sing.; words terminating in चित् accent the last syllable (चितः—Pāṇ. VI. 1.16). त्वष्टा—He is the personification of the art of architecture. In the Ṛ.V. he is said to have created heaven and earth. He is the father of Indra, and is also said to have been killed by the latter. स्वर्यम्—Sāyaṇa derives it from √*ṛ* to go or √*svṛ* to roar, and renders as सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यम्. Wilson takes it to mean 'far whirling', Griffith as heavenly' and Peterson as 'roaring'. For accent see note on वीर्याणि (I.32.1). ततक्ष—√*takṣ* to fashion, perf. 3rd. sing. स्यन्दमानाः—√*syand* to flow, mid. pres. part. जग्मुः—√*gam* to go, perf. 3rd. plu.

वृष॒ऽयमा॑णः । अ॒वृ॒णी॒त॒ । सोम॑म् । त्रिऽक॑द्रुकेषु । अ॒पि॒ब॒त् । सु॒तस्य॑ ॥ आ । सायकम् । म॒घऽवा॑ । अ॒द॒त्त॒ । वज्र॑म् । अह॑न् । ए॒न॒म् । प्र॒थ॒म॒ऽजाम् । अहा॑नाम् ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—वृषायमाणः वृष इवाचरन् इन्द्रः सोमम् अवृणीत वृतवान्। त्रिकद्रुकेषु ज्योतिः गौः आयुः इत्येतन्नामकाः त्रयो यागाः त्रिकद्रुकाः उच्यन्ते। तेषु सुतस्य अभिषुतस्य सोमस्यांशम् अपिबत् पीतवान्। मघवा धनवान् इन्द्रः सायकं बन्धकं वज्रम् आ अदत्त स्वीकृतवान्। तेन च वज्रेण अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघं अहन् हतवान्॥ वृषायमाणः। वृष इवाचरन्। 'कर्तुः क्यङ् सलोपश्च' (पा० सू० ३. १. ११) इति क्यङ्। 'अकृत्-सार्वधातुकयोः' इति दीर्घः। अदुपदेशात् धातोः अन्तोदात्तत्वे क्यङन्तात् धातोः अन्तोदात्तत्वम्। सायकम्। 'षिञ् बन्धने'। सिनोतीति सायकः। ण्वुल्ः। णित्स्वरेणाद्युदात्तत्वम्। प्रथमजाम्। प्रथमं जायते इति प्रथमजाः। 'जनसनखनक्रमगमो विट्' 'विड्वनोः' इति आत्वम्॥

शब्दा० वृषायमाणः=शक्तिशाली सांड की तरह आचरण करता हुआ, अवृणीत=चुना, सोमम्=सोम को, त्रिकद्रुकेषु=ज्योतिः, गौः तथा आयुः नामक तीन आहुतियों में जो अभिप्लव यज्ञ में प्रथम तीन दिन क्रमशः दी जाती हैं, अपिबत्=पान किया, सुतस्य=पीसे हुये सोम का; सायकम्=शस्त्र, मघवा=उदार दानी, आ अदत्त=धारण किया, वज्रम्=वज्र को, अहन्=मारा, एनम्=इसको, प्रथमजाम्=सर्वप्रथम उत्पन्न, अहीनाम्=राक्षसों में, बादलों में।

हि० अ०—शक्तिशाली सांड की तरह आचरण करते हुये (इन्द्र ने) सोम को (अपना प्रिय पान) चुना; उसने तीन यागों में पीसे हुये (सोम) का पान किया। उदार (इन्द्र) ने शस्त्र तथा वज्र को धारण किया, (और उससे) राक्षसों में प्रथम उत्पन्न इसको मारा।

Trans.—Acting as a mighty bull, (he) chose the soma; drank of the pressed soma at three offerings. The bounteous took the arrow, the thunderbolt (and therewith) smote this first-born of the dragons.

Notes—वृषायमाणः—Pres. part. from denominative √वृषाय. In the Saṁhitā-text when denominative-termination य is added to a stem, the preceding vowel is lengthened; but in the Pada-text the original stem is restored and is always separated from

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the denominative termination य by avagraha. अवृणीत—√*vṛ* to choose, mid. impf. 3rd. sing. त्रिकद्रुकेषु—According to Sāyaṇa कद्रुक means a particular offering in the Abhiplava festival, and three shows the offerings of the first three days of the ceremony viz. ज्योतिः, गौःand आयुः. Griffith takes it to mean 'in three sacred beakers' and Peterson as 'three cups. Grassmann thinks त्रिकद्रुक to mean 'three soma-cups'. According to Geldner त्रिकद्रुक might be the name of a locality where Indra quaffed off three lakes of soma. अपिबत्—√*pā* to drink, impf. 3rd. sing. सुतस्य—'Of the pressed soma'; an instance of partitative gen. which is very common in the Ṛ. V. मघवा—From √*maṁh* with possessive termination वत्—'bounteous', 'liberal'. In the Pada-text stem is separated from the possessive termination वा by avagraha. अदत्त—√*dā* to give, mid. impf. 3rd. sing. अहन्—See I.32.1. प्रथमजाम्—Karmadhāraya compd. accented on the final member.

यत् । इन्द्र । अहन् । प्रथमऽजाम् । अहीनाम् । आत् । मायिनाम् । अमिनाः । प्र । उत । मायाः ॥ आत् । सूर्यम् । जनयन् । द्याम् । उषसम् । तादीत्ना । शत्रुम् । न । किल । विवित्से ॥४॥

सा० भा०—उत अपि च हे इन्द्र यत् यदा अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघम् अहन् हतवानसि आत् तदनन्तरं मायिनां मायोपेतानामसुराणां संबन्धिनीः मायाः प्र अमिनाः प्रकर्षेण नाशितवानसि । अनन्तरं सूर्यम् उषसम् उषः काल द्याम् आकाशं च जनयन् उत्पादयन् आवरकमेघनिवारणेन प्रकाशयन् वर्तसे । तादीत्ना तदानीम् आवरकान्धकाराभावात् शत्रुं घातकं वैरिणं न विवित्से किल त्वं न लब्धवान् खलु ॥ अहन् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हन्तेः लङि 'हल्ङ्याब्भ्यः०' इति सिलोपः। अडागम उदात्तः। यद्वृत्तयोगादनिघातः। मायिनाम्। मायाशब्दस्य व्रीह्यादिषु पाठात् 'व्रीह्यादिभ्यश्च' (पा० सू० ५. २. ११६) इति मत्वर्थीय इनिः। अमिनाः। 'मीञ् हिंसायाम्'। क्र्यादिकः। 'मीनातेर्निगमे' (पा० सू० ७. ३. ८१) इति ह्रस्वत्वम्। तादीत्ना। तदानीम् इत्यस्य पृषोदरादित्वात् वर्णविपर्ययः। किल। 'निपातस्य' इति दीर्घत्वम्। विवित्से। 'विद्लृ लाभे'। क्रादिनियमात् प्राप्तः इट् व्यत्ययेन न भवति॥

शब्दा०—यत्=जिस समय, इन्द्र=ओ इन्द्र, अहन्=मारा, प्रथमजाम्=सर्वप्रथम उत्पन्न, अहीनाम्=राक्षसों में, बादलों में, आत्=तदनन्तर, मायिनाम्=धूर्तों की, मायावियों की, प्र=विशेष रूप से, उत=और, मायाः=धूर्तता, माया, आत्=तदनन्तर, सूर्यम्=सूर्य को, जनयन्=उत्पन्न करते हुये, द्याम्=आकाश को, उषासम्=उषा को, तादीत्ना=उस समय, शत्रुम्=शत्रु को, न=नहीं, किल=निश्चित अर्थ का वाचक एक निपात, विवित्से=पाया।

हि० अ०—ओ इन्द्र, जिस समय (तुमने) राक्षसों में प्रथम उत्पन्न को मारा, तथा धूर्तों की धूर्तता को नष्ट किया, उस समय सूर्य, आकाश, तथा उषा को उत्पन्न करते हुये (तुमने) निश्चित रूप से किसी शत्रु को नहीं पाया।

Trans.—At the time when o Indra, (you killed the first-born of the dragons, and destroyed the tricks of artful ones, then giving birth to the sun, the sky, and the dawn (you) found certainly no enemy.

Notes—अहन्—√*han* to kill, impf. 2nd. sing.; not unaccented because preceded by यत् (यद्वृत्तान्नित्यम्—Pāṇ. VIII.1.66). आत्—An adverb showing sequence of time—'thereupon', 'then'. Sometimes as a conjunctive it connects the words and clauses in the sense of 'and', 'moreover'. अमिनाः—√*mī* to damage, impf. 3rd. sing.; not unaccented because syntactically connected with यत्. उत—A conjunctive particle. जनयन्—√*jan* to generate, pres. part. उषासम्—The second syllable, being the tenth syllable of the pāda consisting of eleven

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

syllables, and followed by a short vowel, is lengthened (दशमं चैतयोरेवम् Ṛg. Prāt. VIII. 38 ; also see Ibid VIII. 36). तादीत्ना —An adverb of time. It is, correlated with यत् in the first pāda. Parāñjpe takes it as the instrumental of तदीत्न, the first syllable being lengthened. He thinks it to mean 'from the time onwards'. किला—A particle which emphasizes the preceding word. Second syllable being the eighth syllable of the pāda consisting of eleven syllables and followed by a short vowel is lengthened (एकादशिद्वादशिनोर्लघावष्टममक्षरम् उदये संहिता काले Ṛg.Prāt.VIII. 36). विवित्से—√*vid* to find, mid. perf. 2nd. sing.

अहन् । वृत्रम् । वृत्रऽतरम् । विऽअंसम् । इन्द्रः । वज्रेण । महता । वधेन ॥ स्कन्धांसिऽइव । कुलिशेन । विऽवृक्णा । अहिः । शयते । उपऽपृक् । पृथिव्याः ॥५॥

सा० भा०—अयम् इन्द्रः वज्रेण संपादितो यो महान् वधः तेन वज्रेण वृत्रतरम् अतिशयेन लोकानाम् आवरकम् अन्धकाररूपम् । यद्वा । वृत्रैः आवरणैः सर्वान् शत्रून् तरति तं वृत्रम् एतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुः यथा भवति तथा अहन् हतवान् । अंसच्छेदे दृष्टान्तः । कुलिशेन कुठारेण विवृक्णा विशेषतश्छिन्नानि स्कन्धांसीव । यथा वृक्षस्कन्धाश्छिन्ना भवन्ति तद्वत् । तथा सति अहिः वृत्रः पृथिव्याः उपरि उपपृक् सामीप्येन संपृक्तः शयते शयनं करोति छिन्नकाष्ठवत् भूमौ पततीत्यर्थः ॥ वृत्रतरम् । 'वृतु वर्तने' 'स्फायिताञ्चि०' इत्यादिना भावे रक्प्रत्ययान्तो वृत्रशब्दः । वृत्रेण आवरणेन सर्वं तरतीति वृत्रतरः । तरतेः पचाद्यच् । 'परादिश्छन्दसि बहुलम्' इत्युतर-पदाद्युदात्तत्वम् । तरपि तु व्यत्ययेन । व्यंसम् । 'बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे 'उदात्तस्वरितयोर्यणः' इति स्वरितत्वम् । वधेन । 'हनश्च वधः' इति भावे अप्; तत्संनियोगेन धातोः वधादेशः । स च अन्तोदात्तः । अन्त्यस्य अकारस्य 'अतो-लोपः' इति लोपः । उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् । विवृक्णा । 'ओव्रश्चू छेदने' । कर्मणि निष्ठा । यस्य विभाषा इति इट्प्रतिषेधः । 'ओदितश्च' (पा० सू० ८. २. ४५) इति परत्वात् निष्ठानत्वम् । ततो 'व्रश्चभ्रस्ज' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षत्वे प्राप्ते 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः' (पा० सू० ८. २. ६. ७) इति नत्वस्य सिद्धत्वेन झल्परत्वाभावात् षत्वं न भवति। कुत्वे तु कर्तव्ये तदसिद्धमेव (पा० सू० ८. २. १) इति 'चोः कुः' इति कुत्वम्। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। शयते। 'बहुलं छन्दसि' इति शपो लुगभावः। पृथिव्याः। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् ॥

शब्दा०—अहन्=मारा, वृत्रम्=वृत्र को, वृत्रतरम्=वृत्र से बड़ा, व्यंसं=व्यंस नामक असुर को; इन्द्रः=इन्द्र ने, वज्रेण=वज्र से, महता=महान्, वधेन=अस्त्र से; स्कन्धांसीव=वृक्ष की शाखाओं की तरह, कुलिशेना=कुठार से, विवृक्णा=काट कर गिराये गये, अहिः=बादल का राक्षस के रूप में मानवीकृत नाम, शयते=सो रहा है, उपपृक्=समीप, गोद में, पृथिव्याः=पृथिवी की।

हि० अ०—(इन्द्र ने) वृत्र को (अपने) महान् अस्त्र वज्र से मारा; वृत्र से बड़े शत्रु व्यंस को (मारा)। कुठार से काटकर गिराये गये वृक्ष की शाखाओं की तरह वह राक्षस पृथ्वी की गोद में सो रहा है।

Trans.—Indra with his great weapon viz. thunderbolt killed Vṛtra, and Vyaṁśa—greater than Vṛtra. Like branches of the tree felled by axe, the dragon lies in close contact with the earth.

Notes—वृत्रम्—According to Yāska Vṛtra is the cloud (तत्को वृत्रः। मेघ इति नैरुक्ताः Nir. II. 16). He derives this word variously—वृत्रो वृणोतेर्वा। वर्ततेर्वा। वर्धतेर्वा। यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते—Nir. II. 17. वृत्रतरम्—Sāyaṇa sxplains it by अतिशयेन लोकानामावरकमन्धकाररूपम्. Wilson following Sāyaṇa translates as 'the darkling mutilated; Griffith takes it to mean 'worst of Vṛtras', Macdonell as 'a worse Vṛtra', Peterson as 'a greater enemy, and Parāñjpe as 'the vanquisher of Vṛtra'. व्यंसम्—According to Sāyaṇa व्यंसम् means 'having a limb detached', and he construes it with वृत्रम्. Peterson

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

takes व्यंसम् as a proper noun. Geldner thinks it to mean 'the greatest enemy'. कुलिशेना—The final syllable, being the eighth syllable of the pāda and followed by a short vowel, is lengthened (see किला in I. 32.4). विवृक्णा —√*vraśc* with वि to cut up, past part. शयते—√*śī* to sleep, mid. pres. 3rd. sing. उपपृक्—From √*pṛc* to mix.

अयोद्धाऽइव । दुःऽमदः । आ । हि । जुह्वे । महाऽवीरम् । तुविऽबाधम् । ऋजीषम् ॥ न । अतारीत् । अस्य । सम्ऽऋतिम् । वधानाम् । सम् । रुजानाः । पिपिषे । इन्द्रऽशत्रुः ॥६॥

सा० भा०—दुर्मदः दुष्टमदोपेतो दर्पयुक्तो वृत्रः अयोद्धेव योद्धृरहित इव इन्द्रम् आ जुह्वे हि आहूतवान् खलु । कीदृशमिन्द्रम् । महावीरं गुणैः महान् भूत्वा शौर्योपेतं तुविबाधं बहूनां बाधकं ऋजीषं शत्रूणामपार्जकम् । अस्य ईदृशस्य इन्द्रस्य संबन्धिनो ये शत्रुवधाः सन्ति तेषां वधानां समृतिं संगमं नातारीत् पूर्वोक्तो दुर्मदः तरीतुं नाशक्नोत् । इन्द्रशत्रुः इन्द्रः शत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्रः इन्द्रेण हतो नदीषु पतितः सन् रुजानाः नदीः सं पिपिषे सम्यक् पिष्टवान् । सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यपाषाणादिकं च चूर्णीभूतमित्यर्थः ॥ अयोद्धा इव । न विद्यते योद्धास्येति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । समासान्तविधेरनित्यत्वात् (परिभा० ८४) 'नद्यृतश्च' (पा० सू० ५.४.१५३) इति कबभावः । जुह्वे । 'ह्वेञ् स्पर्धायां शब्दे च' । 'अभ्यस्तस्य च' (पा०-सू० ६.१.३३) इति संप्रसारणम् । उवङादेशाभावश्छान्दसः । यद्वा । 'छन्दस्युभयथा' इति सार्वधातुकसंज्ञायां 'हुश्नुवोः सार्वधातुके' (पा० सू० ६.४.८७) इति यणादेशः । अत्र लक्षणप्रतिपदोक्तपरिभाषा (परिभा० १०५) लक्ष्यानुरोधान्नाश्रीयते । इतरथा हि आजुह्वानः इत्यादिषु यणादेशो न स्यात् । न चैवं सति 'सातये हुवे वाम्' (ऋ० स० ६.६०.१३) इत्यादावपि तथा स्यादिति वाच्यं अनेकाच्त्वाभावात् । अनेकाच इति हि तत्रानुवर्तते । प्रत्ययस्वरेणान्तोदात्तत्वम् । 'हि च' इति निघातप्रतिषेधः । महावीरम् । महांश्चासौ वीरश्च महावीरः । 'आन्महतः' (पा० सू० ६.३.४६) इति आत्वम् । तुवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बाधम्। 'बाधृ विलोडने'। तुवीन् प्रभूतान् बाधते इति तुविबाधः। पचाद्यच्। कृदुत्तरपदप्रकृतिस्वरत्वम्। समृतिम्। 'तादौ च' इति गतेः प्रकृतिस्वरत्वम्। रुजानाः। 'रुजो भङ्गे' रुजन्ति कूलानीति रुजाना नद्यः। 'रुजाना नद्यो भवन्ति रुजन्ति कूलानि' (निरु० ६.४) इति यास्कः। व्यत्ययेन शानच्। 'तुदादिभ्यः शः'। नुमभावश्छान्दसः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः। पिपिषे। 'पिष्लृ संचूर्णने'। व्यत्ययेन लिट्। इन्द्रशत्रुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

शब्दा०—अयोद्धेव=असमर्थ योद्धा की तरह, दुर्मदः=दर्पयुक्त, हि=निश्चित अर्थ का वाचक एक निपात, आ जुह्वे=ललकारा, महावीरम्=महान् शक्तिशाली को, तुविबाधम्=बहुतों को अभिभूत करने वाले, ऋजीषम्=अन्तिम बूँद तक सोमपान करने वाले; न=नहीं, अतारीत्=पार पा सका, अस्य=उस इन्द्र के, समृतिम्=प्रहार को, वधानाम्=शस्त्रों के, रुजानाः=नदियों को, संपिपिषे=कुचल डाला, इन्द्रशत्रुः=इन्द्र है जिसको सताने वाला अर्थात् वृत्र।

हि० अ०—दर्पयुक्त, असमर्थ योद्धा की तरह (वृत्र ने) महाशक्तिशाली, सबको अभिभूत करने वाले, अन्तिम बूँद तक सोमपान करने वाले (इन्द्र) को ललकारा। (किन्तु वह वृत्र) उस (इन्द्र) के शस्त्रों के प्रहार को न पार पा सका। वृत्र ने, जिसका शत्रु इन्द्र है, (गिरकर) नदियों के तटों को कुचल डाला।

Trans.—Arrogant (Vṛtra) like an incapable soldier challanged the great hero, the oppressor of many, drinker of soma to the last drop. (But he) could not surpass the onslaught of his (Indra's) weapon ; Vṛtra, whose oppressor is Indra, crushed (the banks of) the rivers completely.

Notes—अयोद्धेव—'As if unequalled' (Wilson), 'like a weak warrior' (Griffith), 'like an incapable fighter' (Peterson). Words ending in तृ, and having अ or अन् as first member, optionally accent the final syllable (विभाषा तृन्नन्नतीक्ष्णशुचिषु—Pāṇ. VI. 2.261 ; नञ्सुभ्याम्—Pāṇ-VI.2.172). According to Sāyaṇa, Bergaigne and

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Zimmermann अयोद्ध is Bahuvrīhi compd. But Grassmann, Geldner, Wackernagel and Oldenbarg take it as Tatpuruṣa compd.. दुर्मदः—Wilson following Sāyaṇa translates as 'arrogant'; Griffith takes it to mean 'mad', Peterson as 'under the influence of drink'. Bahuvrīhi compd. accents the final member, if the monosyllabic word दुस् forms the first member (Macd. Ved. Gram. for stud. p. 455). जुह्वे—√*hū* to call, mid. perf. 3rd. sing.; not unaccented because preceded by हि (हि च—Pāṇ.VIII.1.34). महावीरम्—Karmadhāraya compd. accented on the final syllable. ऋजीषम्—'Scatterer of foes' (Wilson), 'impetuous' (Griffith), 'drinker of Soma to the dregs' (Peterson). Peterson's rendering seems to be correct, for it is based on the authority of Yāska (यत्सोमस्य पूयमानस्यातिरिच्यते तत् ऋजीषम्—Nir. V. 12). Grassmann derives it from √*ṛñj* to direct. अतारीत्—√*tṛ* to cross, 'is-aorist' 3rd. sing. अस्य—Oblique cases of the pron. इदम्, if not emphatic (replacing a preceding substantive) and not standing at the beginning of a pāda or a sentence, are unaccented (Vide, Macd. Ved. Gram. for stud. p. 452; Monier Williams Dict. under इदम् p. 165). समृतिम्—Derived from √*ṛ* with preposition सम् to 'face in battle' (cf. समर, अरि). रुजानाः—According to Yāska रुजानाः means rivers (रुजानाः नद्यो भवन्ति। रुजन्ति कूलानि–Nir. VI. 4). Sāyaṇa takes रुजानाः as an object of पिपिषे which is in active voice. Some European scholars interpret it as an epithet of इन्द्रशत्रु taking पिपिषे in passive voice. Bloomfield takes रुजानाः as pres. pass. part. and derives from (1) रुजान+आस् (mouth) or (II) रुजान+नास् (nose) by haplology and takes it to mean 'whose

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

mouth is being crushed. According to Oldenberg रुजानाः is derived from रुजा+अनास्. He suggests that अनास् being Bahuvrīhi must be accented on the final syllable, the first member being अन्. According to him originally the final syllable of अनास्, was accented but later on through the obscurity of the sense one accent was dropped. According to Geldner रुजानाः is derived from रुज+अनस् and रुज+नास् meaning (I) a car-breaker, and (II) nose-breaker. Griffith takes रुजानाः to mean 'shattered forts in falling. Peterson in the translation of this verse has followed Geldner's interpretation. पिपिषे—√*piṣ* to crush, perf. mid. 3rd. sing. इन्द्रशत्रुः—(इन्द्रः शातयिता यस्य) Bahuvrīhi compd. accented on the first member.

अपात् । अहस्तः । अपृतन्यत् । इन्द्रम् । आ । अस्य । वज्रम् । अधि । सानौ । जघान ॥ वृष्णः । वध्रिः । प्रतिऽमानम् । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥७॥

सा० भा०-- अपात् वज्रेण च्छिन्नत्वात् पादरहितः अहस्तः हस्तरहितः वृत्रः इन्द्रम् उद्दिश्य अपृतन्यत् पृतनां युद्धम् ऐच्छत् । द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः । अस्य हस्तपादहीनस्य वृत्रस्य सानौ पर्वतसानुसदृशे प्रौढ़स्कन्धे अधि उपरि वज्रम् आ जघान इन्द्रः आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्यापि युद्धेच्छायां दृष्टान्तः । वध्रिः छिन्नमुष्कः पुरुषः वृष्णः रेतः सेचनसमर्थस्य पुरुषान्तरस्य प्रतिमानं सादृश्यं बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । सः वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्तः विविधं क्षिप्तः ताडितः सन् अशयत् भूमौ पतितवान् ॥ अपात् । बहुव्रीहौ पादशब्दस्य अन्त्यलोपश्छान्दसः । अहस्तः । बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । अपृतन्यत् । 'सुप आत्मनः क्यच्' । 'कव्यध्वरपृतनस्य' इति अन्त्यलोपः । बुभूषन् । 'सनि ग्रहगुहोश्च' (पा० सू० ७.२.१२) इति इट्प्रतिषेधः । पुरुत्रा । 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' (पा० सू० ५.४.५६) इति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन पर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्मैपदम् । 'बहुलं छन्दसि' इति शपो लुगभावः । व्यस्तः । 'असु क्षेपणे' इत्यस्मात् कर्मणि क्तः । 'यस्य विभाषा' इति इट्प्रतिषेधः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । संहितायाम् 'उदात्तस्वरितयोर्यणः' इति परस्यानुदात्तस्य स्वरितत्वम् ॥

शब्दा०—अपात्=पैर रहित, अहस्तः=हाथ रहित, अपृतन्यत्=युद्ध करना चाहा, इन्द्रम्=इन्द्र के साथ, अस्य=उस वृत्र के, वज्रम्=वज्र को, अधि सानौ=कंधे पर, जघान=प्रहार किया, वृष्णः=शक्तिशाली, वध्रिः=वधिया किया हुआ, नपुंसक, प्रतिमानम्=समान, बुभूषन्=होने की इच्छा करता हुआ, पुरुत्रा=कई स्थानों पर, वृत्रः=वृत्र, अशयत्=पड़ गया, व्यस्तः=बिखरे अंग वाला होकर ।

हि० अ०—पैर-रहित तथा हाथ-रहित (वृत्र) ने इन्द्र से युद्ध करना चाहा; (इन्द्र ने) उस (वृत्र) के कंधे पर वज्र से प्रहार किया । एक नपुंसक शक्तिशाली की समानता करने की इच्छा करता हुआ वृत्र कई स्थानों में बिखरे अंग वाला (पृथिवी पर) पड़ गया ।

Trans.—Footless and handless (Vṛtra) desired to fight with Indra (who) struck the thunderbolt upon his (Vṛtra's) shoulder. (Like) an emasculate desiring to be equal of a vigorous, Vṛtra lay down with limbs scattered in many places.

Notes—**अपात्, अहस्तः**—Bahuvrīhi compds. accented on the second member (**नञ्सुभ्याम्**—Pāṇ. VI. 2.172). **अपृतन्यत्**—Denom. from √**पृतना** to fight, impf. 3rd. sing. **सानौ**—According to Yāsk **सानु** means a mountain-top, for it is raised on high, or it is pushed up in a mass (**सानु समुच्छ्रितं भवति । समुन्नुन्नमिति वा**—Nir. II. 24); Kṣīrasvāmī explains **सानु** as 'that which gives pleasure' (**सनोति ददाति सुखं सानुः**—Amarakośa II. 3.5); 'mountain-like shoulder' (Wilson), 'shoulder' (Griffith), 'back' (Peterson). **जघान**—√*han* to kill, perf. 3rd. sing.. **बुभूषन्**—√*bhū* to be, desid. pres. part. **पुरुत्रा**—In many places;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the termination त्रा with the words देव, मनुष्य, पुरुष, पुरु, and मर्त्य expresses the locative sense (देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्—Pāṇ. V. 4.56.). अशयत्—√*śī* to lie, impf. 3rd. sing. व्यस्तः—Past part. from वि+√*as* to scatter; if a word ending in क्त in objective sense, is compounded with a preposition, the latter is accented गतिरनन्तरः—Pāṇ. VI. 2.49). In the combination of उदात्त and अनुदात्त the latter becomes स्वरित in the case of क्षैप्र सन्धि.

नदम् । न । भिन्नम् । अमुया । शयानम् । मनः । रुहाणाः । अति । यन्ति । आपः ॥ याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासाम् । अहिः । पत्सुतःऽशीः । बभूव ॥८॥

सा० भा०—अमुया अमुष्यां पृथिव्यां शयानं पतितं मृतं वृत्रम् आपः जलानि अति यन्ति अतिक्रम्य गच्छन्ति । तत्र दृष्टान्तः । भिन्नं बहुधा भिन्नकूलं नदं न सिन्धुमिव । यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वा अतिक्रम्य गच्छन्ति तद्वत् । कीदृश्य आपः । मनो रुहाणाः नृणां चित्तमारोहन्त्यः । पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवन्ति तदानीं नृणां मनः खिद्यते । मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लङ्घ्य प्रवहन्ति । तदा वृष्टिलाभेन मनुष्यास्तुष्यन्तीत्यर्थः । तदेतदुत्तरार्धेन स्पष्टीक्रियते । वृत्रः जीवनदशायां महिना स्वकीयेन महिम्ना याश्चित् या एव मेघगताः अपः पर्यतिष्ठत् परिवृत्य स्थितवान् अहिः वृत्रो मेघः तासाम् अपां पत्सुतःशीः पादस्याधःशयानः बभूव । यद्यप्यपां पादो नास्ति तथाप्यद्भिर्वृत्रस्य अभिलङ्घितत्वात् पादस्याधः शयनमुपपद्यते । भिन्नम् । 'रदाभ्यां निष्ठातो नः' (पा० सू० ८. २. ४२) इति नत्वम् । अमुया । 'सुपां सुलुक्' इति सप्तम्या याजादेशः । शयानम् । 'शीङः सार्वधातुके गुणः' (पा० सू० ७. ४. २१) । धातोर्ङित्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । रुहाणाः 'रुह बीजजन्मनि प्रादुर्भावे' । व्यत्ययेन शानच् । कर्तरि शपि प्राप्ते व्यत्ययेन शः । 'अनित्यमागमशासनम्' इति वचनात् मुगभावः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः । महिना । 'मह पूजायाम्' । 'इन्सर्वधातुभ्यः' इति इन्प्रत्ययः । व्यत्ययेन विभक्तेरुदात्तत्वम् । यद्वा । महिना महिम्ना ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महच्छब्दस्य पृथ्वादिषु पाठात् 'तस्य भावः' इत्येतस्मिन्नर्थे 'पृथ्वादिभ्य इमनिज्वा' (पा० सू० ५. १. १२२) इति इमनिच् प्रत्ययः। 'टेः' इति टिलोपः। 'चितः' इत्यन्तोदात्तत्वम्। तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम्। मकारलोपश्छान्दसः। पत्सुतःशीः। पादस्याधः शेते इति पत्सुतःशीः। 'क्विप् च' इति क्विप्। तसि 'पद्दन्' इत्यादिना पादशब्दस्य पदादेशः। 'शस्प्रभृतिषु' इति प्रभृतिशब्दः प्रकारवचनः इति शलादोषणी इत्यत्रापि दोषन्नादेशो भवति इत्युक्तत्वात् (का० ६. १. ६३)। मध्ये सु इति शब्दोपजनश्छान्दसः। यद्वा। पादशब्दस्य सप्तमी बहुवचने पदादेशे कृते 'इतराभ्योऽपि दृश्यन्ते' (पा० सू० ५. ३. १४) इति सप्तम्यर्थे तसिल्। लुगभावश्छान्दसः।

शब्दा०— नदम्=नदी, न=तरह, भिन्नम्=कई भागों में कटे हुये, अमुया=इस (पृथिवी) पर, शयानम्=पड़े हुये (वृत्र) को, मनः=मन को रुहाणाः=आकर्षित करते हुये, अति=पारकर, यन्ति=बह रहा है, आपः जल; याः=जिनको, चित्=निश्चित् अर्थ का वाचक एक निपात, वृत्रः= वृत्र, महिना=पराक्रम से, महानता से, पर्यतिष्ठत्=चारो तरफ से घेरे हुये था, तासाम्=उन्ही के, अहिः=राक्षस, पत्सुतःशीः=पैरों के नीचे पड़ा हुआ, बभूव=हो गया।

हि० अ०— विभक्त नदी की तरह, मन को आकर्षित करता हुआ, इस (पृथिवी) पर पड़े हुये (वृत्र) को पार कर, पानी बह रहा है। जिन जलों को वृत्र अपने पराक्रम से चारो तरफ से घेरे हुये था, (आज) अहि उन्हीं जलों के पैरों के नीचे पड़ा हुआ बन गया है।

Trans.—Like a broken river attracting the minds (of men) the waters flow across (Vṛtra), lying on the earth. (Waters) which Vṛtra had surrounded by his greatness, (now) the dragon became prostrated beneath their very feet.

Notes—नदम्—According to Oldenberg नद means a bellowing or neighing bull or horse. न—A particle in the sense of इव always comes after the standard of comparison (उपरिष्टादुपचारस्तस्य येनोपमिमीते—Nir. I. 4).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिन्नम् Past part. from √*bhid* to split. अमुया—Wilson, following Sāyaṇa tranlsates as 'on this earth'; Griffith takes it to mean 'as' and Peterson 'in that manner'; Geldener thinks it to mean 'lying just that way' i.e. naked, unburied. शयानम्—√*śī* to lie, pres. part. acc. sing. नदं न भिन्नममुया शयानम्—Following Sāyaṇa Wilson translates, 'recumbent on this earth, as a river (bursts through) its broken (banks)'; Griffith renders as, 'there as he lies like a bank-bursting river'; according to Peterson 'while he lay like a bull hacked to piecees in that manner. मनो रुहाणाः—√*ruh* to ascend, root-aorist part. Sāyaṇa renders it by नृणां चित्तमारोहन्त्यः, 'that delights the minds' (Wilson), obtaining (mastery over) their wills (St. Petersburg Dict.), 'rising as they listed' (Grassmann), 'taking heart' (Geldner), 'flowing for Manu' (Oldenberg), 'taking courage' (Griffith), 'flowing for mankind's sake' (Peterson). महिना—Instru. sing of महिमन्; the penultimate म् is optionally dropped (cf. महिम्ना, मह्ना). परि अतिष्ठत्—√*sthā* with परि to surround; not unaccented because preceded by या (यद्वृत्तान्नित्यम् Pāṇ. VIII. 1.66); the preposition, compounded with such verbs, is unaccented (तिङिचोदात्तवति Pāṇ. VIII.1.71). पत्सुतःशीः—पत्सु is formed from पाद which becomes पत् (पद्दन्०—Pāṇ. VI. 1.63) with insertaion of सु; or it may be the loc. plu. form of पाद; in both the cases तसिल् is added; शीः √*śī*+क्विप्. The compd. is Tatpuruṣa (पादस्याधः शेते इति पत्सुतःशीः); hence, accent on the last syllable (समासस्य—Pāṇ. VI. 1.223). बभूव—√*bhū* to be, perf. 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीचाऽवयाः । अभवत् । वृत्रऽपुत्रा । इन्द्रः । अस्याः । अव । वधः । जभार ॥ उत्ऽतरा । सूः । अधरः । पुत्रः । आसीत् । दानुः । शये । सहऽवत्सा । न । धेनुः ॥९॥

सा० भा०—वृत्रपुत्रा वृत्रः पुत्रो यस्याः मातुः सेयं माता वृत्रपुत्रा नीचावयाः न्यग्भावं प्राप्ता हता अभवत् पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः । तदानीम् अयम् इन्द्रः अस्याः मातुः अव अधोभागे वृत्रस्योपरि वधः हननसाधनमायुधं जभार प्रहृतवान् । तदानीं सूः माता उत्तरा उपरिस्थिता आसीत् । पुत्रः तु अधोभागस्थितः आसीत् । सा च दानुः दानवी वृत्रमाता शये मृता शयनं कृतवती । तत्र दृष्टान्तः । धेनुः लोकप्रसिद्धा गौः सहवत्सा न यथा वत्ससहिता शयनं करोति तद्वत् ॥ नीचावयाः । वेति खादतीति वयो बाहुः औणादिकः असि प्रत्ययः । न्यञ्चौ वयसौ यस्याः सा नीचावयाः । न्यच्शब्दादुत्तरस्या विभक्तेः 'सुपां सुपो भवन्ति' इति तृतीयैकवचनादेशः । 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम् । 'अञ्चैश्छन्दस्यसर्वनामस्थानम्' (पा० सू० ६.१.१७०) इति तस्योदात्तत्वम् । समासे लुगभावश्छान्दसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । नीचौ निकृष्टौ वयसौ यस्याः सा । पूर्वपदस्य दीर्घश्छान्दसः । वधः । हन्यतेऽनेनेति वधः । असुनि हन्तेर्वधादेशः । नित्त्वादाद्युदात्तत्वम् । जभार । 'हृग्रहोर्भः' इति भत्वम् । सूः । 'षूङ् प्राणिगर्भविमोचने' । सूते गर्भं विमुञ्चतीति सूः माता । 'क्विप् च' इति क्विप् । दानुः । 'दो अवखण्डेन' । 'दाभाभ्यां नुः' (उ० सू० ३.३१२) । शये । लटि 'लोपस्त आत्मनेपदेषु' (पा० सू० ७.१.४१) इति तलोपः । 'शीङः सार्वधातुके' इति गुणे अयादेशः ॥

शब्दा०—नीचावया=नीचे की ओर हाथ वाली, क्षीण होती हुई शक्ति वाली, अभवत्=हुई, वृत्रपुत्रा=वृत्र है पुत्र जिसका, वृत्र की माता, इन्द्रः=इन्द्र ने, अस्याः=उसके, अव=नीचे, वधः=शस्त्र, जभार=प्रहार किया, उत्तरा=ऊपर, सूः=माता, अधरः=नीचे, पुत्रः=पुत्र, आसीत्=था, दानुः=वृत्र की माता, शये=पड़ी है, सहवत्सा=बछड़े के साथ, न=तरह, धेनुः=गाय ।

हि० अ०—वृत्र की माता ने (पुत्र की रक्षा के लिये) नीचे की तरफ हाथों को कर लिया । इन्द्र ने उसके नीचे (वृत्र के उपर) शस्त्र का प्रहार किया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माता ऊपर थी, पुत्र नीचे था। दानु (वृत्र की माता) बछड़े के साथ गाय की तरह पड़ी है।

Trans.—The mother of Vṛtra became with hands downward; Indra struck (his) weapon below her. The mother was above, the son below; the demoness lies like a cow with her calf.

Notes—नीचावया—According to Sāyaṇa वया means hands; hands are called वया because food is taken to mouth with them (वेति खादतीति वयो बाहुः). Thus he takes नीचावया to mean 'with hands downdard' i.e. bent over'; 'of humbled strength' (Griffith), 'with vital energy on the decline' (Peterson); Bahuvrīhi compd. (न्यञ्चौ वयसौ यस्याः सा or नीचौ निकृष्टौ वयसौ यस्याः सा). वृत्रपुत्रा—Having Vṛtra as her son (वृत्रः पुत्रो यस्याः मातुः सा) Bahuvrīhi compd. accented on the first member. अव—'Nether part' (Wilson); Peterson construes it with जभार and renders as 'hurled down' while Sāyaṇa explains it with अस्याः (अस्याः मातुः अव अधोभागे वत्रस्योपरि). जभार—√*bhṛ* to bear, perf. 3rd. sing. आसीत्—√*as* to be, impf. 3rd. sing. शये—√*śī* to lie, mid. pres. 3rd. sing. सहवत्सा—Bahuvrīhi compd. accented on the first member.

अतिष्ठन्तीनाम्। अनिऽवेशनानाम्। काष्ठानाम्। मध्ये। निऽहितम्। शरीरम्॥ वृत्रस्य। निण्यम्। वि। चरन्ति। आपः। दीर्घम्। तमः। आ। अशयत्। इन्द्रऽशत्रुः॥१०॥

सा० भा०—वृत्रस्य शरीरम् आपः वि चरन्ति विशेषण उपरि आक्रम्य प्रवहन्ति। कीदृशं शरीरम्। निण्यं निर्नामधेयम्। अप्सु मग्नत्वेन गूढत्वात् तदीयं नाम न केनापि ज्ञायते। एतदेव स्पष्टीक्रियते। काष्ठानाम् अपां मध्ये निहितं निक्षिप्तम्। कीदृशानां काष्ठानाम्। अतिष्ठन्तीनां स्थितिरहितानां अनिवेशनानाम् उपवेशनरहितानां प्रवहणस्वभावत्वात् एतासां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनुष्यवन्न क्वापि स्थितिः संभवति । इन्द्रशत्रुः वृत्रः जलमध्ये शरीरे प्रक्षिप्ते सति दीर्घं तमः दीर्घं निद्रात्मकं मरणं यथा भवति तथा आशयत् सर्वतः पतितवान् ॥ अतिष्ठन्तीनाम् । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अनिवेशनानाम् । निविशन्तेऽस्मिन्निति निवेशनं स्थानम् । 'करणाधिकरणयोश्च' इति अधिकरणे ल्युट् । तद्रहितानाम् । बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । क्रान्त्वा स्थिताः काष्ठाः । पृषोदरादि । निहितम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । अत्र यास्कः—अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरं श्रृणातेः शम्नातेर्वा । वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः । तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिकाः (निरु० २.१६) इति ॥

शब्दा०—अतिष्ठन्तीनाम्=कभी न रुकने वाले, अनिवेशनानाम्=कभी आराम न करने वाले, काष्ठानाम्=जलों के, मध्ये=बीच, निहितम्=पड़े हुये, शरीरम्=शरीर के, वृत्रस्य=वृत्र के, निण्यम्=नामरहित, विचरन्ति=इधर-उधर बह रहा है, आपः=जल, दीर्घम्=घनघोर, बड़े, तमः=अन्धकार में, आ अशयत्=सो गया, इन्द्रशत्रुः=वृत्र ।

हि०अ०—कभी न रुकने वाली तथा कभी आराम न करने वाली जलधारा के बीच पड़े हुए वृत्र के नाम रहित शरीर के इधर-उधर ऊपर जल बह रहा है । इन्द्र के द्वारा सताया गया वृत्र दीर्घ अन्धकार में सो गया ।

Trans.—The waters flow over the Vṛtra's nameless body placed amidst the never-stopping, never-resting currents. (Vṛtra), tormented by Indra lay in long darkness.

Notes—अतिष्ठन्तीनाम्—Never-stopping, ceaseless; नञ् compd. accented on the first member (अव्यये नञ्कुनिपातानाम् Vārtika on Paṇ VI. 2.2). नञ् compd. is not analysed by avagraha, in the Pada-text. अनिवेशनानाम्—Having no resting place ; Bahuvrīhi compd. with अ or अन् as the first member, accents the second member (नञ्सुभ्याम् Paṇ. VI. 2.172). काष्ठानाम्—In the Nighaṇṭu (I. 6.5)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काष्ठा is enumerated in the list of the names of direction. According to Yāaka a good many things are called काष्ठ—'काष्ठा दिशो भवन्ति । काष्ठा उपदिशो भवन्ति । आदित्योऽपि काष्ठोच्यते । आज्यन्तोऽपि काष्ठोच्यते । आपोऽपि काष्ठा उच्यन्ते' (Nir. II. 15.) According to kṣīrasvāmī काष्ठा means—(I) a direction (2) a certain measure of time (3) preeminence and (4) boundary (see Amarakośa I. 2.2 ; I. 3.11 ; III. 3.41 ; I. 2.6) ; MWD. takes काष्ठा to mean 'a place for running', 'race ground' 'the course of the wind and cloud in the atmosphere.' Griffith takes it to mean 'current'. निहितम्—see notes on निहिताः (I. 24. 7.) विचरन्ति—√*car* to move, pres. 3rd. plu.

दासऽपत्नीः । अहिःऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः । पणिनाऽइव । गावः ॥ अपाम् । बिलम् । अपिऽहितम् । यत् । आसीत् । वृत्रम् । जघन्वान् । अप । तत् । ववार ॥११॥

सा० भा०—दासपत्नीः दासः विश्वोपक्षपणहेतुः वृत्रः पतिः स्वामी यासाम् अपां ताः दासपत्नीः । अत एव अहिगोपाः । अहिर्वृत्रो गोपा रक्षको यासां ताः । गोपनं नाम स्वच्छन्देन यथा न प्रवहन्ति तथा निरोधनम् । एतदेव स्पष्टीक्रियते । आपः निरुद्धा अतिष्ठन् इति । तत्र दृष्टान्तः । पणिनेव गावः । पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः । अपां यत् बिलं प्रवहणद्वारम् अपिहितं वृत्रेण निरुद्धम् आसीत् तत् बिलं प्रवहणद्वारं वृत्रं जघन्वान् हतवान् इन्द्रः अप ववार अपवृतमकरोत् वृत्रकृतमपां निरोधं परिहृतवान् । अत्र यास्कः—दासपत्नीर्दासाधिपत्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः । अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्हसितोपसर्ग आहन्तीति । निरुद्धा आपः पणिनेव गावः । पणिर्वणिग्भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा । यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते' (निरु० २. १७) इति ॥ दासपत्नीः । 'दसु उपक्षये' । दासयतीति दासो वृत्रः । पचाद्यच् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'चितः' इत्यन्तोदात्तत्वम् । दासः पतिर्यासाम् । 'विभाषा सपूर्वस्य' (पा० सू० ४. १. ३४) इति ङीप्; तत्संनियोगेन इकारस्य नकारः । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वम् । यद्वा दासस्य पालयित्र्यः । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृति स्वरत्वम् । अहिगोपाः । 'गुपू रक्षणे' । गोपायतीति गोपाः । 'आयादय आर्ध-धातुके वा' (पा० सू० ३. १. ३१) इति आयप्रत्ययः । ततः क्विप् । 'अतो लोपः' । 'वेरपृक्तलोपाद्वलि लोपो बलीयान्' इति पूर्वं यकार लोपः (पा० सू० ६. १. ६६–६७) । न च 'अचः परस्मिन्' इति अतो लोपस्य स्थानिवत्त्वं 'न पदान्तद्विर्वचन' इति प्रतिषेधात् । अहिर्गोपा यासाम् । पूर्ववत् स्वरः । निरुद्धाः । 'रुधिर् आवरणे' । 'झषस्तथोर्धोऽधः' (पा० सू० ८. २. ४०) इति निष्ठात-कारस्य धकारः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । जघन्वान् । हन्तेर्लिटः क्वसुः । 'अभ्यासाच्च' (पा० सू० ७. ३. ५५) इति अभ्यासादुत्तरस्य हकारस्य कुत्वम् । क्रादिनियमप्राप्तस्य इटः 'विभाषा गमहन' (पा० सू० ७. २. ६८) इत्यादिना विकल्पविधानादभावः । संहितायां नकारस्य रुत्वानु-नासिकावुक्तौ ॥

शब्दा०—दासपत्नीः=दास है स्वामी जिनका, अहिगोपाः=अहि है रक्षक जिनका, अतिष्ठन्=पड़ा था, निरुद्धाः=रुका हुआ, आपः=जल, पणिनेव गावः=पणियों द्वारा रोकी गई गायों की तरह, अपाम्=जलों का, बिलम्=मार्ग, सुरंग, अपिहितम्=बन्द हो गया, यत्=जो, आसीत्=था, वृत्रम्=वृत्र को, जघन्वान्=मारकर, तत्=उसको, अपववार=खोला ।

हि० अ०—दास है पति जिनका तथा अहि है रक्षक जिनका ऐसा जल रुका हुआ पड़ा था, जिस प्रकार गायें पणियों द्वारा (रोक ली गई थीं); जल का मार्ग जो बन्द हो गया था वृत्र को मारकर (इन्द्र ने) उसे खोला ।

Trans.—The waters, wives of the slave, having a dragon as their protector, stood obstructed like the cows (confined) by the Paṇis. The hole of the waters, which was concealed, having killed Vṛtra (Indra) made it open.

Notes—दासपत्नीः—Having slave as their lord; Bahu-vrīhi compd. accented on the first member. अहिगोपाः—Having Ahi as their protector; Bahuvrīhi compd. accented on the first member. अतिष्ठन् —√*sthā* to stand,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

impf. 3rd. plu. निरुद्धाः—√*rudh* to obstruct, past part.; for accent see निहिताः (I. 24.7). बिलम्—From √*bhṛ* to bear (बिलं भरं भवति बिभ्रतेः Nir. II. 17). अपिहितम्—√*dhā* to put, past part; for accent see निहिताः (I. 24.7). आसीत्—√*as* to be, impf. 3rd. sing; not unaccented because preceded by यत्. जघन्वान्—√*han* to kill, perf. part. अप ववार—√*vṛ* with अप to uncover, perf. 3rd. sing.

अश्व्यः । वारः । अभवः । तत् । इन्द्र । सृके । यत् । त्वा । प्रतिऽअहन् । देवः । एकः ॥ अजयः । गाः । अजयः । शूर । सोमम् । अव । असृजः । सर्तवे । सप्त । सिन्धून् ॥१२॥

सा० भा०—सृके वज्रे । 'सृकः वृकः' (नि० २. २०. ६) इति वज्रनामसु पठितत्वात् देवः दीप्यमानः सर्वायुधकुशलः एकः अद्वितीयः वृत्रः यत् यदा त्वा त्वां प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् तत् तदानीं त्वम् अश्व्यो वारः अश्वसंबन्धी वालः अभवः । यथाश्वस्य वालोऽनायासेन मक्षिकादीन्निवारयति तद्वत् वृत्रमगणयित्वा निराकृतवानित्यर्थः । किं च गाः पणिनापहृताः त्वम् अजयः जितवान् । हे शूर शौर्ययुक्त इन्द्र सोमम् अजयः जितवान् । तथा च तैत्तिरीयाः—'त्वष्टा हतपुत्रः' इत्येतस्मिन्नुपाख्याने समामनन्ति—'स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्' (तै० सं० २. ४. १२. १) इति । सप्त सिन्धून् 'इमं मे गङ्गे' (ऋ० सं० १०. ७५. ५) इत्यस्यामृच्याम्नाता गङ्गाद्याः सप्तसंख्याका नदीः सर्तवे सर्तुं प्रवाहरूपेण गन्तुम् अवासृजः त्यक्तवान् । वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः ॥ अश्व्यः । अश्वे भवः । 'भवे छन्दसि' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । वारयति दंशमशकानिति वारः । पचाद्यच् । कपिलकादित्वात् लत्वविकल्पः (पा० म० ८. २. १८) । वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् । 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः । 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम् । अजयः । गाः इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य 'तिङ्ङतिङः' इति निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (पा० सू० ८. १. १८. ५) इति वचनात् । सर्तवे । 'तुमर्थे सेसेन्' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

शब्दा०—अश्व्यः=अश्व के, वारः=बाल, अभवः=हो गये, तत्=उस

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समय, इन्द्र=ओ इन्द्र, सृके=वज्र पर, यत्=जिस समय, त्वा=तुम्हारे, प्रत्यहन्=प्रहार किया, देवः=देव, एकः=अद्वितीय; अजयः=जीता, गाः=गायों को, अजयः=जीता, शूर=ओ बहादुर, सोमम्=सोम को, अव=नीचे की ओर, असृजः=प्रवाहित किया, सर्तवे=बहने के लिये, सप्त=सात, सिन्धून्=नदियों को।

हि० अ०—ओ इन्द्र, जिस समय (वृत्र ने) तुम्हारे वज्र पर उलटा प्रहार किया उस समय (तुम) अद्वितीय देव घोड़े की पूंछ के बाल बन गये। (तुमने) गायें जीती, ओ बहादुर, (तुमने) सोम जीता तथा सात नदियों को प्रवाहित होने के लिये मुक्त किया।

Trans.—O Indra, then, thou, the sole god, became the hair of the horse's tail, when he smote thee on thy thunderbolt in return. (Thou) won the cows, o hero, won the Soma, and released the seven rivers to flow.

Notes—अश्व्यः—Formed from अश्व with the suffix यत्. वारः—From √*vṛ* to protect; here अश्व्यो वारः is used metaphorically to mean 'Indra acted quickly in self defence' or brushed him aside quickly. अभवः—√*bhū* to be, impf. 2nd. sing. प्रत्यहन्—√*han* with प्रति to attack in return, impf. 3rd. sing.; not unaccented because preceded by यत् (see notes on पर्यतिष्ठत् (I. 32.8). अजयः—√*ji* to conquer, impf. 2nd. sing.; not unaccented because it comes at the beginning of the Pāda; the following अजयः too, is not unaccented, for it begins a new sentence. असृजः—√*sṛj* to emit, impf. 2nd. sing. सर्तवे—Dative infinitive in तवे from √*sṛ* to flow.

न। अस्मै। विऽद्युत्। न। तन्यतुः। सिसेध। न। याम्। मिहम्। अकिरत्। ह्रादुनिम्। च॥ इन्द्रः। च। यत्। ययधाते इति। अहिः। च। उत। अपरीभ्यः। मघऽवा। वि। जिग्ये॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—इन्द्रं निषेद्धुं वृत्रो यान् विद्युदादीन् मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः। सोऽयमर्थोऽनेन मन्त्रेणोच्यते। अस्मै इन्द्रार्थं निर्मिता विद्युत् न सिषेध इन्द्रं न प्राप्नोत्। तथा तन्यतुः गर्जनं यां मिहं सेचनं यां वृष्टिम् अकिरत् वृत्रो विक्षिप्तवान् सापि वृष्टिः न सिषेध। ह्रादुनिं च अशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध। इन्द्रश्च अहिश्च इन्द्रवृत्रावुभावपि यत् यदा युयुधाते युद्धं कृतवन्तौ। तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः। उत अपि च मघवा धनवानिन्द्रः अपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मितानां मायानां सकाशात् वि जिग्ये विशेषेण जितवान्॥ सिषेध। 'षिधु गत्याम्'। मिहम्। 'मिह सेचने'। मेहति सिञ्चतीति मिट् वृष्टिः। 'क्विप् च' इति क्विप्। अकिरत्। 'कॄ विक्षेपे'। 'तुदादिभ्यः शः'। 'ऋत इद्धातोः' इति इत्वम्। अडागम उदात्तः। यद्वृत्त-योगादनिघातः। युयुधाते। 'युध संप्रहारे'। लिटि प्रत्ययस्वरः। जिग्ये। 'सन्लिटोर्जेः' (पा० सू० ७.३.५७) इति अभ्यासादुत्तरस्य जकारस्य कुत्वम्॥

शब्दा०—न=नहीं, अस्मै=उस (इन्द्र) के लिये, विद्युत्=विजली, न=न तो, तन्यतुः=गर्जन, सिषेध=सफल हो सका, न=न तो, याम्=जिसको, मिहम्=मेघ, अकिरत्=फैलाया था, ह्रादुनिम्=वज्र, च=और इन्द्रः=इन्द्र, च=और, यत्=जिस समय, युयुधाते=एक साथ लड़े, अहिः=राक्षस, बादल, च=और, उत=और, अपरीभ्यः=अन्य (प्रहारों को भी), मघवा=महान् (इन्द्र) ने, वि जिग्ये=जीता।

हि० अ०—उस समय न तो विजली, न गर्जन, न मेघ और न वज्र ही जिनको (वृत्र ने) उस (इन्द्र) के लिये फैलाया था, सफल हो सका, जब इन्द्र तथा अहि दोनों एक साथ लड़े। और महान् (इन्द्र) ने (वृत्र द्वारा प्रयुक्त) अन्य प्रहारों पर भी विजय प्राप्त की।

Trans.—Neither lightning nor thunder, nor rain, nor the thunderbolt, which (Vṛtra) had spread around him, could avail (Indra), when Indra and Ahi fought together. And the bounteous one conquered also over other (attacks).

Notes—सिषेध—√*sidh* to avail, perf. 3rd. sing. ह्रादुनिम्—'Thunderbolt' (Sāyaṇa), 'hailstorm' (Griffith). अकिरत्—√*kṝ* to scatter, impf. 3rd. sing.; not un-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

accented because preceded by याम्. युयुधाते —√*yudh* to fight, mid. perf. 3rd. dual; not unaccented because preceded by यत्. ई, ऊ and ए forming the dual ending are called Pragṛhya (ईदूदेद् द्विवचनं प्रगृह्यम् Pāṇ. I. 1.11); hence, in the Pada-text इति is added after युयुधाते. उत–The use of उत here shows that the sentence beginning with उत is not connected with preceding one i.e. the 3rd. Pāda. Sāyaṇa takes a, b, and c in continuation and d as a separate sentence. अपरीभ्यः—Griffith takes it to mean 'for ever' and Peterson as 'for all time to come'. जिग्ये—√*ji* to conquer, mid. perf. 3rd. sing.

अहेः । यातारम् । कम् । अपश्यः । इन्द्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् ॥ नव । च । यत् । नवतिम् । च । स्रवन्तीः । श्येनः । न । भीतः । अतरः । रजांसि ॥१४॥

सा० भा०—हे इन्द्र जघ्नुषः वृत्रं हतवतः तव हृदि चित्ते यत् यदि भीरगच्छत् न हतवानस्मीति बुद्ध्या भयं प्राप्नुयात् तर्हि अहेः वृत्रस्य यातारं हन्तारं कमपश्यः त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि । तादृशस्य पुरुषान्तरस्याभावात् मा भूत् तव भयमित्यर्थः । यत् यस्मात् कारणात् त्वं नव च नवतिं च स्रवन्तीः एकोनशतसंख्याकाः प्रवहन्तीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकानि अतरः तीर्णवानसि । तत्र दृष्टान्तः । श्येनो न । श्येननामको बलवान पक्षीव दूरगमनात्तव भयमासीदिति गम्यते । तद्भयं मा भूदित्यभिप्रायः । तच्च दूरगमनं ब्राह्मणे समाम्नातम्—'इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छत्' (ऐ० ब्रा० ३.१५) इति । तैत्तिरीयाश्चामनन्ति—'इन्द्रो वृत्रं हत्वा परां परावतमगच्छदपराधमिति मन्यमानः' (तै०स० २.५.३.६) इति ॥ हृदि । 'पद्दन्' इत्यादिना हृदयशब्दस्य हृदादेशः । 'ऊडिदम्' इत्यादिना विभक्तेरुदात्तत्वम् । जघ्नुषः । हन्तेर्लिटः क्वसुः । षष्ठ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणपरपूर्वत्वे । 'शासिवसिघसीनां च' इति षत्वम् । न च 'षत्वतुकोरसिद्धः' (पा० सू० ६.१.८६) इत्येकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यं, 'संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः' (का० ६.१.८६.१)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति असिद्धवद्भावस्य प्रतिषिद्धत्वात् । 'गमहन्' इत्यादिना उपधालोपः । न च 'असिद्धवदत्रा भात्' इति संप्रसारणस्यासिद्धवद्भावः, भिन्नाश्रयत्वात् । संप्रसारणं हि षष्ठ्येकवचने उपधालोपस्तु वसाविति भिन्नाश्रयत्वम् । स्रवन्तीः । 'स्रु गतौ' । 'शप्श्यनोर्नित्यम्' (पा० सू० ७.१.८१) इति नुमागमः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वम् । अतरः । यद्-वृत्तयोगादनिघातः ॥

शब्दा०—अहेः=राक्षस के, यातारम्=अनुयायी, सहायक, कम्=किस को, अपश्यः=देखा, इन्द्र=ओ इन्द्र, हृदि=हृदय में, यत्=जिससे ते=तुम्हारे, जघ्नुषः=मारने वाले के, भीः=भय, अगच्छत्=गया, प्रवेश किया, नव च नवतिम्=नौ और नब्बे अर्थात् निन्यानबे, स्रवन्तीः=नदियों को, श्येनः=श्येन पक्षी, न=तरह, भीतः=डरे हुये, अतरः=पार कर गये, रजांसि=अन्तरिक्ष को ।

हि० अ०—ओ इन्द्र, अहि के किस अनुयायी (सहायक) को तुमने देखा कि (वृत्र को) मारने वाले, तुम्हारे हृदय में भय प्रवेश कर गया; कि भयभीत होकर ९९ नदियों तथा अन्तरिक्ष को (तुम) श्येन की तरह पार कर गये ।

Trans.—O Indra, what follower of Ahi did thou see, that a fear entered the heart of thee, the killer ; that thou affrighted crossed the nine and ninety streams and the aerial regions like a falcon.

Notes—यातारम्—Derived from √*yā* to go by adding the suffix तृच्, acc. sing ; 'killer' (Sāyaṇa), 'destroyer' (Wilson), 'avenger (SPD.). 'follower' (Parāñjpe). अपश्यः—√*paś* to see, impf. 2nd. sing. जघ्नुषः—Gen. sing. perf. part. of जघ्निवस् from √*han* to kill. अगच्छत्—√*gam* to go, impf. 3rd. sing. ; not unaccented because preceded by यत्. स्रवन्तीः—√*sṛ* to flow, pres. part. भीतः—√*bhī* to fear, past part. अतरः—√*tṝ* to cross, impf. 2nd. sing.; not unaccented because preceded by यत्.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृङ्गिणः । वज्रऽबाहुः ॥ सः । इत् । ऊँ इति । राजा । क्षयति । चर्षणीनाम् । अरान् । न । नेमिः । परि । ता । बभूव ॥१५॥

सा० भा०—वज्रबाहुः इन्द्रः शत्रौ हते सति निःसपत्नो भूत्वा यातः गच्छतो जङ्गमस्य अवसितस्य एकत्रैव स्थितस्य स्थावरस्य शमस्य शान्तस्य शृङ्गराहित्येन प्रहरणादावप्रवृत्तस्याश्वगर्दभादेः शृङ्गिणः शृङ्गोपेतस्योग्रस्य महिष-बलीवर्दादेश्च राजा अभूत् । सेदु स एवेन्द्रः चर्षणीनां मनुष्याणां राजा भूत्वा क्षयति निवसति । ता तानि पूर्वोक्तानि जङ्गमादीनि सर्वाणि परि बभूव व्याप्तवान् । तत्र दृष्टान्तः । अरान् न नेमिः । यथा रथचक्रस्य परितो वर्तमाना नेमिः अरान् नाभौ कीलितान् काष्ठविशेषान् व्याप्नोति तद्वत् ॥ यातः । 'या प्रापणे' याति गच्छतीति यात् । लटः शतृ । 'सावेकाचः' इति विभक्तेरुदात्तत्वम् । सः । 'सोऽचि लोपे चेत्' इति संहितायां सोर्लोपः । ता । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । बभूव । भवतेर्लिटो णलि 'भवतेरः' (पा० सू० ७. ४. ७३) इति अभ्यासस्य अत्वम् । कृताकृतप्रसङ्गितया वुगागमस्य नित्यत्वात् वृद्धेः पूर्वं वुगागमः । यद्वा । 'इन्धिभवतिभ्यां च' (पा० सू० १. २. ६) इति लिटः कित्त्वात् वृद्ध्यभावः । न च 'असिद्धवदत्रा भात्' इति तस्या-सिद्धत्वात् उवङादेशः शङ्कनीयः, 'वुग्युटावुवङ्यणोः सिद्धौ भवतः' (पा० सू० ६. ४. २२. १४) इति तस्य सिद्धत्वात् । 'तिङ्ङतिङः' इति निघातः ॥

शब्दा०—इन्द्रः=इन्द्र, यातः=जाने वाले अर्थात् जंगमों के, अवसितस्य =स्थिर रहने वाले अर्थात् स्थावरों के, राजा=शासन करने वाले, शमस्य= शांत का अर्थात् बिना सींग वालों का, च=और, शृङ्गिणः=सींग वालों का, वज्रबाहुः=हाथ में वज्र धारण करने वाले, सः=वह, इत्=निश्चित अर्थ का वाचक एक निपात, उ=निश्चित अर्थ का वाचक एक निपात,राजा= शासन करने वाला, क्षयति=शासन करता है, चर्षणीनाम्=मनुष्यों का, अरान्=रथ के चक्र के धुरे में लगी हुई कीलें, न=तरह, नेमिः=पहिये की परिधि पर लगा हुआ लोहा या रबड़, ता=उनको, परिबभूव=चारो तरफ से घेरे हुये हैं ।

हि० अ०—वज्र धारण करने वाला इन्द्र चलने वाले तथा स्थिर रहने वाले, शांत (बिना सींग वाले) तथा सींग वाले सबका राजा है; वही राजा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सभी मनुष्यों के उपर शासन करता है। जिस प्रकार लोहे की परिधि धुरे में लगे पहिये के सभी अरों को घेरे रहती है उसी प्रकार (वह इन्द्र) उन सबको चारो तरफ से घेरे हुये है।

Trans.—Indra, the wielder of the thunderbolt, is the king of all that moves and that moves not, of quiet (hornless-creatures) and horned. Verily he rules over all people, and surrounds them as does a rim the spokes (of a wheel).

Notes—यातः—Of moving; from √*yā* to go, pres. part. gen. sing.; monosyllabic words in instrumental etc. accent the termination (सावेकाचस्तृतीयादिर्विभक्तिः—Pāṇ. VI. 1. 168). अवसितस्य—Past. part. gen. sing, √*sā* with अव to let loose, to be unyoked, secondarily to take rest; for accent see note on निहिताः (I. 24.7). वज्रबाहुः—Having thunderbolt in his arms; Bahuvrīhi compd. accented on the first member. सेदु—The irregular euphonic combination of सः+vowel is mentioned by the Ṛg. Prāt. (II. 68-69). क्षयति—√*kṣi* to dwell or rule over, pres. 3rd sing.; it governs the gen. चर्षणीनाम्. परि बभूव—√*bhū* with परि to surround, perf. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'ह्वयाम्यग्निम्' इत्येकादशर्चं पञ्चमं सूक्तम् । हिरण्यस्तूप ऋषिः । आद्या नवमी च जगतीच्छन्दस्के । शिष्टास्त्रिष्टुभः । कृत्स्नस्य सूक्तस्य सविता देवता । आद्यायाः 'ह्वयाम्यग्निम्' इत्यस्या अग्निमित्रावरुणरात्रिसवित्राख्या लिङ्गोक्त-देवताः । तथा चानुक्रान्तं—'ह्वयाम्येकादश सावित्रं नवमी जगत्याद्या च लिङ्गोक्त-दैवतपादास्त्रयः' इति । अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्रे इदं सूक्तं सावित्रं निविद्धानम् । 'तृतीयस्य त्र्यर्यमा' इति खण्डे सूत्रितं—'ह्वयाम्यग्निमस्य मे द्यावापृथिवी इति तिस्रः' (आश्व श्रौ० ७. ७) इति ॥

ह्वयामि । अग्निम् । प्रथमम् । स्वस्तये । ह्वयामि । मित्रावरुणौ । इह । अवसे ॥ ह्वयामि । रात्रीम् । जगतः । निऽवेशनीम् । ह्वयामि । देवम् । सवितारम् । ऊतये ॥१॥

सा० भा०—स्वस्तये अस्माकमविनाशाय । 'स्वस्तीत्यविनाशनाम' (निरु० ३.२१) इति यास्कः । प्रथमम् आदौ अग्निं ह्वयामि । इह अस्मिन् कर्मणि अवसे अस्मद्रक्षणाय मित्रावरुणौ ह्वयामि । जगतः जङ्गमस्य प्राणिजातस्य निवेशनीम् उपनिवेशनहेतुभूतां रात्रीं रात्रिदेवतां ह्वयामि । जङ्गमाः सर्वे प्राणिनो दिवसे स्वस्वव्यापारान् कृत्वा स्वस्वगृहे रात्रौ उपविशन्तीति प्रसिद्धम् । ऊतये अस्मद्रक्षणार्थं सवितारं देवं ह्वयामि ॥ मित्रावरुणौ । 'देवताद्वन्द्वे च' इति पूर्वपदस्य आनङादेशः । 'देवताद्वन्द्वे च' इति उभयपदप्रकृतिस्वरत्वम् । रात्रीम् । 'रात्रेश्चाजसौ' (पा० सू० ४.१.३१) इति ङीप् । निवेशनीम् । निवशन्त्यस्यामिति निवेशनी । 'करणाधिकरणयोश्च' इति ल्युट् । 'टिड्ढाणञ्' (पा० सू० ४.१.१५) इत्यादिना ङीप् । ऊतये । अवतेः क्तिनि 'ज्वरत्वर' इत्यादिना वकारस्य उपधायाश्च ऊठ् । 'ऊतियूति' इत्यादिना क्तिन उदात्तत्वम् ॥

शब्दा० ह्वयामि=बुलाता हूँ, अग्निम्=अग्नि को, प्रथमम्=प्रथम देव, स्वस्तये=कल्याण के लिये, ह्वयामि=बुलाता हूँ, मित्रावरुणौ=मित्र और वरुण को, इह=यहाँ, अवसे=रक्षा के लिए, ह्वयामि—बुलाता हूँ । रात्रीम्=रात्रि को, जगतः=सम्पूर्ण जंगम लोक को, निवेशनीम्=आराम देने वाली, ह्वयामि=बुलाता हूँ, देवम्=देव को, सवितारम्=सवितृ को, ऊतये=रक्षा के लिये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—मैं प्रथम (देव) अग्नि को (अपने) कल्याण के लिये बुलाता हूँ ; मित्र तथा वरुण को यहाँ रक्षा के लिये बुलाता हूँ; सम्पूर्ण जंगम लोक को आराम देने वाली रात्रि को बुलाता हूँ; सवितृ देव को सहायता के लिये बुलाता हूँ ।

Trans.—I invoke Agni, the first, for welfare ; I invoke Mitra and Varuṇa here for protection ; I invoke Night that gives rest to all moving ones ; I invoke god Savitar for help.

Notes—ह्वयामि—√*hvā* to call, pres. 1st. sing ; not unaccented because beginning of the Pāda. मित्रावरुणाविह—For sandhi see Appendix-A under *Bhugna*. मित्रावरुणौ is a Dvandva compd. comprising both the members as names of the deities ; hence, both the members are accented (देवता द्वन्द्वे च—Pāṇ. VI 2.141). Such compds. are not analysed in the Pada-text. अवसे—Dative sing. from √*av* to protect. निवेशनीम्—From नि+√*viś* (to enter) by adding the suffixes ल्युट् and ङीप्. ऊतये—dative sing. from √*av* to protect ; व् with its penultimate vowel has become ऊ (ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च—Pāṇ. VI. 4.20).

आ । कृष्णेन । रजसा । वर्तमानः । निऽवेशयन् । अमृतम् । मर्त्यम् । च ॥ हिरण्ययेन । सविता । रथेन । आ । देवः । याति । भुवनानि । पश्यन् ॥२॥

सा० भा०—सविता सूर्यः कृष्णेन रजसा कृष्णवर्णेन लोकेन । 'कृष्णं कृष्यतेर्निकृष्टो वर्णः' (निरु० २. २०) इति यास्कः । 'लोका रजांस्युच्यन्ते' (निरु० ४. १९) इति च । अन्तरिक्षलोको हि सूर्यागमनात् पुरा कृष्णवर्णो भवति । तेनान्तरिक्षमार्गेण आ वर्तमानः पुनः पुनरागच्छन् अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वस्वस्थानेऽवस्थापयन् । यद्वा । अमृतं मरणरहितं प्राणं मर्त्यं मरणसहितं शरीरं च निवेशयन् । तथा चारण्यकाण्डे 'अमर्त्यो मर्त्येना सयोनिः'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ऋ० सं० १. १६४. ३८) इत्येतस्य मन्त्रभागस्य व्याख्यानरूपे ब्राह्मणे यथोक्तोऽर्थोऽवगम्यते—'मर्त्यानि हीमानि शरीराणि अमृतैषा देवता' (ऐ० ब्रा० २. १. ८) इति। यथोक्तगुणोपेतः सविता देवः भुवनानि सर्वान् लोकान् पश्यन् अवेक्षमाणः प्रकाशयन्नित्यर्थः। हिरण्ययेन सुवर्णनिर्मितेन रथेन आयाति अस्मत्समीपमागच्छति॥ अमृतम्। मृतं मरणं नास्ति अस्येति बहुव्रीहौ 'नञो जरमरमित्रमृता' इत्युत्तरपदाद्युदात्तत्वम्। मर्त्यम्। मर्ते भवम्। 'भवे छन्दसि' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। हिरण्ययेन। 'ऋत्व्यवास्त्व्यः' (पा० सू० ६. ४. १७५) इत्यादिना मयटो मकारलोपो निपातितः। यस्येति लोपे प्रत्ययस्वरः। भुवनानि। 'भू सत्तायाम्'। 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (उ० सू० २. २३८) इति क्युन्प्रत्ययः। योरनादेशे उवङादेशः। नित्त्वादाद्युदात्तत्वम्॥

शब्दा०—कृष्णेन=अन्धकारमय, रजसा=अन्तरिक्ष से, आवर्तमानः=लौटते हुये, निवेशयन्=अपने अपने कार्य में लगाते हुये, अमृतम्=देवताओं को, मर्त्यम्=मनुष्यों को, च=और, हिरण्ययेन=स्वर्णमय, सविता=सवितृ देव, रथेन=रथ से, देवः=देव, आयाति=आ रहे हैं, भुवनानि=लोकों को, पश्यन्=देखते हुये।

हि० अ०—अन्धकारमय अन्तरिक्ष से (होकर) लौटते हुये, देवताओं तथा मनुष्यों को (अपने अपने कार्यों में) प्रवृत करते हुये, स्वर्णमय रथ पर (चढ़कर) सवितृ देव सम्पूर्ण प्राणियों को देखते हुये आ रहे हैं।

Trans.—Returning through the darksome region, arousing the immortals and the mortals, God Savitar comes on the golden chariot beholding all the creatures.

Notes—**आ वर्तमानः**—√*vṛt* to turn, pres. part. Preposition may be separated from the participle as from a verb, and then it retains the accent as an independent word. **निवेशयन्**—√*viś* to enter, caus. pre. part; a preposition compounded with pres. part. is unaccented and separated by avagraha in the Pada-text. **अमृतम्**—See notes on **अमृतानाम्** (I.24.1). **मर्त्यम्**—Words ending in the suffix **यत्**, accent the first syllable (**यतोऽनावः**—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Pāṇ. VI. 2.213). आ याति—√*yā* with आ to come, pres. 3rd. sing. पश्यन्—√*paś* to see, pres. part.

याति । देवः । प्रऽवता । याति । उत्ऽवता । याति । शुभ्राभ्याम् । यजतः । हरिऽभ्याम् ॥ आ । देवः । याति । सविता । पराऽवतः । अप । विश्वा । दुःऽइता । बाधमानः ॥३॥

सा० भा०—देवः दीप्यमानः सविता प्रवता प्रवणता मार्गेण याति गच्छति । तथा उद्वता उत्कृष्टेनोर्ध्वदेशयुक्तेन मार्गेण याति । उदयान्तरं आमध्याह्नमूर्ध्वो मार्गः; तत उपरि आसायं प्रवणो मार्ग इति विवेकः । तथा यजतः यष्टव्यः स देवः शुभ्राभ्यां श्वेताभ्यां हरिभ्याम् अश्वाभ्यां याति देवयजनदेशे गच्छति । सविता देवः विश्वा दुरिता सर्वाणि पापानि अप बाधमानः विनाशयन् परावतः दूरदेशात् । 'परावतः' (नि० ३. २६. ५) इति दूरनामसु पठितत्वात् । तादृशात् द्युलोकात् आ याति यागदेशे आगच्छति ॥ प्रवता । 'वन षण संभक्तौ' । अस्मात् प्रपूर्वात् क्विप् । 'गमादीनामिति वक्तव्यम्' (पा० सू० ६. ४. ४०. १) इत्यनुनासिकलोपः । ततः तुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । उद्वता । उत्पूर्वात् वनतेः पूर्ववत्प्रक्रिया । यजतः । 'भृमृदृशि' (उ० सू० ३. ३९०) इत्यादिना यजतेः कर्मणि अतच्प्रत्ययः । विश्वा दुरिता । उभयत्र 'शेश्छन्दसि बहुलम्' इति शेर्लोपः ।

शब्दा०—याति=जाते हैं, देवः=देव, प्रवता=नीचे मार्ग से, याति=जाते हैं, उद्वता=उपर मार्ग से, याति=जाते हैं, शुभ्राभ्याम्=सफेद रंग के, यजतः=पूजनीय, हरिभ्याम्=दो अश्वों के साथ, देवः=देव, आ याति=आ रहे हैं, सविता=सवितृ, परावतः=बहुत दूर से, विश्वा=सम्पूर्ण, दुरिता=पापों को, अपबाधमानः=दूर करते हुये ।

हि० अ०—(सवितृ) देव नीचे (मार्ग) से जाते है; ऊपर (मार्ग) से जाते हैं; पूजनीय (सवितृ देव) श्वेत रंग के दो अश्वों के साथ आते हैं। सम्पूर्ण बुराइयों को दूर करते हुये सवितृ देव बहुत दूर से आ रहे हैं ।

Trans.—God (Savitar) goes by a downward, goes by an upward (path); adorable (God) goes with two white horses. God Savitar comes from afar obstructing all the evils.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—याति—√*yā* to go, not unaccented because it begins the pāda ; so also the 3rd याति in the second Pāda ; second याति is not unaccented because it begins a new sentence. अप बाधमानः √*bādh* with अप to destroy pres. part. For accent see आ वर्तमानः (I.35.2).

अभिऽवृतम् । कृशनैः । विश्वऽरूपम् । हिरण्यऽशम्यम् । यजतः । बृहन्तम् ॥ आ । अस्थात् । रथम् । सविता । चित्रऽभानुः । कृष्णा । रजांसि । तविषीम् । दधानः ॥४॥

सा० भा०—सविता रथम् आस्थात् आस्थितवान् आरूढवानित्यर्थः । कीदृशम् । अभीवृतम् अभितो वर्तमानम् । तथा कृशनैर्विश्वरूपं सुवर्णेन नानारूपम् । 'कृशनं लोहम्' (नि० १.२.७) इति सुवर्णनामसु पाठात् । क्वचित् सुवर्णनिर्मितगजपङ्क्तिः क्वचिदश्वपङ्क्तिः क्वचिन्मनुष्यपङ्क्तिरित्येवं बहुरूपत्वम् । हिरण्यशम्यम् । अश्वानां स्कन्धेषु रथयोजनवेलायां नियन्तुं प्रक्षेप्यमाणाः शङ्कवः शम्याः । ताः सुवर्णमय्यो रथे वर्तन्ते । बृहतं प्रौढम् । कीदृशः सविता । यजतः यष्टव्यः चित्रभानुः विविधरश्मियुक्तः कृष्णा रजांसि अन्धकारयुक्ततया कृष्णवर्णान् लोकानुद्दिश्य तमोनिवारणार्थं तविषीं बलं स्वकीयं प्रकाशरूपं दधानः ॥ अभीवृतम् । अभितो वर्तते इत्यभीवृत् । 'वृतु वर्तने' । क्विपि 'नहिवृति' (पा०सू० ६.३.११६) इत्यादिना पूर्वपदस्य दीर्घत्वम् । विश्वरूपम् । विश्वानि रूपाणि यस्यासौ विश्वरूपः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति व्यत्ययेन असंज्ञायामपि पूर्वपदान्तोदात्तत्वम् । हिरण्यशम्यम् । 'हर्य गतिकान्त्योः' । 'हर्यतेः कन्येन् हिर च' (उ०सू० ५.७२२) इति कन्यन् प्रत्ययो धातोर्हिरादेशश्च । नित्त्वादाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । आस्थात् । तिष्ठतेर्लुङि 'गातिस्था' इति सिचो लुक् । कृष्णा । 'कृषेर्वर्णे' (उ० सू० ३. २८४) इति नक्प्रत्ययः । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । तविषीम् । तवतिः सौत्रो धातुः । 'तवतेर्णिद्वा' (उ० सू०१.४८) इति टिषच् । टित्त्वात् 'टिड्ढाणञ्' इत्यादिना ङीप् । व्यत्ययेन आद्युदात्तत्वम् वृषादित्वात् द्रष्टव्यम् । दधानः । शानचि 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥

शब्दा०—अभीवृतम्=सुसज्जित, कृशनैः=स्वर्ण से, विश्वरूपम्=विविध रूपवाले, हिरण्यशम्यम्=स्वर्ण कीलवाले, यजतः=पुजनीय,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बृहन्तम्=ऊँचे, आ अस्थात्=आरुढ़ हुये, रथम्=रथ पर, सविता=सवितृ देव, चित्रभानुः=विचित्र किरणोंवाले, कृष्णा=अंधकारमय, रजांसि --लोक, तविषीम्=शक्ति, दधानः=धारण करते हुये ।

हि० अ०—स्वर्ण से सुसज्जित, विविध रूपवाले, (जुवा में) स्वर्ण की कीलवाले, ऊंचे रथ पर, विचित्र किरणों से युक्त, पूजनीय सवितृ देव, अंधकारमय लोक के विरुद्ध शक्ति धारण करते हुए आरुढ़ हुये ।

Trans.—Bright-rayed, adorable Savitar, bearing the might (to dispense) the darksome region, mounted the lofty chariot, adorned with pearls, omniform, furnished with golden yoke-pins.

Notes—अभीवृतम्—The final syllable of the preceding preposition is lengthened, if a word ending in the suffix क्विप् forms the second member of the compd. (नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ—Pāṇ-VI. 3.116; निपातस्य च—Pāṇ. VI. 3.136). For accent see निहिताः (I. 24.7). कृशनैः—It is enumerated in the list of the names of gold (Night I. 2.6); Macdonell takes कृशनै to metaphorically mean stars. विश्वरूपम्—In Bahuvrīhi, the word विश्व accents the second syllable, if it is noun and forms the first member. (बहुव्रीहौ विश्वं संज्ञायाम्—Pāṇ. VI. 2.106); here the second syllable of the word विश्व is accented even though it is not a noun. हिरण्यशम्यम्—'Furnished with golden yokes' (Wilson), 'with golden Pole' (Griffith), 'with golden pins' (Macdonell); Bahuvrīhi compd. accented on the first syllable of the first member. बृहन्तम्—From √*bṛh* to make big, pres. part. acc. sing. अस्थात्—√*sthā* to stand, root-aorist, 3rd. sing. चित्रभानुः—'Many-rayed' (Wilson, Griffith), 'brightly lustrous' (Macdonell)', Bahuvrīhi, compd. accented on the first member. तविषीम्—From √*tav* to overpower.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दधानः—√*dhā* to put, pres. part. ; accented on the red. syllable (अभ्यस्तानामादिः Pāṇ. VI. 1.189).

वि । जनान् । श्यावाः । शितिऽपादः । अख्यन् । रथम् । हिरण्यऽप्रउगम् । वहन्तः ॥ शश्वत् । विशः । सवितुः । दैव्यस्य । उपऽस्थे । विश्वा । भुवनानि । तस्थुः ॥५॥

सा० भा०—श्यावाः एतन्नामकाः सूर्यस्याश्वाः । 'श्यावाः सवितुः' (नि० १.१५.८) इति निघण्टावुक्तत्वात् । ते च शितिपादः श्वेतैः पादैरुपेताः हिरण्यप्रउगम् । रथस्य सुखम् ईषयोरग्रं युगबन्धनस्थानं प्रउगमित्युच्यते । तच्चात्र सुवर्णमयम् । तद्युक्तं रथं वहन्तः जनान् प्राणिनः वि अख्यन् विशेषेण प्रकाशितवन्त इत्यर्थः । शश्वत् सर्वदा विशः प्रजाः दैव्यस्य इतरदेव संबन्धिनः सवितुः प्रेरकस्य सूर्यस्य उपस्थे समीपस्थाने तस्थुः स्थितवत्यः । न केवलं प्रजाः किं तर्हि विश्वा भुवनानि सर्वे च लोकाः प्रकाशाय सूर्यसमीपे तस्थुः ॥ शितिपादः । शितयः श्वेतवर्णाः पादा येषां ते शितिपादाः । 'सुपां सुलुक्' इति जसः सुआदेशः । यद्वा । शितिः श्वेतवर्णः स्फाटिकादिः । स इव पादो येषां ते । 'पादस्य लोपोऽहस्त्यादिभ्यः' (पा०सू० ५.४.१३८) इति समासान्तपादशब्दस्यान्त्यलोपः । उपमानात् इति हि तत्रानुवर्तते । पादशब्दस्य वृषादित्वादाद्युदात्तत्वम् । तस्य बहुव्रीहौ समासे 'शितेर्नित्याबह्वज्बहुव्रीहावभसत्' (पा० सू० ६.२.१३८) इत्युत्तरपदप्रकृतिस्वरत्वम् । अख्यन् । ख्यातेर्लुङि 'अस्यतिवक्ति' इत्यादिना च्लेः अङादेशः । हिरण्यप्रउगम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वहन्तः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः । दैव्यस्य । तस्येदमित्यर्थे 'देवाद्यञञौ" (पा० सू० ४.१.८५.३) इति देवशब्दात् प्राग्दीव्यतीयो यञ् । 'तद्धितेष्वचामादेः' (पा० सू० ७.२.११७) इति आदिवृद्धिः । 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वम् । उपस्थे । 'आतश्चोपसर्गे' इति कः । 'आतो लोप इटि च' इति अकारलोपः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥

शब्दा०—जनान्=लोगों को, श्यावाः=सवितृ देव के अश्वों ने, शितिपादः=सफेद पैर वाले, व्यख्यन्=विशेष रुप से प्रकाशित किया है, रथम्=रथ को, हिरण्यप्रउगम्=स्वर्ण की कील वाले, वहन्तः=खींचते हुए, शश्वत्=सम्पूर्ण, विशः=निवास स्थान, सवितुः=सवितृ की, दैव्यस्य=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देव, उपस्थे=गोद में, विश्वा=सम्पूर्ण, भुवनानि=लोक, तस्थुः=स्थित है।

हि० अ०—सफेद पैर वाले (सवितृ देव के) अश्वों ने, स्वर्णनिर्मित जुवा की कीलवाले रथ को खींचते हुये, प्राणियों को विशेष रूप से प्रकाशित किया है। सम्पूर्ण निवास स्थान तथा सम्पूर्ण लोक प्रकाशमान देव सवितृ की गोद में स्थित है।

Trans.—The white-footed horses of Savitar carrying the chariot (furnished) with golden yoke-peg, have lightened people. The clans and all the creatures are seated in the lap of divine Savitar.

Notes—**जनाञ्छयावाः**—For euphonic combination see Appendix A under *Vaśaṅgama Āsthāpita*. **श्यावाः**—The horse of savitar (Nigh. I. 15.8); Macdonell takes it to mean 'dusky steeds'. **शितिपादः**–Mono-Syllabic words, forming the second member of the compound, if follow the word **शिति** as the first member in the Bahuvrīhi, are accented (**शितेर्नित्याबह्वज्बहुव्रीहावभसत्**—Pāṇ. VI. 2.138); final syllable of the word **पाद** in compd. is generally dropped but here it is restored. **वि अख्यन्**—√*khyā* to see, 'a'–aorist, 3rd. plu. **हिरण्य-प्रउगम्**—With golden yoke-peg; Bahuvrīhi compd. accented on the first syllable. **प्रउगम्** is an instance of hiatus in the interior of a word (Ṛg. Prāt. II. 13). **वहन्तः**—√*vah* to carry, pres. part. nom. plu. **दैव्यस्य**—Of divine ; an adj. of **सवितुः**. Words ending in suffixes **ञित्** and **नित्** accent the first syllable (**ञ्नित्यादिर्नित्यम्**–Pāṇ. VI. 1.197). **तस्थुः**—√*sthā* to stand, perf. 3rd. plu.

तिस्रः । द्यावः । सवितुः । द्वौ । उपऽस्था । एका । यमस्य । भुवने । विराषाट् ॥ आणिम् । न । रथ्यम् । अमृता । अधि । तस्थुः । इह । ब्रवीतु । यः । ऊँ इति । तत् । चिकेतत् ॥६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—द्यावः स्वर्गोपलक्षिताः प्रकाशमाना लोकाः तिस्रः त्रिसंख्याकाः सन्ति। तत्र द्वौ लोकौ सवितुः सूर्यस्य उपस्था समीपस्थाने वर्तेते; द्युलोकभूलोकयोः सूर्येण प्रकाशितत्वात्। एका मध्यमा भूमिरन्तरिक्षलोकः यमस्य भुवने पितृपतेर्गृहे विराषाट् विरान् गन्तॄन् सहते। प्रेताः पुरुषा अन्तरिक्षमागण यमलोके गच्छन्तीत्यर्थः। अमृता अमृतानि चन्द्रनक्षत्रादीनि ज्योतींषि जलानि वा अधि तस्थुः सवितारमधिगम्य स्थितानि। तत्र दृष्टान्तः। रथ्यम् आणिं न। रथाद्बहिः अक्षच्छिद्रे प्रक्षिप्तः कीलविशेषः आणिरित्युच्यते। रथसंबन्धिनम् आणिम् अधिगम्य यथा रथस्तिष्ठति तद्वत्। यः तु मानवः तत् सवितृरूपं चिकेतत् जानाति स मानवः इह अस्मिन् विषये ब्रवीतु कथयतु। केनापि वक्तुमशक्यः सवितुर्महिमेत्यर्थः॥ तिस्रः। 'तिसृभ्यो जसः' (पा० सू० ६. १. १६६) इति विभक्तेरुदात्तत्वम्। द्वौ। संहितायामावादेशे 'लोपः शाकल्यस्य' इति वकारलोपः। उपस्था। 'आङ्याजयारां चोपसंख्यानम्' (पा० म० ७. १. ३९.-१) इति सप्तम्या आङादेशः। 'आङोऽनुनासिकश्छन्दसि' (पा० सू० ६. १. १२६) इति प्रकृतिभावः। विराषाट्। 'वृञ् वरणे'। 'घञर्थे कविधानम्' (पा० सू० ३. ३. ५८. ४) इति कर्मणि कः। 'बहुलं छन्दसि' (पा० सू० ७. १. १०३) इति इत्वम्। तथा सति वूर्यन्ते इति विरा इत्युक्तं भवति। तान् सहते इति विराषाट्। 'छन्दसि सहः' (पा० सू० ३. २. ६३) इति सहेर्ण्विः। 'सहेः साडः' (पा० सू० ८. ३. ५६) इति षत्वम्। 'अन्येषामपि दृश्यते' इतिपूर्वपदस्य दीर्घः। रथ्यम्। रथस्येदं रथ्यम्। 'रथाद्यत्' (पा० सू० ४. ३. १२१) इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। अमृता। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। चिकेतत्। 'कित ज्ञाने'। लेटि अडागमः। 'इतश्च लोपः' इति इकारलोपः। जुहोत्यादित्वात् श्लुः। लघूपधगुणः। 'अनुदात्ते च' (पा० सू० ६. १. १९०) इति अभ्यस्तस्याद्युदात्तत्वम्। यद्वृत्तयोगादनिघातः॥

शब्दा०—तिस्रः=तीन, द्यावः=द्युलोक, सवितुः=सवितृ देव की, द्वौ=दो, उपस्था=गोद में, एका=एक, यमस्य=यम के, भुवने=लोक में, विराषाट्=मरे व्यक्तियों का निवास स्थान, आणिम्=धुरा, न=तरह, रथ्यम्=रथ के, अमृता=अमर, अधि तस्थुः=आश्रित हैं, इह=यहां, ब्रवीतु=कहे, यः=जो, उ=निश्चित अर्थ का वाचक एक निपात, तत्=उसे, चिकेतत्=जाना है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—तीन लोक (हैं), (उनमें से) दो सवितृ की गोद में (हैं), एक जो मरे व्यक्तियों का निवास स्थान है, यम के लोक में (है)। (सम्पूर्ण) अमर (प्रकाशमान पदार्थ) रथ के धुरे की तरह उसी पर आश्रित हैं; (वह) जिसने (सवितृ देव के महत्व को) जाना है, यहाँ उसे कहे।

Trans.–Three (are) the regions, (of them) two in the lap of Savitar and one, the abode of dead ones, in the sphere of Yama. (All) the immortals (luminaries) depend (upon him) like an axle pin of a chariot. (He) who has known (the greatness of Savitar) let him speak it here.

Notes—उपस्था—'In the proximity' (Wislon), 'adjacent' (Griffith), 'laps' (Macdonell). Macdonell takes उपस्था as the nom. dual, ending in आ which is common in the Vedas. Sāyaṇa takes उपस्था in locative sense. For sandhi in द्वा उपस्था see Appendix A under *Padavṛtti* ; the final nasalized syllable in the Saṁhitā-text avoids the possibility of sandhi of उपस्था with एका (which is the initial of a Pāda). विराषाट्—Sāyaṇa explains it by 'विरान् गन्तॄन् सहते। प्रेताः पुरुषा अन्तरिक्षमार्गेण यमलोके गच्छन्तीत्यर्थः; Griffith takes it to mean 'the home of heroes' and Macdonell as 'over-coming men'. Macdonell takes it as the nom. sing. of विरासह् ; according to him विरा is far वीर, the quantity of the vowel being interchanged for metrical convenience ; in the Pada-text विराषाट् is not analysed for विरा, as an independent word, is never used. चिकेतत्—√*cit* to know, perf. subju. 3rd. sing. ; not unaccented because preceded by यत्.

वि। स॒ऽप॒र्णः। अ॒न्तरि॑क्षाणि। अ॒ख्य॒त्। ग॒भी॒रऽवे॑पाः। असु॑रः। स॒ऽनी॒थः॥ क्व॑। इ॒दानी॑म्। सूर्यः॑। कः। चि॒के॒त॒। क॒त॒माम्। द्याम्। र॒श्मिः। अ॒स्य॒। आ। त॒ता॒न॒॥७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—सुपर्णः शोभनपतनः सूर्यस्य रश्मिः। 'सुपर्णा इति पञ्चदश रश्मिनामानि' (नि० १.५.१५) इति तन्नामसु पठितत्वात्। अन्तरिक्षाणि अन्तरिक्षोपलक्षितानि लोकत्रयस्थानानि वि अख्यत् विशेषेण ख्यापितवान् प्रकाशितवान्। कीदृशो रश्मिः। गभीरवेपाः गम्भीरकम्पनः। रश्मेः प्रकम्पनं चलनं केनापि द्रष्टुमशक्यमित्यर्थः। असुरः सर्वेषां प्राणदः। तथा चान्यत्र आम्नायते—'सर्वेषां भूतानां प्राणानादायोदेति' (तै० आ० १.१४.१) इति। सुनीथः सुनयनः शोभनप्रापणः। मार्गप्रकाशनेन अभीष्टदेशं प्रापयतीत्यर्थः। तादृशरश्मियुक्तः सूर्यः इदानीं रात्रौ क्व कुत्र वर्तते। तदेतद्रहस्यं कश्चिकेत को जानाति। न कोऽपीत्यर्थः। अस्य सूर्यस्य रश्मिः कतमां द्याम् आ ततान कं द्युलोकं रात्रौ व्याप्तवान्। एतदपि को जानाति॥ सुपर्णः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। गभीरवेपाः। 'टुवेपृ कम्पने'। असुन्। गभीरं वेपो यस्य। पूर्वपदप्रकृतिस्वरत्वम्। असुरः। 'असु क्षेपणे'। अस्यति शत्रून् इत्यसुरः। 'असेरुरन्' (उ० सू० १.४२)। नित्त्वादाद्युदात्तत्वम्। यद्वा। असून् प्राणान् राति ददातीत्यसुरः। 'आतोऽनुपसर्गे कः' इति कप्रत्ययः। सुनीथः। 'णीञ् प्रापणे'। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ० सू० २.१५९) इति क्थन्। प्रादिसमासे थाथादिना उत्तरपदान्तोदात्तत्वम्। इदानीम्। इदंशब्दात् सप्तम्यर्थे 'दानीं च' (पा० सू० ५.३.१८) इति दानींप्रत्ययः। 'इदम् इश्' इति इदंशब्दस्य इशादेशः। प्रत्ययाद्युदात्तत्वम्। सूर्यः। 'षू प्रेरणे'। सुवतीति सूर्यः। 'राजसूयसूर्य' इत्यादिना रुडागमसहितः क्यप्प्रत्ययो निपातितः। प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। चिकेत। 'कित ज्ञाने'। लिट्। कतमां किं जातीयाम्। 'वा बहूनां जातिपरिप्रश्ने डतमच्' (पा० सू० ५.३.९३) इति किं शब्दात् डतमच्। डित्त्वात् टिलोपः। 'चितः' इत्यन्तोदात्तत्वम्॥

शब्दा०—सुपर्णः=सुन्दर किरण, अन्तरिक्षाणि=अन्तरिक्ष लोकों को, व्यख्यत्=प्रकाशित की है, गभीरवेपाः=गम्भीर कम्पनवाली, असुरः=प्राण देनेवाली, सुनीथः=अच्छी प्रकार से मार्ग-दर्शन करनेवाली, क्वः=कहां, इदानीम्=इस समय, सूर्यः=सूर्य, कः=कौन, चिकेत=जाना है, कतमाम्=किस, द्याम्=लोक तक, रश्मिः=किरण, आ ततान=फैली है।

हि० अ०—गम्भीर कम्पनवाली, प्राण देनेवाली, अच्छी प्रकार से मार्ग दर्शन करनेवाली, (सवितृ देव की) सुन्दर किरण अन्तरिक्ष लोकों को

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकाशित की है। किसने जाना है कि सूर्य इस समय कहाँ है तथा उसकी किरण किस लोक तक फैली है ?

Trans.—The beautiful ray, deep quivering, life-giving, well-guiding, has lightened the aeirial regions. Who has known where is the sun now and to what region his ray has stretched ?

Notes—सुपर्णः—The Nighaṇṭu (I. 5.15). enumerates it in the list of the names of ray. Sāyaṇa following the same authority explains it by शोभनपतन सूर्यस्य रश्मिः; Griffith takes it to mean 'the sun' and Macdonell as 'bird' (the sun). Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pāṇ. VI. 2.172). गभीरवेपाः—'Deep-quivering' (Sāyaṇa, Wilson, Griffith), 'of deep inspiration' (Macdonell); वेपा is derived from √*vip* to tremble, with the suffix आसुन् असुरः—See note I. 24.14. सुनीथः—'Well-directed' (Wilson), 'the gentle leader' (Griffith), 'of good guidance' (Macdonell). Words ending in थ etc., forming the second member of the compd.accent the final syllable, if the first member is one of the prefixes (थाथघञ्क्ताजबित्रकाणाम्—Pāṇ VI. 2.144). क्वेदानीम्—See Appendix-B under सन्धिज स्व० and कम्पस्व०. चिकेत—√*cit* to know, perf. 3rd. sing. कतमाम्—See notes on कतमस्य (I. 24.1). ततान—√*tan* to stretch, perf. 3rd. sing.

अष्टौ । वि । अख्यत् । ककुभः । पृथिव्याः । त्री । धन्व । योजना । सप्त । सिन्धून् ॥ हिरण्यऽअक्षः । सविता । देवः । आ । अगात् । दधत् । रत्ना । दाशुषे । वार्याणि ॥८॥

सा० भा०—पृथिव्याः संबन्धिनीः अष्टौ ककुभः प्राच्याद्याश्चतस्रो दिश आग्नेय्याद्याश्चतस्रो विदिश इत्येवमष्टौ दिशः व्यख्यत् सविता प्रकाशितवान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा योजना प्राणिनः स्वस्वभोगेन योजयितॄन् धन्व अन्तरिक्षोपलक्षितान् त्री त्रिसंख्याकान् पृथिव्यादिलोकान् सप्त सिन्धून् गङ्गादिनदीः समुद्रान्वा सविता व्यख्यत् । हिरण्याक्षः । हितरमणीयचक्षुर्युक्तो हिरण्यमयाक्षो वा सविता देवः आगात् इहागच्छतु । किं कुर्वन् । दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीयानि रत्नानि दधत् प्रयच्छन् ॥ अख्यत् । ख्यातेर्लुङि 'अस्यतिवक्ति' इत्यादिना च्लेः अङादेशः । त्री । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । धन्व । 'रिवि रवि धवि गत्यर्थाः' । 'इदितो नुम् धातोः' इति नुम् । अस्मात् 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन् । 'सुपां सुलुक्' इति विभक्तेर्लुक् । नलोपः । प्रत्ययस्य नित्त्वादाद्युदात्तत्वम् । योजना । योजयन्ति प्राणिन उपभोगेनेति योजनानि । नन्द्यादिलक्षणो ल्युः । 'णेरनिटि' इति णिलोपः । पूर्ववत् शेर्लोपः । हिरण्याक्षः । हिरण्यमयान्यक्षीणि यस्यासौ हिरण्याक्षः । 'बहुव्रीहौ सक्थ्यक्ष्णोः (पा० सू० ५. ४. ११३) इति समासान्तः षच्प्रत्ययः । अगात् । एतेर्लुङि 'इणो गा लुङि' (पा० सू० २.४. ४५) इति गादेशः । 'गातिस्था' इति सिचो लुक् । दधत् । शतरि 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । 'श्नाभ्यस्तयोरातः' इति आकारलोपः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । दाशुषे । 'दाश्वान्साह्वान्' इत्यादिना क्वसुप्रत्ययान्तो निपातितः । चतुर्थ्येकवचने 'वसोः संप्रसारणम् इति संप्रसारणम् । परपूर्वत्वम् । 'शासिवसिघसीनां च' इति षत्वम् । वार्याणि । 'वृङ् संभक्तौ' । ऋहलोर्ण्यत् । 'ईडवन्द' इत्यादिनाद्युदात्तत्वम् ॥

शब्दा०—अष्टौ=आठ, व्यख्यत्=प्रकाशित किया है, ककुभः=दिशाओं को, पृथिव्याः=पृथिवी के, त्री=तीन, धन्व=लोकों को, योजना=प्राणियों के, सप्त=सात, सिन्धून्=नदियों को, हिरण्याक्षः=स्वर्णमयी आँख वाले, सविता=सवितृ, देवः=देव, आ अगात्=आये हैं, दधत्=धारण करते हुये, रत्ना=बहुमूल्य धन, दाशुषे=हवि प्रदान करने वाले के लिये, वार्याणि =वरणीय ।

हि० अ०—पृथिवी की आठ दिशाओं, प्राणियों के तीन लोकों तथा सात नदियों को (सवितृ देवता ने) प्रकाशित किया है । स्वर्णमयी आंख वाले सवितृ देव पूजा करनेवाले के लिये वरणीय धन को धारण करते हुये आये हैं ।

Trans.—(He) has lightened the eight quarters of the earth, three desert regions of the living beings and the seven rivers. Golden-eyed God Savitar has come bearing desirable wealth for the worshippers.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—योजना—Acc. plu. of योजन; according to Sāyaṇa योजना means living beings (योजना प्राणिनः । स्वस्वभोगेन योजयितॄन्); Macdonell conjectures the number of योजन as thirty, this number being expressed in I. 123.8, where dawns are said to have traversed this distance. अगात्—√*gā* to go, root-aorist, 3rd. sing. दधत्—√*dhā* to put, pres. part., accented on the red. syllable (अभ्यस्तानामादिः—Pāṇ VI. 1.189). दाशुषे—Dative, sing. from √*dāś* to worship, with the suffix क्वसु. वार्याणि—√*vṛ* to choose, with the suffix ण्यत्; accented on the first syllable (ईडवन्दवृशंसदुहां ण्यतः—Pāṇ VI. 1.214)

हिरण्यऽपाणिः । सविता । विऽचर्षणिः । उभे इति । द्यावापृथिवी इति । अन्तः । ईयते ॥ अप । अमीवाम् । बाधते । वेति । सूर्यम् । अभि । कृष्णेन । रजसा । द्याम् । ऋणोति ॥६॥

सा० भा०—हिरण्यपाणिः सुवर्णमयहस्तयुक्तः । यद्वा । यजमानेभ्यो दातुं हिरण्यं हस्ते धृतवान् । विचर्षणिः विविधदर्शनयुक्तः । विचर्षणिः पश्यत्यर्थः । 'विचर्षणिः विश्वचर्षणिः' नि० ३. ११. ६) इति तन्नामसु पाठात् । सविता देवः उभे द्यावापृथिवी अन्तः उभयोर्लोकयोर्मध्ये ईयते गच्छति । अमीवां रोगादिबाधाम् अप बाधते सम्यक् निराकरोति । तथा सूर्यं वेति गच्छति । यद्यपि सवितृसूर्ययोरेकदेवतात्वं तथापि मूर्तिभेदेन गन्तृगन्तव्यभावः । कृष्णेन तमसः कर्षकेण निवर्तकेन रजसा तेजसा द्याम् आकाशम् अभि ऋणोति सर्वतो व्याप्नोति ॥ द्यावापृथिवी । 'दिवसश्च पृथिव्याम्' (पा सू० ६. ३. ३०) इति चशब्दात् दिवशब्दस्य द्यावादेशः । 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम् । 'नोत्तरपदेऽनुदात्तादौ' (पा० सू० ६. २. १४२) इति न निषेधः, 'अपृथिवीरुद्रपूषमन्थिषु' इति पर्युदस्तत्वात् । ईयते । 'ईङ् गतौ' । तिङ्ङतिङः' इति निघातः । बाधते । बाधते च वेति चेति समुच्चयार्थप्रतीतेः चशब्दस्याप्रयोगात् 'चादिलोपे विभाषा' इति निघातप्रतिषेधः । वेति । 'वी गतिप्रजनकान्त्यशनखादनेषु' । अदादित्वात् शपो लुक् । तिपः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्यप्येषा द्वितीया तथापि तिङः परत्वात् निघाताभावः । ऋणोति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'ऋणु गतौ' तनादित्वात् उः। तनादिषु करोतेरेव गुणो नान्येषामिति आपिशालिमतेन गुणाभावः ॥

शब्दा०—हिरण्यपाणिः=स्वर्णहस्त वाले, सविता=सवितृ, विचर्षणिः=सबको देखने वाले, उभे=दोनों, द्यावापृथिवी=आकाश तथा पृथिवी, अन्तः=बीच में, ईयते=जाते हैं, अमीषाम्=रोग को, अप बाधते=दूर करते हैं, वेति=जाते हैं, सूर्यम्=सूर्य के पास, कृष्णेन=अन्धकार युक्त, रजसा=लोकसे, द्याम्=आकाश को, अभि ऋणोति=व्याप्त करते हैं।

हि० अ०--स्वर्णहस्तवाले, सबको देखने वाले, सवितृ, दोनों आकाश तथा पृथिवी के बीच विचरण करते हैं। रोग को दूर करते हैं; सूर्य के पास जाते ह; अन्धकार युक्त लोक से (होकर) द्युलोक को व्याप्त करते हैं।

Trans.—Golden-handed, all-seeing Savitar goes in the interior of both heaven and earth. (He) drives away the disease, approaches the sun; traverses the sky through darksome region.

Notes—**हिरण्यपाणिः**—Golden handed or goldful-handed; Bahuvrīhi compd. accented on the first member. **उभे**—**ए** as dual ending is Pragṛhya hence **इति** in the Pada-text. **द्यावापृथिवी**–The word **दिवस** is substituted by **द्यावा** when it is compounded with **पृथिवी** (**दिवसश्च पृथिव्याम्** Pāṇ. VI. 3.30). For accent see note on **मित्रावरुणा** (I. 35.1). Final **ई** as dual ending is Pragṛhya; hence, **इति** in the Pada-text. **ईयते**—√*i* to go, mid. perf. 3rd. sing. **बाधते**—√*bādh* to obstruct, pres. mid. 3rd. sing; not unaccented because the conjunctive **च** between **बाधते** and **वेति** has been dropped (**चादिलोपे विभाषा** Pāṇ-VIII. 1.63). **वेति**—√*vī* to go, pres. 3rd. sing; not unaccented because it begins a new sentence. **अभि ऋणोति**—√*ṛ* with **अभि** to surround, pres. 3rd. sing.

हिरण्यऽहस्तः। असुरः। सऽनीथः। सुऽमृळीकः। स्वऽवान्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यातु । अर्वाङ् ॥ अपऽसेधन् । रक्षसः । यातुऽधानान् । अस्थात् । देवः । प्रतिऽदोषम् । गृणानः ॥१०॥

सा० भा०—हिरण्यहस्तः असुरः प्राणदाता सुनीथः सुष्ठु नेता प्रशस्य इत्यर्थः । 'सुनीथः पाकः' (नि० ३.८.७) इति प्रशस्यनामसु पाठात् । सुमृळीकः सुष्ठु सुखयिता स्ववान् धनवान् अर्वाङ् अभिमुखः कर्मदेशे गच्छतु । किंचायं देवः प्रतिदोषं प्रतिरात्रि गृणानः स्तूयमानः अस्थात् स्थितवान् । किं कुर्वन् । रक्षसः बाधकत्वेन रक्षणनिमित्तभूतान् 'रक्षो रक्षितव्यमस्मात्' (निरु० ४.१८) इति यास्कः । यातुधानान् असुरान् अपसेधन् निराकुर्वन् ॥ हिरण्यहस्तादयो गताः । सुमृळीकः । सुष्ठु मृळीकं सुखं यस्यासौ तथोक्तः । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । स्ववान् । स्वम् अस्यास्तीति स्ववान् । 'मादुपधायाः' इति वत्वम् । संहितायां नकारस्य 'दीर्घादटि समानपादे' इति रुत्वम् । 'आतोऽटि नित्यम्' इति सानुनासिक आकारः । रोर्यत्वम् । यलोपश्च । अपसेधन् । 'षिधु गत्याम्' । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण कृदुत्तरपदप्रकृतिस्वरत्वम् । रक्षसः । 'रक्षपालने' इत्यस्मात् अपादाने औणादिक असिप्रत्ययः । यद्वा । रक्षन्त्यनेनेति रक्षो बलम् । करणेऽसुन् । तदेषामस्तीति रक्षस्विनः । मत्वर्थप्रत्ययलोपश्छान्दसः । प्रत्ययस्वरः । यातुधानान् । 'यत निकारोपसंस्कारयोः' । तस्मात् ण्यन्तात् औणादिको भावे उप्रत्ययः । यातवो यातना एषु धीयन्ते इति यातुधानाः । अधिकरणे ल्युट् । 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । अस्थात् । 'गातिस्था' इति सिचो लुक् । प्रतिदोषम् । दोषांदोषाम् । प्रति वीप्सालक्षणे यथार्थे । अव्ययीभावः । गृणानः । 'गृ शब्दे' । कर्मणि लटः शानच् । व्यत्ययेन श्ना । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । 'चितः' इत्यन्तोदात्तत्वम् ॥

शब्दा०—हिरण्यहस्तः=स्वर्णहस्तवाले, असुरः=प्राण देने वाले, सुनीथः=सुन्दर मार्ग दर्शन करनेवाले, सुमृळीकः=दयालु, स्ववान्=धनवान, प्रकाशवान, यातु=आवें, अर्वाङ्=हमारी तरफ, अपसेधन्=दूर करते हुये, रक्षसः=राक्षसों को, यातुधानान्=मायावियों को, अस्थात्=स्थित हुये हैं, देवः=देव, प्रतिदोषम्=प्रतिसंध्या को, गृणानः=स्तूयमान ।

हि० अ०—स्वर्णहस्तवाले, प्राणदातृ, सुन्दर मार्ग-दर्शक, दयालु तथा धनवान सवितृ हमारी तरफ (यज्ञ में) आवें । प्रति संध्या स्तूयमान देव (सवितृ) राक्षसों तथा मायावियों को दूर करते हुये स्थित हुये हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—May the golden-handed, life-giving, well-guiding, most gracious, prosperous Savitar come to (the sacrifice). Conquering the demons and sorcerers God (Savitar) has mounted, being worshipped at every evening.

Notes—सुमृळीकः—Of good grace; Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pāṇ VI. 2.172). स्ववान्—Roth takes स्ववान् to be nom. sing. of सु-अवस् 'giving good help. The final न् is dropped, if it is preceded by आ and followed by a vowel, the penultimate vowel being nasalized. But the word स्ववान् drops the final न् and nasalizes its penultimate vowel even though it is not followed by a vowel. This is the special case of आन्पदपदवृत्ति as enumerated in the Rg. Prāt. (IV. 68). अपसेधन्—√*sidh* to repel, pres. part; for accent see निवेशयन् (I. 35.2). अस्थात्—√*sthā* to stand, root-aorist 3rd. sing.; not unaccented because it begins the pāda. प्रतिदोषम्—Macdonell construes it with अस्थात् 'has arisen towards eventide' while Sāyaṇa, Wilson, and Griffith take प्रतिदोषम् as an adverb of time and each construes it with गृणानः. Governing compd. accented on the final syllable of the second member गृणानः—√*gṛ* to sing pres. part.

ये । ते । पन्थाः । सवितरिति । पूर्व्यासः । अरेणवः । सुऽकृताः । अन्तरिक्षे ॥ तेभिः । नः । अद्य । पथिऽभिः । सऽगेभिः । रक्ष । च । नः । अधि । च । ब्रूहि । देव ॥११॥

सा० भा०—हे सवितः ते तव पन्थाः मार्गाः पूर्व्यासः पूर्वसिद्धाः अरेणवः धूलिरहिताः अन्तरिक्षे सुकृताः सुष्ठु संपादिताः । सुगेभिः सुष्ठु गन्तुं शक्यैः तेभिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पथिभिः तैर्मार्गैरागत्य अद्य अस्मिन् दिने नः अस्मान् रक्ष च पालनमपि कुरु। तथा हे देव नः अस्मान् अनुष्ठातॄन् अधि ब्रूहि च देवानामग्रेऽधिकत्वेन कथय च ॥ पन्थाः। 'सुपां सुलुक्' इति जसः सुः। 'पथिमथोः सर्वनामस्थाने' इत्याद्युदात्तत्वम्। पूर्व्यासः। पूर्वैः कृताः पूर्व्याः। 'पूर्वैः कृतमिनियौ च' (पा० सू० ४. ४. १३३) इति यः। प्रत्ययस्वरः असुगागमः। अरेणवः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। सुकृताः। कर्मणि क्तः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुगेभिः। सुष्ठु गच्छन्त्येष्विति सुगाः। 'सुदुरोरधिकरणे' (पा० सू० ३. २. ४८. ३) इति गमेर्डप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्। रक्ष। 'द्व्यचोऽतस्तिङः' इति संहितायां दीर्घः ॥

शब्दा०—ये=जो, ते=तुम्हारे, पन्थाः=मार्ग, सवितः=हे सवितृ, पूर्व्यासः=पहिले के, अरेणवः=धूलि रहित, सुकृताः=अच्छी प्रकार से निर्मित, अन्तरिक्षे=अन्तरिक्ष में, तेभिः=उनसे, नः=हमारी, अद्य=आज, पथिभिः=मार्गों से, सुगेभिः=सुगम, रक्ष=रक्षा करो, च=और, नः=हमारी, च=और, अधि ब्रूहि=तरफ से बोलो, देव=हे देव।

हि० अ०—ओ सवितृ, तुम्हारे प्राचीन तथा धूलि-रहित मार्ग जो अन्तरिक्ष में अच्छी प्रकार से निर्मित हैं, आज उन्हीं सुगम मार्गों से (यहां आकर) मेरी रक्षा करो, तथा हे देव हमारी तरफ से बोलो।

Trans.—O, Savitar, thy ancient (and) dustless pathways which are well-fashioned in the heaven, today (coming) by those paths, good to travel, protect us; o God speak for us.

Notes—**पन्थाः**—The word **पथ** coming with pronoun accents the first syllable (**पथिमथोः सर्वनाम स्थाने** Pāṇ. VI. 1.19). **सवितः**—Vocative, not coming in the beginning of a Pāda, is unaccented. The visarjanīya is rhotasized; hence, **इति** in the Pada-text. **पूर्व्यासः**—Nom. plu. in **आसस्** from the stem **पूर्व्य** originally **पूर्वी**. **अरेणवः**—Bahuvrīhi compd. accented on the second member (**नञ्सुभ्याम्** Pāṇ. VI. 2.172). For sandhi in **पूर्व्यासोऽरेणवः** see Appendix A under *Abhinihita(visarjanīya)*. **सुकृताः**—Prep.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

uninterruptedly compounded with word ending in suffix क्त in objective sense is accented. (गतिरनन्तरः Pāṇ VI.2.49). सुगेभी—The penultimate vowel of a short rhotasized visarjanīya is lengthened, if र् follows, while the visarjanīya is dropped (see Appendix 'A' under *Niyata Sandhi*); Bahuvrīhi compd. accented on the second member. रक्षा—The second syllable is lengthened (द्व्यचोऽतस्तिङः—Pāṇ VI. 3. 135); √*rakṣ* to protect, impv. 2nd. sing. अधिब्रूहि—√*brū* with अधि to speak on behalf of, impv. 2nd. sing.

———.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'कद्ध नूनम्' इति पञ्चदशर्चं तृतीयं सूक्तम्। घोरपुत्रः कण्व ऋषिः, 'ऋषिश्चान्यस्मात्' इति परिभाषितत्वात्। पूर्वसूक्ते 'मारुतं हि' इत्युक्तत्वादिदमपि मरुद्दैवताकम्। 'गायत्रं तु' इत्युक्तत्वात् गायत्रीच्छन्दस्कम्। 'कद्ध' इत्यनुक्रमणिका। विनियोगो लैङ्गिकः॥

कत्। ह। नूनम्। कधऽप्रियः। पिता। पुत्रम्। न। हस्तयोः॥
दधिध्वे। वृक्तऽबर्हिषः॥१॥

सा० भा०—हे मरुतः कद्ध कदा खलु नूनम् अवश्यं हस्तयोः दधिध्वे यूयमस्मान् हस्ते धारयथ। तत्र दृष्टान्तः। पिता पुत्रं न हस्तयोः। यथा लोके पिता हस्तयोः स्वकीयं पुत्रं धारयति तद्वत्। कीदृशा मरुतः। कधप्रियः स्तुतिप्रीताः वृक्तबर्हिषः। वृक्तं छिन्नं बर्हिर्दर्भो येषां मरुतां यजमानाय ते मरुतः तथाविधाः। कत् कदा। 'द्वौ चापरौ वर्णविकारनाशौ' (का० ६. ३. १०९) इत्युक्तत्वात् आकारलोपः। कधप्रियः। कथा स्तुतिः। तया प्रीणन्तीति कधप्रियः। 'प्रीञ् प्रीतौ'। क्विप्। पूर्वपदस्य 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' (पा० सू० ६. ३. ६३) इति ह्रस्वत्वम्। धकारश्छान्दसः। आमन्त्रितनिघातः। दधिध्वे। दधातेः 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लिट्। ऋचादिनियमात् इट्। प्रत्ययस्वरः वृक्तबर्हिषः। आमन्त्रितनिघातः॥

शब्दा०—कत्=किस समय, कब, ह=निश्चित अर्थ का वाचक एक निपात, नूनम्=निश्चित रूप से, कधप्रियः=ओ स्तुतिप्रेमी, पिता=पिता, पुत्रम्=पुत्र को, न=तरह, हस्तयोः=दोनों हाथों में, दधिध्वे=धारण करोगे, वृक्तबर्हिषः=ओ (मरुतो) जिनके लिये पवित्र दूर्वा बिछाई गई है।

हि० अ०—ओ स्तुति प्रेमी, ओ (मरुतो) जिनके लिये पवित्र दूर्वा बिछाई गई है, कब अपने दोनों हाथों में निश्चित रूप से (हमें) धारण करोगे, जिस प्रकार पिता पुत्र को (धारण करता है)।

Trans.—O (Maruts), fond of praise, for whom sacred grass is trimmed, when will you take (us) surely, by both hands, as a father does his son.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—कत्—For कदा; final आ is dropped. कधप्रियः—Sayaṇa explains it by 'कथा स्तुतिः तया प्रीणन्तीति कधप्रियः Griffith takes it as an adjective of पिता and renders 'dear father'; vocative, not at the beginning of the Pāda, is unaccented (आमन्त्रितस्य च Pāṇ. VIII. 1.19). दधिध्वे—√*dhā* to put, mid. perf. 3rd. plu.; not unaccented because it begins the Pāda. वृक्तबर्हिष--वृक्त is the past part; of √*vṛj* to twist; Bahuvrīhi compd. in vocative.

क्व॑ । नूनम् । कत् । वः॒ । अर्थ॑म् । गन्त॑ । दि॒वः । न । पृ॒थि॒व्याः । क्व॑ । वः॒ । गाव॑ः । न । र॒ण्य॒न्ति॒ ॥२॥

सा० भा०—हे मरुतः नूनम् इदानीं क्व यूयं कुत्र स्थिताः । कत् कदा वः युष्माकम् अर्थम् अरणं देवयजनदेशे गमनम् । विलम्बं मा कुरुतेत्यर्थः । दिवः गन्त द्युलोकाद्गच्छत । पृथिव्याः न गन्त भूलोकान्मा गच्छत । वः युष्मान् क्व रण्यन्ति । देवयजनरूपायाः पृथिव्या अन्यत्र कुत्र शब्दयन्ति । यजमानाः स्तुवन्ति । तत्र दृष्टान्तः । गावो न । यथा गावो रण्यन्ति शब्दयन्ति तद्वत् ॥ क्व । किंशब्दात् सप्तम्यन्तात् 'किमोऽत्' (पा० सू० ५. ३.१२) इति अत्प्रत्ययः । 'क्वाति' (पा० सू० ७.२.१०५) इति किमः क्वादेशः । 'तित्स्वरितम्' इति स्वरितत्वम् । अर्थम् । 'ऋ गतौ' । उषिकुषिगार्तिभ्यस्थन्' (उ० सू० २.१६१) इति भावे थन् । नित्त्वादाद्युदात्तत्वम् । गन्त । गमेर्लोटि 'बहुलं छन्दसि' इति शपो लुक् । थादेशस्य तस्य 'तप्तनप्तनथनाश्च' इति तबादेशः । अत एव ङित्त्वाभावात् 'अनुदात्तोपदेश' इत्यादिना अनुनासिकलोपो न भवति । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । द्व्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम् । दिवः । 'उडिदम्' इति विभक्तेरुदात्तत्वम् । पृथिव्याः । 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् । रण्यन्ति । रणतिः शब्दार्थः । व्यत्ययेन श्यन् ॥

शब्दा०—क्व=कहाँ, नूनम्=अब, कत्=कब, वः=तुम लोगों का, अर्थम्=लक्ष्य की ओर गमन, गन्त=जावो, दिवः=द्युलोक से, न=नहीं, पृथिव्याः=पृथिवी से, क्व=कहाँ, वः=तुम्हारे (यजमान), गावः=गायों की, न=तरह, रण्यन्ति=शब्द कर रहे हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—इस समय कहाँ (स्थित हो) ? तुम लोगों का लक्ष्य की तरफ गमन कब होगा ? द्युलोक से जावो (किन्तु) पृथिवी से मत जावो। तुम्हारे (यजमान) गायों की तरह कहाँ शब्द कर रहे हैं ?

Trans.—where now, when (will you go) to your destination ? Go from the heaven, not from the earth. Where do your (worshippers) sing (for you) like kine ?

Notes—**क्व**—From **किम्** with the suffix **अत्**; the latter, being **तित्**, is svarita (**तित्स्वरितम्** Pāṇ. VI. 1.185). **अर्थम्**—From √*r* to go with the suffix **थन्**; words, ending in the suffix **थन्** accent the first syllable. **गन्त**—√*gam* to go, 'root-aorist, impv. 2nd. plu. not unaccented because it begins the Pāda. A verb consisting of two syllables, lengthens its final syllable in the Saṁhitā-text (see notes on **रक्ष** (I. 35.11). **रण्यन्ति**—√*ran* to rejoice, pres. 3rd plu. **गन्ता दिवो न पृथिव्याः**—Wilson following Sāyaṇa renders ; 'pass from heaven, not from the earth'. According to Griffith, 'go ye in heaven and not on earth'. **क्व वो गावो न रण्यन्ति**—Wilson renders 'where do they who worship you cry (to you) like cattle ? According to Griffith, 'where do your cows disport themselves' ?

क्व । वः । सुम्ना । नव्यांसि । मरुतः । क्व । सुविता । क्वो३इति । विश्वानि । सौभगा ॥३॥

सा० भा०—हे मरुतः वः युष्माकं संबन्धीनि नव्यांसि नवतराणि सुम्ना प्रजापशुरूपाणि धनानि 'प्रजा वै पशवः सुम्नम्' (तै० सं० ५.४.६.६) इति श्रुत्यन्तरात्। क्व कुत्र वर्तन्ते। तथा सुविता शोभनानि प्राप्याणि मणिमुक्तादीनि भवदीयानि क्व कुत्र वर्तन्ते। विश्वानि सर्वाणि सौभगा सौभाग्यरूपाणि गजाश्वादीनि क्वो कुत्र वा वर्तन्ते। भवदीयैः सुम्नादिभिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वैः सहागन्तव्यमित्यर्थः। सुम्ना। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। नव्यांसि। नवशब्दात् ईयसुनि ईकारलोपश्छान्दसः। सुविता। सुष्ठु इतानि सुवितानि। 'तन्वादीनां छन्दसि बहुलमुपसंख्यानम्' (पा० सू० ६.४. ७७.१) इति उवङादेशः। सौभगा। 'सुभगान्मन्त्रे' (पा० सू० ५.१.१२९ ग) इति तस्य भावः इत्यर्थे अञ्। पूर्ववत् शेर्लोपः॥

शब्दा०—क्व=कहाँ, वः=तुम्हारे, सुम्ना=धन, नव्यांसि=नये, मरुतः=ओ मरुतो क्व=कहाँ, सुविता=मणिमुक्तादि धन, क्व=कहाँ, विश्वानि=सम्पूर्ण, सौभगा=गजाश्वादिरूपी धन।

हि० अ०—तुम्हारे (प्रजापश्वादिरूपी) नये धन कहाँ हैं? ओ मरुतो, (मणिमुक्तादि) धन कहाँ हैं? सम्पूर्ण (गजाश्वादिरूपी) सौभाग्य कहाँ हैं?

Trans.—Where are your new treasures? O Maruts, where the precious (riches)? Where all the fortunes?

Notes—को—(=क्व+उ); final ओ of a word which is not the first member of the compd., is called pragṛhya (अपूर्वपदान्तगश्च—Ṛg. Prāt. I. 70); hence, इति in the Pada-text.

यत्। यूयम्। पृश्निऽमातरः। मर्तासः। स्यातन। स्तोता। वः। अमृतः। स्यात्॥४॥

सा० भा०—हे पृश्निनामकधेनुपुत्राः मरुतः यूयं यद्यपि मर्तासः मनुष्याः स्यातन भवेत तथापि वः युष्माकं स्तोता यजमानः अमृतः स्यात् देवो भवेत्॥ पृश्निमातरः। पृश्निर्माता येषां ते। समासान्तविधेरनित्यत्वात् 'नद्यृतश्च' (पा० सू० ५. ४. १५३) इति कबभावः। मर्तासः। 'असिहसि' इत्यादिना म्रियतेः तन्प्रत्ययः। 'आज्जसेरसुक्'। स्यातन। अस्तेर्लिङि तस्य 'तप्तनप्तनथनाश्च' इति तनादेशः। यासुट उदात्तत्वम्। अमृतः। 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्॥

शब्दा०—यत्=यदि, यूयम्=तुमलोग, पृश्निमातरः=ओ पृश्नि के पुत्र, मर्तासः=मर्त्य, मनुष्य, स्यातन=हो जावो, स्तोता=प्रशंसक, वः=तुम्हारा, अमृतः=अमर, स्यात्=हो जाय।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ पृश्नि के पुत्र, यद्यपि तुम मर्त्य हो (किन्तु) तुम्हारा प्रशंसक अमर हो जाय।

Trans.—O son of Pṛśni although you are mortals, let your worshipper become immortal.

Notes—पृश्निमातरः—Having Pṛśni as their mother; Maruts are called the son of Pṛśni, the personification of sky. Bahuvrīhi compd. in vocative. स्यातन—√*as* to be, opt, 2nd. plu.; not unaccented because preceded by यत्. स्यात्—√*as* to be, opt. 3rd, sing.

मा। वः। मृगः। न। यवसे। जरिता। भूत्। अजोष्यः। पथा। यमस्य। गात्। उप ॥५॥

सा० भा०—हे मरुतः वः युष्माकं जरिता स्तोता अजोष्यः असेव्यः मा भूत्। तत्र दृष्टान्तः। मृगो न यवसे। यथा तृणे भक्षणीये मृगः कदाचिदप्यसेव्यो न भवति किंतु सर्वदा तृणं भक्षयति तद्वत् किं च स स्तोता यमस्य पथा यमलोकसंबन्धिमार्गेण मा उप गात् मा गच्छतु। तस्य मरणं मा भूदित्यर्थः॥ जरिता। 'जॄष् वयोहानौ'। स्तुतिकर्मेति (निरु० १०. ८) यास्कः। तृचि इडागमः। चित्त्वादन्तोदात्तत्वम्। भूत्। लुङि 'गातिस्था' इति सिचो लुक्। 'न माङ्योगे' इति अडभावः। अजोष्यः। 'जुषी प्रीतिसेवनयोः'। 'ऋहलोर्ण्यत्' इति कर्मणि ण्यत्। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। पथा। तृतीयैकवचने 'भस्य टेर्लोपः' (पा० सू० ७. १. ८८) इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। गात्। एतेर्लुङि इणो गा लुङि' (पा० सू० २. ४. ४५) इति गादेशः। 'गातिस्था' इति सिचो लुक्। पूर्ववत् अडभावः॥

शब्दा०—मा=नहीं, वः=तुम्हारे, मृगः=मृग, न=तरह, यवसे=क्षेत्र से, जरिता=प्रशंसक, भूत्=होवें, अजोष्यः=अलग, पथा=मार्ग पर, यमस्य=यम के, गात्=जावे, उप=पास।

हि० अ०—तुम्हारा प्रशंसक अलग न होवे जैसे मृग क्षेत्र से (अलग नहीं होता), (और न वह) यम के मार्ग पर ही जावे।

Trans.—Let your worshipper never be indifferent to you as a deer to the pasture land; nor let (he) go on the path of yama.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—Griffith connects this stanza with preceding one. According to him the preceding one is conditional and this a consequential. He renders : 'then never were your praiser loathed like a wild beast in pasture land, nor should he go on yama's path'. Wilson following Sāyaṇa translates, 'never may your worshipper be indifferent to you as a deer (is never indifferent) to pasture, so that he may not tread the path of yama, भूत्—√*bhū* to be, root-aorist injun. 3rd. sing. अजोष्यः—From √*juṣ* to unite ; नञ् compd. accented on the first member (अव्यये नञ्कुनिपातानाम् Vārtika on Pāṇ VI. 2. 2). गात्—√*gā* to go, root-aorist, injun. 3rd. sing.

मो इति । सु । नः । परा॑ऽपरा । निःऽऋ॑तिः । दः॒ऽहना॑ । व॒धी॒त् । प॒दी॒ष्ट । तृष्ण॑या । स॒ह॥६॥

सा० भा०—हे मरुतः नः अस्मान् निर्ऋतिः रक्षोजातिदेवता मो षु वधीत् सर्वथा वधं मा कार्षीत् । कीदृशी । परापरा उत्कृष्टादप्युत्कृष्टा अतिबलेत्यर्थः । अत एव दुर्हणा केनापि हन्तुं दुःशक्या । सा निर्ऋतिः तृष्णया सह पदीष्ट पततु । अस्मदीया तृष्णा बाधिका निर्ऋतिश्च विनश्यत्वित्यर्थः ॥ मो षु णः । 'सुञः' इति षत्वम् । 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम् । दुर्हणा । 'ईषद्दुःसुषु' इत्यादिना हन्तेः कर्मणि खल् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । वधीत् । लुङि हन्तेः 'लुङि च' (पा० सू० २.४.४३) इति वधादेशः । सिचि इडागमः । वधादेशस्य अदन्तत्वात् 'एकाच उपदेशे' इति इट्प्रतिषेधो न भवति । अतो लोपे सति तस्य स्थानिवत्त्वात् 'अतो हलादेः' (पा० सू० ७. २. ७) इति वृद्ध्यभावः । 'इट ईटि' (पा० सू० ८. २. २८) इति सिचो लोपः । पदीष्ट । 'पद गतौ' । आशीर्लिङि 'छन्दस्युभयथा' इति सार्वधातुकत्वात् सलोपः । आर्धधातुकत्वात् सुडागमः । प्रत्ययस्वरः । तृष्णया । 'ञितृषा पिपासायाम्' । 'तृषिशुषिरसिभ्यः किच्च' (उ० सू० ३. २९२) इति नप्रत्ययः । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् ॥

शब्दा०—मो=नहीं, सु=सर्वथा, नः=हमें, परापरा=अत्यन्त बलवान,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्ऋतिः=पाप देवता, दुर्हणा=किसी के द्वारा न मारने योग्य, वधीत् =मारे, पदीष्ट=चली जावे, तृष्णया सह=लोभ के साथ ।

हि० अ०--अत्यधिक शक्तिशालिनी, अवध्य निर्ऋति हमें सर्वथा न मारे; लोभ के साथ (वह भी) चली जावे ।

Trans.—Let not the most powerful Nirṛti kill us; let it be destroyed with (our) evil desire.

Notes—मो—See notes on क्वो (I.38.3). परापरा—Sāyaṇa renders it by 'उत्कृष्टादप्युत्कृष्टा अतिबलेत्यर्थः, 'most powerful' (Wilson), 'plague on plague' (Griffith); Iterative compd. accented on the first member. निर्ऋतिः—See notes on निर्ऋतिम् (I.24.9.) वधीत्—√*vadh* to kill, 'iṣ'—aorist, injun. 3rd. sing.; not unaccented because it begins the Pāda. पदीष्ट—√*pad* to go, root-aorist, prec. 3rd. sing.; not unaccented because it begins the Pāda.

स॒त्यम् । त्वे॒षाः । अम॑ऽवन्तः । धन्व॑न् । चि॒त् । आ । रु॒द्रिया॑सः । मिह॑म् । कृ॒ण्व॒न्ति॒ । अ॒वा॒ताम् ॥७॥

सा० भा०—धन्वञ्चित् मरुदेशेऽपि रुद्रियासः रुद्रेण पालितत्वात् तदीया मरुतः आ सर्वतः अवातां वायुरहितां मिहं वृष्टिं कृण्वन्ति कुर्वन्ति तदेतत् सत्यम् । कीदृशा रुद्रियासः । त्वेषाः दीप्ताः अमवन्तः बलवन्तः । मरुतां रुद्रपालनमाख्यानेषु प्रसिद्धम् ॥ धन्वन् । 'रिवि रवि धवि गत्यर्थाः' । इदित्त्वात् नुम् । 'कनिन्युवृषितक्षि' इत्यादिना कनिन् । नित्त्वादाद्युदात्तत्वम् । 'सुपां सुलुक्' इति सप्तम्या लुक् । रुद्रियासः । रुद्रस्येमे रुद्रियाः । 'तस्येदम्' इत्यर्थे घः । 'आज्जसेरसुक्' । मिहम् । 'मिह सेचने' । 'क्विप् च' इति क्विप् । कृण्वन्ति । 'कृवि हिंसाकरणयोश्च' । 'धिन्विकृण्व्योर च' इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारादेशः । अतो लोपेन लुप्तस्य स्थानिवद्भावात् लघूपधगुणाभावः ॥

शब्दा०—सत्यम्=सत्य रूप से, त्वेषाः=भयानक, तेजस्वी, अमावन्तः =शक्तिशाली, धन्वन्=बालूमय स्थान पर, चित्=भी, आ=चारों तरफ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

से, रुद्रियासः=रुद्र के पुत्र, मिहम्=वर्षा, कृण्वन्ति=करते हैं, अवाताम् =वायुरहित ।

हि० अ०—सत्यरूप से, भयानक तथा शक्तिशाली रुद्र के पुत्र बालूमय स्थान पर भी वायुरहित वृष्टि करते हैं।

Trans.—Truely, the terrible and mighty sons of Rudra, send down windless rain even on the desert lands.

Notes—अमावन्तः—Powerful, mighty; the second syllable before the suffix वन्त is lengthened. कृण्वन्ति—√*kṛ* to make pres. 3rd. plu. अवाताम्—Bahuvrīhi compd. accented on the second member.

वाश्राऽइव । विऽद्युत् । मिमाति । वत्सम् । न । माता । सिसक्ति । यत् । एषाम् । वृष्टिः । असर्जि ॥८॥

सा० भा०—वाश्रेव शब्दयुक्ता प्रस्नुतस्तनवती धनुरिव विद्युत् मेघस्था दृश्यमाना सती मिमाति शब्दं करोति । विद्युद्वेलायां हि मेघगर्जनं प्रसिद्धम् । माता धेनुः वत्सं न वत्समिव, सिषक्ति इयं विद्युत् मरुतः सेवते । सिषक्तिः सेवनार्थः । 'सिषक्तु सचत इति सेवमानस्य' (निरु० ३. २१) इति यास्केनोक्तत्वात् । यत् यस्मात् कारणात् एषां मरुतां संबन्धिनी वृष्टिरसर्जि गर्जनसहिते विद्युत्काले वृष्टा भवति, तस्मात् विद्युतो मरुत्सेवनमुपपन्नम् । वाश्रेव । 'वाश्रृ शब्दे' । 'स्फायितञ्चि' इत्यादिना रक् । मिमाति । 'माङ् माने शब्दे च' । व्यत्ययेन परस्मैपदम् । जुहोत्यादित्वात् श्लुः । 'भृञामित्' (पा० सू० ७. ४. ७६) इति अभ्यासस्य इत्वम् । सिषक्ति । 'षच समवाये' । लटि 'बहुलं छन्दसि' इति शपः श्लुः । 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम् । असर्जि । 'सृज विसर्गे' । कर्मणि लुङ् । 'चिण् भावकर्मणोः' (पा० सू० ३. १. ६६) इति चिण् । 'चिणो लुक्' (पा० सू० ६. ४. १०४) इति तशब्दस्य लुक् । गुणः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः ॥

शब्दा०—वाश्रेव=रम्भाती गाय की तरह, विद्युत्=बिजली, मिमाति =शब्द करती ह, वत्सम्=बछड़े का, न=तरह माता=माता, सिसक्ति =पीछा करती है, यत्=जब, एषाम्=उन लोगों की, वृष्टिः=वर्षा, असर्जि=भेजी जाती है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—विद्युत् रम्भाती गाय की तरह शब्द करती है तथा (वृष्टि करने वाले मरुतों का) पीछा करती है जैसे गाय बछड़े का, जब वे वृष्टि करते हैं।

Trans.—Lightning roars like a cow, and accompanies (the Maruts) as a cow her calf, when their rain is sent forth.

Notes—मिमाति—√*mā* to bellow, pres. 3rd. sing. सिसक्ति—√*sac* to accompany, pres. 3rd. sing. असर्जि—√*sṛj* to emit, aorist, passive, 3rd. sing.; not unaccented because preceded by यत्.

दिवा। चित्। तमः। कृण्वन्ति। पर्जन्येन। उदऽवाहेन। यत्। पृथिवीम्। विऽउन्दन्ति ॥९॥

सा० भा०—हे मरुतः उदवाहेन उदकधारिणा पर्जन्येन मेघेन सूर्यमाच्छाद्य दिवा चित् अहन्यपि तमः कृण्वन्ति अन्धकारं कुर्वन्ति। यत् यदा पृथिवीं भूमिं व्युन्दन्ति विशेषेण क्लेदयन्ति तदानीमतिवृष्टिकाले तमः कुर्वन्तीति पूर्वत्रान्वयः। उदवाहेन। उदकानि वहतीति उदवाहः। 'कर्मण्यण्'। मेघविशेषस्येयं संज्ञा। 'उदकस्योदः संज्ञायाम्' (पा० सू० ६. ३. ५७) इति उदकशब्दस्य उदभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्। व्युन्दन्ति। 'उन्दीक्लेदने'। रुधादित्वात् श्नम्। 'श्नान्नलोपः' (पा० सू० ६. ४. २३) इति नलोपः। यद्वृत्तयोगादनिघातः ॥

शब्दा०—दिवा=दिन में, चित्=भी, तमः=अन्धकार, कृण्वन्ति=करतेहैं, पर्जन्येन=बादल से, उदवाहेन=पानी भरे हुये, जलवाही, यत्=जब, पृथिवीम्=पृथिवी को, व्युन्दन्ति=आप्लावित करते हैं।

हि० अ०—जलवाही मेघ से दिन में भी अन्धकार फैलाते हैं, जब पृथिवी को जल से आप्लावित करते हैं।

Trans.—They spread darkness with water-bearing cloud, even in day time when they sprinkle the earth.

Notes—उदवाहेन—Final क of उदक is dropped (उदकस्योदः संज्ञायाम्—Pāṇ. VI.3.57); वाहेन is instr., sing of वाह from

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

√*vah* to carry with the suffix अण् ; Tatpuruṣa compd., having second member ending in कृत्, accents the second member. व्युन्दन्ति —√*ud* to wet, pres. 3rd, plu ; not unaccented because preceded by यत्.

अध । स्वनात् । मरुताम् । विश्वम् । आ । सद्म । पार्थिवम् । अरेजन्त । प्र । मानुषाः ॥१०॥

सा० भा०—मरुतां संबन्धिनः स्वनात् अध ध्वनेर्गर्जनरूपादनन्तरं पार्थिवं पृथिवीसंबन्धि विश्वं सद्म सर्वं गृहम् आ समन्तात् अरेजत इति शेषः । तथा मानुषाः गृहवर्तिनो मनुष्या अपि प्र अरेजन्त प्रकर्षेण कम्पितवन्तः ॥ अध । छान्दसं धत्वम् । सद्म । 'षद्लृ विशरणगत्यवसादनेषु' । 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । पार्थिवम् । पृथिव्याः संबन्धि । 'पृथिव्या ञाञौ' (पा० सू० ४. १. ८५. २) इति प्राग्दीव्यतीयः अञ् प्रत्ययः । ञित्त्वादाद्युदात्तत्वम् । अरेजन्त । 'रेजृ कम्पने' ।

शब्दा०—अध=बाद, स्वनात्=शब्द होने के, मरुताम्=मरुतों के, विश्वम्=सम्पूर्ण, आ=चारों तरफ से, सद्म=गृह, प्र अरेजन्त=अत्यधिक रूप से कांप जाते हैं, मानुषाः=मनुष्य ।

हि० अ०—मरुतों के शब्द पर सम्पूर्ण पार्थिव गृह तथा मनुष्य अत्यधिक रूप से कांप जाते हैं ।

Notes—अरेजन्त—√*rej* to tremble, mid. impf. 3rd. plu. ; not unaccented because it begins the Pāda.

Trans.—All the earthly houses and men tremble at the roaring of the Maruts.

मरुतः । वीळुपाणिऽभिः । चित्राः । रोधस्वतीः । अनु । यात । ईम् । अखिद्रयामऽभिः ॥११॥

सा० भा०—हे मरुतः यूयं वीळुपाणिभिः दृढहस्तैः सहिताः सन्तः रोधस्वतीरनु कूलयुक्ता नदीरनुलक्ष्य अखिद्रयामभिः अच्छिन्नगमनैः याते गच्छतैव । मरुतः । आमन्त्रिताद्युदात्तत्वम् । वीळुपाणिभिः । वीडु इति बलनाम, 'वीळु च्यौत्नम्' (नि० २. ९. १४) इति तन्नामसु पाठात् । तेन च तद्वान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लक्ष्यते । वीळवश्च ते पाणयश्च । 'समासस्य' इत्यन्तोदात्तत्वम् । रोधस्वतीः । 'रुधिर् आवरणे' । रुणद्धि स्रोतः इति रोधः कूलम् । 'रोधः कूलं निरुणद्धि स्रोतः' (निरु० ६. १) इत्युक्तत्वात् । असुनो नित्त्वादाद्युदात्तत्वम् । तद्युक्ता रोधस्वत्यः । 'मादुपधायाः' इति मतुपो वत्वम् । 'उगितश्च' इति ङीप् । मतुब्ङीपोः पित्त्वादनुदात्तत्वे असुनः स्वर एव शिष्यते । यात । 'या प्रापणे' । अदादित्वात् शपो लुक् । ईम् । 'चादयोऽनुदात्ताः' इत्यनुदात्तत्वम् । गुणे 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम् । अखिद्रयामभिः । 'खिद दैन्ये' । 'स्फायितञ्चि' इत्यादिना रक् । खिद्रं यान्तीति खिद्रयामानः । न खिद्रयामानः अखिद्रयामानः । तैः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

शब्दा०—मरुतः=ओ मरुतो, वीळुपाणिभिः=मजबूत हाथवाले, चित्राः=सुन्दर, रोधस्वतीः=नदियों को, अनुयात=लक्ष्य करके जावो, ईम्=इन, अखिद्रयामभिः=कभी न रुकनेवाली गतिवाले (अश्वों) के साथ ।

हि० अ०—ओ मरुद्गण, मजबूत हाथवाले, कभी न रुकनेवाली गति वाले (अपने अश्वों) के साथ, सुन्दर नदियों को लक्ष्य कर तुम जावो ।

Trans.—O Maruts, with (horses) having strong feet and unobstructed in their course, you do go along with beautifully embanked rivers.

Notes—**वीळुपाणिभिः**—'With strong hands' (Sāyaṇa), 'with strong hoofed steeds' (Griffith). **रोधस्वतीः**–Karmadhāraya compd. accented on the second member (**समासस्य**—Pāṇ VI.1.223), **रोधः** means bank (**रोधः कूलम् । निरुणद्धि स्रोतः**—Nīr. VI. 1); a river is called **रोधस्वती**, for it has bank on either side. **वती** is not separated by avagraha in the Pada-text—(see **मनस्वान्** II.2.1) **ईम्**—A particle always unaccented. **यात**—√*yā* to go impv. 2nd. sing. ; not unaccented because it begins the Pāda. **अखिद्रयामभिः**—'Unobstructed progress' (Wilson) 'unhindered in their course' (Griffith) ; **नञ्** compd. accented on the first syllable. **यामभिः** from √*yā* to go.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थिराः । वः । सन्तु । नेमयः । रथाः । अश्वासः । एषाम् । सुऽसंस्कृताः । अभीशवः ॥१२॥

सा० भा०—हे मरुतः एषां वः युष्माकं नेमयः रथचक्रवलयाः स्थिराः सन्तु । तथा रथा अश्वासः अश्वाश्च स्थिराः सन्तु । अभीशवः अंगुलयः, 'अभीशवः दीधितयः' (नि० २.५.२०) इति तन्नामसु पाठात् । सुसंस्कृताः अश्वबन्धनरज्जुपरिग्रहणे स्वलंकृताः सावधानाः सन्तु ॥ सुसंस्कृताः । संपूर्वात् करोतेः कर्मणि क्तः । 'संपर्युपेभ्यः' (पा० सू० ६.१.१३७) इति सुट् । पुनः सुशब्देन प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अभीशवः । अभिपूर्वात् अश्नोतेः 'कृवापाजि' इत्यादिना उण् । वर्णव्यत्ययेन आकारस्य इकारः । उक्तं च—'वर्णागमो वर्णविपर्ययश्च' (का० ६.३.१०९) इति । 'अभीशवोऽभ्यश्नुवते कर्माणि' (निरु० ३.९) इति निरुक्तम् ॥

शब्दा०—स्थिराः=स्थिर, वः=तुम्हारे, सन्तु=होवें, नेमयः=रथ के पहिये में लगी लोहे की परिधि, रथाः=रथ, अश्वासः=घोड़े, एषाम्=इनकी, सुसंस्कृताः=अच्छी प्रकार से सुसज्जित, अभीशवः=लगाम, अंगुलियाँ ।

हि० अ०—तुम्हारे (रथ के पहिये में लगी) लोहे की परिधि, रथ तथा अश्व स्थिर होवें; इनकी लगाम अच्छी प्रकार से सुसज्जित हो ।

Trans.—May your rims, chariots, and horses be firm and their reins be well-fashioned.

Notes—सन्तु—√*as* to be, impv. 3rd. plu. सुसंस्कृता—past part. from √*kṛ* with सम् to fashion. Compounds having prefixes, प्र etc. as the first member, accent the first member. अभीशवः–Derived from अभि+√*aś* to attain. This word has been enumerated in the synonyms of ray (Nigh. I. 5.5) and finger (Nigh. II. 5.20); Griffith takes it to mean 'rein'.

अच्छ । वद । तना । गिरा । जरायै । ब्रह्मणः । पतिम् । अग्निम् । मित्रम् । न । दर्शतम् ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—हे ऋत्विक्समूह तना तनया देवतास्वरूपं प्रकाशयन्त्या गिरा वाचा ब्रह्मणस्पतिं मन्त्रस्य हविर्लक्षणस्यान्नस्य वा पालकं मरुद्गणम् अग्निं दर्शतं दर्शनीयं मित्रं न मित्रमपि जरायै स्तोतुम् अच्छ आभिमुख्येन वद ब्रूहि। अच्छ। 'निपातस्य च' इति संहितायां दीर्घत्वम्। वद। 'द्व्यचोऽतस्तिङः' इति संहितायां दीर्घः। तना। 'तनु विस्तारे'। तनोति देवतामाहात्म्यं विस्तारयतीति तना। पचाद्यच्। वृषादित्वादाद्युदात्तत्वम्। तृतीयाया डादेशः। गिरा। 'सावेकाचः' इति विभक्तेरुदात्तत्वम्। ब्रह्मणः। 'षष्ठ्याः पतिपुत्र' इति संहितायां सत्वम्॥

शब्दा०—अच्छा=की ओर, वदा=कहो, तना=शरीर से, गिरा=वाणी से, जरायै=स्तुति के लिये, ब्रह्मणस्पतिम्=प्रार्थना के पति, अग्निम्=अग्नि को, मित्रम्=मित्र, न=तरह, दर्शतम्=दर्शनीय।

हि० अ० मित्र के समान दर्शनीय, प्रार्थना के पति अग्नि को शरीर से तथा वाणी से स्तुति के लिये बुलावो।

Trans.—speak for praise, with body and speech to Agni, the lord of prayer, beautiful as Mitra.

Notes—वदा—√*vad* to speak, impv. 2nd. sing.; second syllable is lengthened (See note on रक्षा (I.35.11). जरायै—From √*jr* to sing, dative, sing.

मिमीहि। श्लोकम्। आस्ये। पर्जन्यःऽइव। ततनः। गाय। गायत्रम्। उक्थ्यम्॥१४॥

सा० भा०—हे ऋत्विक्समूह आस्ये स्वकीयमुखे श्लोकं स्तोत्रं मिमीहि निर्मितं कुरु। तं च श्लोकं ततनः विस्तारय। तत्र दृष्टान्तः। पर्जन्य इव। यथा मेघो वृष्टिं विस्तारयति तद्वत्। उक्थ्यं शस्त्रयोग्यं गायत्रं गायत्रीच्छन्दस्कं सूक्तं गाय पठ। मिमीहि। 'माङ् माने'। जौहोत्यादिकः। व्यत्ययेन परस्मैपदम्। 'भृञामित्' इति अभ्यासस्य इत्वम्। आस्ये। 'असु क्षेपणे'। अस्यते क्षिप्यतेऽस्मिन्निति आस्यम्। 'कृत्यल्युटो बहुलम्' (पा० सू० ३. ३. ११३) इत्यधिकरणे ण्यत्। 'तित्स्वरितम्' इति स्वरितत्वम्। ततनः। 'तनु विस्तारे'। लेटि सिपि 'बहुलं छन्दसि' इति विकरणस्य श्लुः। 'लेटोऽडाटौ' इति अडागमः। 'इतश्च लोपः' इति इकारलोपः। गायत्रम्। गायत्र्याः संबन्धि। 'तस्येदम्' इति अण्। यद्वा। गायतस्त्रायते इति गायत्रम्। 'आतोऽनुपसर्गे कः'॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—मिमीहि=रचना करो, श्लोकम्=श्लोक, आस्ये=मुख में, पर्जन्य इव=बादल की तरह, ततनः=फैलावो, गाय=गान करो, गायत्रम्=गायत्री छन्द का, उक्थ्यम्=गाने योग्य ।

हि० अ० – मुख मे श्लोक की रचना करो; बादल की तरह उसे फैलावो; गाने योग्य गायत्री छन्द वाले सूक्तों का गान करो ।

Trans.—Form hymn in (your) mouth ; spread it out as a rainy cloud (spreads the rain) ; sing Gāyatrī song worthy of recitation.

Notes—मिमीहि—√*mā* to measure, impv. 2nd. sing. ततनः—√*tan* to stretch, perf. subju. 2nd. sing. गाय—√*gā* to sing. impv. 2nd. sing. ; not unaccented bacause it begins the Pāda. उक्थ्यम्—Worthy of recitation ; for accent see notes on वीर्याणि (1.32.1)

वन्दस्व । मारुतम् । गणम् । त्वेषम् । पनस्युम् । अर्किणम् । अस्मे इति । वृद्धाः । असन् । इह ॥१५॥

सा० भा०—हे ऋत्विक्संघ मारुतं मरुत्संबन्धिनं गणं समूहं वन्दस्व नमस्कुरु स्तुहि वा । कीदृशं गणम् । त्वेषं दीप्तं पनस्युं स्तुतियोग्यम् अर्किणम् अर्चनोपेतम् । अस्मे अस्माकम् इह अस्मिन् कर्मणि वृद्धा असन् मरुतः प्रवृद्धा भवन्तु ॥ वन्दस्व । 'वदि अभिवादनस्तुत्योः' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । पनस्युम् । 'पन च' इति स्तुत्यर्थो धातुः । असुन् । पनः स्तोत्रमात्मन इच्छतीति पनस्यु । 'सुप आत्मनः क्यच्' । 'क्याच्छन्दसि' इति उप्रत्ययः । अर्किणम् । 'ऋच स्तुतौ' । 'पुंसि संज्ञायाम्' इति घः । अर्कोऽस्यास्तीति अर्की । 'अत इनिठनौ' । असन् । 'बहुलं छन्दसि' इति शपो लुगभावः । 'इतश्चलोपः इति इकार लोपः । तिङ्ङतिङः इति निघातः ॥

शब्दा० - वन्दस्व=वन्दना करो, मारुतम् गणम्=मरुतों के समूह को, त्वेषम्=भयानक, तेजस्वी, पनस्युम्=स्तुति की इच्छा करने वाले, अर्किणम्=पूजा करने योग्य, अस्मे=इस स्तुति में, वृद्धाः=प्रवृद्ध, बढ़े हुये, असन्=होवें, इह=यहां ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—भयानक, स्तुति की इच्छा करने वाले, पूजा करने योग्य मरुद्गणों की वन्दना करो। वे इस (स्तुति) में यहाँ प्रवृद्ध होवें।

Trans.—Glorify the host of Maruts, the terrible, desiring to be praised, entitled to laudation. May (they) be exalted here in this (prayer).

Notes—वन्दस्व—√*vand* to glorify, mid. impv. 2nd. sing. पनस्युम्—√*pan* to praise, with desiderative suffix यु. अर्किणम्—From √*ṛc* to praise; Griffith takes it to mean 'tuneful'. वृद्धाः—Sāyaṇa construes it with असन् and renders 'प्रवृद्धा भवन्तु'; Griffith takes it as noun, meaning 'the strong ones'. असन्—√*as* to be, pres. subju. 3rd. plu.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'सह वामेन' इति षोडशर्चं पञ्चमं सूक्तम् । प्रस्कण्व ऋषिः । बार्हतत्वात् अयुजो बृहत्यो युजः सतोबृहत्यः । उषा देवता । 'सह षोळशोषस्यं तु' इति अनुक्रमणिका । प्रातरनुवाके उषस्ये ऋतौ बार्हते छन्दसीदं सूक्तम् । 'अथोषस्य' इति खण्डे सूत्रितम् 'प्रत्यु अदर्शि सह वामेनेति बार्हतम्' (आश्व० श्रौ० ४. १४) इति । तथा आश्विनशस्त्रेऽप्येतत्सूक्तं, 'प्रातरनुवाकन्यायेन' (आश्व० श्रौ० ६. ५) इत्यतिदिष्टत्वात् ॥

स॒ह । वा॒मेन॑ । नः॒ । उ॒षः॒ । वि । उ॒च्छ॒ । दु॒हि॒तः॒ । दि॒वः॒ ॥ स॒ह । द्यु॒म्नेन॑ । बृ॒ह॒ता । वि॒भा॒ऽव॒रि॒ । रा॒या । दे॒वि॒ । दास्व॑ती ॥१॥

सा० भा०—हे दुहितर्दिवः द्युदेवतायाः पुत्रि उषः उषःकालदेवते नः अस्मदर्थं वामेन धनेन सह व्युच्छ प्रभातं कुरु । हे विभावरि उषोदेवते बृहता प्रभूतेन द्युम्नेन अन्नेन सह व्युच्छ । हे देवि त्वं दास्वती दानयुक्ता सती राया पशुलक्षणेन धनेन सह व्युच्छ । उच्छ । 'उछो विवासे' । दुहितर्दिवः । 'सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यत्र 'परमपि च्छन्दसि' (पा० सू० २.१.२.६) इति वचनात् दिवः इत्यस्य पूर्वाङ्गवद्भावे सति 'आमन्त्रितस्य च' इति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् । बृहता । 'बृहन्महतोरुपसंख्यानम्' इति विभक्तेरुदात्तत्वम् । विभावरि । 'भा दीप्तौ' । 'आतो मनिन्' इत्यादिना वनिप् । 'वनो र च' इति ङीप्; तत्संनियोगेन नकारस्य रेफादेशः । संबुद्धौ ह्रस्वत्वम् । दास्वती । 'डुदाञ् दाने' । भावे असुन्प्रत्ययः । तदस्यास्तीति दास्वती । 'मादुपधायाः' इति मतुपो वत्वम् । 'उगितश्च' इति ङीप् ॥

शब्दा०—सह=साथ, वामेन=धन के, नः=हमारे लिये, उषः=ओ उषा, व्युच्छ=विविध रूप से प्रकाशित होवो, दुहितर्दिवः=ओ आकाश की पुत्री, सह=साथ, द्युम्नेन=अन्नादिरूप धन के, बृहता=प्रचुर, विभावरि=ओ प्रकाशवाली, राया=पश्वादिरूप धन के, देवि=ओ देवि, दास्वती=देनेवाली ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ आकाश की पुत्री, उषा, धन के साथ, ओ प्रकाशवती, प्रचुर अन्नरूप धन के साथ, दान देनेवाली ओ देवी, पशुरूप धन के साथ हमारे लिये विविध रूप से प्रकाशित होवो।

Trans.—O Dawn, the daughter of heaven, shine forth upon us with riches; O, diffuser of light, with abundant food; o goddess, bounteous one, with wealth (consisting of cattle).

Notes—**वामेन**—From √*van* to desire; Griffith takes it to mean 'prosperity,' Geldner as 'good luck'. **उच्छ**—√*vas* to shine, impv. 2nd. sing. **दुहितर्दिवः**—Words in genitive case followed by words in vocative case are regarded as their part for accentuation (**सुबामन्त्रिते पराङ्गवत्स्वरे**—Pāṇ-II.1.2). In the Vedic language even if the words in genitive occur after the words in vocative, they are regarded as their part for accentuation (**परमपि च्छन्दसि**—Vārtika on Pāṇ. II.1.2). **द्युम्नेन**—Food (Sāyaṇa), 'glory' (Griffith), 'lustre' (Geldner). According to Yāska **द्युम्न** means fame or food. (**द्युम्नं द्योततेर्यशो वान्नं वा**—Nir.V.5). **विभावरि**—From **वि**+√*bhā* to shine, by adding the suffix **वनिप्** or **मनिन्** which becomes **वरी** in feminine; Vocative not coming in the beginning of the Pāda is unaccented. **दास्वती**—From √*dā* to give, by adding the suffixes **असुन् मतुप्** and **ङीप्** in succession.

अश्वऽवतीः । गोऽमतीः । विश्वऽसविदः । भूरि । च्यवन्त । वस्तवे ॥ उत् । ईरय । प्रति । मा । सूनृताः । उषः । चोद । राधः । मघोनाम् ॥२॥

सा० भा०—अश्वावतीः बह्वश्वोपेताः गोमतीः बहुभिर्गोभिर्युक्ताः विश्वसुविदः कृत्स्नस्य धनस्य सुष्ठु लम्भयित्र्यः उषोदेवताः वस्तवे प्रजानां निवासाय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूरि प्रभूतं यथा भवति तथा च्यवन्त प्राप्ताः । हे उषोदेवते मा प्रति मामुद्दिश्य सुनृताः प्रियहितवाचः उदीरय ब्रूहि । मघोनां धनवतां संबन्धि राधः धनं चोद अस्मदर्थं प्रेरय ॥ अश्वावतीः 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' (पा० सू० ६. ३. १३१) इतिपूर्वपदस्य दीर्घत्वम् । 'वा छन्दसि' इति पूर्वसवर्णदीर्घनिषेधस्य पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वम् । च्यवन्त । 'च्युङ् गतौ' । लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । वस्तवे । 'वस निवासे' । 'तुमर्थे सेसेन्' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । ईरय । 'ईर गतौ कम्पने च' । 'हेतुमति च' इति णिच् । चोद । 'चुद् संचोदने' । चौरादिकः । लोटि 'छन्दस्युभयथा' इति शपः आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । पादादित्वात् निघाताभावः । मघोनाम् । षष्टी बहुवचने 'श्वयुवमघोनामतद्धिते' (पा० सू० ६. ४. १३३) इति संप्रसारणम् ॥

शब्दा०—अश्वावतीः=अश्वोंवाली, गोमतीः=गायोंवाली, विश्वसुविदः=सभी प्रकार के सुन्दर धन देने वाली, भूरि=प्रचुर, अधिक संख्या में, च्यवन्त=प्रवृत्त हुई है, वस्तवे=प्रकाशित करने के लिये, उदीरय=बोलो, प्रति=लिये, मा=मेरे, सुनृता=सुन्दर वाणी, उषः=ओ उषा, चोद=प्रेरित करो, भेजो, राधः=धन, मघोनाम्=धनवान दानियों का ।

हि० अ० - अश्वोंवाली, गायोंवाली, सभी प्रकार के सुन्दर धन देनेवाली (उषायें) प्रकाशित करने के लिये अधिक संख्या में प्रवृत्त हुई हैं । ओ उषा, मेरे प्रति सुन्दर वाणी बोलो; धनवान दानियों का धन (दक्षिणा के रूप में) हमारे लिये भेजो ।

Trans.—Abounding with horses, abounding with cows, excellent giver of all (sorts of riches), (the dawns) have sped (themselves) to lighten (us.) O dawns, speak forth excellent words for me ; stir (to us) the gifts of bounteous ones.

Notes—**अश्वावतीः**—Abounding with horses ; the word **अश्व** lengthens its final syllable when it is followed by **व्** or **य्** (Ṛg. Prāt. IX.11 ; **मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ**—Pāṇ VI. 3.131). **विश्वसुविदः**—Griffith takes it to mean 'boon-givers of all wealth' ; Bloomfield and Geldner derive this word from **विश्ववसुविदः** by

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

haplology ; Peterson renders as 'excellent obtainers of every blessing. च्यवन्त—√*cyu* to move, mid. aorist injun. 3rd. plu. वस्तवे—Dative infinitive in तवे from √*vas* to shine ; for accent see सर्तवे (I.32.12). उदीरय —√*īr* with उत् to set in motion, caus. impv. 2nd. sing. सुनृता—'Kind words' (Wilson), 'sacrificial fee' (Grassmann), 'sound of joy' (Griffith), 'sacrificial fee or an auspicious hymn of praise' (Geldner). चोद—√*cud* to impel, impv. 2nd. sing ; not unaccented because it begins the Pāda.

उवास । उषाः । उच्छात् । च । नु । देवी । जीरा । रथानाम् ॥
ये । अस्याः । आऽचरणेषु । दध्रिरे । समुद्रे । न । श्रवस्यवः ॥३॥

सा० भा०—उषाः देवी उवास पुरा निवासमकरोत् प्रभातं कृतवतीत्यर्थः । च नु अद्यापि उच्छात् व्युच्छति प्रभातं करोति । कीदृशी देवी । रथानां जीरा प्रेरयित्री उषःकाले हि रथाः प्रेर्यन्ते । अस्याः उषसः आचरणेषु आगमनेषु ये रथाः दध्रिरे धृताः सज्जीकृता भवन्ति तेषां रथानामिति पूर्वत्रान्वयः । रथप्रेरणे दृष्टान्तः । श्रवस्यवः धनकामाः समुद्रे न यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयन्ति तद्वत् ॥ उवास । 'वस निवासे' । णलि लिट्यभ्यासस्योभयेषाम्' (पा० सू० ६.१.१७) इति अभ्यासस्य संप्रसारणम् । लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम् । उच्छात् लेटि आडागमः । 'इतश्चलोपः' इति इकारलोपः । तुदादित्वात् शप्रत्ययः । आगमानुदात्तत्वे प्रत्ययस्वरः । उषाः इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (पा० सू० ८.१.१८.५) इति वचनात् । जीरा । जु इति गत्यर्थः सौत्रो धातुः । 'जोरी च' (उ० सू० १.१८१) इति रक्प्रत्ययः । अस्याः । 'इदमोऽन्वादेशे' इति अशादेशोऽनुदात्तः विभक्तिरपि सुप्त्वादनुदात्तेति सर्वानुदात्तत्वम् । आचरणेषु । चर गत्यर्थः । 'ल्युट् च' (पा० सू० ३.३.११५) इति भावे ल्युट् । लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । दध्रिरे । 'धृङ् अवस्थाने' । लिटः कित्त्वाद्गुणाभावे यणादेशः । चित्त्वादन्तोदात्तत्वम् । यच्छब्दयोगादनिघातः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रवस्यवः। श्रूयते इति श्रवो धनम्। असुन्। तदात्मन इच्छन्तीति श्रवस्यवः। 'सुप आत्मन क्यच्'। 'क्याच्छन्दसि' इति उप्रत्ययः॥

शब्दा०—उवास=चमकी थी, प्रकाशित हुई थी, उषाः=उषा, उच्छात्=प्रकाश करे, च=और, नु=अब, देवी=देवी, जीरा=प्रेरित करने वाली, रथानाम्=रथों को, ये=जो, अस्याः=इसके, आचरणेषु=आगमन पर, दध्रिरे=तैयार हो जाते हैं, समुद्रे=समुद्र में, न=तरह, श्रवस्यवः=यश की इच्छा वाले।

हि० अ०—उषा (पहले) चमकी थी, आज भी प्रकाश करे। देवी (उषा) रथों को प्रेरित करनेवाली है, जो इसके आने पर स्वयं तैयार हो जाते हैं जैसे यश की इच्छा वाले समुद्र में।

Trans.—Dawn has shone forth (in past), may (she) shine now; the goddess is the impeller of the chariots, which are ready at her arrival as the seekers of fame in the ocean.

Notes—उवास—√*vas* to shine, perf. 3rd. sing.; reduplicated व् has become उ by Samprasāraṇa. उच्छात्—√*vas* to shine, pres. subju. 3rd. sing.; not unaccented because it begins a new sentence. जीरा—Form √*ju* to impel with the suffix रक्. अस्याः—See note on अस्य (I.32.6). आचरणेषु—√*car* to move, pres. part. locative absolute. दध्रिरे—√*dhṛ* to hold, passive, perf. 3rd. plu; not unaccented because preceded by ये. Scholars render it variously—'harnessed' (Wilson), 'follow their path' (Grassmann) 'fixed their thought on her' (Griffith), 'are held in readiness' (Geldner) 'are restrained or regulated' (Peterson). श्रवस्यवः—From श्रवस् with the desiderative suffix यु; 'desirous of wealth' (Sāyaṇa), 'glory seekers' (Griffith), 'seeking glory' (Oldenberg) 'racers' or 'racing' (Peterson)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उषः । ये । ते । प्र । यामेषु । युञ्जते । मनः । दानाय । सूरयः ॥
अत्र । अह । तत् । कण्वः । एषाम् । कण्वऽतमः । नाम ।
गृणाति । नृणाम् ॥४॥

सा० भा०—हे उषः ते तव यामेषु गमनेषु सत्सु ये सूरयः विद्वांसः दानाभिज्ञाः दानाय धनादिदानार्थं मनः स्वकीयं प्र युञ्जते प्रेरयन्ति । दानशीला उदाराः प्रभवः प्रातःकाले दातुमिच्छन्तीत्यर्थः । एषां दातुमिच्छतां नृणां तत् नाम दानविषये लोकप्रसिद्धं नाम कण्वतमः अतिशयेन मेधावी कण्वः महर्षिः अत्राह अत्रैव उषःकाले गृणाति उच्चारयति । यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषः काले एव तथा कुरुत इत्युषसः स्तुति ॥ गृणाति । 'गॄ शब्दे' । क्र्यादिकः । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । नृणाम् । नामि 'नृ च' (पा० सू० ६. ४. ६) इति दीर्घप्रतिषधः । 'न चान्यतरस्याम्' (पा० सू० ६. १. १८४) इति विभक्तेरुदात्तत्वम् ॥

शब्दा०—उषः=ओ उषा, ये=जो, ते=तुम्हारे, यामेषु=आगमन पर, प्रयुञ्जते=प्रवृत्त करते हैं, मनः=मन को, दानाय=दान के लिये, सूरयः =दानी संरक्षक, अत्र=यहां, अह=पूर्ववर्ती शब्द पर बल देने वाला एक निपात, तत्=उन, कण्वः=कण्व ऋषि, एषाम्=उनके, कण्वतमः=कण्ववंश में प्रमुख, नाम=नाम, गृणाति=प्रशंसा करता है, नृणाम्=मनुष्यों के ।

हि० अ०—ओ उषा, तुम्हारे आगमन पर जो संरक्षक दान देने के लिये मन को प्रवृत्त करते हैं; यहां (उसी समय) कण्व वंश में श्रष्ठ कण्व ऋषि उन्हीं दानी मनुष्यों के नाम की प्रशंसा करता है ।

Trans.—O dawn, at your arrivals, the patrons who employ their mind to give ; here just kaṇva, the chief of the Kaṇva's race, glorifies the name of these men.

Notes—यामेषु—√*yā* to go, pres. part. locative absolute. प्र युञ्जते—√*yuj* with प्र to employ, pres. 3rd. plu., not unaccented because preceded by ये. सूरयः—Nom. plu. of सूरि ; Nighaṇṭu (III.16.8). enumerates this word in the list of the names of singer. Those who give liberally are called सूरयः its apposite

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

sense being conveyed by अरयः (from अरि). कण्वतमः— Chief of the Kaṇva's race; the superlative degree with noun, is often met with in the Ṛ.V. (cf. वृत्रतरम् मातृतमाम् etc.) गृणाति—√*gṛ* to sing, pres. 3rd. sing.

आ । घ । योषाऽइव । सूनरी । उषाः । याति । प्रऽभुञ्जती । जरयन्ती । वृजनम् । पत्ऽवत् । ईयते । उत् । पातयति । पक्षिणः ॥५॥

सा० भा०—उषाः देवी प्रभुञ्जती प्रकर्षेण सर्वं पालयन्ती आ याति घ प्रतिदिनमागच्छति खलु । तत्र दृष्टान्तः । सूनरी सुष्ठु गृहकृत्यस्य नेत्री योषेव गृहिणीव । कीदृशी उषाः वृजनं गमनशीलं जङ्गमं प्राणिजातं जरयन्ती जरां प्रापयन्ती । असकृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवन्ति । किंच उषःकाले पद्वत् पादयुक्तं प्राणिजातम् ईयते निद्रां परित्यज्य स्वस्वकृत्यार्थं गच्छति । किं च इयमुषाः पक्षिणः उत्पातयति । पक्षिणो ह्युषःकाले समुत्थाय तत्र तत्र व्रजन्ति । घ । 'ऋचि तुनुघ' इत्यादिना संहितायां दीर्घः । सुष्ठु नयतीति सूनरी । 'नृ नये' । 'अचः इः' इति इप्रत्ययः । गतिसमासे 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (परिभा० २८) इति वचनात् 'कृदिकारादक्तिनः' (पा० सू० ४. १. ४५ ग) इति ङीष् । 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम् । 'निपातस्य च' इति पूर्वपदस्य दीर्घः । प्रभुञ्जती । 'भुज पालनाभ्यवहारयोः' । लटः शतृ । रुधादित्वात् श्नम् । 'श्नसोरल्लोपः' इति अकारलोपः । 'उगितश्च' इति ङीप् । 'शतुरनुमः' इति नद्या उदात्तत्वम् । वृजनम् । 'वृजी वर्जने' । वर्ज्यते इति वृजनं प्राणिजातम् । 'कृपवृजिमन्दिनिधाञ्भ्यः क्युः' (उ० सू० २. २३९) इति क्युप्रत्ययः । कित्त्वात् लघूपधगुणाभावः । योरनादेशे प्रत्ययस्वरः । पद्वत् । पत् पादः तदस्यातीति पद्वत् । 'झयः' इति मतुपो वत्वम् । व्यत्ययेन मतुप उदात्तत्वम् । न च 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (परिभा० ७९) इति व्यञ्जनस्य अविद्यमानवत्त्वे सति 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वमिति वाच्यम् । ह्रस्वादित्येव सिद्धे पुनर्नुड्ग्रहणसामर्थ्यादेषा परिभाषा नाश्रीयते इति वृत्तावुक्तम् (का० ६. १. १७६) । इतरथा हि मरुत्वान् इत्यत्रापि मतुप उदात्तत्वं स्यात् ॥

शब्दा०—घा=निश्चित अर्थ का वाचक एक निपात, योषेव=युवती की

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तरह, सूनरी=सुन्दरी, उषाः=उषा, आयाति=आती है, प्रभुञ्जती=सबको आनन्दित करती हुई, जरयन्ती=जगाती हुई, वृजनम्=जंगम प्राणियों को, पद्वत्=पैरवालों को, ईयते=अपने कार्य पर भेजती है, उत्पातयति=उड़ाती है, पक्षिणः=पक्षियों को।

हि० अ०—उषा एक सुन्दरी युवती की तरह सबको आनन्दित करती हुई आती है; सम्पूर्ण प्राणियों को जगाती हुई पैरवालों को (अपने-अपने कार्य पर) भेजती है, पक्षियों को (आकाश में) उड़ाती है।

Trans.—The dawn rejoicing (all) comes daily like a lovely lady ; waking up all the moving creatures, she causes the footed creatures to go and birds to fly.

Notes—घा—An emphatic particle like ह; in the Saṁhitā-text it is often lengthened (ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्—Pāṇ VI.3.133 ; Ṛg. Prāt. VIII.15). सूनरी—The word without any change is used in Bhojapurī, one of the dialects of northern India, in the sense of beautiful or lovely woman, the masculine form being सूनर handsome (cf. classical Sanskrit सुन्दर) ; सु is lengthened (निपातस्य च। अन्येषामपि दृश्यते —Pāṇ VI.3.136-37) प्रभुञ्जती—√*bhuj* to enjoy, pres. part. जरयन्ती—√*jṝ* to wake up, pres. part ; Sāyaṇa explains it by 'जरा प्रापयन्ती। असकृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवन्ति'; Wilson following Sāyaṇa renders 'conducting to decay' ; Griffith takes it to mean 'rousing' and Peterson as 'waking to activity'. Oldenberg thinks that जरयन्ती has double sense—waking and decaying combined ; Geldner takes it to mean waking. वृजनम्—From √*vṛj* to twist ; Grassmann takes it mean 'strength' or 'fulness of power' ; Geldner as 'patron' or 'a group of sacrificers' or 'party' ; Parāñjpe thinks it to signify 'society', 'company' 'comrades'. ईयते—√*i* to go, mid. pres. 3rd. sing. उत् पातयति—√*pat* with उत् to fly, caus. pres. 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वि । या । सृजति । समनम् । वि । अर्थिनः । पदम् । न । वेति । ओदती ॥ वयः । नकिः । ते । पप्तिऽवांसः । आसते । विऽउष्टौ । वाजिनीऽवति ॥६॥

सा० भा०—या देवता समनं समीचीनचेष्टावन्तं पुरुषं वि सृजति प्रेरयति । गृहारामादिचेष्टाकुशलान् पुरुषान् उषःकालः शयनादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धम् । किंच उषाः अर्थिनः याचकान् वि सृजति । तेऽपि ह्युषःकाले समुत्थाय स्वकीयदातृगृहे गच्छन्ति । ओदती उषोदेवता पदं स्थानं न वेति न कामयते । उषःकालः शीघ्रं गच्छतीत्यर्थः । हे वाजिनीवति उषोदेवते ते व्युष्टौ त्वदीये प्रभातकाले पप्तिवांसः पतनयुक्ता वयः पक्षिणः नकिः आसते न तिष्ठन्ति । किन्तु स्वस्वनीडाद्विनिर्गत्य गच्छन्तीत्यर्थः ॥ सृजति । 'सृज विसर्गे' । तुदादित्वात् शः । तस्य ङित्वात् लघूपधगुणाभावः । प्रत्ययस्य पित्त्वादनुदात्तत्वे विकरणस्वरः । यद्वृत्तयोगादनिघातः । ओदती । 'उन्दी क्लेदने' । उनत्ति सर्वं नीहारेण इति ओदती उषाः । शतरि व्यत्ययेन शप् । व्यत्ययेन अनुनासिकलोपे लघूपधगुणः । 'उगितश्च' इति ङीप् । आगमानुशासनस्यानित्यत्वात् नुमभावः । शपः पित्त्वादनुदात्तत्वम् । शतुः अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् । न च 'शतुरनुमः' इति नद्या उदात्तत्वम्, अन्तोदात्तात् शतुः परस्यास्तद्विधानात् । नकिष्टे । 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' इति षत्वम् । पप्तिवांसः । 'पत्लृगतौ' लिटः क्वसुः । क्रादिनियमात् प्राप्त इट् 'वस्वेकाजाद्धसाम्' इति नियमात् न प्राप्नोति । तत्क्रियते सर्वविधीनां छन्दसि विकल्पितत्वात् । 'तन्निपत्योश्छन्दसि' (पा० सू० ६. ४. ९९) इति उपधालोपः । 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् द्विर्भावः । प्रत्ययस्वरः । वाजिनीवति । वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया । मत्वर्थीय इनिः । 'ऋन्नेभ्यः' इति ङीप् । तादृशी क्रिया यस्याः सा । 'तदस्यास्ति' इति मतुप् । 'संज्ञायाम्' इति मतुपो वत्वम् ॥

शब्दा०—या=जो, विसृजति=कार्य पर अलग-अलग भेजती है, समनम्=एकत्रित समुदाय को, चेष्टावान पुरुष को, वि=प्रवृत्त करती है, अर्थिनः=याचकों को, पदम्=रुकना, देर करना, न=नहीं, वेति=जानती है, ओदती=ओस बरसाने वाली, वयः=पक्षी, नकिः=कोई ीं, =तुम्हारे, पप्तिवांसः=पंखवाले, आसते=बैठा रहता है, व्युष्टौ=प्रकाशित होने पर, वाजिनीवति=ओ प्रचुर धनवाली ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—जो (यह उषा है वह) एकत्रित समुदाय को कार्य में प्रवृत्त करती है, याचकों को (अपने कार्य में) प्रवृत्त करती है; ओस बरसानेवाली यह उषा देर करना नहीं जानती। ओ प्रचुर धनवाली (उषा), तुम्हारे प्रकाशित होने पर कोई भी पंखवाला पक्षी बैठा नहीं रहता।

Trans.—(She) sets in activity the gathering ; sends the beggars (to their day's work) ; (dawn) the shedder of dews, does not know to rest. O bounteous (dawn), at thy bursting forth into day, none of the birds, having wings, stands.

Notes—वि सृजति—√*sṛj* with वि to set in activity, pres. 3rd. sing.; not unaccented because preceded by या. समनम्—Sāyaṇa explains it by 'समीचीन चेष्टावन्तं पुरुषं', Wilson as 'diligent', Grassmann as 'traffic', Griffith' as 'busy' and Parāñjpe as 'meeting' or 'encounter'. व्यर्थिनः:—Sāyaṇa renders याचकान् for अर्थिनः; Wilson takes it to mean 'clients' and Parāñjpe as 'day's work, Vide Appendix—B, सन्धिज and कम्प स्व०. पदम्—'Delay' (Wilson, Griffith), 'foot-steps' (Parāñjpe). न—Sāyaṇa, Wilson, Griffith and many others take it in negative sense, but Peterson thinks it to mean 'as it were' वेति—√*vī* to know, or enjoy, or go, 3rd. sing. ओदती —This word has been enumerated in the list of the names of dawn (Nigh. I.4.8) ; Sāyaṇa derives ओदती from √*ud* to wet ; dawn is called ओदती for it wets with dews (उनत्ति सर्वं नीहारेण इति ओदती उषा). According to Griffith ओदती means 'springing'. Parāñjpe derives it from ओद् (or उद् not same as उद् उनत्ति) to long for. पदं न वेति ओदती—This stanza has variously been interpreted by scholars—'Shedder of dews knows not delay' (Wilson), 'delays she knows not as she springs' (Griffith), 'she follows the footsteps (of the sun) as

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

it were of eagerness' (Peterson). नकिः—A substantive from न with suffix कि, meaning 'none'. पप्तिवांसः —√*pat* to fly, perf. part. आसते—√*ās* to sit, mid, 3rd. plu. व्युष्टौ—Loc. absolute of उष्ट past part. from √*vas* to shine.

एषा । अयुक्त । पराऽवतः । सूर्यस्य । उत्ऽअयनात् । अधि ॥ शतम् । रथेभिः । सुऽभगा । उषाः । इयम् । वि । याति । अभि । मानुषान् ॥७॥

सा० भा०—एषा उषोदेवी शतम् अयुक्त स्वकीयानां रथानां शतं योजितवती । सुभगा सौभाग्ययुक्ता इयम् उषाः परावतः दूरस्थात् सूर्यस्योदयनादधि सूर्योदयस्थानादधिकात् द्युलोकात् मानुषान् अभि मनुष्यानुद्दिश्य रथेभिः शतसंख्याकैः युक्तैः रथैः वि याति विशेषेण गच्छति ॥ अयुक्त । लुङि 'झलो झलि' (पा० सू० ८.२.२६) इति सिचो लोपः । उदयनात् । उदेत्यत्रेति उदयनम् । 'इण् गतौ' । अधिकरणे ल्युट् । कृदुत्तरपदप्रकृतिस्वरत्वम् । सुभगा । शोभनो भगो यस्याः सा । 'आद्युदात्त द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । मानुषान् । मनोः पुत्रा मानुषाः । 'मनोर्जातावञ्यतौ षुक् च' इति अञ् षुगागमश्च । ञित्त्वादाद्युदात्तत्वम् ॥

शब्दा०—एषा=इसने, अयुक्त=जोता है, परावतः=बहुत दूर से, सूर्यस्य=सूर्य के, उदयनात्=उदय स्थान से, अधि=आगे, शतम्=सौ, रथेभिः=रथों से, सुभगा=सौभाग्यवती, उषाः=उषा, इयम्=यह, वि=विशेष रूप से, याति=जाती है, अभि=ओर, मानुषान्=मनुष्यों की ।

हि० अ०—इसने बहुत दूर सूर्य के उदय स्थान से भी आग से (अपने रथ को) जोता है । यह सौभाग्यवती उषा सौ रथों से मनुष्यों की तरफ विशेष रूप से जाती है ।

Trans.—This (dawn) has harnessed (her chariot) from afar, above the rising point of sun. This auspicious dawn goes to the men with hundred chariots.

Notes—अयुक्त—√*yuj* to join, mid. root-aorist 3rd. sing. सुभगा—Auspicious, lovely; Bahuvrīhi

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

compd. accented on the second member (नञ्सुभ्याम्—Pāṇ. VI. 2.172).

विश्वं॑म् । अ॒स्याः॒ । न॒ना॒म॒ । चक्ष॑से । जग॑त् । ज्योतिः॑ । कृ॒णो॒ति॒ । सू॒नरी॑ ॥ अप॑ । द्वेषः॑ । म॒घोनी॑ । दु॒हि॒ता । दि॒वः । उ॒षाः । उ॒च्छ॒त् । अप॑ । स्रिधः॑ ॥८॥

सा० भा०—विश्वं सर्वं जगत् जङ्गमं प्राणिजातम् अस्याः उषसः चक्षसे प्रकाशाय ननाम प्रह्वी भवति । रात्रौ तमसि निमग्नाः सर्वे जनास्तन्निवारयित्रीमुषसमुपलभ्य नमस्कुर्वन्तीत्यर्थः । कुतः । यस्मादेषा सूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्री उषाः ज्योतिष्कृणोति सर्वं प्रकाशयति । किं च मघोनी मघवती धनवती दिवः दुहिता द्युलोकसकाशादुत्पन्ना उषाः द्वेषः द्वेष्टॄन् अप उच्छत् अपवर्जयति । तथा स्रिधः शोषयितॄन् अप उच्छत् अपवर्जयति । तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतामुषोदेवतां विश्वं जगन्नमस्करोतीत्यर्थः ॥ अस्याः । 'इदमोऽन्वादेशे' इति अशादेशः अनुदात्तः विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदात्तत्वम् । ननाम । संहितायाम् 'अन्येषामपि दृश्यते' इति अभ्यासस्य दीर्घत्वम् । तुजादित्वे हि तूतुजानः इत्यादाविव पदकालेऽपि दीर्घः श्रूयते । ज्योतिः । 'इणः षः' इत्यनुवृत्तौ 'इसुसोः सामर्थ्ये' (पा० सू० ८.३.४४) इति विसर्जनीयस्य षत्वम् । द्वेषः । 'द्विष अप्रीतौ' । अन्येभ्योऽपि दृश्यन्ते' इति विच् । लघूपधगुणः । मघोनी । मघं वनति संभजते इति मघोनी । 'श्वन्नुक्षन्' इत्यादिना मघवञ्शब्दः कनिन्प्रत्ययान्तो निपातितः । स्त्रियाम् 'ऋन्नेभ्यो ङीप्' इति ङीप् । भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति संप्रसारणम् । उच्छत् । 'उछी विवासे' । विवासो वर्जनम् । 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङ् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडागमाभावः । स्रिधः । 'स्रिधु शोषणे' । 'क्विप् च' इति क्विप् ॥

शब्दा०—विश्वम्=सम्पूर्ण, अस्याः=इसको, नानाम=नमस्कार करते हैं, चक्षसे=देखने के लिये, जगत्=जंगम जीव, ज्योतिः=प्रकाश, कृणोति=करती है, सूनरी=सुन्दरी, द्वेषः=द्वेष करनेवाले को, मघोनी=प्रचुर धन देनेवाली, दुहिता=पुत्री, दिवः=आकाश की, उषाः=उषा, अप उच्छत्=दूर करे, अप=दूर करे, स्रिधः=बाधा उपस्थित करनेवाले को ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—सम्पूर्ण प्राणी देखने के लिये इसको नमस्कार करते हैं; सुन्दरी (उषा) प्रकाश का निर्माण करती है। प्रचुर धन देनेवाली, आकाश की पुत्री उषा, द्वेष करनेवालों को दूर करे; बाधा उपस्थित करनेवालों को दूर करे।

Trans.—All moving creatures bow down before her to see; the lovely (dawn) makes light. May dawn, the bounteous daughter of heaven, drive away the haters and disperse the hinderers.

Notes—नानाम—√*nam* to bend, perf. 3rd. sing.; the first syllable is lengthened (अन्येषामपि दृश्यते. Pāṇ. VI. 3.137). चक्षसे—Dative infinitive in से from √*cakṣ* to see. उच्छत्—√*vas* to shine, pres. injun. 3rd. sing.

उषः। आ। भाहि। भानुना। चन्द्रेण। दुहितः। दिवः॥ आऽवहन्ती। भूरि। अस्मभ्यम्। सौभगम्। विऽउच्छन्ती। दिविष्टिषु॥९॥

सा० भा०—हे दिवः दुहितः द्युलोकस्य पुत्रि उषः उषोदेवते चन्द्रेण सर्वेषामाह्लादकेन भानुना प्रकाशेन आ समन्तात् भाहि प्रकाशस्व। किं कुर्वती। दिविष्टिषु दिवसेषु भूरि प्रभूतं सौभगं सौभाग्यम् अस्मभ्यम् आवहन्ती संपादयन्ती। तथा व्युच्छन्ती तमांसि वर्जयन्ती॥ उषः। षाष्ठिकमामन्त्रिताद्युदात्तत्वम्। दुहितर्दिवः। 'परमपि च्छन्दसि' इति दिवः इत्यस्य परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम्। आवहन्ती। ङीप्शपौ पित्त्वादनुदात्तौ। शतुश्च अदुपदेशात् लसार्वधातुकस्वरेणानुदात्तत्वम्। अतो धातुस्वरः शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्। भूरि। प्रभवति न विनश्यतीति भूरि। 'अदिशदिभूशुभिभ्यः क्रिन्' (उ० सू० ४. ५०५) इति क्रिन्। नित्त्वादाद्युदात्तत्वम्। सुभगस्य भावः सौभगम्। 'सुभगान्मन्त्रे' इति उद्गात्रादिषु पाठात् अञ्प्रत्ययः। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति उभयपदवृद्धौ प्राप्तायां 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् अत्रोत्तरपदवृद्धिर्न भवतीति वृतावुक्तम् (का० ७. ३. १९)। व्युच्छन्ती। 'उछी विवासे'। विवासो वर्जनम्। तौदादिकः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः। दिविष्टिषु। दिवशब्देन दिविष्ठः आदित्यो लक्ष्यते। तस्य इष्टयः एषणानि गमनानि येषु दिवसेषु ते दिविष्टयः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

शब्दा०—उषः=ओ उषा, आ भाहि=सर्वत्र प्रकाश करो, भानुना=प्रकाश से, चन्द्रेण=चमकीले, दुहितर्दिवः=ओ आकाश की पुत्री, आवहन्ती=लाती हुई, भूरि=प्रचुर, अस्मभ्यम्=हमारे लिये, सौभगम्=सौभाग्य, व्युच्छन्ती=प्रकाशित होती हुई, दिविष्टिषु=प्रतिदिन।

हि० अ०—ओ आकाश की पुत्री, उषा, हमारे लिये प्रचुर सौभाग्य लाती हुई, प्रतिदिन प्रकाशित होती हुई (अपनी) चमकीली किरणों से सर्वत्र प्रकाश करो।

Trans.—O dawn, the daughter of heaven, shine around with brilliant light, bringing to us plenty of fortune and shining (on us) daily.

Notes—आ भाहि—√*bhā* with आ to shine around, impv. 2nd. sing. आवहन्ती—√*vah* to carry, pres. part.; for accent see निवेशयन् (I. 35. 2.). व्युच्छन्ती–√*vas* to shine, pres. part. दिविष्टिषु–Every day' (Sāyaṇa) 'daily sacrifice' (Maxmüller, Geldner), 'wishing for heaven prayer' (Grassmann) 'solemn rite' (Griffith); Sāyaṇa takes it as Bahuvrīhi, accented on the first member, but in the Pada-text it is not analysed.

विश्वस्य। हि। प्राणनम्। जीवनम्। त्वे इति। वि। यत्। उच्छसि। सूनरि॥ सा। नः। रथेन। बृहता। विभाऽवरि। श्रुधि। चित्रऽमघे। हवम् ॥१०॥

सा० भा०—हे सूनरि उषोदेवि विश्वस्य प्राणिजातस्य प्राणनं चेष्टनं जीवनं प्राणधारणं च त्वे हि त्वय्येव वर्तते। यत् यस्मात् त्वं वि उच्छसि तमो वर्जयसि। हे विभावरि विशिष्टप्रकाशयुक्ते सा तादृशी त्वं नः अस्मान्प्रति बृहता प्रौढेन रथेन आयाहीति शेषः। तथा हि चित्रामघे विचित्रधनयुक्ते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उषोदेवि नः अस्मदीयं हवम् आह्वानं श्रुधि शृणु ॥ प्राणनम् । 'अन चेष्टायाम्' । 'ल्युट् च' इति भावे ल्युट् । योरनादेशः । समासे 'अनितेः' (पा० सू० ८. ४. १९) इति उपसर्गस्थात् रकारात् निमित्तात् उत्तरस्य नकारस्य णत्वम् । ननु 'अनितेः' इति इटा निर्देशात् कथम् 'अन चेष्टायाम्' इत्यस्य णत्वम् । तर्हि जीवनस्य पृथगुपादानात् तेनैव धातुना चेष्टा लक्ष्यते । समासे कृदुत्तरपद-प्रकृतिस्वरत्वम् । संहितायाम् एकादेशस्वरेण एकादेशस्योदात्तत्वम् । त्वे । 'सुपां सुलुक्' इति सप्तम्याः शेआदेशः । उच्छसि । 'उछी विवासे' तौदादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । 'निपातैर्यद्यदिहन्त' इति निघात प्रतिषेधः । सूनरि । सुष्ठु नयतीति सूनरी । 'नृ नये' इत्यस्मात् 'अच इः' इति औणादिक इप्रत्ययः । गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृदिकारादक्तिनः' इति ङीष् । 'निपातस्य च' इति पूर्वपदस्य दीघत्वम् । 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वे प्राप्ते 'आमन्त्रितस्य च' इति आष्टमिको निघातः । विभावरि । विशिष्टा भा यस्याः सा । 'छन्दसीवनिपौ' (पा० सू० ५. २. १०९. २) इति मत्वर्थीयो वनिप् । 'वनो र च' इति ङीप्; तत्संनियोगेन नकारस्य रेफादेशश्च । श्रुधि । 'श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः । 'बहुलं छन्दसि' इति विकरणस्य लुक् । हेरपित्त्वेन प्रत्ययस्वरेणान्तोदात्तत्वम् । पादादित्वात् निघाताभावः । मघम् इति धननाम । चित्रं मघं यस्याः सा चित्रमघा । 'अन्येषामपि दृश्यते' इति संहितायां पूर्वपदस्य दीर्घत्वम् । हवम् । 'ह्वेञ् स्पर्धायां शब्दे च' । 'भावेऽनुपसर्गस्य' इति अप्प्रत्ययः; तत्संनियोगेन संप्रसारणं च ॥

शब्दा०—विश्वस्य=सम्पूर्ण, हि=चूँकि, प्राणनम्=प्राण, जीवनम्=जीवन, त्वे=तुममें, यत्=जब, व्युच्छसि=प्रकाशित होती हो, सूनरि=ओ सुन्दरी, सा=वह (तुम), नः=हमारी, रथेन=रथ से, बृहता=बड़े, विभावरि=ओ प्रकाशवाली, श्रुधि=सुनो, चित्रमघे=ओ विचित्र धन-वाली, हवम्=पुकार ।

हि० अ०—चूँकि, ओ सुन्दरी (उषा), जब तुम प्रकाशित होती हो, सम्पूर्ण प्राणियों का प्राण तथा जीवन तुम्हारे में रहता है; (अतः) ओ प्रकाश-वाली, वह (तुम) बड़े रथ से हमारी तरफ (आती हुई), ओ विचित्र धन वाली, हमारी पुकार को सुनो ।

Trans.—O beautiful one, the breath and life of all (are) in thee, when thou shine forth. Thou as such,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

O diffuser of light, (coming) to us with lofty chariot, O possessor of illustrious wealth, listen our invocation.

Notes—त्वे—The final ए expressive of locative sense is called pragṛhya ; hence, इति is added to it in the Pada-text. उच्छसि—√*vas* to shine, pres. 2nd. sing ; not unaccented because preceded by हि. सा—The use of 3rd person pronoun with the verb of 2nd person is common in the Vedas. In such cases the pronoun in the 3rd. person has an adjectival sense. Here सा is adjective of त्वम् which is silent. श्रुधि-√*śru* to hear, impv. 2nd. sing ; not unaccented because it begins the Pāda. चित्रामघे—The second syllable is lengthened ; vocative not in the beginning ; hence, unaccented.

उषः । वाजम् । हि । वंस्व । यः । चित्रः । मानुषे । जने ॥
तेन । आ । वह । सुऽकृतः । अध्वरान् । उप । ये । त्वा । गृणन्ति । वह्नयः ॥११॥

सा० भा०—हे उषः वाजं हविर्लक्षणमन्नं हि श्रुतिषु प्रसिद्धं वंस्व याचस्व स्वीकुर्वित्यर्थः । यः वाजः चित्रः चायनीयः मानुषे मनुष्ये जने जाते यजमाने वर्तते तं वाजमिति पूर्वत्रान्वयः । तेन कारणेन सुकृतः सुष्ठु कृतवतो यजमानान् अध्वरान् हिंसारहितान् यागान् उप आ वह प्रापय । ये यजमानाः वह्नयः यज्ञनिर्वाहकाः त्वा त्वां गृणन्ति स्तुवन्ति तान् सुकृत इति पूर्वेण संबन्धः । एतदुक्तं भवति । यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयेति ॥ वाजम् । 'वज व्रज गतौ' । कर्मणि घञ् । 'आजिव्रज्योश्च' (पा० सू० ७.३.६०) इत्यत्र चशब्दस्य अनुक्तसमुच्चयार्थत्वात् वाजो वाज्यमित्यत्रापि कुत्वाभाव इति वृत्तावुक्तत्वात् कुत्वाभावः । 'कर्षात्वतः' इत्यन्तोदात्तत्वे प्राप्ते वृषादित्वादाद्युदात्तत्वम् । वंस्व । 'वनु याचने' । अत्र याचनवाचिना धातुना तदुत्तरभावी स्वीकारो लक्ष्यते । 'बहुलं छन्दसि' इति विकरणस्य लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । 'हि च' इति निघातप्रतिषेधः । सुकृतः । 'सुकर्मपाप' इत्यादिना करोतेः भूतार्थे क्विप् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुगागमः। कृदुत्तरपदप्रकृतिस्वरत्वम्। अध्वरान्। ध्वरो हिंसा नास्त्यस्मिन्निति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। अध्वरान् इत्यस्य ईप्सिततमत्वात् 'कर्तुरीप्सिततमम्' (पा० सू० १.४.४९) इति कर्मसंज्ञा, सुकृत इत्यस्य तु 'अकथितं च' (पा० सू० १.४.५१) इति, 'नीवह्योर्हरतेश्च' (पा० म० १.४.५१) इति द्विकर्मकेषु वहतेः परिगणितत्वात्। अध्वरान् इत्यत्र नकारस्य संहितायां 'दीर्घादटि' इति रुत्वम्। 'आतोऽटि नित्यम्' इति पूर्वस्य आकारस्य सानुनासिकता। गृणन्ति। 'गॄ शब्दे'। 'क्र्यादिभ्यः श्ना'। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। 'श्नाभ्यस्तयोरातः' आकारलोपः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः॥

शब्दा०—उषः=ओ उषा, वाजम्=हविरूप अन्न को, वंस्व=स्वीकार करो, हि=प्रसिद्ध अर्थ का वाचक एक निपात, यः=जो, चित्रः=विचित्र, मानुषे=मनुष्यों में, जने=यजमान में, तेन=उससे, आ वह=लावो, सुकृतः=सुन्दर कार्य करनेवाले, अध्वरान्=यज्ञों में, उप=समीप, ये=जो, त्वा=तुमको, गृणन्ति=प्रशंसा करते हैं, वह्नयः=यज्ञ करानेवाले।

हि० अ०—ओ उषा, इस हविरूप अन्न को, जो यजमान-मनुष्यों में विचित्र है, स्वीकार करो। उसके द्वारा सुन्दर कार्य करनेवाले, यज्ञ करनेवाले (दानियों) को जो तुम्हारी प्रशंसा करते हैं, यज्ञों में लावो।

Trans.—O dawn, accept the sacrificial food which is wonderful among men. Thereby bring to the sacrifices, the pious, the leader (of the sacrifices) who glorify thee.

Notes—**वाजम्**—From √*vaj* to be strong; 'food' (Sāyaṇa), 'strength' (Griffith), 'gifts' (Peterson), 'the prize of victory' (Parāñjpe). **वंस्व**—√*van* to win, impv. 2nd. sing; not unaccented because preceded by **हि**. **वह**—√*vah* to carry, impv. 2nd. sing. **सुकृतः**—Sāyaṇa renders it by **'सुष्ठु कृतवतो यजमानान्'**, Wilson and Griffith as 'pious'; Geldner takes **सुकृतः** to mean pious patron, but he thinks it as genitive of **अध्वरान्**. He renders the 3rd Pāda as 'come on chariot to the sacrifice of the pious patrons'; Grassmann takes **सुकृतः** as

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

denoting 'the gods'. अध्वरान्—Nighaṇṭu enumerates it in the list of the names of sacrifice (III.17.3) and aerial region (I.3.16); Yāska takes it in the first sense and derives it from √*dhvṛ* to kill (अध्वरः इति यज्ञनाम ध्वरतिः हिंसाकर्मा तत्प्रतिषेधः—Nir. I.8). Sāyaṇa analyses the compd. as 'ध्वरो हिंसा नास्त्यस्मिन्निति'; accented on the second member (नञ्सुभ्याम् pān VI.2. 172). For Sandhi in अध्वराँ उप see Appendix 'A' under *Anpadapadavṛtti*. गृणन्ति—√*gṝ* to sing, pres. 3rd. plu; not unaccented because preceded by ये.

विश्वा॑न् । दे॒वान् । आ । व॒ह॒ । सोम॑ऽपीतये । अ॒न्तरि॑क्षात् । उ॒षः॒ । त्वम् ॥ सा । अ॒स्मासु॑ । धाः॒ । गोऽम॑त् । अश्व॑ऽवत् । उ॒क्थ्य॑म् । उषः॑ । वाज॑म् । सु॒ऽवीर्य॑म् ॥१२॥

सा० भा०—हे उषः त्वं सोमपीतये सोमपानाय अन्तरिक्षात् अन्तरिक्षलोकात् विश्वान् सर्वान् देवान् आ वह अस्मदीयं देवयजनदेशं प्रापय । हे उषः सा तादृशी त्वं गोमत् गोमन्तं बहुभिर्गोभिर्युक्तं अश्वावत् अश्वैरुपेतम् उक्थ्यं प्रशस्यं सुवीर्यं शोभनवीर्योपेतं वाजम् अन्नम् अस्मासु धाः निधेहि स्थापयेत्यर्थः ॥ धाः । दधातेः 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लुङ् । 'गातिस्था' इति सिचो लुक् 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । गोमत् । अश्वावत् । 'मन्त्रे सोमाश्वेन्द्रिय' इति मतुपि दीर्घत्वम् । उभयत्र 'सुपां सुलुक्' इति विभक्तेर्लुक् । उक्थ्यम् । उक्थं स्तोत्रम् । तत्र भवमुक्थ्यम् 'भवे छन्दसि' इति यत् । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति 'यतोऽनावः' इत्याद्युदात्तत्वाभावे 'तित्स्वरितम्' इति स्वरितत्वम् । उषः आमन्त्रिताद्युदात्तत्वम् । पादादित्वात् निघाताभावः । सुवीर्यम् । शोभनं वीर्यं यस्य । 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ॥

शब्दा०—विश्वान्=सम्पूर्ण, देवान्=देवताओं को, आ वह=लावो, सोमपीतये=सोमपान करने के लिये, अन्तरिक्षात्=अन्तरिक्षलोक से, उषः=ओ उषा, त्वम्=तुम, सा=वह (तुम), अस्मासु=हमको, धाः=धारण करावो, प्रदान करो, गोमत्=गायों से युक्त, अश्वावत्=अश्वो से

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्त, उक्थ्यम्=प्रशंसनीय, उषः=ओ उषा, वाजम्=धन, सुवीर्यम्=सुन्दर पराक्रमयुक्त ।

हि० अ०—ओ उषा, तुम सभी देवताओं को आकाश से सोमपान करने के लिये (यहां) लावो । ऐसी तुम, ओ उषा, पराक्रमयुक्त, प्रशंसनीय धन, जो गायों तथा अश्वों से युक्त है, हमको प्रदान करो ।

Trans.—O dawn, bring thou all the gods from heaven to drink the Soma-juice. O dawn, thou as such, bestow upon us the praiseworthy invigourating food, accompanied with cows and horses.

Notes—सोमपीतये—Tatpuruṣa compd. generally accents the second member, but also the first, if the second member terminates in the suffix त or न or in verbal noun in ति. (cf. Pāṇ. VI.2. 42). धाः—√*dhā* to put, root-aorist, subju. 2nd. sing. उक्थ्यम्—For accent see वीर्याणि (I.32.1) and व्यथिनः (I.48.6). सुवीर्यम्—Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pāṇ VI.2.172) ; the word वीर preceded by सु as the first member in the Bahuvrīhi, accents the first syllable (वीरवीर्यौ च—Pāṇ VI.2.120; cf. वीर्याणि).

यस्याः । रुशन्तः । अर्चयः । प्रति । भद्राः । अदृक्षत ॥ सा । नः । रयिम् । विश्वऽवारम् । सुऽपेशसम् । उषाः । ददातु । सुग्म्यम् ॥१३॥

सा० भा०—यस्याः उषसः अर्चयः प्रकाशः रुशन्तः शत्रून् हिंसन्तः भद्राः कल्याणाः प्रति अदृक्षत प्रतिदृश्यन्ते सा तथाभूता उषाः नः अस्मभ्यं रयिं ददातु । कीदृशं रयिम् । विश्ववारं विश्वस्य वारकम् । यद्वा । विश्वैर्वरणीयम् । सुपेशसम् पेश इति रूपनाम । शोभनरूपोपेतं सुग्म्यं सुष्ठु गन्तव्यम् । यद्वा । सुग्म्यमिति सुखनाम । तद्धेतुत्वात् ताच्छब्द्यम् ॥ रुशन्तः । 'रुश रिश हिंसायाम्' । शतरि तुदादित्वात् शः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे सतिशिष्टत्वात् विकरणस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । अदृक्षत । दृशेः कर्मणि लुङि झस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अदादेशः । च्लेः सिच् । 'न दृशः' (पा० सू० ३. १. ४७) इति क्सप्रतिषेधः । 'एकाचः' इति इट्प्रतिषेधः । 'लिङ्सिचावात्मनेपदेषु' (पा० सू० १. २. ११) इति सिचः कित्त्वात् लघूपधगुणाभावः । 'सृजिदृशोर्झल्यमकिति' पा० सू० ६. १. ५८) इति अमागमाभावश्च कित्त्वादेव । षत्वकत्वषत्वानि । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । विश्ववारम् । विश्वं वृणोतीति विश्ववारः । 'वृञ् वरणे' । 'कर्मणि अण्' । यद्वा । विश्वैर्व्रियते इति विश्ववारः । कर्मणि घञ् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । सुग्म्यम् । सुष्ठु गन्तव्यः सुग्मः । गमेः 'द्यञर्थे कविधानम्' इति कप्रत्ययः । 'गमहन' इत्यादिना उपधालोपः । तत्र भवं सुग्म्यम् 'भवे छन्दसि' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् ॥

शब्दा० —यस्याः=जिसकी, रुशन्तः=चमकती हुई, अर्चयः=किरणें, प्रति=सम्मुख, भद्राः=कल्याणकारी, अदृक्षत=दिखाई पड़ती है, सा=वह, नः=हम लोगों को, रयिम्=धन, विश्ववारम्=बहुतों के द्वारा अभिलषित, सुपेशसम्=सुन्दर रूपवाला, उषाः=उषा, ददातु=देवे, सुग्म्यम्=सरलता से प्राप्त होने होग्य ।

हि० अ० —जिसकी चमकती हुई, कल्याणकारी किरणें हम लोगों के सम्मुख दिखाई पड़ती है, वह उषा बहुतों के द्वारा अभिलषित, सुन्दर रूपवाला सरलता से प्राप्त होने योख्य धन हम लोगों को प्रदान करे ।

Trans.—Whose shining, auspicious rays are seen towards us, may that dawn give us wealth, desired by many, excellent in form, easily attainable.

Notes—**रुशन्तः**—√*ruś* to shine, pres. part. irregularly accented on the first syllable ; 'killing (the enemies)' (Sāyaṇa), 'bright' (Wilson), 'red' (Maxmüller), 'shining' (Peterson). **अदृक्षत**—√*dṛś* to see, mid. 's'-aorist, 3rd plu. ; not unaccented because preceded by **यस्याः**. **विश्ववारम्**—Desirable (Wilson), 'of all good things' (Griffith), 'consisting of all precious things' (Peterson, Grassmam, Oldenberg) ; in Bahuvrīhi the word **विश्व** as forming the first member, accents the final syllable, if it is noun (**बहुव्रीहौ विश्वं संज्ञायाम्** Pāṇ-VI.2.106). **सुपेशसम्**—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'Endowed with beautiful form' (Sāyaṇa), 'agreeable' (Wilson), 'fair in form' (Griffith), 'of lovely appearance' Peterson); Bahuvrīhi compd. accented on the second member. सुगम्यम्—√*gam* to go, by adding the suffix यत्. A word of two syllables ending in यत् accents the first syllable (यतोऽनावः—Pāṇ VI. 1.213). 'Easily attainable' (Wilson), 'of good augury for life's journey' (Peterson).

ये । चित् । हि । त्वाम् । ऋषयः । पूर्वे । ऊतये । जुहूरे । अवसे । महि ॥ सा । नः । स्तोमान् । अभि । गृणीहि । राधसा । उषः । शुक्रेण । शोचिषा ॥१४॥

सा०भा०—हे महि महिते पूजनीये वा उषोदेवते त्वां ये चिद्धि ये खलु प्रसिद्धाः पूर्वे चिरंतनाः ऋषयः मन्त्रद्रष्टारः ऊतये रक्षणाय । अवः इति अन्ननाम । अवसे अन्नाय च जुहूरे जुह्वरे आहूतवन्तः सूक्तरूपैर्मन्त्रैः स्तुतवन्त इत्यर्थः । हे उषः सा तादृशी त्वं राधसा अस्माभिर्दत्तेन हविर्लक्षणेन धनेन शुक्रेण शोचिषा दीप्तेन तमो निवारयितुं समर्थेन तेजसा चोपलक्षिता सती तेषामृषीणामिव नः अस्माकं स्तोमान् अभि स्तुतीरभिलक्ष्य गृणीहि सम्यक् स्तुतमिति शब्दय । अस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः ॥ ऊतये । अवतेः क्तिनि 'ज्वरत्वर' इत्यादिना वकारस्य उपधायाश्च ऊठ् । 'ऊतियूति' इत्यादिना क्तिन् उदात्तो निपातितः । जुहूरे । 'ह्वेञ् स्पर्धायां शब्दे च' । लिटि 'अभ्यस्तस्य च' इति द्विर्वचनात् पूर्वमेव अभ्यस्तकारणभूतस्य ह्वयतेः संप्रसारणम् । 'अभ्यस्तस्य यो ह्वयतिः कश्चाभ्यस्तस्य ह्वयतिः यस्तस्य कारणम्' (का० ६.१.३३) इति व्याख्यातत्वात् । परपूर्वत्वे 'हलः' इति दीर्घत्वम् । द्विर्वचनादीनि । 'इरयो रे' इति इरेचो रेआदेशः । 'चितः' इत्यन्तोदात्तत्वम् । यद्वृत्तयोगादनिघातः । तत्र हि पञ्चमी निर्देशेऽपि व्यवहितेऽपि कार्यं भवतीत्युक्तम् (का० ८.१.६६) । महि । 'मह पूजायाम्' औणादिकः इप्रत्ययः । 'कृदिकारादक्तिनः' इति ङीष् । संबुद्धौ 'अम्बार्थ' (पा० सू० ७.३.१०७) इति ह्रस्वत्वम् । स्तोमान् । संहितायां नकारस्य रुत्वाद्युक्तम् । नित्त्वादाद्युदात्तत्वम् । गृणीहि । 'गॄ शब्दे' । क्र्यादिकः । शिति 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । राधसा । राध्नोत्यनेनेति राधः । असुनो नित्त्वादाद्युदात्तत्वम् । उषः । पादादित्वात् आष्टमिकनिघाताभावे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०--ये=जो, चित्=निश्चित अर्थ का वाचक एक निपात, हि=प्रसिद्ध अर्थ का वाचक एक निपात, त्वाम्=तुमको, ऋषयः=ऋषियों ने, पूर्वे=पहिले के, ऊतये=रक्षा के लिये, जुहूरे=बुलाया था, अवसे=अन्न के लिये, महि=ओ महान्, सा=वह (तुम), नः=हमारे, स्तोमान्=स्तोत्रों को, अभि गृणीहि=सम्मानित करो, राधसा=धन से, उषः=ओ उषा, शुक्रेण=दीप्त, चमकने वाले, शोचिषा=प्रकाश से।

हि० अ०--ओ महती (उषा), पहिले के सभी महान् ऋषियों ने सहायता के लिये तथा अन्न के लिये तुमको बुलाया था। ओ उषा, ऐसी तुम, हमारे स्तोत्रों को धन से तथा दीप्त प्रकाश से सम्मानित करो।

Trans.—O great (dawn), all the seers in the ancient time had invoked thee for help and for food. Thou as such, O dawn, honour our hymns of praise with wealth and brilliant lustre.

Notes—Both ऊतये and अवसे are derived from √*av* to protect; Sāyaṇa relying on the authority of Nighaṇṭu (II. 7.9) takes अवः to mean 'food'. जुहूरे—√*hū* to call, perf. 3rd. plu.; not unaccented because preceded by हि. अभिगृणीहि—√*gṝ* with अभि to honour, impv. 2nd. sing.

उषः। यत्। अद्य। भानुना। वि। द्वारौ। ऋणवः। दिवः॥ प्र। नः। यच्छतात्। अवृकम्। पृथु। छर्दिः। प्र। देवि। गोऽमतीः। इषः॥१५॥

सा० भा०—हे उषः त्वम् अद्य अस्मिन् प्रभातसमये यत् यस्मात् भानुना प्रकाशेन दिवः अन्तरिक्षस्य द्वारौ द्वारभूतौ पूर्वापरदिग्भागावन्धकारेणाच्छादितौ वि ऋणवः विश्लिष्य प्राप्नोषि, तस्मात् त्वं नः अस्मभ्यं छर्दिः तेजस्वि गृहं प्र यच्छतात् देहि। कीदृशं छर्दिः। अवृकं हिंसकरहितं पृथु विस्तीर्णम्। अपि च हे देवि देवनशीले गोमतीः बहूभिर्गोभिर्युक्ताः इषः अन्नानि। प्र इत्युपसर्गस्य आवृत्तेः यच्छतात् इत्यनुषज्यते। प्र यच्छतात् देहि। त्वदागमनस्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः। छर्दिः इति गृह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाम, 'छर्दिः छदिः' (नि० ३.४.१८) इति तन्नामसु पाठात्। ऋणवः। 'ऋणु गतौ'। छान्दसे लङि सिपि तनादित्वात् उप्रत्ययः। ततो व्यत्ययेन शपि गुणावादेशौ। शपः पित्त्वादनुदात्तत्वे उप्रत्ययस्वरः शिष्यते। यद्वृत्तयोगादनिघातः। दिवः। 'ऊडिदम्' इत्यादिना विभक्तेरुदात्तत्वम्। प्र नः। 'उपसर्गाद्बहुलम्' इति बहुलवचनात् नसो णत्वाभावः। यच्छतात्। 'दाण् दाने'। शपि 'पाघ्रा' इत्यादिना यच्छादेशः। अवृकम्। नास्ति वृकोऽस्मिन्निति बहुव्रीहौ 'नञ्सुभ्याम्'। इत्युत्तरपदान्तोदात्तत्वम्। पृथु। 'प्रथ प्रख्याने'। 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' (उ० सू० १.२८) इति कुप्रत्ययः संप्रसारणं च। छर्दिः इति गृहनाम। 'उछृदिर् दीप्तिदेवनयोः'। अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' (उ०सू० २.२६५) इति इसिप्रत्ययः। लघूपधगुणः। प्रत्ययस्वरः॥

शब्दा०--उषः=ओ उषा, यत्=जब, अद्य=आज, भानुना=प्रकाश से, द्वारौ=दोनों फाटकों को, वि ऋणवः=खोला है, दिवः=आकाश के, प्र=विशेष रूप से, नः=हमको, यच्छतात्=प्रदान करो, अवृकम्=भयरहित, पृथु=विस्तृत, छर्दिः=सुरक्षित स्थान, प्र=(प्रदान करो), देवि=ओ देवी, गोमतीः=दूध से युक्त, इषः=अन्न।

हि० अ०–ओ उषा, आज, जब तुमने प्रकाश से आकाश के दोनों फाटकों को खोला है; हमें भयरहित, विस्तृत स्थान तथा ओ देवी, दूध से युक्त अन्न प्रदान करो।

Trans.—O dawn, today, when thou hast opened the two gates of the heaven with lustre; give us spacious shelter, free from danger; O goddess, grant us food, accompanied with milk.

Notes—ऋणवः—√*ṛ* with वि to open, pres. subju. 2nd. sing.; not unaccented because preceded by यत्. यच्छतात्—√*yam* to stretch out, impv. 2nd. sing. अवृकम्—'Secure' (Wilson), 'free from foes' (Griffith) 'harm-proof' (Peterson); वृक् is derived from √*vraśc* to cut into pieces; in the Nighaṇṭu it is enumerated in the list of the names of thunderbolt (II.20.7) and thief (III.24.14); thus अवृकम् means free from the fear of thunderbolt or thieves; Bahuvrīhi compd.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

accented on the second member (नञ्सुभ्याम्—Pāṇ. VI.2.172). पृथु — From √*prath* to spread, by Samprasāraṇa छर्दिः—Sheltering place; according to Grassmann छर्दि is the corrupt form of छदि,, but in the Nighaṇṭu both the words are enumerated in the list of the names of house (Nigh. III.41.18-19). इषः—'Food' (Wilson, Griffith) 'nourishment' (Peterson); Geldner derives it from √*iṣ* to desire, and Parāñjpe from √*iṣ* to strive or set in action. गोमती—Yāska takes गो also to mean 'milk'. In Nirukta he quotes a stanza गोभिः श्रीणीत मत्सरम् (IX.46.4). Here गोमती with इष would certainly mean 'food accompanied with milk'.

सम् । नः । राया । बृहता । विश्वऽपेशसा । मिमिक्ष्व । सम् । इळाभिः । आ ॥ सम् । द्युम्नेन । विश्वऽतुरा । उषः । महि । सम् । वाजैः । वाजिनीऽवति ॥१६॥

सा० भा०—हे उषः नः अस्मान् राया धनेन सं मिमिक्ष्व संसिञ्च संयोजयेत्यर्थः । कीदृशेन धनेन । बृहता प्रभूतेन विश्वपेशसा । पेश इति रूपनाम । बहुविधरूपयुक्तेन । तथा इळाभिः आ गोभिश्च अस्मान् सं मिमिक्ष्व । इळा इति गोनाम । 'इळा जगती' (नि० २. ११. ७) इति तन्नामसु पाठात् । आकारः समुच्चये पदान्ते वर्तमानत्वात् । उक्तं च—'एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकारः' (निरु० १. ४) इति । किंच हे महि महनीये उषोदेवते द्युम्नेन यशसा सं मिमिक्ष्व । 'द्युम्नं द्योततेर्यशो वान्नं वा' (निरु० ५. ५) इति यास्कः । कीदृशेन द्युम्नेन । विश्वतुरा सर्वेषां शत्रूणां हिंसकेन । तथा हे वाजिनीवति अन्नसाधनभूतक्रियायुक्ते वाजैः अन्नैः अस्मान् सं मिमिक्ष्व । 'अन्नं वै वाजः' (श० ब्रा० ९. ३. ४. १) इति श्रुत्यन्तरात् ॥ राया । 'ऊडिदम्' इत्यादिना विभक्तेरुदात्तत्वम् । बृहता । 'बृहन्महतोरुपसंख्यानम्' इति विभक्तिरुदात्ता । विश्वपेशसा । विश्वानि पेशांसि यस्य सौ विश्वपेशाः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति व्यत्ययेन असंज्ञायामपि पूर्वदान्तोदात्तत्वम् । यद्वा । मरुद्वृधादिर्द्रष्टव्यः । मिमिक्ष्व । 'मिह सेचने' । व्यत्ययेन आत्मनेपदम् । लोटि 'बहुलं छन्दसि' इति शपः श्लुः । द्विर्भावहलादिशेषौ । ढत्वकत्वषत्वानि । प्रत्यय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वरस्य सतिशिष्टत्वात् स एव शिष्यते। पूर्वपदस्य असमानवाक्यस्थत्वात् 'तिङ्ङतिङः' इति निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति वचनात्। विश्वतुरा। तूर्वतीति तूः। तुर्वी हिंसार्थः। 'क्विप् च' इति क्विप्। राल्लोपः इति वलोपः। विश्वेषां तूः विश्वतूः। 'समासस्य' इत्यन्तोदात्तत्वम्। वाजिनीवति। वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया। तादृशी क्रिया यस्याः सा तथोक्ता॥

शब्दा०—नः=हमें, राया=धन से, बृहता=प्रचुर, बड़े, विश्वपेशसा=विविध रूपवाले, संमिमिक्ष्व=संयुक्त करो, सम्=संयुक्त करो, इळाभिः=अन्न से, सम्=संयुक्त करो, द्युम्नेन=यश से, विश्वतुरा=सबको जीतनेवाले, उषः=ओ उषा, महि=महान्, सम्=संयुक्त करो, वाजैः=अन्न से, वाजिनीवति=ओ प्रचुर धनवाली।

हि० अ०—ओ महती उषा, प्रचुर तथा विविध रूपवाले धन से, पुष्टिकारक अन्न से, सबको जीतनेवाले यश से, तथा ओ प्रचुर धनवाली, अन्न से हमें संयुक्त करो।

Trans.—O great dawn, associate us with wealth, abundant and omniform, with nurture, with fame, all-subduing, with food, O possessor of food.

Notes—**मिमिक्ष्व**—Impv. 2nd. sing ; not unaccented because it begins the pāda ; the root from which it is derived is doubtful : Sāyaṇa, Maxmüller and Grassmann derive it from √*mih* to rain ; Macdonell and Geldner from √*mikṣ* to mix ; Parāñjpe from √*miṣ* to mix. **इळा**—It is enumerated in the list of the names of earth (Nigh.I.1.15), speech (Nigh.I.11.3), food (Nigh.II.7.13), and cow (Nigh.II. 11.7) ; Sāyaṇa takes it here to mean 'cow' Griffith as 'refreshing food' ; according to Bergaigne **इळा** is a 'liquid offering' as well as 'the prayer accompanying it'. **इळा** in the Vedas is personified as a goddess. **विश्वतुरा**—Tatpuruṣa compd. accented on the final member.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तदशेऽनुवाके पञ्च सूक्तानि । तत्र 'नासत्याभ्याम्' इति पञ्चविंशत्यृचं प्रथमं सूक्तम् । उशिक्संज्ञायामङ्गराजस्य महिष्या दास्या दीर्घतमसोत्पादितः कक्षीवान् अस्य सूक्तस्य ऋषिः । त्रिष्टुप् छन्दः । अश्विनौ देवता । तथा चानुकान्तं—'नासत्याभ्यां पञ्चाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वै' इति । तुह्यादि परिभाषया इदमादीनि पञ्च सूक्तानि अश्विदेवत्यानि । प्रातरनुवाकस्य आश्विने क्रतो त्रैष्टुभे छन्दसि इदमादीनि त्रीणि सूक्तानि । 'अथाश्विनः' इति खण्डे सूत्रितं—'ग्रावाणेव नासत्याभ्यामिति त्रीणि' (आश्व० श्रौ० ४. १५) इति । आश्विनशस्त्रे चैतानि शस्यानि 'प्रातरनुवाकन्यायेन' (आश्व० श्रौ० ६. ५) इति अतिदिष्टत्वात् ॥

नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे । स्तोमान् । इयर्मि । अभ्रियाऽइव । वातः ॥ यौ । अभंगाय । विऽमदाय । जायाम् । सेनाऽजुवा । निऽऊहतुः । रथेन ॥१॥

सा० भा०—बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्र वृञ्जे प्रकर्षेण अन्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृङ्क्ते छिनत्ति संपादयतीति यावत् । एवमहं नासत्याभ्याम् अश्विभ्यां स्तोमान् स्तुतीः इयर्मि संपादयामि । एतदेव विशदीक्रियते । अभ्रियेव । यथा अभ्रियाणि अभ्रेषु मेघेष्ववस्थितान्युदकानि वातः वायुः वर्षणार्थं बहुशः प्रेरयति एवमहम् अश्विभ्यां स्तोत्राणि इयर्मि बहुशः प्रेरयामि । कीदृशावश्विनौ । अभंगाय बालाय स्वयंवरलब्धभार्याय विमदाय एतत्संज्ञाय राजर्षये मध्येमार्गं स्वयंवरार्थमागतैः ताम् अलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिः दुष्प्रापेण रथेन यौ अश्वनौ जायां भार्यां परैरनुक्रान्तां न्यूहतुः शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः । ताभ्यामित्यर्थः ॥ नासत्याभ्याम् । सत्सु भवौ सत्यौ । न सत्यौ असत्यौ । न असत्यौ नासत्यौ । 'नञ्राण्नपात्' इत्यादिना नञः प्रकृतिभावः अव्ययपूर्वपदप्रकृतिस्वरत्वम् । वृञ्जे । 'वृजी वर्जने' । आदादिकः इदित्वात् नुम् । 'लोपस्त आत्मनेपदेषु' इति तलोपः । इयर्मि । 'ऋगतौ' जौहोत्यादिकः । 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम् । 'अभ्यासस्यासवर्णे' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इयङ् । अभ्रियेव । 'समुद्राभ्राद्घः' इति भवार्थे घः । घस्य इयादेशः । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । अर्भगाय । 'अर्तिगृभ्यां भन्' (उ० सू० ३. ४३२) इति अर्तेर्भन् । अर्भः एवार्भकः । 'संज्ञायां कन्' (पा० सू० ५. ३. ८७) । छान्दसो गकारः । अपर आह । अर्भमल्पं गायति शब्दयतीत्यर्भगः । 'कै गै शब्दे' । 'गापोष्टक्' (पा० सू० ३. २. ८) । 'आतो लोप इटि च' इति आकारलोपः । तदेतत् पदकृतः शाकल्यस्य अभिमतम् । सेनाजुवा । जु इति सौत्रो धातुर्गत्यर्थः । अस्मादन्तर्भावितण्यर्थात् 'क्विब्वचिप्रच्छि' इत्यादिना क्विब्दीर्घौ । तन्वादित्वादुवङ् (पा० सू० ६. ४. ७७. १) न्यूहतुः । 'वह प्रापणे' लिटि अतुसि यजादित्वात् संप्रसारणम् । 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः ॥

शब्दा०—नासत्याभ्याम्=अश्विन् का एक विशेषण जो स्वतंत्र नाम के रूप में व्यवहृत होने लगा; जो असत्य न हो, ऐसे अश्विन् के लिये, वर्हिरिव=पवित्र दूर्वा की तरह, प्र वृञ्जे=विशेष रूप से सजाता हूँ, स्तोमान्=स्तोत्रों को, इयर्मि=भेजता हूँ, अभ्रियेव=जैसे बादल को, वातः=वायु, यौ=जिन दोनों ने, अर्भगाय=युवक के लिये, विमदाय=विमद के लिये, जायाम्=स्त्री को, सेनाजुवा=वाण की तरह तेज चालवाले, न्यूहतुः=लाये, रथेन=रथ से ।

हि० अ०—मै अश्विन् के लिये मन्त्रों को पवित्र दूर्वा की तरह सजाता हूँ तथा (उन मन्त्रों को अश्विन् के पास) भेजता हूँ जैसे वायु बादलों को । जिन्होंने युवक विमद के लिये उसकी पत्नी को वाण की तरह तेज चालवाले (अपने) रथ से लाया ।

Trans.—I trim (my) hymns as it were sacred grass, for true ones, and send (them) forth (to them) as the wind (drives) the rainy-clouds; who brought a wife to youthful Vimada in their chariot, speeding like an arrow.

Notes—नासत्याभ्याम्—नासत्या (not-untrue) is the epithet of Aśvins, but later on it began to be treated as a name of Aśvins. Sāyaṇa analyses the compound as सत्सु भवौ सत्यौ न सत्यौ असत्यौ न असत्यौ नासत्यौ; नञ् comp. accented on the first syllable. प्र वृञ्जे—√*vrj* to twist,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

mid. pres. 1rst. sing. Sāyaṇa explains वृञ्जे here by taking it in 3rd. sing. इयर्मि—√*ṛ* to go, III conj. pres. 1rst. sing. अर्भगाय—Same as अर्भक; the word अर्भक occurs in the list of the names of 'little' (Nigh. III 2.9). Yāska derives it from अव+√*hṛ* to make little (अर्भगाय अर्भकं अवहृतं भवति—Nir. III. 20). Sāyaṇa renders अर्भगाय by बालाय; Wilson and Griffith take it to mean 'Youthful', Peterson as 'Young'. सेनाजुवा—From सेना +√*ju* to speed; Wilson following Sāyaṇa renders 'outstripping the rival host'; Macdonell takes it to mean 'speeding like an arrow'. न्यूहतुः—नि+√*vah* to carry, perf. 3rd dual, not unaccented because preceded by यौ; for Sandhi in न्यूहतू रथेन see Appendix—'A', *Niyat* under विसर्ग सन्धि.

वीळुपत्मऽभिः । आशुहेमऽभिः । वा । देवानाम् । वा । जूतिऽभिः । शाशदाना ॥ तत् । रासभः । नासत्या । सहस्रम् । आजा । यमस्य । प्रऽधने । जिगाय ॥२॥

सा० भा०—वीळुपत्मभिः । वीड्विति बलनाम । बलवदुत्पतनैः आशुहेमभिः शीघ्रगमनैः । वा शब्दः समुच्चये । हे नासत्या अश्विनौ एवं भूतैरश्वैश्च देवानाम् इन्द्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशद्यमानयोः अत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यः रासभः प्रजापतिना दत्तः सः यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेते आजा आजौ संग्रामे तत् शत्रूणां सहस्रं जिगाय जितवान् । वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति । यद्वा । जेतव्यत्वेन प्रजापतिना निहितं ऋक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय जयेनालभत । अन्येभ्यः देवेभ्यः पूर्वमेवार्जि प्राप्य युवां जयं प्रापयामास । तथा चास्मिन्नर्थे 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्' (ऐ० ब्रा० ४.७) इत्यादिकं ब्राह्मणमनुसंधेयम् ॥ वीळुपत्मभिः । वीळु बलवत्पतन्तीति वीळुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वन्ति गच्छन्तीति आशुहेमानः । तैः । 'हि गतौ वृद्धौ च' । अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जूतिभिः । 'उतियूतिजूति' इत्यादिना क्तिन उदात्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वम् । शाशदाना । 'शद्लृ शातने' । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्मात् यङन्तात् लटः शानच् । तस्य 'छन्दस्युभयथा' इति आर्धधातुकत्वात् शबभावः । अतोलोपयलोपौ । 'अभ्यस्तानामादिः, इत्याद्युदात्तत्वम् । 'सुपां सुलुक्' इति षष्ठ्याः पूर्वसवर्णदीर्घः । आजा । तेनैव सूत्रेण डादेशः । जिगाय । 'जि जये' । 'सन्लिटोर्जेः' इति अभ्यासादुत्तरस्य कुत्वं गकारः ॥

शब्दा०—वीळुपत्मभिः=मजबूत पंखवाले, आशुहेमभिः=शीघ्रगामी अश्वों से, वा=अथवा, देवानाम्=देवताओं की, वा=या, जूतिभिः=प्रेरणा से, शाशदाना=जीतता हुआ, तत्=उन, रासभः=खच्चर ने, नासत्या=ओ सत्यरूप अश्विन्, सहस्रम्=हजार, आजा=रथ-दौड़ प्रतियोगिता में, यमस्य=यम के द्वारा आयोजित, प्रधने=प्रचुरधनयुक्त, जिगाय=जीता ।

हि० अ०—मजबूत पंख वाले, शीघ्रगामी (अश्वों) से या देवताओं की प्रेरणा से जीतता हुआ (तुम्हारे) खच्चर ने, ओ अश्विन्, यम के द्वारा आयोजित प्रचुरधनयुक्त रथ-दौड़ प्रतियोगिता में उन हजार को जीता ।

Trans.—Conquering either by strong-winged quick-going (steeds) or by the instigation of gods, the ass (of yours) O true ones, won that thousand in Yama's chariot race-competition, full of wealth.

Notes—वीळुपत्मभिः—वीळु is enumerated. in the list of the names of power (Nigh. II. 9.14). पत्मभिः is the *instr.* plu. of पत्मन् from √*pat* to fly by adding the suffix मनिन्; *karmadhāraya* compd accented on the second member. आशुहेमभिः From आशु+√*hi* to impel with the suffix मनिन्; Geldner takes आशु to mean 'race-horses'. वा—According to Sāyaṇa it is conjunctive (वा शब्दः समुच्चये); Peterson takes first वा to mean 'either' and second वा 'or'. जूतिभिः—*Instr.* plu. of जूति from √*jū* to speed, with noun making termination ति. शाशदाना—√*śad* to prevail, pass. perf. part.; accented on the first syllable (अभ्यस्तानामादिः—Pāṇ. VI. 1.189). तत्—Sāyaṇa construes it with सहस्रम् and renders 'तत् शत्रूणां सहस्रं,' Griffith construes it

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

with **रासभः** and renders, 'that ass of yours'; Peterson takes it as an introductory adverb and translates as 'then'. **सहस्रम्**—According to Sāyana **सहस्रम्** means 'thousand enemies', Peterson takes it to mean 'thousand ṛks by way of prize'. **आजा**—Loc. sing. of **आजि**; 'battle' (Nigh. II. 17.8). 'chariot -driving competition' (Peterson). **प्रधने**—Sāyaṇa takes it as an adj. of **आजौ** and renders by **'प्रकीर्णधनोपेते'**; Grassmann and Geldner take **प्रधने** to mean 'tournament' arranged by Yama; Parāñjpe thinks it to mean 'prize of victory'. **जिगाय**—√*ji* to conquer, perf. 3rd. sing.

तुग्रः । ह । भुज्युम् । अश्विना । उदऽमेघे । यिम् । न । कः । चित् । ममृऽवान् । अव । अहाः ॥ तम् । ऊहथुः । नौभिः । आत्मन्ऽवतीभिः अन्तरिक्षप्रुत्ऽभिः । अपऽउदकाभिः ॥३॥

सा० भा०—अत्रेयमाख्यायिका । तुग्रो नाम अश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौः मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्ना आसीत् । तदानीं सः भुज्युः शीघ्रम् अश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितम् आत्मीयासु नौषु आरोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थः इदमादिकेन तृचेन प्रतिपाद्यते । हशब्दः प्रसिद्धौ । तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थम् उदमेघे । उदकैर्मिह्यते सिच्यते इति उदमेघः समुद्रः तस्मिन् भुज्युम् एतत्संज्ञं प्रियं पुत्रम् अवाहाः । नावा गन्तुं पर्यत्याक्षीत् । तत्र दृष्टान्तः । ममृवान् म्रियमाणः सन् धनलोभी कश्चित् मनुष्यः रयिं न यथा धनं परित्यजति तद्वत् । हे अश्विनौ तं च भुज्युं मध्येसमुद्रं निमग्नं नौभिः पितृसमीपम् ऊहथुः युवां प्रापितवन्तौ । कीदृशीभिः । आत्मन्वतीभिः आत्मीयाभिः युवयोः स्वभूताभिरित्यर्थः । यद्वा । धृतिरात्मा धारणवतीभिरित्यर्थः । अन्तरिक्षप्रुद्भिः अतिस्वच्छत्वादन्तरिक्षे जलस्य उपरिष्टादेव गन्त्रीभिः अपोदकाभिः सुश्लिष्टत्वात् अपगतोदकाभिः अप्रविष्टोदकाभिरित्यर्थः ॥ उदमेघे । 'मिह सेचने' । कर्मणि घञ् । 'न्यङ्क्वादीनां च' (पा० सू० ७. ३. ५३) इति कुत्वम् । 'उदकस्योदः संज्ञायाम्' (पा० सू० ६. ३. ५७)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

थाथादिना उत्तरपदान्तोदात्तत्वम् । ममृवान् । 'मृङ् प्राणत्यागे' । लिटः क्वसुः । क्रादिनियमात् प्राप्तस्य इटः 'वस्वेकाजाद्धसाम्' इति नियमात् अभावः । अहाः । 'ओहाक् त्यागे' । लुङि तिपि च्लेः सिच् । आगमानुशासनस्यानित्यत्वात् सगिटौ न क्रियेते । 'बहुलं छन्दसि' इति इडभावः । 'हल्ङ्याब्भ्यः' इति तिलोपः । रुत्व-विसर्गौ । यद्वा । 'मन्त्रे घस' इति च्लेर्लुक् । च्लेर्लुप्तत्वात इण् न क्रियते । नौभिः । 'सावेकाचः' इति विभक्तेरुदात्तत्वम् । आत्मन्वतीभिः । आत्मनो मतुप् । 'मादुपधायाः' इति वत्वम् । 'अनो नुट्' (पा० सू० ८. २. १६) इति नुट् । नलोपः । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । अन्तरिक्षप्रुद्भिः । 'प्रुङ् गतौ' ।'क्विप् च' इति क्विप् ॥

शब्दा०—तुग्रः=तुग्र नाम का कोई राजर्षि, ह=प्रसिद्ध अर्थ का वाचक एक निपात, भुज्युम्=तुग्र का पुत्र, अश्विना=ओ अश्विन्, उदमेघे=समुद्र में, रयिम्=धन को, न=तरह, कश्चित्=कोई, ममृवान्=मरता हुआ, अव अहाः=छोड़ा था, तम्=उस भुज्यु को, ऊहथुः=लाये, नौभिः=नौकाओं से, आत्मन्वतीभिः=प्राणवाली, अन्तरिक्षप्रुद्भिः=समुद्र पर तैरने-वाली, अपोदकाभिः=अन्दर जल न आनेवाली ।

हि० अ०—ओ अश्विन्, तुग्र ने भुज्यु को समुद्र के बीच छोड़ा था जैसे मरता हुआ कोई धन को (छोड़े); उस (भुज्यु) को प्राणवाली, समुद्र पर तैरनेवाली, अन्दर जल न आनेवाली नौकाओं पर (बैठाकर तुमलोग उसके घर) लाये ।

Trans.—O Aśvins, Tugra had left Bhujyu in the cloud of waters (i.e. ocean) as a dying one (parts his) wealth. Him (you) brought by animated boats, floating over the ocean and keeping out the waters.

Notes—उदमेघे—Grassmann takes it to mean 'in a down-pour of rain' and Geldner as 'in a mass of water'. Tatpuruṣa compd. accented on the final syllable ; also see note on उदवाहेन (I. 38.9). ममृवान्—√*mṛ* to die, perf. part. अहाः—√*hā* to leave, irregular form of 's-aorist, 3rd. sing. ; the final त् is dropped. ऊहथुः—√*vah* to carry, perf. 2nd. dual. आत्मन्वतीभिः—From

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आत्मन् by adding the suffix मतुप्. Sāyaṇa takes it to mean 'your own' or 'animated' Wilson accepts the first meaning while Griffith and Peterson the second. अन्तरिक्षप्रद्भिः—प्रुद्भि from √*pru.* to go, with the suffix क्विप्; Tatpuruṣa compd. accented on the second member. Wilson following Sāyaṇa translates 'floating over the ocean' Griffith as 'traversing air' and Peterson as 'plying in the sky'.

तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः । नासत्या । भुज्युम् । ऊहथुः । पतङ्गैः ॥ समुद्रस्य । धन्वन् । आर्द्रस्य । पारे । त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥४॥

सा० भा०—हे नासत्यौ सेनया सह उदके निमग्नं भुज्युं तिस्रः क्षपः त्रिसंख्याका रात्रीः त्रिरहा त्रिवारमावृत्तान्यहानि च अतिव्रजद्भिः अतिक्रम्य-गच्छद्भिरेतावन्तं कालमतिव्याप्य वर्तमानैः पतङ्गैः पतद्भिः त्रिभिः त्रिसंख्याकैः रथैः ऊहथुः युवामूढवन्तौ । क्वेति चेत् उच्यते । समुद्रस्य अम्बुराशेर्मध्ये धन्वन् धन्वनि जलवर्जिते प्रदेशे आर्द्रस्य उदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च । कथंभूतै रथैः । शतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः षळश्वैः षड्भिरश्वैर्युक्तैः ॥ तिस्रः । 'त्रिचतुरोः स्त्रियाम्' इति त्रिशब्दस्य तिस्रादेशः । स चान्तोदात्तः । 'अचि र ऋतः' इति रेफादेशे 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् । क्षपः । विभक्त्यन्तस्य छान्दसं ह्रस्वत्वम् । यद्वा । शसि 'आतः' इति योगविभागादधातोरपि आकारलोपः । अहा । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । पतङ्गैः । 'पत्लृ गतौ' । 'पतेरङ्गच्' (उ० सू० १.११६) । धन्वन् । 'धविर्गत्यर्थः' । इदित्त्वात् नुम् । 'कनिन्युवृषि' इत्यादिना कनिन् । 'सुपां सुलुक्' इति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषाम् । 'संख्यासु-पूर्वस्य' इति पादशब्दस्यान्त्यलोपः समासान्तः । अयस्मयादित्वेन भत्वात् पादः पत्' इति पद्भावः । यद्वा । पादसमानार्थः पच्छब्दः प्रकृत्यन्तरं द्रष्टव्यम् ॥

शब्दा०—तिस्रः=तीन, क्षपः=रात्रि, त्रिः=तीन, अहा=दिन, अति-व्रजद्भिः=लगातार चलकर, नासत्या=ओ सत्यरूप अश्विन्, भुज्युम्=भुज्यु को, ऊहथुः=लाये, पतङ्गैः=उड़नेवाले, समुद्रस्य=समुद्र के, धन्वन्=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूखे स्थलपर, आर्द्रस्य=भीगे हुये (समुद्र) के, पारे=पार, त्रिभिः=तीन, रथैः=रथों से, शतपद्भिः=सौ पैरवाले, षडश्वैः=छै अश्वोंवाले।

हि० अ०—ओ अश्विन्, तीन रात, तीन दिन लगातार चलकर भुज्यु को, सौ पैर वाले छै अश्वों से युक्त, उड़ने वाले तीन रथों से, पानी वाले समुद्र के पार, सूखे स्थल पर लाये।

Trans.—By travelling throughout three nights and three days, O true ones, you brought Bhujyu along the dry land, across the watery ocean with swift-flying three chariots, (yoked) with hundred footed six horses.

Notes—अतित्रजद्भिः—Governing compd. accented on the second member. नासत्या—Vocative in the beginning of a pāda; hence, not unaccented. शतपद्भिः—Bahuvrīhi compd. accented on the first member.

अनारम्भणे। तत्। अवीरयेथाम्। अनास्थाने। अग्रभणे। समुद्रे॥ यत्। अश्विनौ। ऊहथुः। भुज्युम्। अस्तम्। शतऽअरित्राम्। नावम्। आतस्थिऽवांसम्॥५॥

सा० भा०—हे अश्विनौ अनारम्भणे आलम्बनरहिते समुद्रे तत् कर्म अवीरयेथाम्। विक्रान्तं कृतवन्तौ युवाम्। अनारम्भणत्वमेव स्पष्टीकरोति। अनास्थाने। आस्थीयते अस्मिन् इति आस्थानो भूप्रदेशः। तद्रहिते स्थातुमशक्ये जले इत्यर्थः। अग्रभणे अग्रहणे। हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन् इत्यर्थः। किं पुनस्तत्कर्म। भुज्युं समुद्रे मग्नं शतारित्रां बह्वरित्राम्। यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तानि अरित्राणि। ईदृशीं नावम् आतस्थिवांसम् आस्थितवन्तमारूढवन्तं कृत्वा अस्तम्। गृहनामैतत्। पितुस्तुग्रस्य गृहं प्रति यत् ऊहथुः। तत्प्रापणमन्यैर्दुःशकं युवां समुद्रमध्ये कृतवन्तावित्यर्थः॥ अनारम्भणे। आरभ्यते इत्यारम्भणम्। 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट्। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। अवीरयेथाम्। 'शूर वीर विक्रान्तौ'। चुरादिरात्मनेपदी। अनास्थानाग्रभणयोः पूर्ववत् ल्युट्स्वरौ। अयं तु विशेषः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'हृग्रहोर्भः' इति भत्वम्। अस्तम्। अस्यते अस्मिन् सर्वमित्यस्तं गृहम्। 'असिहसि' इत्यादिना तन्प्रत्ययः। शतारित्राम्। 'ऋ गतौ'। 'अतिलूधूसू' (पा० सू० ३.२.१८४) इति करणे इत्रप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

शब्दा०—अनारम्भणे=आलम्बन-रहित, आश्रय-रहित, तत्=वह, अवीरयेथाम्=बहादुरी का कार्य किया, अनास्थाने=जहाँ खड़ा होने का स्थान नहीं था, अग्रभणे=जहाँ सहारारूप पकड़ने की कोई वस्तु नहीं, समुद्रे=समुद्र में, यत्=जब, अश्विनौ=ओ अश्विन्, ऊहथुः=लाये, भुज्युम्=भुज्यु को, अस्तम्=घर, शतारित्राम्=सौ डांड़वाली, नावम्=नौका पर, आतस्थिवांसम्=बैठाकर।

हि० अ०—समुद्र में जहाँ, पर कोई आश्रय नहीं था, (जहाँ) खड़ा होने का स्थान नहीं, (जहाँ सहारा रूप) पकड़ने की कोई वस्तु नहीं, (निश्चित ही तुमने) बहादुरी का कार्य किया; ओ अश्विन्, जब तुम लोग सौ डांड़-वाली नौका पर बैठाकर भुज्यु को (उसके) घर लाये।

Trans.—(Indeed) you did a heroic deed in the ocean where there was nothing to give support, nothing to rest upon and nothing to catch at, when you brought Bhujyu, having seated (him) in a hundred oared boat, (his) dwelling.

Notes—अनारम्भणे—From अन्+आ+√*rabh* (to grasp) with ल्युट्; Bahuvrīhi, accented on the second member (नञ्सुभ्याम्—Pan. VI. 2.172). अवीरयेथाम्—From denom. base √*viraya* to act like hero, impf. 2nd. dual. अनास्थाने—Bahuvrīhi, accented on the second member. अग्रभणे—From √*grabh.* (to catch) with ल्युट्. Bahuvrīhi compd. शतारित्राम्—अरित्र from √*ṛ* to go; Bahuvrīhi compd. accented on the first member. आतस्थिवांसम्——√*sthā* to stand, perf. part.

यम्। अश्विना। ददथुः। श्वेतम्। अश्वम्। अघऽअश्वाय। शश्वत्। इत्। स्वस्ति॥ तत्। वाम्। दात्रम्। महि। कीर्तेन्यम्। भूत्। पैद्वः। वाजी। सदम्। इत्। हव्यः। अर्यः॥६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—अत्रेदमाख्यायते। पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव। तस्मै प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्तवन्तौ। स चाश्वस्तस्य प्रौढं जयं चकारेति। एतदत्र प्रतिपाद्यते। हे अश्विनौ युवाम् अघाश्वाय अहन्तव्याश्वाय। पेदुनाम्ने राजर्षये यं श्वेतवर्णं अश्वं ददथुः दत्तवन्तौ सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मङ्गलं शश्वत् इत् नित्यमेव चकार। वां युवयोः तत् दात्रं दानं महि महदतिगम्भीरम् अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत् अभूत्। तस्मात् पैद्वः पेदोः संबन्धी पतनशीलः शीघ्रगामी वा अर्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान् सोऽश्वः सदमित् सदैव हव्यः अस्माभिरप्याह्वातव्यः॥ दात्रम्। ददातेर्भावे औणादिकः त्रप्रत्ययः। महि। 'मह पूजायाम्'। 'इन्सर्वधातुभ्यः' इति इन्। कीर्तेन्यम्। 'कृत संशब्दने'। 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्यप्रत्ययः। 'ऋत इद्धातोः' इति इत्वम्। भूत्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। पैद्वः। पेदोः संबन्धी। 'तस्येदम्' इति अण्। छान्दसो वर्णलोपः। हव्यः। ह्वयतेः 'अचो यत्' इति यत्। 'बहुलं छन्दसि' इति संप्रसारणम्। गुणः। 'धातोस्तन्निमित्तस्यैव' इति अवादेशः। अर्यः। 'ऋ गतौ'। 'अघ्न्यादयश्च' (उ० सू० ४.५५१) इति औणादिको यत्। व्यत्ययेनान्तोदात्तत्वम्॥

शब्दा०—यम्=जिसको, अश्विना=ओ=अश्विन्, ददथुः=दिया, श्वेतम्=श्वेत वर्ण के, अश्वम्=अश्व को, अघाश्वाय=दुष्ट अश्ववाले को, शश्वत्=सदा के लिये, इत्=पूर्ववर्ती शब्द पर बल देनेवाला एक निपात, स्वस्ति=मंगलकारी, तत्=वह, वाम्=तुम दोनों का, दात्रम्=दान, महि=महान्, कीर्तेन्यम्=प्रशंसा के योग्य, भूत्=हो गया, पैद्वः=पेदु का, वाजी=अश्व, सदम्=सदा के लिये, इत्=पूर्ववर्ती शब्द पर बल देनेवाला एक निपात, हव्यः=स्तुति के योग्य, अर्यः=मालिक के लिये।

हि० अ० - ओ अश्विन्, दुष्ट घोड़ेवाले को तुमने जिस श्वेत वर्ण के अश्व को दिया वह (अश्व) सदा के लिये मंगलकारी बन गया। तुम्हारा वह महान् दान प्रशंसनीय हुआ; पेदु का वह अश्व मालिक के लिये स्तुति के योग्य बन गया।

Trans.—O Aśvins, the white horse (which) you gave to (a man) whose horse was mischievious, was proved to be a blessing for ever. That great gift of yours was worthy of glorification; the horse of Pedu became the object of invocation to the patron.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—ददथुः—√*dā* to give, perf. 2nd. dual; not unaccented because preceded by यम्. अघाश्वाय—Wilson following Sāyaṇa translates as 'whose horses were indestructible'; Griffith takes it as a proper name. According to Peterson अघाश्वाय means 'to him whose horse was mischievious'; Bahuvrīhi compd. accented on the first member. कीर्तेन्यम्—Gerundive in एन्य from √*krī* to praise. भूत्—√*bhu* to be, root-aorist injun. 3rd. sing. पेद्वः—From पेदु by adding the suffix अण्. इत्—a Particle which emphasises the preceding word. हव्यः—Gerundive in य from √*hū* to call. अर्यः—This word has variously been interpreted by the scholars. Sāyaṇa derives it from √*ṛ* to go with the suffix यत् and renders it by 'शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा' and takes it as an adj. of वाजी or in apposition to हव्यः; Wilson translates it 'scatterer (of the enemies). Griffith, too, regards it as an adj. of वाजी, and renders it as 'brave'. Grassmann thinks it to mean 'pious', Oldenberg as 'Arya', Geldner as 'rich' or 'powerful' and Peterson as 'patron'. Parāñjpe takes it as gen. sing of अरि.

युवम् । नरा । स्तुवते । पज्रियाय । कक्षीवते । अरदतम् । पुरम्-ऽधिम् ॥ कारोतरात् । शफात् । अश्वस्य । वृष्णः । शतम् । कुम्भान् । असिञ्चतम् । सुरायाः ॥७॥

सा० भा०—अत्रेयमाख्यायिका । कक्षीवानृषिः पुरा तमसा तिरोहितज्ञानः सन् ज्ञानार्थमश्विनौ तुष्टाव । तस्मै अश्विनौ प्रभूतां धियं दत्तवन्ताविति । तदाह । हे नरा नेतारावश्विनौ युवं युवां पज्रियाय । पज्रा इत्यङ्गिरसाम् आख्या 'पज्रा वा अङ्गिरसः' इत्याम्नातत्वात् । तेषां कुले जाताय कक्षीवते । कक्ष्या रज्जुरश्वस्य । तद्वते तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरंधिं प्रभूतां धियं बुद्धिम् अरदतं व्यलिखतम् । यथा सर्वार्थगोचरा भवति तथा कृतवन्ता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वित्यर्थः । अपि च कारोतरात् । कारोतरो नाम वैदलश्चर्मवेष्टितो भाजन-विशेषो यस्मिन् सुरायाः स्रावणं क्रियते । लुप्तोपममेतत् । कारोतरात् यथा सुरायाः संपादकाः तां स्रावयन्ति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्म-दीयस्य अश्वस्य शफात् खुरात् सुरायाः शतं कुम्भान् असंख्यातान सुराघटान् असिञ्चतम् अक्षारयतम् । यद्वा । सिञ्चति । पूरणार्थः । कारोतरस्थानीयात् युष्मदीयाश्वखुरात् या सुरा प्रवहति तया असंख्यातान् घटान् असिञ्चतम् अपूरयतम् । ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचन्ते तेषा-मित्यर्थः ।। स्तुवते । स्तौतेर्लटः शतृ । अदादित्वात् शपो लुक् । 'शतुरनुमः' इति विभक्तेरुदात्तत्वम् । पज्रियाय । पज्रशब्दात् शैषिको घच् । कक्षीवते । 'आसन्दी-वदष्ठीवच्चक्रीवत्कक्षीवत्' इति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वत्वं च । अरदतम् । 'रद विलेखने' । पुरंधिम् । 'पुरंधिर्बहुधीः' (निरु० ६. १३) इति यास्कः । पृषोदरादित्वात् पुरंधिभावः । यद्वा । पुरं पूरयितव्यं सर्वविषयजात-मस्यां धीयते अवस्थाप्यते इति पुरंधिर्बुद्धिः । 'कर्मण्यधिकरणे च' इति दधातेः किप्रत्ययः । 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनात् अलुक् । इदं तु व्युत्पत्ति-मात्रं वस्तुतः पृषोदरादिरेव । असिञ्चतम् । 'षिचिर् क्षरणे' । तौदादिकः । 'शे मुचादीनाम्' इति नुम् ।।

शब्दा०—युवम्=तुम दोनों ने, नरा=ओ नेता, स्तुवते=स्तुति करने-वाले के लिये, पज्रियाय=पज्रि वंश में उत्पन्न, कक्षीवते=कक्षीवान को, अरदतम्=दिया, पुरंधिम्=ज्ञान, कारोतरात्=बांस के बने सुरापात्र से, शफात्=खुर, अश्वस्य=अश्व के, वृष्णः=शक्तिशाली, शतम्=सौ, कुम्भान्=घड़ों को, असिञ्चतम्=भर दिया, सुरायाः=सुरा के ।

हि० अ०—ओ नेता, तुमलोगों ने स्तुति करनेवाले, पज्रि वंश में उत्पन्न, कक्षीवान् को प्रभूत ज्ञान दिया । शक्तिशाली अश्व के खुर से, मानो बांस का बना सुरा रखने का पात्र हो, सैकड़ों सुरा के घड़ों को भर दिया ।

Trans.—O heroes, you imparted knowledge to Kakṣivān of Pajri family, who praised you. (You) poured forth hundred pitures of Soma-juice from the hoof of mighty steed as if from a strainer.

Notes—स्तवते—√*stu* to praise, pres. part. dative. sing. अरदतम्—√*rad* to dig, impf. 2nd. dual. पुरंधिम्—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

From पुरं + √*dhā* + कित्; Wilson following Sāyaṇa translates as 'various knowledge', Grassmann as 'wealth; Griffith as 'wisdom', Geldner' as 'blessing' and Peterson as 'fortune'. असिञ्चतम् — √*sic* to pour, impf. 2nd. dual.

हिमेन। अग्निम्। घ्रंसम्। अवारयेथाम्। पितुऽमतीम्। ऊर्जम्। अस्मै। अधत्तम्॥ ऋबीसे। अत्रिम्। अश्विना। अवऽनीतम्। उत्। निन्यथुः। सर्वऽगणम्। स्वस्ति॥८॥

सा० भा०—अत्रेदमाख्यानम्। अत्रिम् ऋषिम् असुराः शतद्वारे पीड़ायन्त्रगृहे प्रवेश्य तुषाग्निना अबाधिषत। तदानीं तेन ऋषिणा स्तुतावश्विनौ अग्निमुदकेनोपशमय्य तस्मात् पीडागृहात् अविकलेन्द्रियवर्गं सन्तं निरगमयतामिति। तदेतत् प्रतिपाद्यते। हे अश्विनौ हिमेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानम् अत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निम् अवारयेथां युवां निवारितवन्तौ शीतीकृतवन्तावित्यर्थः। अपि च अस्मै असुरपीडया कार्श्यं प्राप्ताय अत्रये पितुमतीम्। पितुरित्यन्ननाम। अन्नयुक्तम् ऊर्जं बलप्रदं रसात्मकं क्षीरादिकम् अधत्तं पुष्ट्यर्थं प्रायच्छतम्। ऋबीसे अपगतप्रकाशे पीड़ायन्त्रगृहे अवनीतम् अवाङ्मुखतया असुरैः प्रापितम् अत्रिं सर्वगणम्। गणः समूहः। सर्वेषामिन्द्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथा उन्निन्यथुः तस्माद्गृहादुद्गमय्य युवां स्वगृहं प्रापितवन्तौ। यद्वा। हिमेन शीतेन वृष्ट्युदकेन अग्निम् अग्निवत्तीक्ष्णं घ्रंसम्। अहर्नामैतत्। सामर्थ्यात् निदाघकालीनम् अहः अवारयेथाम्। तस्याह्नस्तैक्ष्ण्यं निवारितवन्तौ। अपि च अस्मै अग्नये पितुमतीं चरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं रसात्मकम् उपस्तरणाभिधारणात्मकं घृतमधत्तम्। वृष्ट्युत्पादनेनाग्नेर्यागार्थं हवींषि निष्पादितवन्तावित्यर्थः। ऋबीसे अपगततेजस्के पृथिवीद्रव्ये अवनीतमोषधीनामुत्पादनाय अवस्तान्नीतम्। पार्थिवाग्निना परिपक्वाः उदकेन क्लिन्नाः ह्योषधिवनस्पतयो विरोहन्ति। अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशः यथा भवति तथा उन्निन्यथुः। व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवन्तौ। कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मश्विनौ प्रवर्षणेन व्यक्तीकृतवन्तावित्यर्थः । अयं पक्षो यास्केन 'हिमेनोदकेन' (निरु० ६.३६) इत्यादिना उक्तः ॥ पितुमतीम् । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । ऋबीसे । अत्र यास्कः । 'ऋबीसमपगतभासमपचितभासमपहृतभासं गतभासं वा' (निरु० ६.३५) इति । पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । अत्रिम् । 'अद भक्षणे' । 'अदेस्त्रिनि च' इति चशब्दात् त्रिः । अवनीतम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । स्वस्ति । 'अस भुवि' । भावेक्तिन् । 'छन्दस्युभयथा' इति सार्वधातुकत्वात् अस्तेर्भूभावाभावः ॥

शब्दा०—हिमेन=वर्फ से, अग्निम्=अग्नि को, घ्रंसम्=जलती हुई, अवारयेथाम्=बुझाया, पितुमतीम्=अन्न, ऊर्जम्=बलदायक, अस्मै=उसके लिये, अधत्तम्=दिया, ऋबीसे=अन्धेरी गुफा में, अत्रिम्=अत्रि को, अश्विना=ओ अश्विन्, अवनीतम्=नीचे पड़े हुये को, उन्निन्यथुः=ऊपर लाये, सर्वगणम्=सभी अनुयायियों के साथ, स्वस्ति=कल्याण के मार्ग पर ।

हि० अ०--तुमने ठंडे जल से दहकती अग्नि को बुझाया; उसके लिये क्षीरयुक्त अन्न दिया । ओ अश्विन्, अन्धेरी गुफा में नीचे पड़े हुये अत्रि को उसके अनुयायियों के सहित कल्याण के मार्ग पर उपर लाये ।

Trans.—You pacified the burning fire with ice and gave nutritious food to him; O Aśvins, you brought out Atri (who was) cast downward into a dark cavern, with all his followers to blessing.

Notes—**घ्रंसम्**—Yāska takes it to mean day (Nir. VI. 36). According to him **घ्रंसम्** is the object of **अवारयेथाम्** and **अग्नि** is the **उपमान** of **घ्रंसम्**. Sāyaṇa takes **अग्निम्** as the object of **अवारयेथाम्** and **घ्रंसम्** as the adjective of **अग्निम्**. In alternative, Sāyaṇa accepts Yāska's interpretation. Geldner and Griffith understand **अग्नेः** for **अग्निम्** Griffith renders' the fire's fierce burning'. Peterson thinks **घ्रंसम्** as a substantive in apposition to **अग्निम्** and translates as 'dazzling lustre. **अवारयेथाम्**—$\sqrt{vṛ}$ to cover, mid caus. impf. 2nd. dual. **पितुमतीम्**—From $\sqrt{pī}$ with the suffix **मतुप्**. **अधत्तम्**—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

√*dhā* to put, impf. 2nd. dual, ऋबीसे—Yāska takes it to mean earth. Wilson understands it as 'dark cavern', Peterson as 'a fire pit', Grassmann as 'a hot fissure in the earth', Geldner as 'a smouldering fire', अवनीतम्—√*nī* with अव to cast downward, past part; for accent see निहिताः (I. 24.7).

परा । अवतम् । नासत्या । अनुदेथाम् । उच्चाऽबुध्नम् । चक्रथुः । जिह्मऽबारम् ॥ क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गौतमस्य ॥९॥

सा० भा० – अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुः गोतमस्य ऋषेः समीपं देशान्तरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयेताम् । प्रापय्य च तं कूपं स्नानपानादिसौकर्याय उपरिमूलमधोबिलमवास्थापयतामिति । तदेतदाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा एतत्संज्ञावश्विनौ युवाम् अवतम् । कूपनामैतत् । अवस्तात्ततं कूपं परा अनुदेथां गोतमस्य ऋषेः समीपे प्रैरिषाथाम् । तदनन्तरं तं कूपम् उच्चाबुध्नम् उच्चेरुपरिष्टात् बुध्नो मूलं यस्य स तथोक्तः । जिह्मबारं जिह्ममधस्ताद्वर्तमानतया वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः युवामकृषाथाम् । तस्मात् कूपात् तृष्यते पिपासतः गोतमस्य पायनाय पानार्थम् आपो न आपश्च । अयं नशब्दश्चार्थे । क्षरन् प्रवाहरूपेण निरगमन् । कीदृशस्य । राये हवींषि दत्तवतः सहस्राय सहनशीलाय । यद्वा । सहस्रसंख्याकाय राये धनाय एतत्संख्यधनलाभार्थं च अक्षरन् ॥ अनुदेथाम् । 'णुद प्रेरणे' । तौदादिकः । जिह्मबारम् । द्वारशब्दस्य पृषोदरादित्वात् बारादेशः । क्षरन् । 'क्षर संचलने' । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । शपः पित्त्वादनुदात्तत्वम् । तिङो लसार्वधातुकस्वरेण धातुस्वरः । पायनाय । हेतुमिति णिच् । 'शाच्छासाह्वा' इति युक् । भावे ल्युट् । राये । 'रा दाने' । राति ददातीति राः । 'रातेर्डैः' (उ० सू० २. २२४) । 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । तृष्यते । 'ञितृषा पिपासायाम्' । श्यन् । लटः शतृ । श्यनो नित्त्वादाद्युदात्तत्वम् । 'षष्ठ्यर्थे चतुर्थी वक्तव्या' (पा० म० २. ३. ६२. १) इति चतुर्थी ।

शब्दा०—परा=समीप, अवतम्=कुयें को, नासत्या=ओ सत्यस्वभाववाले, अनुदेथाम्=ऊपर उठाये, उच्चाबुध्नम्=उपर पेंदावाला, चक्रथुः=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किया, जिह्मबारम्=तिरछा मुंहवाला, क्षरन्=बहाया, आपः=जल, न=तरह, पायनाय=पीने के लिये, राये=धन के लिये, सहस्राय=हजार, तृष्यते=प्यासे, गोतमस्य=गोतम के लिये।

हि० अ०—ओ अश्विन्, तुमने (धन के) कुयें को ऊपर उठाया; इसके पेंदे को नीचे की ओर तथा मुंह को (पृथिवी की ओर) तीरछा किया; सहस्र धन के प्यासे गोतम के लिये (उस कुयें से धन की) वर्षा की, मानो प्यास शान्त करने के लिये जल हो।

Trans.—O true ones, you raised up the well (of treasure) and made its bottom upward and mouth curved (on the ground); poured as it were waters for drinking, for Gotama, thirsty for thousand-fold wealth.

Notes—अनुदेथाम्—√*nud* to push, mid. impf. 2nd. dual. उच्चाबुध्नम्—Bahuvrīhi, accented on the first member. चक्रथुः—√*kṛ* to make, perf. 2nd. dual. जिह्मबारम्—The word द्वार has become बार by dropping the letter द्; बार is modern बारी the mouth of a pot; Bahuvrīhi compd. accented on the first member. क्षरन्—√*kṣar* to flow, pres. injun. 3rd. plu; Peterson takes it as a participle and renders as 'letting flow'. न—According to Sāyaṇa न is a conjunctive expressive of 'and'; Peterson takes it to mean 'as it were'. पायनाय—From √*pā* to drink by adding the suffixes युक् and ल्युट् in dative sing. सहस्राय—Sāyaṇa understands it as 'सहनशीलाय' and in alternative as 'एतत्संख्यधनलाभार्थम्'; Griffith takes it to mean 'thousand-fold'. Both Sāyaṇa and Griffith construe it with राये but Peterson with तृष्यते. गोतमस्य—Use of gen. in the sense of dative.

जुजुरुषः। नासत्या। उत। वृत्रिम्। प्र। अमुञ्चतम्। द्रापिम्-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऽइव । च्यवानात् ॥ प्र। अतिरतम्। जहितस्य । आयुः । दस्रा । आत् । इत् । पतिम् । अकृणुतम् । कनीनाम् ॥१०॥

सा० भा०—अत्रेदमाख्यानम् । वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभिः परित्यक्तश्चवनाख्यः ऋषिरश्विनौ तुष्टाव । स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति । तदेतदाह । हे नासत्या अश्विनौ जुजुरुषः जीर्णात् च्यवानात् च्यवनाख्यादृषेः सकाशात् वव्रिं कृत्स्नं शरीरमावृत्यावस्थितां जरां प्रामुञ्चतं प्रकर्षेणामोचयतम् । तत्र दृष्टान्तः । द्रापिमिव । द्रापिरिति कवचस्याख्या । यथा कश्चित् कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात् पृथक्करोति तद्वत् । उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वा अश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेः आयुः जीवनं प्रातिरतं प्रावर्धयतम् । प्रपूर्वस्तिरतिर्वर्धनार्थः । आत् इत् अनन्तरमेव युवानं सन्तं कनीनां कन्यानां पतिं भर्तारम् अकृणुतम् अकुरुतम् । जुजुरुषः । 'जॄष् वयोहानौ' । लिटः क्वसुः । 'बहुलं छन्दसि' इति उत्वम् । द्विर्भावः । पञ्चम्येक वचने 'वसोः संप्रसारणम्' इति संप्रसारणम् । 'शासिवसिघसीनां च' इति षत्वम् । वव्रिम् । 'वृञ् वरणे' । 'आहगमहन' इति किप्रत्ययः । जहितस्य । 'ओहाक् त्यागे' । कर्मणि निष्ठा । तस्य 'छन्दस्युभयथा' इति सार्वधातुकत्वात् यक् । तस्य 'बहुलं छन्दसि' इति श्लुः । 'जहातेश्च' (पा० सू० ६. ४. ११६) इति इत्वम् । कनीनाम् । 'रयेर्मतौ बहुलम्' इति बहुलवचनात् कन्याशब्दस्य अत्र संप्रसारणम् ॥

शब्दा०—जुजुरुषः=वृद्ध, नासत्या=ओ सत्य स्वभाववाले, उत=और, वव्रिम्=बाहरी रूप को, प्रामुञ्चतम्=अलग किया, द्रापिमिव=कवच की तरह, च्यवानात्=च्यवान् नामक ऋषि के शरीर से, प्रातिरतम्=बढ़ाया, जहितस्य=पुत्रों द्वारा छोड़ दिये गये की, आयुः=आयु को, दस्रा=ओ आश्चर्यजनक कार्य करनेवाले, आत्=इसके बाद, इत्=पूर्ववर्ती शब्द पर बल देनेवाला एक निपात, पतिम्=स्वामी, अकृणुतम्=बनाया, कनीनाम्=युवतियों का ।

हि० अ०—ओ अश्विन्, (तुम लोगों ने) वृद्ध च्यवान् (ऋषि) के बाहरी रूप को कवच की तरह अलग कर दिया । (पुत्रों द्वारा) छोड़ दिये गये (ऋषि) की आयु को, ओ आश्चर्यजनक कार्य करने वाले, (तुमलोगों ने) बढ़ाया तथा उसको सुन्दर युवतियों का पति बनाया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—O true ones, you removed the outward appearance as it were an armour from the aged Cyavān. You extended the life of an abandoned one, O miracle workers, and then you made him the husband of youthful maidens.

Notes—जुजुरुषः—Gen. sing of जुजुर्वस् from √*jṝ* to be old, perf. part. वव्रिम्—Form (Nigh. III. 7.2). Yāska derives it from √*vṛ* to cover. (वव्रिः इति रूपनाम । वृणोतीति सतः Nir. II. 9). Sāyaṇa here takes it to mean 'old age that prevails the body', Wilson and Griffith as 'skin' and Peterson as 'outer shell'. अमुञ्चतम्—√*muc* to release, impf. 2nd. dual. अतिरतम्—√*tṝ* with prefix प्र to prolong, to extend, 2nd. dual. जहितः—√*hā* to leave, past. part. अकृणुतम्—√*kṛ* to make, impf. 2nd. dual. कनीनाम्—कनी is the Samprasāraṇa of कन्या.

तत् । वाम् । नरा । शंस्यम् । राध्यम् । च । अभिष्टिऽमत् । नासत्या । वरूथम् ॥ यत् । विद्वांसा । निधिम्ऽइव । अपऽगूळ्हम् । उत् । दर्शतात् । ऊपथुः । वन्दनाय । ॥११॥

सा० भा०—अत्रेदमाख्यानम् । वन्दनो नाम कश्चिदृषिः स चासुरैः कूपे निखातः उत्तरीतुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुन्निन्यतुरिति । तदाह । नरा आरोग्यस्य नेतारौ हे नासत्यौ अश्विनौ वां युवयोः संबन्धि अभिष्टिमत् अभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत् कर्म शंस्यम् अस्माभिः प्रशंसनीयं राध्यम् आराधनीयं च । किं पुनस्तत्कर्म । विद्वांसा जानन्तौ युवां निधिमिव निक्षिप्तं धनमिव अपगूळ्हम् अरण्ये निर्जने देशे कूपमध्ये असुरैः निगूढं वन्दनाय वन्दनमृषिं दर्शतात् अध्वगैः पिपासुभिर्द्रष्टव्यात् कूपात् उत् ऊपथुः उदहार्ष्टम् । एवं यत् एतत् कूपादुद्धरणं तदित्यर्थः ॥ शंस्यम् 'शंसु स्तुतौ' । अस्मात् ण्यन्तात् 'अचो यत्' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । अभिष्टिमत् । अभिपूर्वात् 'इष गतौ' इत्यस्मा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्भावे क्तिन् । 'मन्त्रे वृष' इति क्तिन् उदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकन्ध्वादित्वात् पररूपत्वम् । 'तादौ च' इति तु गतिस्वरस्य सर्वविधीनां छन्दसि विकल्पितत्वादप्रवृत्तिः । ततो मतुप् । अन्तोदात्तादुत्तरस्य तस्य 'ह्रस्वनुड्भ्याम्' इत्युदात्तत्वम् । वरूथम् । 'ऋवृञ्भ्यामूथन्' । विद्वांसा । 'सुपां सुलुक्' इति विभक्तेराकारः । अपगूळहम् । 'गुहू संवरणे' । कर्मणि निष्ठा । 'यस्य विभाषा' इति इट्प्रतिषेधः । ढत्वधत्वष्टुत्वढ्लोपदीर्घाः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । दर्शतात् । 'भृमृदृशि' इत्यादिना अतच् । ऊपथुः । 'डुवप् बीजतन्तुसंताने' । लिटि अथुसि यजादित्वात् संप्रसारणम् । द्विर्वचनादि । वन्दनाय । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

शब्दा०—तत्=वह, वाम्=तुमलोगों की, नरा=ओ नेता, शंस्यम्=प्रशंसनीय, राध्यम्=पूजनीय, च=और, अभिष्टिमत्=सहायतात्मक, नासत्या=ओ सत्यस्वभाववाले, वरूथम्=सुरक्षा, यत्=जब, विद्वांसा=जानकार, निधिमिव=खजाने की तरह, अपगूळहम्=छिपे हुये, उत्=ऊपर, दर्शतात्=कुयें से, ऊपथुः=निकाले, वन्दनाय=वन्दन को ।

हि० अ०—ओ नेता, तुम्हारी वह अभिलषित सहायतात्मक सुरक्षा प्रशंसनीय है तथा पूजनीय है; जब जानकार (तुमने) वन्दन को छिपे धन की तरह कुयें से बाहर निकाला ।

Trans.—O leaders, that helpful protection of yours, (which is) desired (by us) is praiseworthy and adorable ; O true ones, when you the knowing (gods) brought out Vandana from the well (in which he was) concealed like treasure.

Notes—**शंस्यम्**—√*śaṁs* to praise, with the suffix **यत्**. **राध्यम्**—√*rādh* to succeed, with the suffix **यत्** ; Wilson renders as 'to be adored', Griffith as 'worth the winning' and Peterson as 'worthy of acquisition'. **अभिष्टिमत्**—Sāyaṇa derives it from **अभि**+√*iṣ* to go ; Parāñjpe derives it from **अभि**+√*as* to afford help; Griffith takes it to mean 'favouring succour'. **वरूथम्**—From √*vṛ* to choose ; Sāyaṇa renders it as **'वरणीयं**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामयितव्यं', Wilson as 'desired'. MWD. takes it to mean 'protection'. अपगूळ्हम्—√*guh* with the prefix अप to conceal; the breathing ह् is a secondary sound being originally represented by घ्. This घ् sometimes represents the old palatal झ which is replaced by cerebral sound before त्. This 'guh' was originally 'gugh' also represented by 'gujh'. With past participle suffix त added to it the 'zh' became cerebral ḍh the replacement being indicated by lengthening of the preceding syllable. ऊपथुः—√*vap* with उत् to bring out. यत्··· वन्दनाय—This hemistich is variously interpreted by the scholars; according to Wilson: 'when becoming aware (of the circumstance) you extricated Vandana (hidden like a concealed treasure from (the well) that was visible (to travellers)'; Grassmann renders: 'as you hauled up for Vandana from the pit the hidden thing like treasure'; Griffith translates: 'what time ye, knowing well his case, delivered Vandana from the pit like a hidden treasure'; Peterson renders: 'when you the knowing (gods) found out visibly a buried treasure as it were for Vandana'.

तत् । वाम् । नरा । सनये । दंसः । उग्रम् । आविः । कृणोमि । तन्यतुः । न । वृष्टिम् ॥ दध्यङ् । ह । यत् । मधु । आथर्वणः । वाम् । अश्वस्य । शीर्ष्णा । प्र । यत् । ईम् । उवाच ॥१२॥

सा० भा०—अत्रेयमाख्यायिका। इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदि इमाम् अन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच। ततोऽश्विनौ अश्वस्य शिरश्छित्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्ताम्। तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास। तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत्। अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाट्यायनवाजसनेययोः प्रपञ्चेनोक्तम्। तदेतत्प्रतिपाद्यते। हे नरा नरौ अश्विनौ वां युवयोः संबन्धि उग्रम् उद्गूर्णमन्यैर्दुःशकं दंसः। कर्मनामैतत्। युवाभ्यां पुरा कृतं तत् कर्म सनये धनलाभार्थम् आविष्कृणोमि प्रकटीकरोमि। तत्र दृष्टान्तः। तन्यतुः न यथा मेघस्थ शब्दः वृष्टिं मेघान्तर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत्। किं तत्कर्म। अथर्वणः पुत्रः दध्यङ् एतत्संज्ञः ऋषिः अश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वां युवाभ्याम् ईम् इमां मधुविद्यां यत् ह यदा खलु प्र उवाच प्रोक्तवान्। तदानीमाश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यत् भवदीयं कर्म तत् आविष्कृणोमीत्यर्थः॥ सनये। 'षणु दाने'। 'खनिकषिकस्यञ्जसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्च' (उ० सू० ४.५७९) इति इप्रत्ययः। तन्यतुः। 'तनु विस्तारे'। 'ऋतन्यञ्जि०' (उ०सू० ४.४४२) इत्यादिना यतुच्। यद्वा। 'स्तन शब्दे'। बाहुलकात् यतुच्। छान्दसः सलोपः। वृष्टिम्। वृष्यते सिच्यते अनेनेति वृष्टिः। मन्त्रे वृष' इत्यादिना क्तिन उदात्तत्वम्। आथर्वणः। अपत्यार्थे अणि 'अन्' (पा०सू० ६.४.१६७) इति प्रकृतिभावात् टिलोपाभावः। शीर्ष्णा। 'शीर्षश्छन्दसि' (पा०सू० ६.१.६०) इति शिरः शब्दपर्यायः शीर्षञ्शब्दोऽन्तोदात्तो निपात्यते। अल्लोपे सति उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥

शब्दा०—तत्=उस, वाम्=तुम्हारे, नरा=ओ नेता, सनये=धन के लिये, दंसः=आश्चर्यजनक कार्य, उग्रम्=शक्तिशाली, आविष्कृणोमि=प्रकट करता हूँ, तन्यतुः=गर्जन, न=तरह, वृष्टिम्=वर्षा को, दध्यङ्=दध्यङ् नाम के ऋषि, ह=प्रसिद्ध अर्थ का वाचक एक निपात, यत्=जब, मधु=मधुविद्या का रहस्य, आथर्वणः=अथर्वण के पुत्र, वाम्=तुम दोनों को, अश्वस्य=अश्व के, शीर्ष्णा=सिर से, प्र=विशेष रूप से, यत्=जो, ईम्=इस, उवाच=कहा था।

हि० अ०—ओ नेता, तुम्हारे उस शक्तिशाली कार्य को धन के लिये मैं प्रकट करता हूँ जैसे गर्जन वर्षा की; जब अथर्वन् के पुत्र दध्यङ् ने अश्व के सिर से तुम लोगों को मधु विद्या का रहस्य बताया था।

Trans.—O leaders, that powerful miracle of yours, in order to gain thereby, I make manifest as the thunder (anounces) the rain; when Dadhyaṅ, the son of Atharvan proclaimed to you the secret of mead with a horse's head.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—सनये—Dative infinitive in ए from √*san* to gain. आविष्कृणोमि—√*kṛ* with आवि to make manifest, pres. 1rst. sing. तन्यतुः—Derived from √*tan* to stretch or √*stan* to thunder. उवाच—√*vac* to speak, perf. 3rd. sing. not unaccented because preceded by यत्.

अजोहवीत् । नासत्या । करा । वाम् । महे । यामन् । पुरुऽभुजा । पुरंम्ऽधिः ॥ श्रुतम् । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तम् । अश्विनौ । अदत्तम् ॥१३॥

सा० भा०—वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विनावाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः तदेतदाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावाश्विनौ महे महनीये पूजनीये यामन् यामनि । याति गच्छतीति याम स्तोत्रम् । तस्मिन्सति करा अभिमतफलस्य कर्तारौ वां युवां पुरंधिः बहुधीः वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः पण्डकः । तद्वती एतत्संज्ञा राजपुत्री अजोहवीत् । पुनः-पुनः स्तुत्या पुत्रलाभार्थम् आहूतवती युवां च वध्रिमत्याः तत् आह्वानं श्रुतम् अशृणुतम् । तत्र दृष्टान्तः । शासुरिव । यथा शासुः आचार्यस्य वचनं शिष्योऽवहितः सन् एकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रं अदत्तं प्राथच्छतम् ॥ अजोहवीत् । ह्वियतेर्यङ्लुगन्तात् लङ् । 'यङो वा' इति तिप ईडागमः । करा । करोतेः पचाद्यच् । 'सुपां सुलुक्' इति विभक्तेः आकारः । यामन् । 'आतो मनिन्क्वनिब्वनिपश्च' इति मनिन् । 'सुपां सुलुक' इति सप्तम्या लुक् । श्रुतम् । लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'बहुलं छन्दस्यमाङ्योगेऽपि इति अडभावः । शासुः । शास्तुः । 'शासु अनुशिष्टौ ।' शंसिशसिशासि' (उ० सू० २ २५०) इत्यादिना संज्ञायां तृन् । इडभावः । छान्दसस्तलोपः ॥

शब्दा०—अजोहवीत्=बुलाया था, नासत्या=ओ सत्यस्वभाववाले, करा=अभिमत कार्य करनेवाले, वाम्=तुम दोनों को, महे=श्रेष्ठ, बड़ी, यामन्=प्रार्थना में, पुरुभुजा=ओ अनेक (शक्तियों) का आनन्द लेनेवाले, पुरंधिः=बुद्धिमान ने, श्रुतम्=सुना, तत्=उसको, शासुरिव=गुरु की आज्ञा की तरह, वध्रिमत्याः=क्लीव या बधिया पुरुष की पत्नी की, हिरण्यहस्तम्=स्वर्ण हाथवाले, अश्विनौ=ओ अश्विन्, अदत्तम्=तुम दोनों ने दिया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ अश्विन्, ओ अनेक (शक्तियों) का आनन्द लेनेवाले, बुद्धिमान (स्त्री) ने अपनी श्रेष्ठ प्रार्थना में, (अभिमत) कार्य करनेवाले तुमको बुलाया था। नपुंसक पुरुष की स्त्री की उस (प्रार्थना) को तुम लोगों ने सुना मानो यह (गुरु की) आज्ञा हो; (तथा तुम लोगों ने उसे) ओ अश्विन्, स्वर्ण हस्तवाले (पुत्र) को दिया।

Trans.—O true ones, a wise (woman) invoked you, the active ones in a powerful prayer, O enjoyer of many; you heard that (invocation) of impotent man's wife and gave her, O Aśvins, a golden handed (son).

Notes—**अजोहवीत्**—√*hū* to call, int. impf. 3rd. sing. **करा**—Acc. dual in **आ**; Wilson following Sāyaṇa takes it to mean 'accomplishers of desires'. According to Geldner **कर** means hand. Parāñjpe understands it as 'active' or 'skilful'. **यामन्**—Loc. sing of **याम** (from √*yā* to go). Sāyaṇa on Ṛ.V. X. 64.1 takes it to mean sacrifice (**यान्ति गच्छन्त्यत्र इति यामा यज्ञः**), but here he understands as prayer (**याति गच्छतीति याम स्तोत्रम्**). Roth and Grassmann following Sāyaṇa understand it as 'going forth to the Gods with prayer and offering i.e. the sacrifice. Pischel takes it to mean 'successful coming of the sacrifice. Max-müllar and Oldenberg render it by 'way' or 'march', according to Parāñjpe **यामन्** means 'on appeal to gods or an appeal made at or through the sacrifice.' **पुरुभुजा**—**पुरु**+√*bhuj* to enjoy; Sāyaṇa renders it by '**बहूनां पालकौ प्रभूतहस्तौ वा**'; Wilson translates as 'protectors of many', Griffith as 'lords of many treasures' and Peterson as 'they enjoy many powers'; vocative not in the beginning of a pāda; hence, unaccented. **श्रुतम्**—√*śru* to hear, rootaorist impv. 2nd dual. **हिरण्यहस्तम्**—See I. 35.10. **अदत्तम्**—√*dā* to give. impf. 2nd dual.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आस्नः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या । अमुमुक्तम् ॥ उतो इति । कविम् । पुरुऽभुजा । युवम् । ह । कृपमाणम् । अकृणुतम् । विऽचक्षे ॥१४॥

सा० भा०—वर्तिका चटकसदृशस्य पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किल अश्विनौ अमोचयताम् । तदेतदाह । नरा नेतारौ नासत्यावश्विनौ युवं युवाम् अभीके अभिगते वृकवर्तिकयोः संग्रामे वृकस्य विकर्तकस्य शुनः आस्नः आस्यात् वर्तिकां चटकसदृशीम् अमुमुक्तम् अमोचयतम् । यास्कस्त्वाह । पुनः पुनर्वर्तते प्रतिदिवसमावर्तते इति वर्तिका उषाः । तां वृकेण आवरकेण सर्वजगत्प्रकाशेनाच्छादयित्रा सूर्येण ग्रस्तां तदीयमुखादश्विनावमुञ्चतामिति । उतो अपि च पुरुभुजा महाबाहू प्रभूतहस्तौ वा युवं ह युवां खलु कृपमाणं स्तुवन्तं कविम् एतत्संज्ञमन्धमृषिं विचक्षे विशेषेण द्रष्टुं समर्थम् अकृणुतम् अकुरुतम् ॥ आस्नः । 'पद्दन्' इत्यादिना आस्यस्य आसन्नादेशः । 'अल्लोपोऽनः' इति अकारलोपे उदात्तनिवृत्तिस्वरेण 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । अमुमुक्तम् । मुचेरन्तर्भावितण्यर्थात् लङि 'बहुलं छन्दसि' इति विकरणस्य श्लुः । कृपमाणम् । कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः । विकरणस्वरे प्राप्ते 'वृषादीनां च' इत्याद्युदात्तत्वम् । विचक्षे । 'तुमर्थे सेसेन्' इति सेन्प्रत्ययः । 'स्कोः संयोगाद्योः' इति सलोपः ॥

शब्दा०—आस्नः=मुख से, वृकस्य=भेड़िये के, वर्तिकाम्=वर्तिका जाति की एक पक्षी को, अभीके=संग्राम में, युवम्=तुम दोनों ने, नरा=ओ नेता, नासत्या=ओ सत्य स्वभाववाले, अमुमुक्तम्=मुक्त किया, उतो=और, कविम्=कवि को, पुरुभुजा=ओ अनेक, (शक्तियों) का आनन्द लेनेवाले, युवम्=तुम दोनों ने, ह=निश्चित अर्थ का वाचक एक निपात, कृपमाणम्=प्रार्थना करनेवाले को, अकृणुतम्=किया, विचक्षे=देखने के लिये ।

हि० अ०—ओ नेता, ओ अश्विन्, (वृक-वर्तिका) संग्राम में तुम लोगों ने वर्तिका पक्षी को भेड़िये के मुख से बचाया । ओ अनेक (शक्तियों) का आनन्द लेनेवाले, तुम दोनों ने प्रार्थना करनेवाले (अन्धे) कवि को देखने के लिये (समर्थ) किया ।

Trans.—In the combat, O leaders, o true ones, you liberated a quail from the mouth of a wolf. And

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

O enjoyer of many, you made the imploring poet to see.

Notes—आस्नः—Abl. sing of आस्य (आस्यम् अस्यतेः। अस्यन्दते एनत् अन्नमिति वा Nir. I. 9). वृकम्—Sāyaṇa takes it here to mean 'dog'., Griffith as 'wolf'. Yāska takes वृकम् to metaphorically mean 'sun'. See note on अवृकम् (I. 48.15). वर्तिकाम्—Yāska takes it to metaphorically mean 'dawn'. He derives it from √*vṛt* to turn. अमुमुक्तम्—√*muc* to release, pluperf. 2nd dual. उतो—Final ओ, not occurring in the first member of the compd., is called Pragṛhya ; hence, इति is added to it in the Pada-text. कृपमाणम्—√*kṛp* to implore (Sāyaṇa), to lament (Macdonell) pres. part. अकृणुतम्—√*kṛ* to make, impf. 2nd. dual. विचक्षे—Dative infinitive in ए from √*cakṣ* to see.

चरित्रम्। हि। वेःऽइव। अच्छेदि। पर्णम्। आजा। खेलस्य। परिऽतक्म्यायाम्॥ सद्यः। जङ्घाम्। आयसीम्। विश्पलायै। धने। हिते। सर्तवे। प्रति। अधत्तम्॥१५॥

सा० भा०—अगस्त्यपुरोहितः खेलो नाम राजा। तस्य संबन्धिनी विश्पला नाम स्त्री संग्रामे शत्रुभिश्छिन्नपादा आसीत्। पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्य अयोमयं पादं समधत्ताम्। तदेतदाह। आजा आजौ संग्रामे अगस्त्यपुरोहितस्य खेलस्य संबन्धिन्याः विश्पलाख्यायाः चरित्रं चरणं वेरिव वेः पक्षिणः पर्णं पतत्रमिव अच्छेदि हि पुरा छिन्नमभूत् खलु। हे अश्विनौ युवामगस्त्येन स्तुतौ सन्तौ परितक्म्यायाम्। परितक्म्या रात्रिः। 'परित एनां तकति' (निरु० ११.२५) इति यास्कः। एनामुभयतः सूर्यो गच्छतीति तस्यार्थः। रात्रावागत्य सद्यः तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभते सति सर्तवे सर्तुं गन्तुं विश्पलायै आयसीम् अयोमयीं जङ्घां जङ्घोपलक्षितं पादं प्रत्यधत्तम्। संधानमेकीकरणं कृतवन्तावित्यर्थः॥ चरित्रम् 'अर्तिलूधूखनसहचर इत्रः' इति करणे इत्रः। आजा। 'सुपां सुलुक्' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विभक्तेर्डादेशः। आयसीम्। अयःशब्दाद्विकारार्थे 'प्राणिरजतादिभ्योऽञ्' (पा० सू० ४. ३. १५४)। 'टिड्ढाणञ्' इति ङीप्॥

शब्दा०—चरित्रम्=पैर, वेरिव=पक्षी की तरह, अच्छेदि=कट गया था, पर्णम्=पंख, आजा=लड़ाई में, खेलस्य=खेल नामक राजा की, परितक्म्यायाम्=रात्रि में, सद्यः=शीघ्र ही, जङ्घाम्=पैर, आयसीम्=लोहे का, विश्पलायै=विश्पला के लिये, धने=धन के लिये, हिते=रखे गये, सर्तवे=दौड़ने के लिये, प्रति=लिये, अधत्तम्=प्रदान किया।

हि० अ०—रात्रि के समय, खेल की लड़ाई में (विश्पला का) पैर पक्षी के पंख की तरह कट गया था। शीघ्र ही (तुमलोगों ने) विश्पला को गड़े धन के लिये दौड़ने के लिये लोहे का पैर प्रदान किया।

Trans.—A leg (of Viśspalā) had been broken like a wing of a bird in the battle of Khela in night. Immediately you restored an iron leg for Viśpalā to run the race for hidden treasure.

Notes—**अच्छेदि**—√*chid* to cut off, pass. aorist, 3rd. sing., not unaccented because preceded by **हि**. **खेलस्य**—A proper noun. Sāyaṇa thinks it as expressive of the wife of Khela'. Peterson construes it with **आजा** and renders 'in the race run by Khela'. **परितक्म्यायाम्**—Yāska derives it from √*tak* to run (**परितक्म्या रात्रिः। परितः एनां तक्म। तक्म इति उष्ण नाम। तकते इति सतः**—Nir. XI. 25). Peterson takes it to mean running 'about' 'confusion', 'tumult of battle', 'melee'. **विश्पलायै**—According to Sāyaṇa Viśpalā was the wife of Khela. Her leg was cut off by the enemies in the battle. Pischel suggested for the first time that Vispalā was a mare not the wife of Khela. **हिते**—From √*dhā* to put, past part.; see note on **निहिताः** (I. 24.7). **सर्तवे**—Dative infinitive in **तवे** from √*sṛ* to flow. **प्रति अधत्तम्** √*dhā* with prefix **प्रति** to restore, impf. 2nd. dual.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शतम् । मेषान् । वृक्ये । चक्षदानम् । ऋज्रऽश्वम् । तम् । पिता । अन्धम् । चकार ॥ तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तम् । दस्रा । भिषजौ । अनर्वन् ॥१६॥

सा० भा०—वृषागिरः पुत्रः ऋज्राश्वो नाम राजर्षिः । तस्य समीपे अश्विनोर्वाहनभूतो रासभो वृकीभूत्वावतस्थे । स च तस्या आहारार्थमेकोत्तरशतसंख्याकान् पौरजनानां स्वभूतान्मेषान्शकलीकृत्य प्रददौ । 'ऋज्राश्वः शतमेकं च मेषान्' (ऋ० सं० १. ११७. १८) इति मन्त्रान्तरे दर्शनात् । एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत् । तेन स्तूयमानावश्विनौ अस्मद्वाहननिमित्तम् अस्य आन्ध्यं जातमिति जानन्तौ तस्मै अक्षिणी प्रायच्छतामिति । तदेतदाह । अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यः ऋज्राश्वः शतं शतसंख्याकान् मेषान् वृक्ये आत्मना पोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् तं चक्षदानम् । क्षदतिः अत्तिकर्मा अत्र शकलीकरणार्थः । शकलीकृत्य दत्तवन्तम् ऋज्राश्वं पिता शापेन अन्धं दृष्टिहीनं चकार कृतवान् । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ । 'अश्विनौ वै देवानां भिषजौ' (ऐ० ब्रा० १. १८; तै०स० २. ३. ११) इति श्रुतेः । दस्रा दर्शनीयौ एतत्संज्ञौ वा हे अश्विनौ अनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापात् गमनरहिते अक्षी चक्षुषी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आधत्तम् व्यधत्तम् अकुरुतम् ॥ वृक्ये । वृकोऽरण्यश्वा । तस्य स्त्री वृकी । 'जातेरस्त्रीविषयात्' (पा० सू० ४. १. ६३) इति ङीष् । 'जसादिषु च्छन्दसि वावचनम्' इति चतुर्थ्येकवचनस्य आडभावे यणादेशे 'उदात्तस्वरितयोर्यणः' इति परस्यानुदात्तस्य स्वरितत्वम् । चक्षदानम् । क्षदेर्लिटः कानच् । चित्स्वरः । अक्षी । 'ई च द्विवचने' (पा० सू० ७. १. ७७) इति परत्वात् अक्षशब्दस्य ईकारान्तादेशः । स चोदात्तः । तस्मिन्कृते 'सकृद्गतौ विप्रतिषेधे' (परिभा० ४०) इति परिभाषया पुनः नुम् न भवति । विचक्षे । चक्षेः संपदादिलक्षणो भावे क्विप् । अनर्वन् । 'ऋ गतौ' । अस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वात् भावे वनिप् । अर्व गमनं विषयं प्रति एनयोः नास्तीति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । 'सुपां सुलुक्' इति द्विवचनस्य लुक् । छान्दसो नलोपाभावः ।

शब्दा०—शतम्=सौ, मेषान्=भेड़ों को, वृक्ये=वृकी के लिये, चक्षदानम्=बलिदान करते हुये, ऋज्राश्वम्=ऋज्राश्व नाम के अपने पुत्र को, तम्=उसको, पिता=पिताने, अन्धम्=अन्धा, चकार=कर दिया, तस्मै

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=उसके लिये, अक्षी=आंखो को, नासत्या=ओ सत्य स्वभाववाले, विचक्षे देखने के लिये, आ अधत्तम्=प्रदान की, दस्रा=ओ आश्चर्यजनक कार्य करने वाले, भिषजौ=ओ वैद्यों, अनर्वन्=अनुपम ।

हि० अ०—वृकी के लिये सौ भेड़ों का बलिदान करते हुये ऋज्राश्व को उसके पिता ने उसे अन्धा बना दिया । उसको, ओ अश्विन्, ओ आश्चर्यजनक कार्य करनेवाले, ओ वैद्यों, तुमने देखने के लिये अनुपम आंखें प्रदान की ।

Trans.—To Ṛjrāśva, serving as food hundred sheep to a she-wolf, him, his father made blind. To him O true ones, you restored matchless eyes, O miracle workers, O physicians.

Notes—चक्षदानम्—√*kṣad* to serve as food (Sāyaṇa), to divide (Macdonell). perf. part. acc. sing. अक्षी—Final ई forming dual is called Pragṛhya; hence, इति is added to it in the Pada-text. विचक्षे—See I. 116.14. अनर्वन्—From √*ṛ* with the suffix वनिप्; Sāyaṇa takes it as an adj. of अक्षी. He analyses the compd. as 'अर्वं गमनं विषयं प्रति एनयोः नास्तीति'; Yāska renders it अनर्वम् अप्रत्यृतम् अन्यस्मिन् (Nir. IV. 27), Grassmann understands it as 'not to be overpowered', Geldner as 'matchless', Peterson as 'unrivalled', Griffith as 'with sight uninjured' and Wilson as 'unable to find their way'.

आ । वाम् । रथम् । दुहिता । सूर्यस्य । कार्ष्मेऽइव । अतिष्ठत् । अर्वता । जयन्ती ॥ विश्वे । देवाः । अनु । अमन्यन्त । हृत्ऽभिः । सम् । ऊँ इति । श्रिया । नासत्या । सचेथे इति ॥१७॥

सा० भा०—सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् । तां सूर्यां सर्वे देवा वरयामासुः । ते अन्योन्यमूचुः आदित्यमर्वधिं कृत्वा आजिं धावाम । योऽस्माकं मध्ये उज्जेष्यति तस्येयं भविष्यतीति । तत्राश्विनावुदजयताम् । सा च सूर्या जितवतोस्तयोः रथमारुरोह । अत्र 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रायच्छत्' (ऐ० ब्रा० ४.७) इत्यादिकं ब्राह्मणमनुसंधेयम्। इदं चाख्यानं सूर्याविवाहस्य स्तावकेन 'सत्येनोत्तभिता भूमिः' (ऋ० सं० १०. ८५.१) इति सूक्तेन विस्पष्टयिष्यते। हे अश्विनौ वां युवयोः रथं कार्ष्मेव। कार्ष्मशब्दः काष्ठवाची। यथा काष्ठम् आजिधावानस्य अवधितया निर्दिष्टं लक्ष्यम् आशुगामी कश्चित् सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति एवमेव सर्वेभ्यो देवेभ्यः पूर्वम् अर्वता शीघ्रमर्वाधं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जयन्ती जीयमाना सूर्यस्य सवितुः दुहिता आ अतिष्ठत् आरूढवती। विश्वे सर्वे इतरे देवाः एतत् आरोहणस्थानं हृद्भिः हृदयैः अन्वमन्यन्त अन्वजानन्। तदानीं हे नासत्या-वश्विनौ श्रिया ऋक्सहस्रलाभरूपया संपदा कान्त्या वा युवां सं सचेथे संगच्छेथे॥ जयन्ती व्यत्ययेन कर्मणि शतृप्रत्ययः। हृद्भिः। 'पद्दन्' इत्यादिना हृदयशब्दस्य हृद्भावः। सचेथे। 'षच समवाये'। स्वरितेत्त्वादात्मनेपदम्॥

शब्दा०—वाम्=तुम्हारे, रथम्=रथ पर, दुहिता=पुत्री, सूर्यस्य=सूर्य की, कार्ष्मेव=विजय सीमा सूचक रेखा की तरह, आ अतिष्ठत्=आरूढ़ हुई, अर्वता=तेज दौड़नेवाले के द्वारा, जयन्ती=विजय प्राप्त करती हुई, विश्वेदेवाः=सभी देवताओं ने, अन्वमन्यन्त=अनुमोदन किया, समर्थन किया, हृद्भिः=हृदय से, उ=निश्चित अर्थ का वाचक एक निपात, श्रिया =गौरव से, संसचेथे=युक्त हुये, नासत्या=ओ सत्य स्वभाववाले।

हि० अ०—सूर्य की पुत्री (सूर्या) जीतती हुई तुम्हारे रथ पर आरूढ़ हुई मानो (यह किसी) तेज दौड़नेवाले (के द्वारा प्राप्त) विजय-सीमा-सूचक रेखा हो। सभी देवताओं ने हृदय से (इसका) समर्थन किया; ओ अश्विन् सत्य स्वभाववाले, निश्चित ही (उस समय तुमने) गौरव प्राप्त किया।

Trans.—The daughter of the sun mounted your chariot, reaching first, as it were a winning post (attained) by a quick runner. All the gods approved it by hearts and O true ones, indeed, (you) obtained the glory.

Notes—**अर्वता**—'Runner' (Sāyaṇa), 'with courser (Griffith) 'with (her) horse' (Peterson) **जयन्ती**—√*ji* to conquer, pres. part. nom. sing. fem; 'first-reacing' (Griffith), 'victorious' (Peterson). **अन्वमन्यन्त**—√*man*

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

with prefix अनु to assent. irr impf. 3rd. plu. संसचेथे—√*sac* with सम् to obtain., mid. pres. 2nd. dual ; final ए forming dual number is Pragṛhya ; hence, इति in the Pada-text.

यत्। अयातम्। दिवः॑ऽदासाय। व॒र्तिः। भ॒रत्ऽवा॑जाय। अ॒श्वि॒ना॒। हय॑न्ता ॥ रे॒वत्। उ॒वा॒ह॒। स॒च॒नः। रथः॑। वा॒म्। वृ॒ष॒भः। च॒। शिं॒शु॒मारः॑। च॒। यु॒क्ता ॥१८॥

सा० भा०—हे अश्विनौ हयन्ता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासाय एतत्संज्ञाय राजर्षये अभीष्टं फलं दातुं वर्तिः तदीयं गृहं यत् यदा अयातम् अगच्छतम् तदानीं रेवत् धनयुक्तम् अन्नं वां युवयोः सचनः सेवनः रथः उवाह। तस्मै दिवोदासाय प्रापयामास। अपि च तस्मिन् रथे वृषभः अनड्वान् शिंशुमारः ग्राहः च परस्पर विरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता वाहनतया संयुक्तावास्ताम् ॥ दिवोदासाय 'दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः' (का० ६. ३. २१. ५) इत्यलुक्। दिवोदासादीनां छन्दस्युपसंख्यानम्' इति पूर्वपदाद्युदात्तत्वम्। भरद्वाजाय। 'भृञ् भरणे'। अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः। शतुः 'छन्दस्युभयथा' इति आर्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययाद्युदात्तत्वम्। बहुव्रीहौ-पूर्वपदप्रकृतिस्वरत्वम्। हयन्ता। ह्वेञः कर्मणि लटो व्यत्ययेन शतृ। 'बहुलं छन्दसि' इति संप्रसारणम्। शपि गुणे छान्दसः अयादेशः। रेवत्। रयिशब्दात् मतुप्। 'रयेर्मतौ बहुलम्' इति संप्रसारणम्। 'छन्दसीरः' इति मतुपो वत्वम्। 'रयिशब्दाच्च' (का० ६. १. १७६. १) इति मतुप उदात्तत्वम्। सचनः। 'षच सेवने'। 'अनुदात्तेतश्च हलादेः' इति युच्। युक्ता। 'सुपां सुलुक्' इति विभक्तेः आकारः ॥

शब्दा०—यत्=जब, अयातम्=आये, दिवोदासाय=दिवोदास के लिये, वर्तिः=घर, भरद्वाजाय=पवित्र यजमान, अश्विना=ओ अश्विन्, हयन्ता=बुलाये जाने पर, रेवत्=धन से युक्त, उवाह=लाया था, सचनः=सहायक, रथः=रथ, वाम्=तुम लोगों का, वृषभः=बैल, च=और शिंशुमारः=घड़ियाल, च=और, युक्ता=जोते गये थे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ अश्विन्, बुलाये जाने पर, पवित्र यजमान दिवोदास को (धन देने के लिये) जब तुमलोग (उसके) घर आये (उस समय) धन से भरा हुआ तुम्हारा सहायक रथ लाया था और (उसमें एक तरफ) बैल तथा (दूसरी तरफ) घड़ियाल जोते गये थे।

Trans.—O Aśvins, being invited, when you came to (his) house (to give wealth) to Divodāsa, a pious worshipper, your helping chariot, full of riches, carried (you) and a bull and a dolphin were yoked together.

Notes—अयातम् – √*yā* to go, impf. 2nd dual; not unaccented because preceded by यत्. भरद्वाजाय—From √*bhṛ* to bear; pious worshipper; it is in apposition to दिवोदासाय; Griffith takes it as a proper name like दिवोदास. वर्तिः—From √*vṛt* to turn, to go on round, Sāyaṇa takes it to mean house. ह्यन्ता—Pres. part. from √*hi* to 'drive quickly; Wilson, following Sāyaṇa translates as being invited; Griffith takes it to mean 'hasting 'and Peterson as 'in haste'; रेवत्—From रयि with the suffix वन्. सचनः—'Helping' (Wilson) 'ever-present' (Peterson); Sāyaṇa and Oldenberg derives it from √*sac* to accompany; Geldner takes it from चन 'having the same wish'. युक्ता—√*yuj* to unite, past part, dual ending in आ.

रयिम्। सुऽक्षत्रम्। सुऽअपत्यम्। आयुः। सुऽवीर्यम्। नासत्या। वहन्ता॥ आ। जह्नावीम्। सऽमनसा। उप। वाजैः। त्रिः। अह्नः। भागम्। दधतीम्। अयातम्॥१६॥

सा० भा०—हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतम् आयुः। अन्ननामैतत्। एवं-गुणविशिष्टमन्नं च वहन्ता धारयन्तौ युवां समनसा समानमनस्कौ सन्तौ जह्नावीं जह्नोर्महर्षेः संबन्धिनीं प्रजाम् आ अयातम् आभिमुख्येनागच्छतम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कीदृशीं वाजैः हविर्लक्षणैरन्नैरुपेताम् । अह्नः । अत्र अहः शब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रातः सवनादिरूपेण त्रिः त्रिधा विभक्तं भागम् अंशं दधतीं बिभ्रतीम् । अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥ सुक्षत्रम् । बहुव्रीहौ 'नञ्सुभ्याम्' इति उत्तरपदान्तोदात्तत्वम् । सुवीर्यम् । 'वीरवीर्यौ च' इति बहुव्रीहौ उत्तरपदाद्युदात्तत्वम् । जह्नावीम् । जह्नुशब्दात् 'तस्येदम्' इत्यर्थे अण् । 'टिड्ढाणञ्' इति ङीप् । जाह्नवी । ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात् । उक्तं च –'वर्णागमो वर्णविपर्ययश्च' (का० ६. ३. १०९) इति । अत एव मध्योदात्तत्वम् ॥१९॥

शब्दा० –रयिम्=धन, सुक्षत्रम्=सुन्दर शक्तियुक्त, स्वपत्यम्=सुन्दर संतानयुक्त, आयुः=उम्र, सुवीर्यम्=सुन्दर पराक्रमवाले, नासत्या=ओ सत्य स्वभाववाले, वहन्ता=लाते हुये, जह्नावीम्=जह्नु के पुत्रों को, समनसा=एकमत से, उप=पास, वाजैः=धन के साथ, त्रिः=तीन बार, अह्नः=दिन में, भागम्=हिस्सा, दधतीम्=देनेवाले, आयातम्=आये ।

हि० अ० –ओ अश्विन्, सुन्दर शक्ति एवं सुन्दर संतान युक्त धन तथा पराक्रमशाली आयु लाते हुये (अर्थात् प्रदान करते हुये) दिन में तीन बार (तुम्हारा) हिस्सा प्रदान करने वाले जह्नु के पुत्रों के यहाँ तुम एकमत से धन के साथ आये ।

Trans.—O true ones, carrying wealth accompanied by good strength and good offspring, and life accompanied with heoric vigour, you with accordant mind and with riches came to descendants of Jahnu who offered (your) share thrice a day.

Notes—**सुक्षत्रम्, स्वपत्यम्, सुवीर्यम्**—All are Bahuvrihi compds. accented on the second member (**नञ्सुभ्याम्**—Pāṇ. VI. 2.172). **आयुः**—Sāyaṇa takes it to mean food. **वहन्ता**—√*vah* to carry, pres. part. nom. dual. **जह्नावीम्**—The word **जह्नु** with the suffixes **अण्** and **ङीप्** would be **जाह्नवीम्**, but the place of vowels of the first and the second syllables has been interchanged. **दधतीम्**—√*dhā* to put, pres. part. fem. acc. sing. **अयातम्**—√*yā* to go, impf. 2nd. dual.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परि॑ऽविष्टम् । जा॒हु॒षम् । वि॒श्वतः॑ । सी॒म् । सु॒ऽगेभिः॑ । नक्त॑म् । ऊ॒ह॒थुः॒ । रजः॑ऽभिः ॥ वि॒ऽभि॒न्दुना॑ । ना॒स॒त्या॒ । रथे॑न । वि । पर्व॑तान् । अ॒ज॒र॒यू इति॑ । अ॒या॒त॒म् ॥२०॥

सा० भा०—जाहुषो नाम कश्चिद्राजा। विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनौ अजरयू जरारहितौ नित्यतरुणौ युवां विभिन्दुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गन्तुं शक्यैः रजोभिः रञ्जकैर्मार्गैः ऊहथुः तस्मात् शत्रुसमूहान्निरगमयतम्। सीम् इत्येतत् पादपूरणम्। निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान् वि अयातं विशेषेणागच्छतम्॥ परिविष्टम्। 'विश प्रवेशने'। कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुगेभिः। 'सुदुरोधिकरणे' इति गमेर्डः। विभिन्दुना। 'भिदिर् विदारणे'। औणादिक उप्रत्ययो नुमागमश्च। अजरयू। न जरा अजरा तामात्मान इच्छतः। 'सुप आत्मनः क्यच्'। 'न च्छन्दस्यपुत्रस्य' इति इत्वदीर्घयोर्निषेधः। 'क्याच्छान्दसि' इति उप्रत्ययः॥

शब्दा०—परिविष्टम्=घिरा हुआ, जाहुषम्=जाहुष को, विश्वतः=चारों तरफ से, सीम्=पादपूरण के लिये एक निपात, सुगेभिः=चलने में आसान, नक्तम्=रात्रि में, ऊहथुः=लाये, रजोभिः=आकाश मार्ग से, विभिन्दुना=शत्रुओं का भेदन करनेवाले, नासत्या=ओ सत्य स्वभाववाले, रथेन=रथ से, पर्वतान्=पर्वतों को, अजरयू=ओ कभी वृद्ध न होने वाले, वि अयातम्=पार किये।

हि० अ०—तुम लोगों ने जाहुष को जो चारों तरफ से (शत्रुओं द्वारा) घिरा हुआ था, रात्रि में चलने में आसान आकाश मार्ग से लाया। ओ कभी वृद्ध न होनेवाले, ओ अश्विन्, (शत्रुओं का) भेदन करनेवाले रथ से तुम लोग पर्वतों को पार किये।

Trans.—You brought Jāhuṣa who was surrounded on all sides, by night through aerial region, (on the path) easy to travel. O true ones, with your foe-overwhelming chariot you came across the mountains, O unaging ones.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—परिविष्टम्—From √*viṣ* with the prefix परि to surround, past part.; for accent see निहिताः (I. 24.7.) सीम्—An emphatic particle which gives a slight emphasis on the preceding word. It is used in all numbers and genders of 3rd person. सुगेभिः—Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम् Pāṇ. VI. 2.172). विभिन्दुना—From √*bhid* to cut; It is an adjective of रथेन; Wilson following Sāyaṇa takes it to mean 'foe-overwhelming'. According to Peterson विभिन्दुना means 'which cuts a way before it'. अजरयू—Final ऊ forming dual is called Pragṛhya; hence, इति is added to it in the Pada-text. वि अयातम्—√*yā* with वि to cross over, impf. 2nd dual.

एकस्याः। वस्तोः। आवतम्। रणाय। वशम्। अश्विना। सनये। सहस्रा॥ निः। अहतम्। दुच्छुनाः। इन्द्रऽवन्ता। पृथुऽश्रवसः। वृषणौ। अरातीः॥२१॥

सा० भा०—हे अश्विनौ वशम् एतत्संज्ञमृषिं एकस्याः वस्तोः एकस्याह्नः रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभाय आवतम् अरक्षतम्। स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवन्तावित्यर्थः। अपि च हे वृषणौ कामानां वर्षितारावश्विनौ इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुनाः दुष्टसुखान् दुःखस्य कर्तॄन् पृथुश्रवसः विस्तीर्णयशसः अरातीः शत्रून् निरहतं निःशेषेणावधिष्टम्। यद्वा। कानीननस्य पृथुश्रवःसंज्ञस्य राज्ञः शत्रूनिति योज्यम्॥ सहस्रा। 'सुपां सुलुक्' इति चतुर्थ्या डादेशः। अहतम्। लङि थसस्तम्। 'अनुदात्तोपदेश' इत्यादिना अनुनासिकलोपः। दुच्छुनाः शुनमिति सुखनाम। दुष्टं सुखं यासां तास्तथोक्ताः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्॥

शब्दा०—एकस्याः=एक, वस्तोः=दिन में, आवतम्=रक्षा किया, रणाय=रमणीय, वशम्=वश नाम के ऋषि की, अश्विना=ओ अश्विन्, सनये=धन की प्राप्ति के लिये, सहस्रा=हजारों, निरहतम्=नष्ट किया,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुच्छुनाः=कष्ट देनेवाले, इन्द्रवन्ता=इन्द्र के साथ, पृथुश्रवसः=पृथुश्रवस् के, वृषणौ=ओ इच्छाओं की पूर्ति करनेवाले, अरातीः=शत्रुओं को।

हि० अ०—ओ अश्विन्, तुम लोगों ने वश को, एक ही दिन में हजारों सुन्दर धन की प्राप्ति के लिये, (उसकी) रक्षा की। ओ इच्छाओं की पूर्ति करनेवाले, इन्द्र के साथ तुमने पृथुश्रवस् को कष्ट देनेवाले शत्रुओं को नष्ट किया,

Trans.—O Aśvins, you protected Vaśa for (his) gain of beautiful thousands (of wealth) in course of a single morning. Accompanied by Indra you smote away malignant enemies of Pṛthuśravas, O fulfiller of desires.

Notes—आवतम्—√*av* to protect, impf. 2nd,dual. रणाय—From √*ran* to rejoice, Sāyaṇa takes it to mean 'beautiful'. सनये—Dative infinitive in ए from √*san* to gain. अहतम्—√*han* to kill, impf. 2nd dual. दुच्छुना—Bahuvrīhi compd. (दुष्टं सुखं यासां तास्तथोक्ताः) accented on the first syllable of the second member (परादिश्छन्दसि बहुलम् Pāṇ. VI. 2.199) Griffith and Peterson think it as an abstract noun meaning 'misfortune', 'ill-luck'.

शरस्य। चित्। आर्चत्ऽकस्य। अवतात्। आ। नीचात्। उच्चा। चक्रथुः। पातवे। वारिति वाः॥ शयवे। चित्। नासत्या। शचीभिः। जसुरये। स्तर्यम्। पिप्यथुः। गाम्॥२२॥

सा० भा०—आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य एतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नीचात् नीचानात् अवतात् कूपात् उच्चा उच्चैरुपरिष्टात् वाः उदकं हे अश्विनौ युवाम् आ चक्रथुः आभिमुख्येन कृतवन्तौ। तथा हे नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैः जसुरये श्रान्ताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गाम् अग्निहोत्रार्थस्य पयसो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दोग्ध्रीं पिप्यथुः पयसा युवामापूरितवन्तौ ॥ पातवे । 'पा पाने' । 'तुमर्थे सेसेन्' इति तवेन्प्रत्ययः । जसुरये । 'जसु हिंसायाम् ।' 'जसिसहोरुरिन्' (उ० सू० २. २३१) । स्तर्यम् । स्तीर्यते आच्छाद्यते प्रसवसामर्थ्याभावेन इति स्तरीः । 'अवितृस्तृतन्त्रिभ्यः ईः' (उ० सू० ३. ४३८) इति ईकारप्रत्ययः । 'वाच्छन्दसि' इति अमि पूर्वत्वस्य विकल्पितत्वात् अभावे यणादेशः । 'उदात्त-स्वरितयोर्यणः' इति परस्यानुदात्तस्य स्वरितत्वम् । पिप्यथुः । 'प्यायी वृद्धौ' लिटि व्यत्ययेन परस्मैपदम् । 'लिड्यङोश्च' (पा० सू० ६. १. २९) इति पीरभावः ।

शब्दा०=शरस्य=शर नाम के स्तोता के, चित्=आदर अर्थ में प्रयुक्त निपात, आर्चत्कस्य=ऋचत्क के पुत्र के, अवतात्=कुयें से, नीचात्=नीचे से, उच्चा=ऊँचा, आ चक्रथुः=ऊपर किया, पातवे=पीने के लिये, वाः=जल, शयवे=शयु के लिये, चित्=आदर अर्थ में प्रयुक्त निपात, नासत्या=ओ सत्यस्वभाववाले, शचीभिः=शक्ति से, जसुरये=थके हुये. स्तर्यम्=वन्ध्या, पिप्यथुः=दूध देने वाली बनाया, गाम्=गाय को ।

हि० अ०—ऋचत्क के पुत्र शर के पीने के लिये (तुमने) नीचे कुयें से जल को ऊपर किया । ओ अश्विन्, थके शयु के लिये अपनी शक्ति से वन्ध्या गाय को दूध देनेवाली बनाया ।

Trans.—(You) raised on high the waters from the bottom of well for drinking of Śara, the son of Ṛcatka. O true ones, by your power you made a sterile cow swell milk for exhausted Śayu.

Notes—**पातवे**—Dative infinitive in **तवे** from √*pā* to drink. **वाः**—Nom. sing. of **वार्**; the visarjanīya is rhotosized ; hence, **इति** is added to it in the Pada-text. It is repeated only to show that it is not the form of **वारिन्** but of **वार्**. **जसुरये**—Dative sing. of **जसुरि** from √*jas* (to be exhausted) with noun making termination **उरिन्**. **स्तर्यम्**—Sterile ; for accent see note on **स्वर्यम्** (I. 32.2). **पिप्यथुः**—√*pi* to swell, perf. 2nd. dual.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अवस्यते । स्तुवते । कृष्णियाय । ऋजूऽयते । नासत्या । शचीभिः ॥ पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् । ददथुः । विश्वकाय ॥२३॥

सा० भा० - अवस्यते अवनं रक्षणमात्मन इच्छते । स्तुवते स्तुतिं कुर्वते कृष्णियाय । कृष्णो नाम कश्चित् । तस्य पुत्राय । ऋजूयते आर्जवमिच्छते विश्वकाय एतत्संज्ञाय ऋषये हे नासत्यौ युवां शचीभिः आत्मीयैः कर्मभिः विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः दत्तवन्तौ । तत्र दृष्टान्तः । पशुं न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् ॥ अवस्यते । अवः शब्दात् 'सुप आत्मनः क्यच्' । 'शतुरनुमः' इति विभक्तेरुदात्तत्वम् । कृष्णियाय । कृष्णशब्दादपत्यार्थे छान्दसो घच् ॥

शब्दा०—अवस्यते=सहायता चाहनेवाले, स्तुवते=स्तुति करनेवाले, कृष्णियाय=कृष्ण के पुत्र, ऋजूयते=सरल जीवन व्यतीत करने वाले, नासत्या =ओ सत्य स्वभाववाले, शचीभिः=शक्ति से, पशुम्=पशु, नष्टमिव=नष्ट हुये की तरह, न= उपमा का वाचक किन्तु यहाँ पदपूरण के लिये, दर्शनाय =देखने के लिये, विष्णाप्वम्=विष्णापू को, ददथुः=दिया, विश्वकाय =विश्वक के लिये ।

हि० अ० - ओ अश्विन्, सहायता चाहनेवाले, स्तुति करनेवाले, तथा सरल जीवन व्यतीत करनेवाले कृष्ण के पुत्र विश्वक के लिये तुमने अपनी शक्ति से, विष्णापू को दिया जैसे चुराया हुआ पशु (मालिक के पास) देखने के लिये (आ जाय) ।

Trans.—To Viśvaka, the son of Kṛṣṇa, seeking for protection, praying and living a holy life, O true ones, by your power you gave him Visṇāpū like a lost animal to see.

Notes—**अवस्यते**—Dative sing. of **अवस्** (from √*av* to protect) by adding the suffix **क्यन्च्**. **स्तुवते**—Dative of **स्तुवत्** from √*stu* to praise. **ऋजूयते**—Dative of **ऋजयत्** from denom. base √*ṛjūya* to act in a simple manner.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Wilson takes it to mean 'lover of rectitude' and Griffith as 'righteous ;

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धम् । श्नथितम् । अप्ऽसु । अन्तरिति ॥ विऽप्रुतम् । रेभम् । उदनि । प्रऽवृक्तम् । उत् । निन्यथुः । सोममऽइव । स्रुवेण ॥२४॥

सा० भा० - पुरा खलु रेभमृषिं पाशैर्बध्वा असुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स च अश्विनौ स्तुवन् दश रात्रीः नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातः अश्विनौ तं कूपात् उदतारयतामिति । तदाह । अप्सु कूपान्तर्वर्तमानासु अन्तः मध्ये असुरैः पातितम् अशिवेन दुःखहेतुना दाम्ना अवनद्धं बद्धं श्नथितं शत्रुभिर्हिंसितं दश रात्रीः दशसंख्याका निशाः नव द्यून् नवसंख्याकान्यहानि च । अत्यन्तसंयोगेद्वितीया । एतावन्तं कालं तत्रैव कूपेऽवस्थितम् अत एव उदनि उदके विप्रुतं विप्लुतं व्याक्षिप्तसर्वाङ्गं प्रवृक्तम् । लुप्तोपममेतत् । प्रवृञ्जनेन संतप्तं घर्ममिव व्यथया संतप्यमानम् एवंभूतं रेभं हे अश्विनौ युवाम् उन्निन्यथुः तस्मात्कूपात् उन्नीतम् उत्तीर्णं कृतवन्तौ तत्र दृष्टान्तः । सोममिव यथा अग्निहोत्रहोमार्थम् अभिषुतं सोमरसं कूपसदृशे अग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेण अध्वर्युः उन्नयति अर्ध्वं नयति तद्वत् ॥ अवनद्धम् । 'णह बन्धने' । कर्मणि निष्ठा । 'नहो धः' (पा० सू० ८. २. ३४) । 'झषस्तथोर्धोऽधः' इति निष्ठातकारस्य धत्वम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । श्नथितम् । 'श्नथ हिंसार्थः' । निष्टा । विप्रुतम् । 'प्रुङ् गतौ' । अवनद्धवत् प्रत्ययस्वरौ । कपिलकादित्वात् लत्वविकल्पः । उदनि । 'पद्दन्' इत्यादिना उदकशब्दस्य उदन्भावः ॥

शब्दा० - दश=दश, रात्रिः=रात, अशिवेन=दुःखदायी रस्सी से, नव=नव, द्यून=दिन, अवनद्धम्=बंधा हुआ, श्नथितम्=पीटा हुआ, अप्सु=जल में, अन्तः=बीच, विप्रुतम्=फेंका हुआ, रेभम्=रेभ को उदनि=जल में, प्रवृक्तम्=कष्ट सहता हुआ, उन्निन्यथुः=बाहर निकाला, सोममिव=सोम की तरह, स्रुवेण=स्रुवा से ।

हि० अ०—तुम लोगों ने स्रुवा से सोम की तरह रेभ को बाहर निकाला जो एक दुखदायी रस्सी से बांधकर तथा पीट कर जल में फेंक दिया गया था और दश रात्रि तथा नौ दिन तक उसी जल में उतराया हुआ एवं कष्ट सहता हुआ पड़ा था ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Trans.—You brought out, like soma with ladle, Rebha, who fettered by a cruel rope and smitten had lain in the waters for ten nights and nine days, floating and suffering.

Notes—**अशिवेन**—Sāyaṇa renders it by **दुःखहेतुना दाम्ना**' Peterson takes it to mean 'by an evil doer ; **नञ्** compd. accented on the first syllable. **अवनद्धम्**—√*nah* to bind, past part. The breathing sound **ह्** before **त्** has been changed into **ध्**. For accent see **निहिताः** (I. 24.7). **श्नथितम्** √*snath* to pierce. past part. **अन्तः**—Visarjanīya is rhotasized; hence, **इति** is added to it in the Pada-text. **विप्रुतम्**—√*pru* with the prefix **वि** to float ; past part. Sāyaṇa renders it by **विप्लुतं व्याक्षिप्तसर्वाङ्गम्** Wilson and Griffith take it to mean 'immersed'. **प्रवृक्तम्**—√*vṛj* to twist, past part.

प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् । अस्य । पतिः । स्याम् । सुऽगवः । सुऽवीरः ॥ उत । पश्यन् । अश्नुवन् । दीर्घम् । आयुः । अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥२५॥

सा० भा०—एवमनेन सूक्तेन अश्विनोर्महिमानं प्रशस्य अधुना मन्त्रद्रष्टा स्वाभीष्टं प्रार्थयते । हे अश्विनौ वां युवयोः दंसांसि पुरा कृतानि कर्माणि प्र अवोचम् इत्थम् उक्तवानस्मि । सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वा अस्य राष्ट्रस्य पतिः अधिपतिः स्यां भवेयम् । उत अपि च पश्यन् अक्षिभ्यां पश्यन् । उपलक्षणमेतत् । सर्वैरिन्द्रियैः स्वस्वविषयदर्शन-समर्थैः दीर्घं वर्षशतरूपेण आयतम् आयुः जीवितं च अश्नुवन् प्राप्नुवन्नहम् अस्तमिव यथा गृहं स्वामी निष्कण्टकं प्रतिशति एवं जरिमाणं जरां जगम्यां कण्टकराहित्येन प्राप्नुयाम् । वृद्धः सन् चिरकालं निवसेयमित्यर्थः । स्याम् । अस्तेः प्रार्थनायां लिङ् । यासुट् । 'श्नसोरल्लोपः' इत्यकारलोपः । अश्नुवन् । 'अशू व्याप्तौ' । व्यत्ययेन शतृ । जरिमाणम् । 'जॄष् वयोहानौ' । अस्मादौणादिकः इमनिच् । जगम्याम् । गमेः प्रार्थनायां लिङि 'बहुलं छन्दसि' इति विकरणस्य श्लुः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—वाम्=तुम्हारे, दंसांसि=पराक्रमयुक्त कार्यों का, अश्विनौ =ओ अश्विन्, प्र अवोचम्=वर्णन किया, अस्य=इसका पतिः=स्वामी स्याम=होऊं, सुगवः=सुन्दर गायों से युक्त, सुवीरः=सुन्दर वीरों से युक्त, उत=और, पश्यन्=देखता हुआ, अश्नुवन्=प्राप्त करता हुआ, दीर्घम्= बड़ी, आयुः=उम्र, अस्तमिव=घर की तरह, इत्=पूर्ववर्ती शब्द पर बल देनेवाला निपात, जरिमाणम्=वृद्धावस्था, जगम्याम्=पहुँचूँ।

हि० अ०—ओ अश्विन्, (इस प्रकार) मैंने तुम्हारे पराक्रम युक्त कार्यों का वर्णन किया। सुन्दर गायों तथा सुन्दर वीरों से युक्त मैं इस (राष्ट्र) का स्वामी बनूं। और देखता हुआ तथा लम्बी आयु को प्राप्त करता हुआ वृद्धावस्था को पहुँचूँ जैसे (कोई अपने) घर को।

Trans.—O Aśvins, (thus) I declared your exploits. May I become the master of this (nation) having good kine and good heroes. Seeing and attaining a long life may I reach old age as (one reaches one's home.

Notes—**अवोचम्**—√*vac* to speak, impf. 1rst. sing. **अस्य**—As an oblique case **अस्य** is generally unaccented but here being emphasized it is not unaccented. **सुगवः, सुवीरः**—Bahuvrīhi compds. accented on the second member (**नञ्सुभ्याम्**—Pāṇ. VI. 2. 172). **पश्यन्**—√*pās* to see, pres. part. **अश्नुवन्**—√*aś* to attain, irr. pres. part. **जरिमाणम्**—√*jṝ* to be old, irr. pres. part. **जगम्याम्**—√*gam* to go, perf. opt. 1rst. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'विष्णोर्नु कम्' इति षड्चं पञ्चदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवम्। अत्रानुक्रमणिका – 'विष्णोः षड्वैष्णवं हि' इति। अभिप्लवषडहेषूक्थ्येषु तृतीयसवने स्तोमवृद्धावच्छावाकस्य स्तोमातिशंसनार्थम् इदमादिसूक्तद्वयं विनियुक्तम्। 'स्तोमे वर्धमाने' इति खण्डे सूत्रितं – 'विष्णोर्नु कमिति सूक्ते परो मात्रयेत्यच्छावाकः' (आश्व० श्रौ० ७.९) इति। तथा तृतीयसवने सोमातिरेके उत्तरोत्तरसंस्थोपगन्तव्या आतिरात्रात् ततोऽप्यतिरिक्ते तदर्थमेव शस्त्रमुपजनयितव्यम्। तत्रैतदेव सूक्तम्। 'सोमातिरेके इति खण्डे सूत्रितं – 'महाँ इन्द्रो नृवद्विष्णोर्नु कम्' (आश्वा० श्रौ० ६.७) इति। आग्निमारुतशस्त्रे आद्या विनियुक्ता। 'अथ यथेतम्' इति खण्डे सूत्रितं – 'विष्णोर्नु कं वीर्याणि प्र वोचं तन्तुं तन्वन्रजसो भानुमन्विहि' (आश्व० श्रौ० ५.२०) इति।

विष्णोः। नु। कम्। वीर्याणि। प्र। वोचम्। यः। पार्थिवानि। विऽममे। रजांसि॥ यः। अस्कभायत्। उत्ऽतरम्। सधऽस्थम्। विऽचक्रमाणः त्रेधा। उरुऽगायः॥१॥

सा० भा०—हे नराः विष्णोः व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्र वोचम् प्रब्रवीमि। अत्र यद्यपि नु कम् इति पदद्वयम् तथापि यास्केन नवोत्तराणि पदानि (निरु० ३.१३) इत्युक्तत्वात् शाखान्तरे एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कम् इति पदद्वयम् कानि तानीति तत्राह। यः विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीनि अग्निवाय्वादित्यरूपाणि रजांसि विममे विशेषेण निर्ममे। अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तथा च मन्त्रान्तरं— 'यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः' (ऋ० स० १.१०८.९) इति। तैत्तिरीयेऽपि—'योऽस्यां पृथिव्यामस्यायुषा' इत्युपक्रम्य 'यो द्वितीयस्यां तृतीयस्यां पृथिव्याम्' (तै० सं० १.२.१२.१) इति। तस्मात् लोकत्रयस्य पृथिवीशब्दवाच्यत्वम्। किंच यः च विष्णुः उत्तरम् उद्गततरमतिविस्तीर्णं सधस्थं सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् अस्कभायत् तेषामाधारत्वेन स्तम्भितवान् निर्मितवानित्यर्थः। अनेन अन्तरिक्षाश्रितं लोकत्रय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मपि सृष्टवानित्युक्तं भवति। यद्वा। यो विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान्। रजः शब्दो लोकवाची, 'लोका रजांस्युच्यन्ते' इति यास्केनोक्तत्वात्। किंच यश्चोत्तरम् उद्गततरम् उत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः। स्कम्भेः 'स्तम्भुस्तुम्भु' इति विहितस्य श्नः 'छन्दसि शायजपि' इति व्यत्ययेन शायजादेशः। अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे। भूरादिलोकत्रयमित्यर्थः। भूम्याम् उपार्जितकर्मभोगार्थत्वात् इतरलोकानां तत्कारणत्वम्। किंच यश्चोत्तरम् उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतम्। अपुनरावृत्तेः तस्योत्कृष्टत्वम्। सधस्थम् उपासकानां सहस्थानं सत्यलोकमस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थः। किं कुर्वन्। त्रेधा विचक्रमाणः त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः। विष्णोस्त्रेधा क्रमणम् 'इदं विष्णुर्वि चक्रमे (ऋ० स० १.२२.१७) इत्यादि श्रुतिषु प्रसिद्धम्। अत एव उरुगायः उरुभिः महद्भिः गीयमानः अतिप्रभूतं गीयमानो वा। य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्र वोचम्॥

शब्दा०—विष्णोः=विष्णु के, नु=शीघ्र, कम्=पादपूरण के लिये एक निपात, वीर्याणि=वीरतापूर्ण कार्यों को, प्र वोचम्=कहूँगा, यः=जिसने, पार्थिवानि=पृथिवी संबन्धी, विममे=नापा, रजांसि=लोकों को, यः=जिसने, अस्कभायत्=निर्माण किया, उत्तरम्=ऊँचे, सधस्थम्=मिलन स्थान, विचक्रमाणः=चलकर, त्रेधा=तीन, उरुगायः=विशाल गतिवाले ने, बहुतों द्वारा स्तूयमान ने,

हि० अ०—शीघ्र ही मैं विष्णु के वीरतापूर्ण कार्यों का वर्णन करूंगा, जिस विशाल गतिवाले ने तीन कदमों से चलकर पृथिवी सम्बन्धी लोकों को नापा; जिसने (पवित्रात्माओं के लिये) ऊँचे, मिलन-स्थान का निर्माण किया।

Trans.—I will, now, indeed, proclaim the heroic deeds of Viṣṇu who measured the terrestrial regions; who established the upper station of congregation, (he who) of wide pace, striding thrice.

Notes—कम्—Unaccented कम् always appears as an enclitic particle following the particles नु सु हि, and gives the sense of 'willingly', 'gladly', 'indeed'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(cf. accented कम् V. 83.10). वीर्याणि—See I. 32.1. वोचम्—See I. 32.1. पार्थिवानि रजांसि—Sāyaṇa understands it as regions occupied by Agni, Vāyu and Āditya. According to him, by पार्थिवानि रजांसि one should understand three regions with पृथिवी ahead. Griffith and Macdonell take them to mean earthly regions. Macdonell in the note takes पार्थिवानि and रजांसि separately rendering as the earth and the contiguous air. विममे—√*mā* to measure, perf. 3rd. sing ; not unaccented because preceded by यः. अस्कभायत्—√*skabh* to prop, 3rd. impf. sing. ; not unaccented because preceded by यः. उत्तरम् सधस्थम्—Upper region i.e. heaven as opposed to the lower region i.e. earth; According to Sāyaṇa, by उत्तरम् सधस्थम् one should understand three upper regions with अन्तरिक्ष ahead. In alternative, on the authority of Yāska he also takes it to mean the abode of pious men. विचक्रमाणः—√*kram* to stride, mid. perf. part. उरुगायः—According to Yāska उरुगाय means he who has wide pace (विष्णोर्महागतेः—Nir. II. 7) ; Sāyaṇa takes it to mean 'praised widely'. Griffith and Macdonell prefer Yāskās interpretation. Sāyaṇa derives it from उरु+√*gā* to sing, while Yāska from उरु+√*gā* to go.

प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः ॥ यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियन्ति । भुवनानि । विश्वा ॥२॥

सा० भा०—यस्येति वक्ष्यमाणत्वात् स इति अवगम्यते । स महानुभावः वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तवते स्तूयते सर्वैः ॥ कर्मणि व्यत्ययेन शप् । वीर्येण स्तूयमानत्वे दृष्टान्तः । मृगो न सिंहादिरिव । यथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वविरोधिनो मृगयिता सिंहः भीमः भीतिजनकः कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा गिरिष्ठाः पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते । अस्मिन्नर्थे निरुक्तं—'मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव । कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति वा । गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा' (निरु० १. २०) इति । तद्वदयमपि मृगोऽन्वेष्टा शत्रूणां भीमो भयानकः सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिः 'भीषास्माद्वातः पवते' (तै० आ० ८. ८. १) इत्यादिश्रुतिषु प्रसिद्धा । किंच कुचरः शत्रुवधादिकुत्सित कर्मकर्ता कुषु सर्वासु भूमिषु लोकत्रये संचारी वा तथा गिरिष्ठाः गिरिवत् उच्छ्रितलोकस्थायी । यद्वा । गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किंच यस्य विष्णोः उरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातानि अधिक्षियन्ति आश्रित्य निवसन्ति स विष्णुः स्तूयते ॥

शब्दा०—तत्=उस, विष्णुः=विष्णु, स्तवते=स्तुति किया जाता है, वीर्येण=वीरतायुक्त कार्य के कारण, मृगः=जंगली पशु, न=तरह, भीमः=भयानक, कुचरः=(१) कुत्सित कार्य करनेवाला, (२) सर्वत्र विचरण करनेवाला, गिरिष्ठाः=पर्वत पर रहने वाला या वाणी में निवास करने वाला, यस्य=जिसके, उरुषु=विशाल, त्रिषु=तीन, विक्रमणेषु=कदमों में, अधिक्षियन्ति=निवास करते हैं, भुवनानि=लोक, विश्वा=सम्पूर्ण ।

हि० अ०—विष्णु अपने उस वीरतायुक्त कार्य के कारण स्तुति किया जाता है जिस प्रकार पर्वत पर रहने वाला तथा अपनी इच्छानुकूल विचरण करनेवाला भयानक पशु । (वह विष्णु) जिसके विशाल तीन कदमों में सम्पूर्ण प्राणी निवास करते हैं ।

Trans.—Viṣṇu is worshipped by reason of his that heroic deed like a mountain-haunting terrible beast, wandering at its disposal ; (he) in whose wide threefold strides all the creatures dwell.

Notes—स्तवते—√*stu* to praise, mid. 3rd. sing. मृगः—Yāska derives it from √*mṛs* to go (मृगो मार्ष्टेर्गतिकर्मणो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Nir. I. 20); this word was originally used for any beast but later on its meaning was contracted to a particular beast i.e. deer. भीमः—From √*bhī* to fear (बिभ्यत्यस्मात्—Nir. 1.20). कुचरः—Yāska has two explanations of this word (i) doing ill (कुत्सित कर्म Nir. I. 20) and (ii) going anywhere क्वायं न चरतीति Nir. I. 20). Sāyaṇa follows Yāska's interpretation. कुचर is not analysed in the Pada-test because कु does not appear as an independent word. गिरिष्ठा—Sāyaṇa takes it to mean 'dwelling in a lofty world' or 'always abiding in speech. Griffith takes it to mean mountain roaming and Macdonell as mountain-haunting. Tatpuruṣa compd. accented on the second member; the change in the second member caused by the internal sandhi appearing in the Saṁhitā-text is always removed in the Pada-text when the word is analysed. अधिक्षियन्ति—√*kṣi* to dwell, pres. 3rd. plu; not unaccented because preceded by यस्य.

प्र । विष्णवे । शूषम् । एतु । मन्म । गिरिऽक्षितै । उरुऽगायाय । वृष्णे ॥ यः । इदम् । दीर्घम् । प्रऽयतम् । सधऽस्थम् । एकः । विऽममे । त्रिऽभिः । इत् । पदेभिः ॥३॥

सा० भा०—विष्णवे सर्वव्यापकाय शूषम् अस्मत्कृत्यादिजन्यं बलं महत्त्वं मन्म मननं स्तोत्रं मननीयं शूषं बलं वा विष्णुम् एतु प्राप्नोतु । कर्मणः संप्रदानत्वात् चतुर्थी । कीदृशाय । गिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानाम् । एवं महानुभावं शूषं प्राप्नोतु । कोऽस्य विशेष इति उच्यते । यः विष्णुः इदं प्रसिद्धं दृश्यमानं दीर्घम् अतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयम् एकः इत् एक एवाद्वितीयः सन् त्रिभिः पदेभिः पादैः विममे विशेषेण निर्मितवान् ।

शब्दा०—विष्णवे=विष्णु के लिये, शूषम्=शक्तिशाली, प्रैतु=जावे, मन्म=प्रार्थना, गिरिक्षिते=पर्वत पर निवास करनेवाले, वाणी में निवास

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करनेवाले, उरुगायाय=विशाल गतिवाले, वृष्णे=कामनाओं को पूरा करने-वाले, यः=जिसने, इदम्=इस, दीर्घम्=बड़े, प्रयतम्=अति विस्तृत, सधस्थम्=मिलन स्थान को, एकः=अकेले, विममे=नापा था।' त्रिभिः=तीन, इत्=पूर्ववर्ती शब्द पर बल देने वाला एक निपात, पदेभिः=कदमों से।

हि० अ० – (मेरी) शक्तिशाली प्रार्थना, ऊँचे लोक में निवास करनेवाले विशाल कदमोंवाले, इच्छाओं की पूर्ति करनेवाले, विष्णु के पास जावे, जिसने इस बड़े अति विस्तृत (पवित्रात्माओं के) मिलन-स्थान को अकेले तीन पदों से ही नापा था।

Trans.—Let (our) mighty hymn attain Viṣṇu, dwelling in the lofty world, having wide pace, the fulfiller of desires, who alone measured out this long far-extended station of congregation by three steps.

Notes—एतु—√*i* to go pres. impv. 3rd sing. गिरिक्षिते—Sāyaṇa takes it to mean 'dwelling in speech' or dwelling in the lofty world' preferably the first. Tatpuruṣas compd. accented on the second member. क्षिते is dative sing of क्षिति from √*kṣi* to dwell, with noun making termination ति like गति, भक्ति etc. उरुगायस्य—See उरुगायः (I. 154.1.) प्रयतम्—√*yam* to stretch out, past. part; for accent see निहिताः (I. 24.7). एकः—Sāyaṇa takes it for Viṣṇu who alone without the help of others did the task of measuring the region. Macdonell thinks एकः and त्रिभिः as antithetical and translates 'with alone three', विममे—See I. 154.1; not unaccented because synatactically connected with यः.

यस्य । त्री । पूर्णा । मधुना । पदानि । अक्षीयमाणा । स्वधया । मदन्ति ॥ यः । ॐ इति । त्रिऽधातु । पृथिवीम् । उत । द्याम् । एकः । दाधार । भुवनानि । विश्वा ॥४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सा० भा०—यस्य विष्णोः मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा अक्षीयमाणानि स्वधया अन्नेन मदन्ति मादयन्ति तदाश्रितजनान्। य उ य एव पृथिवीं प्रख्यातां भूमिं द्याम् उत द्योतनात्मकमन्तरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च। यद्वा। पृथिवीशब्देन अधोवर्तीनि अतलवितलादिसप्तभुवनान्युपात्तानि। द्युशब्देन तदवान्तररूपाणि भूरादिसप्तभुवनानि। एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि। त्रिधातु। त्रयाणां धातूनां समाहारस्त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा दाधार धृतवान्। तुजादित्वात् अभ्यासस्य दीर्घत्वम्। उत्पादितवानित्यर्थः। छन्दोगारण्यके – 'तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षन्त' इति भूतत्रयसृष्टिमुक्त्वा 'हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' (छा० उ० ६. ३. २-३) इत्यादिना त्रिवृत्करणसृष्टिरुपपादिता। यद्वा। त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः॥

शब्दा०—यस्य=जिसके, त्री=तीन, पूर्णा=भरे हुये, मधुना=मधु से पदानि=कदम, अक्षीयमाणा=कभी क्षीण न होनेवाले, स्वधया=आत्मशक्ति से, मदन्ति=आनन्दित करते हैं, यः= जो, उ=निश्चित अर्थ का वाचक एक निपात, त्रिधातु=पृथिवी, जल तथा तेज रूप तीन धातुओं को, पृथिवीम्=पृथिवी, उत=और, द्याम्=आकाश को, एकः=अकेले ही, दाधार=धारण करता है, भुवनानि=लोकों को, विश्वा=सम्पूर्ण।

हि० अ०—कभी समाप्त न होनेवाले, जिनके मधुपूर्ण तीन कदम (मनुष्यों को) अपनी शक्ति से आनन्दित करते हैं, जो अकेले ही (पृथिवी, जल तथा तेज रूप) तीनों धातुओं, पृथिवी, आकाश तथा सम्पूर्ण लोकों को धारण करता है।

Trans.—Whose three imperishable, meadful steps rejoice (mankind) with self-power; who verily alone upholds the threefold elements, earth heaven and all the creatures.

Notes—अक्षीयमाणा—√*kṣi* to destroy, pass. part. नञ् compd.; hence, accented on the first member and not separated by avagraha in the Pada-text. स्वधया—स्वधा is enumerated in the list of the names of

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

water (Nigh. I. 12.97), food (Nigh. II. 7.17) and Dyāvāpṛthivī (Nigh. III. 30.1). Sāyaṇa accepts it in the sense of 'food'. Macdonell takes it to mean 'bliss'. MWD. takes 'self power' as one of the alternative meanings of स्वधया. मदन्ति—√*mad* to rejoice, pres. 3rd. plu.; not unaccented because preceded by यस्य. त्रिधातु—Sāyaṇa explains it as 'त्रयाणां धातूनां समाहारस्त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं', Wilson takes it to mean 'three elements; Griffith as 'threefold' and Macdonell as 'in threefold way'. Macdonell thinks it as similar to त्रेधा. दाधार—√*dhṛ* to hold, perf. 3rd. sing.; the first syllable being regularly lengthened, it is not shortened in the Pada-text; not unaccented because preceded by यः.

तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् । नरः । यत्र । देवऽयवः । मदन्ति ॥ उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः ॥५॥

सा० भा० - अस्य महतो विष्णोः प्रियं प्रियभूतं तत् सर्वैः सेव्यत्वेन प्रसिद्धं पाथः। अन्तरिक्षनामैतत्, 'पाथोऽन्तरिक्षं पथा व्याख्यातम्' (निरु० ६.७) इति यास्केनोक्तत्वात्। अविनश्वरं ब्रह्मलोकमित्यर्थः। अश्याम् व्याप्नुयाम्। तदेव विशेष्यते। यत्र स्थाने देवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः नरः मदन्ति तृप्तिमनुभवन्ति। तदश्यामित्यन्वयः। पुनरपि तदेव विशेष्यते। उरुक्रमस्य अत्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना अत एव विष्णोः व्यापकस्य परमेश्वरस्य परमे उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वः मधुरस्य उत्सः निष्यन्दो वर्तते। तदश्याम्। यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेण अमृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः। ततोऽधिकं नास्तीत्याह। इत्था इत्थमुक्तप्रकारेण स हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरः वा तस्य पदं प्राप्तवतां न पुनरावृत्तेः। 'न च पुनरावर्तते' इति श्रुतेस्तस्य बन्धुत्वम्। हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—तत्=उस, अस्य=इसके, प्रियम्=प्रिय, पाथः=लोक को, अभि अश्याम्=प्राप्त करूं, नरः=मनुष्य, देवयवः=देवताओं के इच्छुक या देवतुल्य, मदन्ति=आनन्द करते हैं, उरुक्रमस्य=विशाल संक्रमणवाले का, सः=वह, हि=निश्चित अर्थ का वाचक निपात, बन्धुः=भाई, मित्र, इत्था=इस प्रकार, विष्णोः=विष्णु के, पदे=लोक में, परमे=श्रेष्ठ, ऊंचे, मध्वः=मधु का, उत्सः=सरोवर।

हि० अ०—इस (विष्णु) के उस प्रिय लोक को मैं प्राप्त करूं जहाँ पर देवताओं के इच्छुक मनुष्य आनन्द करते हैं। विशाल गतिवाले विष्णु के श्रेष्ठ लोक में एक मधु का सरोवर है। इस प्रकार निश्चित ही वह (सबका) मित्र है।

Trans.—May I attain that lovely domain of him, where god-seeking men rejoice. There is a spring of mead in the highest station of Viṣṇu, the wide strider. Thus, indeed, he is our friend.

Notes—पाथः—Yāska takes it to mean aerial region, water, and food (पाथः अन्तरिक्षम्। उदकमपि पाथः उच्यते। अन्नमपि पाथः उच्यते—Nir. VI. 7). Sāyaṇa understands it as Brahmaloka; Wilson takes it to mean 'path' Griffith as 'mansion' and Macdonell as 'domain'. अश्याम्—√*aṁś* to attain, root-aorist, opt. 1rst sing. देवयवः—Nom. plu. of देवयु 'god-seeking. यु as a तद्धित termination expresses the sense of leading or desiring. Yāska takes यु also as a noun-making termination. (See Yāska's interpretation of अध्वर्यु Nir. I. 8). मदन्ति—Not unaccented because preceded by यत्र. उरुक्रमस्य—Bahuvrīhi compd. having first member terminating in उ, accents the second member. इत्था—A particle of affirmation expressing the sense of 'thus', 'truly', 'really'. उरुक्रमस्य स हि बन्धुरित्था—This stanza has variously been interpreted by the scholars. Sāyaṇa explains उरुक्रमस्य with विष्णोः and स हि बन्धुरित्था as

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

a consequential sentence. Wilson following Sāyaṇa translates: 'for to such a degree is he the friend (of the pious men)'; Griffith renders as, 'close akin to wide strider'. According to Macdonell, 'for that truly akin to the wide-strider.

ता । वाम् । वास्तूनि । उश्मसि । गमध्यै । यत्र । गावः । भूरिऽशृङ्गाः । अयासः ॥ अत्र । अह । तत् । उरुऽगायस्य । वृष्णः । परमम् । पदम् । अव । भाति । भूरि ॥६॥

सा० भा०—हे पत्नीयजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोः गमनाय उश्मसि कामयामहे। तदर्थं विष्णुं प्रार्थयाम इत्यर्थः। तानीत्युक्तं कानीत्याह। यत्र येषु वास्तुषु गावः रश्मयः भूरिशृङ्गाः अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा अयासः अयना गन्तारोऽतिविस्तृताः। यद्वा। यासो गन्तारः। अतादृशाः। अत्यन्तप्रकाशयुक्ता इत्यर्थः। अत्राह अत्र खलु वास्त्वाधारभूते द्युलोके उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तत्तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतम् अव भाति स्वमहिम्ना स्फुरति। अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः—'तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनाः। तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि। पादाः पद्यते' (निरु० २.७) इति ॥

शब्दा०—ता=उन, वाम्=तुम दोनों को, वास्तूनि=स्थानों पर, उश्मसि=हम इच्छा करते हैं, गमध्यै=जाने के लिये, यत्र=जहां, गावः=गायें, किरणें, भूरिशृङ्गाः=बहुत सींगवाली, अत्यधिक प्रकाशवाली, अयासः=हमेशा गतिशील रहनेवाली, अत्र=यहां, अह=निश्चित अर्थ का वाचक एक निपात, तत्=उस प्रकार का, उरुगायस्य=विशाल गतिवाले का, वृष्णः=कामनाओं की पूर्ति करनेवाले का, परमम्=श्रेष्ठ, पदम्=स्थान, अव=नीचे, भाति=प्रकाशित हो रहा है, भूरि=अत्यधिक रूप से।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—तुम दोनों को उन स्थानों पर जाने के लिये मैं इच्छा करता हूँ, जहां पर बहुत सींगवाली (अत्यधिक प्रकाशवाली) हमेश। गतिशील रहनेवाली गायें (किरणें) हैं। यहीं पर विशाल गतिवाले, इच्छाओं की पूर्ति करने वाले (विष्णु) का उस प्रकार का परम धाम नीचे (हमारी तरफ) अत्यधिक रूप से प्रकाशित हो रहा है।

Trans.—I desire those abodes for you two to go there where are the many-horned and active kine. Here indeed, the highest station of wide strider, the fulfiller of desire, shines downwards (on us) abundantly.

Notes—वाम्—Sāyaṇa understands वाम् for the sacrificer and his wife and construes it with गमध्यै; Griffith and Macdonell think it for Indra and Viṣṇu and construe it with वास्तूनि. उश्मसि–√*vaś* to desire, pres. 1rst. sing. ; उ is the Samprasāraṇa of व्. गमध्यै—Dative infinitive in ध्यै from √*gam* to go. भूरिश्रृङ्गाः–Bahuvrīhī compd. accented on the first member. गावः—Nom. plu. of गो; Yāska followed by Sāyaṇa explains it as'rays' ; Roth understands it as 'stars'. Griffith and Macdonell prefer Yāska's interpretation. अयासः—Nom.plu. of अय from √*i* to go; Sāyaṇa explains it as 'अयनागन्तारोऽतिविस्तृताः। यद्वा। यासो गन्तारः। अतादृशाः अत्यन्तप्रकाशयुक्ता इत्यर्थः; Wilson takes it to mean 'wide-spreading', Griffith and Macdonell as 'nimble'. भाति—√*bhā* to shine, pres. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयेऽनुवाके एकादश सूक्तानि । तत्र 'यो जातः' इति पञ्चदशर्चं प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम् । संसवे निष्केवल्ये निविद्धानीयस्य पुरस्तात् 'यो जात एव' इति सूक्तं शंसेत् । 'यदि पर्यायान्' इति खण्डेसूत्रितं—'यो जात एवेति निष्केवल्ये' (आश्व० श्रौ० ६-६) इति । आभिप्लविके तृतीयेऽहनि निष्केवल्ये 'यो जात एव' इति निविद्धानीयम् । सूत्रितं च—'तृतीयस्य अर्यमा यो जात एवेति मध्यंदिनः' (आश्व० श्रौ० ७. ७) इति । विश्वजिति माध्यंदिनसवने मैत्रावरुणः स्वशस्त्रे प्राकृतात् सूक्तात्पूर्वं 'यो जातः' इति सामसूक्तं शंसेत् । 'विश्वजितोऽग्निं नरः' इति खण्डे सूत्रितं—'सत्रा मदासो यो जात एवाभूरेक इति सामसूक्तानि' (आश्व० श्रौ० ८. ७) इति अग्निष्टुन्निष्केवल्ये निविद्धानमिदम् । 'श्येनाजिराभ्याम्' इति खण्डे सूत्रितं—'तिष्ठा हरी इति यो जात एवेति मध्यंदिनः' (आश्व० श्रौ० ९. ७) इति । महाव्रते निष्केवल्ये 'यो जात एव' इति सूक्तम् । 'ऊरु' इति खण्डे सूत्रितं—'वने न वा यो न्यधायि चाकन् यो जात एव प्रथमो मनस्वान्' (ऐ० आ० ५. ३. १) इति । अत्रेतिहासो बृहद्देवतायामुक्तः—'संयुज्य तपसात्मानमैन्द्रं विभ्रन्महद्वपुः । अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च । तमिन्द्र इति मत्वा तु दैत्यौ भीमपराक्रमौ । धुनिश्च चुमुरिश्चोभौ सायुधावभियेततुः । विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः । यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत्' (बृहद्दे० ४. ६६-६८) ॥ अन्ये तु अन्यथा वर्णयन्ति । पुरा किल इन्द्रादयो वैन्ययज्ञं समाजग्मुः गृत्समदोऽपि तत्रागत्य सदस्यासीत् । दैत्यश्चेन्द्रजिघांसया तत्र समागमन् । तान् दृष्ट्वा निर्जगामेन्द्रो यज्ञाद्गृत्समदाकृतिः । स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्निरगच्छत् । निर्गच्छन्तं तमृषिं दृष्ट्वा अयमेवेन्द्र इति मन्यमानास्तमसुराः परिवव्रुः । नाहमिन्द्रस्तुच्छः कित्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान् प्रत्युवाच । अपरे त्वेवं कथयन्ति । गृत्समदस्य यज्ञे प्रविष्टमेकाकिनमिन्द्रं ज्ञात्वासुराः परिवव्रुः । स इन्द्रो गृत्समदरूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम । ततोऽसुरा इन्द्रो विलम्बित इत्यन्तः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अयं त्विन्द्रोऽस्मद्भयाद् गृत्समदरूपेणास्ते तं जगृहुः । इति स तान् नाहमिन्द्रोऽयमित्यनेन सूक्तेन प्रत्युवाच । अयमेवार्थो महाभारते प्रपञ्चितः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

यः । जातः । एव । प्रथमः । मनस्वान् । देवः । देवान् । क्रतुना । परिऽअभूषत् ॥ यस्य । शुष्मात् । रोदसी इति । अभ्यसेताम् । नृम्णस्य । मह्ना । सः । जनासः । इन्द्रः ॥१॥

सा० भा० – गृत्समदो ब्रूते । जनासः जना हे असुराः यो जात एव जायमान एव सन् प्रथमः देवानां प्रधानभूतः मनस्वान् मनस्विनामग्रगण्यः देवः द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान् यागदेवान् पर्यभूषत् रक्षकत्वेन पर्यग्रहीत् । 'भूष अलंकारे' । भ्वादिः लङि रूपम् । यद्वा । सर्वानन्यान्देवान्पर्यभूषत् पर्यभवत् अत्यक्रामत् । अस्मिन् पक्षे भवतेर्व्यत्ययेन क्सः । 'श्युकः किति' इति इट्प्रतिषेधः । यस्य इन्द्रस्य शुष्मात् शरीरात् बलात् रोदसी द्यावापृथिव्यौ अभ्यसेताम् अबिभीताम् । 'भ्यस भये' अनुदात्तेत् । 'भ्यस भयवेपनयोः' (निरु० ३. २१) इति नैरुक्ताः । अभ्यसेतामवेपेतां वा । तथा च मन्त्रान्तरम् – 'इमे चित्तव मन्यवे वेपेते भियसामही (ऋ० सं० १. ८०. ११) इति । नृम्णस्य सेनालक्षणस्य बलस्य मह्ना महत्वेन युक्तः सः इन्द्रः नाहमिति । अत्र निरुक्तं–'यो जायमान एव प्रथमो मनस्वी देवो देवान् क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदिति वा यस्य बलात् द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्वेन स जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्ता' (निरु० १०. १०) इति ॥

शब्दा० – यः=जो, जातः=उत्पन्न होकर, एव=ही, प्रथमः=सर्व प्रथम, मनस्वान्=बुद्धिमान्, मनस्वी, देवः=देव ने, देवान्=देवताओं के ऊपर, क्रतुना=पराक्रम से, पर्यभूषत्=आधिपत्य स्थापित किया, यस्य=जिसके, शुष्मात्=शक्ति के सामने, रोदसी=आकाश तथा पृथिवी, अभ्यसेताम्=कांपते हैं, नृम्णस्य=महान् बल की, मह्ना=महिमा से, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिस प्रधान बुद्धिमान देव ने उत्पन्न होते ही अपने पराक्रम से सर्व प्रथम देवताओं के ऊपर आधिपत्य पाया; महान् बल के कारण जिसकी शक्ति के सामने आकाश तथा पृथिवी कांपते हैं, ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who, the chief wise god, as soon as born, surpassed the gods through his power. Before whose power, by greatness of his valour, heaven and earth feared, O men, he is Indra.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—मनस्वान्—The stem ending in consonant is not separated from the suffix वान् in the Pada-text, the latter being separated only after vowels. क्रतुना—Instr. sing of क्रतु (cf. क्रत्वा). पर्यभूषत्— √*bhuṣ* to adorn. impf. 3rd sing.; not unaccented because preceded by यः; prefix परि is unaccented (see note on पर्यतिष्ठत् -I. 32.8). Wilson takes it to mean 'has done honour', Griffith as 'became protector' and Macdonell as 'surpassed'. अभ्यसेताम्—√*bhyas* to fear or tremble (Nir. III. 21), impf. 3rd. dual; not unaccented because preceded by यस्य. मह्ना—Instr. sing of महत् (cf. महिना, महिम्ना, महता), जनासः—Voc. plu. in आसस्.

यः । पृथिवीम् । व्यथमानाम् । अदृंहत् । यः । पर्वतान् । प्रऽकुपितान् । अरम्णात् ॥ यः । अन्तरिक्षम् । विऽममे । वरीयः । यः । द्याम् । अस्तभ्नात् । सः । जनासः । इन्द्रः ॥२॥

सा० भा० हे जनाः यः इन्द्रः व्यथमानां चलन्तीं पृथिवीम् अदृंहत् शर्करादिभिर्दृढामकरोत् । 'दृह दृहि वृद्धौ' । यः च प्रकुपितान् इतस्ततश्चलितान् पक्षयुक्तान् पर्वतान् अरम्णात् नियमितवान् स्वे स्वे स्थाने स्थापितवान् । अरम्णात् । 'रमु क्रीडायाम्' अन्तर्भावितण्यर्थस्य व्यत्ययेन श्नाप्रत्ययः । यः च वरीयः उरुत्तमम् अन्तरिक्षं विममे निर्ममे विस्तीर्णं चकारेत्यर्थः । यः च द्यां दिवम् अस्तभ्नात् तस्तम्भ निरुद्धामकरोत् । 'स्तम्भु रोधने' इति सौत्रो धातुः । सः एव इन्द्रः नाहमिति ॥

शब्दा० - यः=जिसने, पृथिवीम्=पृथिवी को, व्यथमानाम्=कांपती हुई, अदृंहत्=स्थिर किया, यः=जिसने, पर्वतान्=पर्वतों को, प्रकुपितान्=इधर उधर उड़नेवाले, अरम्णात्=स्थापित किया, यः=जिसने, अन्तरिक्षम्=अन्तरिक्ष को, विममे=विस्तृत किया, वरीयः=अधिक चौड़ा, यः=जिसने, द्याम्=आकाश को, अस्तभ्नात्=रोका, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसने कांपती हुई पृथिवी को स्थिर किया; जिसने (इधर-उधर) उड़ने वाले पर्वतों को (अपने-अपने स्थान पर) स्थापित किया;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जिसने अन्तरिक्ष को चौड़ाई में विस्तृत किया; जिसने आकाश को (गिरने से) रोका; ओ मनुष्यों, वह इन्द्र है।

Trans.—Who made firm the quivering earth; who set at rest the agitated mountains; who spread the aerial region wider; who propped the heaven, O men, he is Indra.

Notes—व्यथमानाम्—√*vyath* to quiver, pres. part. fem. acc. sing. अदृंहत्—√*dṛh* to make firm, impf. 3rd. sing.; not unaccented because preceded by यः. प्रकुपितान्—√*kup* to be angry, past part. acc. plu.; for accent see निहिताः (I. 24.7); अरम्णात्—√*ram* to set at rest, impf. 3rd. sing; not unaccented because preceded by यः. विममे—See I. 154.1. वरीयः—Comparative degree of उरु from √*vṛ* by Samprasāraṇa. अस्तभ्नात्—√*stabh* to prop, impf. 3rd. sing.; not unaccented because preceded by यः.

यः। हत्वा। अहिम्। अरिणात्। सप्त। सिन्धून्। यः। गाः। उत्ऽआजत्। अपऽधा। वलस्य॥ यः। अश्मनोः। अन्तः। अग्निम्। जजान। सम्ऽवृक्। समत्ऽसु। सः। जनासः। इन्द्रः॥३॥

सा० भा०—यः अहिं मेघं हत्वा मेघहननं कृत्वा सप्त सर्पणशीलाः सिन्धून् स्यन्दनशीला अपः अरिणात् प्रेरयत्। यद्वा सप्त गङ्गायमुनाद्या मुख्या नदीररिणात्। 'रीङ् स्रवणे'। क्र्यादिः। यः च वलस्य वलनामकस्यासुरस्य अपधा तत्कर्तृकान्निरोधान्निरुद्धाः गाः उदाजत् निरगमयत्। अपधा अपपूर्वाद्दधातेः 'आतश्चोपसर्गे' (पा० सू० ३. ३. १०६) इति भावे अङ् प्रत्ययः। 'सुपां सुलुक्' इति पञ्चम्या आकारः। यः च अश्मनोः। अश्नुते व्याप्नोत्यन्तरिक्षमित्यश्मा मेघः। अत्यन्तमृदुरूपयोर्मेघयोः अन्तः मध्ये वैद्युतम् अग्निं जजान उत्पादयामास। यश्च समत्सु संभक्षयन्ति योद्धॄणामायूंषीति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समदः संग्रामाः । तेषु संवृक् भवति । वृणक्तेर्हिंसार्थस्य क्विपि रूपम् । सः इन्द्रः नाहमिति ॥

शब्दा०—यः=जिसने, हत्वा=मारकर, अहिम्=राक्षस (बादल) को अरिणात्=प्रवाहित किया, सप्त=सात, सिन्धून्=नदियों को, यः=जिसने, गाः=गायों को, उदाजत्=निकाला, अपधा=गुफा से, वलस्य=वलकी, यः=जिसने, अश्मनोः=बादलों के या पत्थरों के, अन्तः=बीच, अग्निम्=अग्नि को, जजान=उत्पन्न किया, संवृक्=शत्रु का संहार करनेवाला, समत्सु=युद्ध में, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसने अहि नामक राक्षस (बादल) को मारकर सात नदियों को प्रवाहित किया, जिसने वल की गुफा से गायों को निकाला; जिसने मेघों के बीच (विद्युत्) अग्नि को उत्पन्न किया, युद्ध में (शत्रु का) संहार करनेवाला, ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who having slain a serpent dragon made the seven rivers flow; who released the cows from the hiding of Vala; who generated fire between two clouds, a spoiler in the battle, O men, he is Indra.

Notes—हत्वा—Gerund in त्वा from √*han* to kill. अरिणात्—√*ri* to flow, impf. 3rd. sing.; not unaccented because preceded by यः. उदजायत्-√*aj* to drive, impf. 3rd. sing.; not unaccented because preceded by यः. अपधा—From अप+√*dhā*+अङ्; final आ is Abl. termination (सुपां सुलुक्—Pāṇ VII. 1.39). Macdonell takes it as instr. sing. and translates 'by unclosing'. जजान—√*jan* to generate, perf. 3rd. sing.; not unaccented because preceded by यः. संवृक्—'Invincible' (Wilson), 'spoiler' (Griffith), 'victor' (Macdonell). समत्सु–The termination सु preceded by uncerebralizing vowels or any of the consonants is separated by avagraha in the Pada-text.

येन । इमा । विश्वा । च्यवना । कृतानि । यः । दासम् । वर्णम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अधरम् । गुहा । अकरित्यकः ॥ श्वघ्नीऽइव । यः । जिगीवान् । लक्षम् । आदत् । अर्यः । पुष्टानि । सः । जनासः । इन्द्रः ॥४॥

सा० भा०—येन इन्द्रेण इमा इमानि विश्वा च्यवना नश्वराणि भुवनानि कृतानि स्थिरीकृतानि । यः च दासं वर्णं शूद्रादिकम् । यद्वा दासमुपक्षपयितारम् । अधरं निकृष्टमसुरं गुहा गुहायां गूढस्थाने नरके वा अकः अकार्षीत् । करोतेर्लुङि 'मन्त्रे घस' इत्यादिना च्लेर्लुकि रूपम् । लक्षं लक्ष्यं जिगीवान् । 'जि जये' क्वसौ 'सन्लिटोर्जेः' इति अभ्यासादुत्तरस्य कुत्वम् । दीर्घश्छान्दसः । जितवान् । यः अर्यः अरेः । षष्ठ्येकवचने छान्दसो यणादेशः । शत्रोः संबन्धीनि पुष्टानि समृद्धानि आदत् आदत्ते । तत्र दृष्टान्तः । श्वघ्नीव । श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः । यथा व्याधो जिघृक्षितं मृगं परिगृह्णाति तद्वत् ॥

शब्दा०—येन=जिसके द्वारा, इमा=ये, विश्वा=सम्पूर्ण, च्यवना=गतिमान, कृतानि=की गई हैं, यः=जिसने, दासम्=दास, वर्णम्=जाति को, अधरम्=नीच, गुहा=गुफाओं में, अकः=किया, श्वघ्नीव=शिकारी की तरह, जिगीवान्=जीतकर, लक्षम्=शिकार को, आदत्=ग्रहण किया, अर्यः=शत्रु के, पुष्टानि=रक्षित धन को, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसके द्वारा ये सम्पूर्ण (चीजें) गतिमान की गईं; जिसने नीच दास जाति को गुफाओं में किया; जिसने जीतकर शत्रु के रक्षित धन को ग्रहण किया जैसे शिकारी अपने शिकार को, ओ मनुष्यों, वह इन्द्र है ।

Trans.—By whom all these are made unstable, who, made the low slave colour (hide) in the cavern. who having conquered, took the cherished treasures of enemy as a hunter a prey.

Notes—**च्यवना**—From √*cyu* to move, perishable' (Wilson), tremble' (Griffith), 'unstable' (Macdonell) **दासं वर्णं**,—Sāyaṇa renders '**शूद्रादिकम्**' for **दासं वर्णं**, Wilson as 'servile tribe', Griffith as 'brood of demons' and Macdonell as 'Dāsa colour'; the word **दास** as a substantive accents the second syllable but as an adj. it accents the first syllable. **अधरम्**—'Base' (Wilson), 'humbled',

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(Griffith); Macdonell takes it as a predicative use meaning, 'subject'. अकः—√*kṛ* to make, root-aorist, 3rd. sing.; not unaccented because preceded by यः ;final visarjanīya is rhotasized; hence इति is added to it in the Pada-text. For the repetition of the word after इति see Appendix B under Rules of rendering Saṁhitā-text into Pada-text. श्वघ्नीव—'Like a hunter' (Sāyaṇa), 'like a gambler' (Griffith and Macdonell). जिगीवान्—√*ji* to win, perf. part. लक्षम्—'Prey' (Wilson) 'winning' (Griffith), 'stake' (Macdonell). आदत्—√*dā* to give, irr. 'a'–aorist, 3rd. sing.; not unaccented because praceded by यः. Prefix आ is not separated from the root in the Pada-text. पुष्टानि—√*puṣ* to flourish, past part. acc. plu.

यम् । स्म । पृच्छन्ति । कुह । सः । इति । घोरम् । उत । ईम् । आहुः । न । एषः । अस्ति । इति । एनम् ॥ सः । अर्यः । पुष्टीः । विजःऽइव । आ । मिनाति । श्रत् । अस्मै । धत्त । सः । जनासः । इन्द्रः ॥५॥

सा० भा०—अपश्यन्तो जनाः घोरं शत्रूणां घातकं यं पृच्छन्ति स्म कुह सेति । स इन्द्रः कुत्र वर्तते इति । सेति । 'सोऽचि लोपे चेत्पादपूरणम्' इति सोर्लोपे गुणः । न क्वचिदसौ तिष्ठतीति मन्यमाना जनाः एनम् इन्द्रम् आहुः एषः इन्द्रः न अस्तीति । तथा च मन्त्रः—'नेन्द्रो अस्तीति नेम उ त्व आह' (ऋ० स० ८.१००.३) इति । ईम् इति पूरणः । सः इन्द्रः विजइव । इवशब्द एवार्थे । उद्वेजक एव सन् अर्यः अरेः संबन्धीनि पुष्टीः पोषकाणि गवाश्वादीनि धनानि आ मिनाति सर्वतो हिनस्ति । 'मीङ् हिंसायाम्' । 'मीनातेर्निगमे' इति ह्रस्वः । तस्मात् श्रदस्मै इन्द्राय धत्त । स इन्द्रोऽस्तीति विश्वासमत्र कुरुत । यद्यप्यसौ विशेषतोऽस्माभिर्न दृश्यते तथापि अस्तीति विश्वासं कुरुत । एवं निर्धारणीयमहिमोपेतः सः इन्द्रः नाहमिति ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—यम्=जिसके, स्म=प्रश्न पूछने का वाचक एक निपात, पृच्छन्ति=पूछते हैं, कुह=कहाँ, सः=वह, इति=ऐसा, घोरम्=भयानक उत=और, ईम्=उसके विषय में, आहुः=कहते हैं, न=नहीं, एषः=यह, अस्ति=है, इति=ऐसा, एनम्=इसको, सः=वह, अर्यः=शत्रु संबन्धी, पुष्टी=रक्षित धन, विजइव=उत्तेजित होते हुये की तरह, आ=चारों तरफ से, मिनाति=नष्ट करता है, श्रत्=श्रद्धा, अस्मै=उसके लिये, धत्त=रखो, धारण करो, सः=वह, जनासः—ओ मनुष्यों, इन्द्रः=इन्द्र।

हि० अ०—जिस भयानक के विषय में 'वह कहाँ है' ऐसा (वे) पूछते हैं; तथा 'वह नहीं है' ऐसा भी वे उसी के ही विषय में कहते हैं। वह उत्तेजित होते हुये की तरह शत्रु के रक्षित धन को चारों तरफ से विनष्ट करता है; उसमें विश्वास रखो; ओ मनुष्यों, वह इन्द्र है।

Trans.—Whom, the terrible one, (they) ask 'where is he' and verily of him (they) say 'he is not'. He destroys the cherished wealth of enemies as being agitated; put faith in him; O men, he is Indra.

Notes—आहुः—√*ah* to say, perf. 3rd. plu. विजइव—Sāyaṇa takes इव in the sense of एव (इव शब्द एवार्थः) and he renders विजइव by 'उद्वेजक एव सन्'; Wilson translates as 'inflicting (chastisement), Griffith as 'like birds' and Macdonell as 'like the player's stake' मिनाति—√*mī* to damage, pres. 3rd. sing. धत्त—√*dhā* to put, impv. 2nd. plu.

यः। रध्रस्य। चोदिता। यः। कृशस्य। यः। ब्रह्मणः। नाधमानस्य। कीरेः॥ युक्तऽग्राव्णः। यः। अविता। सुऽशिप्रः। सुतऽसोमस्य। सः। जनासः। इन्द्रः॥६॥

सा० भा०—यो रध्रस्य। 'रध् हिंसासंराद्ध्योः'। समृद्धस्य चोदिता धनानां प्रेरयिता भवति। यः च कृशस्य च दरिद्रस्य च यः च नाधमानस्य। 'नाधृणाधृयाच्ञोपतापैश्वर्याशीषुः'। याचमानस्य कीरेः। करोतेः कीर्तयते वा। स्तोतुः ब्रह्मणः ब्राह्मणस्य च धनानां प्रेरयिता। यः च सुशिप्रः शोभन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हनुः सुशीर्षको वा सन् युक्तग्राव्णः अभिषवार्थमुद्यतग्राव्णः सुतसोमस्य अभिषुत-सोमस्य यजमानस्य अविता रक्षिता भवति सः एव इन्द्रः नाहमिति । ब्रह्म-शब्दस्य त्वन्नपरत्वे ह्याद्युदात्तता स्यात् यथा 'ब्रह्म वन्वानो अजरं सुवीरम् (ऋ० स० ३.८.२) इति । अयं त्वन्तोदात्तः पठ्यत इति नान्नपरः ॥

शब्दा०—यः=जो, रध्रस्य=धनवान का, चोदिता=प्रेरक, यः=जो, कृशस्य=निर्धन का, यः=जो, ब्रह्मणः=पुरोहित का, नाधमानस्य=सहायता चाहने वाले का, कीरेः=स्तुति गायक का, युक्तग्राव्णः=सोम पीसने के लिये पत्थरों को तैयार करनेवाले का, यः=जो, अविता=रक्षक, सुशिप्रः=सुन्दर ओष्ठवाला, सुतसोमस्य=सोम पीसनेवाले का, सः=वह, जनासः=हे मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ० – जो धनवान का प्रेरक है; जो निर्धन का (प्रेरक है); जो सहायता चाहनेवाले स्तुति गायक पुरोहित का (प्रेरक है); सोम पीसने के लिये पत्थरों को तैयार किया है तथा सोम पीस लिया है ऐसे (यजमान) का जो सुन्दर ओठ वाला सहायक है; ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who is the impeller of rich ; who of the poor; who of the Brahmin singer, seeking help; who, the beautiful-lipped, is the protector of him who has set stones to work and he who has pressed Soma ; O men, he is Indra.

Notes—चोदिता—From √*cud* (to impel) by adding the suffix तृच्; agent noun (masc.) accented on the suffix. ब्रह्मणः—Gen. sing of ब्रह्मन्; the word ब्रह्मन् when accents the root it becomes action noun (neut.) meaning 'prayer' but when it accents the suffix it becomes agent noun (mascu.) meaning 'priest.' नाधमानस्य—√*nādh* to seek aid, pres. part. gen. sing. युक्तग्राव्णः—युक्त is past part. from√*yuj* to join ; Bahuvrīhi compd. accented on the first member. अविता—Agent noun from √*av* to protect. सुशिप्रः—Bahuvrīhi, compd. accented on the second member

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(नञ्सुभ्याम्—Pāṇ. VI. 2.172); Sāyaṇa explains it as शोभनहनुः सुशीर्षको वा'; Wilson as 'of goodly features' Griffith as 'fair-faced' and Macdonell as fair-lipped. सुतसोमस्य—सुत is the past part. from √*su* to press; Bahuvrīhi compd. accented on the first member.

यस्य । अश्वासः । प्रऽदिशि । यस्य । गावः यस्य । ग्रामाः । यस्य । विश्वे । रथासः ॥ यः । सूर्यम् । यः । उषसम् । जजान । यः । अपाम् । नेता । सः । जनासः । इन्द्रः ॥७॥

सा० भा०—यस्य सर्वान्तर्यामितया वर्तमानस्य प्रदिशि प्रदेशनेऽनुशासने अश्वासः अश्वा वर्तन्ते । यस्य अनुशासने गावः । यस्य अनुशासने ग्रामाः । ग्रसन्तेऽत्रेति ग्रामा जनपदाः । यस्य आज्ञायां विश्वे सर्वे रथासः रथा वर्तन्ते । यः च वृत्रं हत्वा सूर्यं जजान जनयामास । यः च उषसम् । तथा मन्त्रः—'जजान सूर्यमुषसं सुदंसाः' (ऋ० स० ३. ३२. ८) इति । यः च मेघभेदनद्वारा अपां नेता प्रेरकः सः इन्द्रः इत्यादि प्रसिद्धम् ।

शब्दा० यस्य=जिसकी, अश्वासः=घोड़े, प्रदिशि=आज्ञा में, यस्य =जिसकी, गावः=गायें, यस्य=जिसकी, ग्रामाः=गाँव, यस्य=जिसकी, विश्वे=सम्पूर्ण, रथासः=रथ, यः=जो, सूर्यम्=सूर्य को, यः=जो, उषसम्=उषा को, जजान=उत्पन्न किया, यः=जो, अपाम्=जल का, नेता=ले जानेवाला, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसकी विशिष्ट आज्ञा में अश्व हैं; जिसकी (आज्ञा में) गायें हैं; जिसकी (आज्ञा में) गाँव हैं; जिसकी (आज्ञा में) सम्पूर्ण रथ हैं; जिसने सूर्य को, जिसने उषा को जन्म दिया; जो जल का नेता है, ओ मनुष्यों, वह इन्द्र है ।

Trans.—In whose distinguished command are the horses; (in) whose cows; (in) whose villages; (in) whose all chariots. Who generated the sun; who the dawn; who is the leader of the waters; O men, he is Indra.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—जजान—√*jan* to generate, perf. 3rd. sing.; not unaccented because preceded by यः.

यम् । क्रन्दसी इति । संयती इति सम्ऽयती । विह्वयेते इति विऽह्वयेते । परे । अवरे । उभयाः । अमित्राः ॥ समानम् । चित् । रथम् । आतस्थिऽवांसा । नाना । हवेते इति । सः । जनासः । इन्द्रः ॥८॥

सा० भा०—यं क्रन्दसी रोदसी शब्द कुर्वाणे मानुषी दैवी च द्वे सेने वा संयती परस्परं संगच्छन्त्यौ यमिन्द्रं विह्वयेते स्वरक्षार्थं विविधमाह्वयतः । परे उत्कृष्टाः अवरे अधमाश्च उभयाः उभयविधाः अमित्राः शत्रवः यमाह्वयन्ति । समानम् इन्द्ररथसदृशं रथम् आतस्थिवांसा आस्थितौ द्वौ रथिनौ तमेवेन्द्रं नाना पृथक् पृथक् हवेते आह्वयेते । यद्वा समानमेकरथमारूढाविन्द्राग्नी हवेते यज्ञार्थं यजमानैः पृथगाहूयेते तयोरन्यतरः सः इन्द्रः नाहमिति ॥

शब्दा०—यम्=जिसको, क्रन्दसी=जोर से चिल्लाती हुई, संयती=एक साथ (युद्ध में) जाती हुई, विह्वयेते=विभिन्न प्रकार से बुलाती हैं, परे=शक्तिशाली, अवरे=कमजोर, उभयाः=दोनों, अमित्राः=शत्रु, समानम्=एक ही, चित्=निश्चित अर्थ का वाचक एक निपात, रथम्=रथ पर, आतस्थिवांसा=बैठे हुये, नाना=अलग-अलग, हवेते=बुलाते हैं, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसको जोर से चिल्लाती हुई (तथा) एक साथ (युद्ध में) जाती हुई (दोनों शत्रु-सेनायें) विभिन्न प्रकार से बुलाती हैं; जिसको शक्तिशाली तथा कमजोर दोनों शत्रु-दल (अपनी सहायता के लिये) बुलाते हैं; जिसको एक ही रथ पर बैठे हुये दो रथी अलग-अलग (अपनी सुरक्षा के लिये) बुलाते हैं; ओ मनुष्यों, वह इन्द्र है ।

Trans.—Whom (the two armies) crying aloud encountering together, invoke divergently; (whom) both the enemies superior and inferior (invoke); (two charioteers) sitting on the self same chariot invoke separately; O men, he is Indra.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—क्रन्दसी—'Two crying aloud' (Sayaṇa), 'calling' (Wilson), 'two armies' (Griffith), 'two battle-arrays' (Macdonell) ; final ई is Pragṛhya ; hence, इति is added to it in the Pada-text. संयती—√*i* with the prefix सम् to go together, pres. part ; final ई is Pragṛhya ; hence, इति is added to it in the Pada-text. In the Pada-text the repetition is only to separate the root from the prefix by avagraha. विह्वयेते—√*hvā* with वि to call divergently, pres: mid. 3rd. dual, ; not unaccented because preceded by यम्; final ए is Pragṛhya ; hence इति in the Pada-text. आतस्थिवांसा—Nom. dual of आतस्थिवांस् from √*sthā* to stand, perf. part. हवेते—√*hū* to call, pres. mid. 3rd. dual ; final ए is Pragṛhya ; hence, इति in the Pada-text.

यस्मा॑त् । न । ऋ॒ते । वि॒ऽजय॑न्ते । जना॑सः । यम् । युध्य॑मानाः । अव॑से । हव॑न्ते ॥ यः । विश्व॑स्य । प्र॒ति॒ऽमान॑म् । ब॒भूव॑ । यः । अ॒च्यु॒त॒ऽच्युत् । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥९॥

सा० भा०—यस्मात् ऋते जनासः जनाः न विजयन्ते विजयं न प्राप्नुवन्ति । अतः युध्यमानाः युद्धं कुर्वाणा जनाः अवसे स्वरक्षणाय यम् इन्द्रं हवन्ते आह्वयन्ति । यः च विश्वस्य सर्वस्य जगतः प्रतिमानं प्रतिनिधिः बभूव । यः च अच्युतच्युत् अच्युतानां क्षयरहितानां पर्वतादीनां च्यावयिता सः इन्द्रः इत्यादि प्रसिद्धम् ॥

शब्दा०—यस्मात्=जिसके, न=नहीं, ऋते=बिना, विजयन्ते=विजय प्राप्त करते हैं, जनासः—मनुष्य, यम्=जिसको, युध्यमानाः=युद्ध करते हुये, अवसे=सहायता के लिये, हवन्ते=बुलाते हैं, यः=जो, विश्वस्य=सबका, प्रतिमानम्=प्रतिरूप, बभूव=हुआ, यः=जो, अच्युतच्युत्=स्थिर को गतिमान करनेवाला, सः=वह, जनासः=हे मनुष्यो, इन्द्रः=इन्द्र ।

हि० अ०—जिसके बिना मनुष्य विजय नहीं प्राप्त करते; जिसको युद्ध करते हुये (सैनिक अपनी) सहायता के लिये बुलाते हैं; जो सबका प्रतिरूप है; जो स्थिर को गतिमान करनेवाला है; ओ मनुष्यों, वह इन्द्र है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Without whom men do not get victory; whom the fighting (soldiers) call on for help; who is the prototype of all; who is the shaker of immoveable; O men, he is Indra.

Notes—विजयन्ते—√*ji* with वि to conquer, mid. pres. 3rd. plu.; not unaccented because preceded by यस्मात् युध्यमाना —√*yudh* to fight, pres. part. अवसे—Dative infinitive in से from √*av* to protect. हवन्ते—√*hū* to call, pres. mid. 3rd. plu.; not unaccented because preceded by यम्. बभूव—√*bhū* to be, perf. 3rd. sing.; not unaccented because preceded by यः. अच्युतच्युत्—Tatpuruṣa compd. accented on the second member.

यः । शश्वतः । महि । एनः । दधानान् । अमन्यमानान् । शर्वा । जघान ॥ यः । शर्धते । न । अनुऽददाति । शृध्याम् । यः । दस्योः । हन्ता । सः । जनासः । इन्द्रः ॥१०॥

सा० भा०—यः महि महत् एनः पापं दधानान् शश्वतः बहून् अमन्यमानान् आत्मानमजानत इन्द्रमपूजयतो वा जनान् शर्वा । शृणाति शत्रूननेनेति शरुर्वज्रः । तेनायुधेन जघान । हन्तेर्लिटि रूपम् । यः च शर्धते उत्साहं कुर्वते अनात्मज्ञाय जनाय शृध्याम् उत्साहनीयं कर्म नानुददाति न प्रयच्छति । अनुपूर्वात् 'डुदाञ् दाने' जौहोत्यादिकः । 'अभ्यस्तानामादिः' तिङि चोदात्तवति' इति गतेर्निघातः । यः च दस्योः उपक्षपयितुः शत्रोः हन्ता घातकः सः इन्द्रः इत्यादि पूर्ववत् ॥

शब्दा०—यः=जिसने, शश्वतः=अनेक, महि=बड़ा, महान्, एनः=पाप, दधानान्=धारण करनेवालों को, अमन्यमानान्=आदर न करनेवालों को, अभिमानियों को, शर्वा=वज्र से, जघान=मारा, यः=जो, शर्धते=उत्साही के लिये, न=नहीं, अनुददाति=क्षमा करता है, शृध्याम्=उत्तेजनात्मक उत्साह को, यः=जो, दस्योः=दस्यु जाति को, हन्ता=मारनेवाला, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसने अनेक भयानक पाप करनेवालों को जो (इसका) आदर नहीं करते थे, अपने वज्र से मारा; जो उत्साही (व्यक्ति) के (उत्तेज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नात्मक) उत्साह को क्षमा नहीं करता; जो दस्यु को मारने वाला है; ओ मनुष्यों, वह इन्द्र है।

Trans.—Who smote with thunderbolt many grievious sin-holders, offering no homage; who does not forgive the bold his (provoking) boldness; who is the killer of Dasyu; O men, he is Indra.

Notes—दधानान्—√*dhā* to put, pres. part. अमन्यमानान्—Sāyaṇa explains it as 'आत्मानमजानत इन्द्रमपूजयतो वा', Wilson as 'offering (him) no homage', Griffith as 'ere they know their danger' and Macdonell as 'unexpecting' 'not thinking that he would slay them'. शर्वा—Instr. sing of शरु. जघान—√*han* to kill, perf. 3rd. sing.; not unaccented because preceded by यः. शर्धते—Bold (Sāyaṇa) 'who provokes' (Griffith), 'confident' (Wilson) 'arrogant' (Macdonell). अनुददाति—√*dā* with prefix अनु to forgive; not unaccented because preceded by यः. शृध्याम्—'Bold ness' (Sāyaṇa, Griffith) 'success' (Wilson), 'arrogance' (Macdonell).

यः। शम्बरम्। पर्वतेषु। क्षियन्तम्। चत्वारिंश्याम्। शरदि। अनुऽअविन्दत्॥ ओजायमानम्। यः। अहिम्। जघान। दानुम्। शयानम्। सः। जनासः। इन्द्रः॥११॥

सा० भा०—यः पर्वतेषु क्षियन्तम् इन्द्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं शम्बरम् एतन्नामकं मायाविनमसुरं चत्वारिंश्यां शरदि चत्वारिंशे संवत्सरे अन्वविन्दत् अन्विष्यालभत। लब्ध्वा च यः ओजायमानम्। 'कर्तुः क्यङ् सलोपश्च', 'ओजसोऽप्सरसो नित्यम्' (पा० सू० ३. १. ११. २) इति सकारलोपः। बलमाचरन्तम् अहिम् आहन्तारं दानुं दानवं शयानं शम्बरमसुरं जघान हतवान् सः इन्द्रः नाहमिति॥

शब्दा०—यः=जो, शम्बरम्=शम्बर को, पर्वतेषु=पर्वतों पर, क्षियन्तम्=निवास करनेवाले, चत्वारिंश्याम्=चालीसवें, शरदि=शरद् ऋतु में,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्ष में, अन्वविन्दत्=ढूंढ़ निकाला, ओजायमानम्=पराक्रम दिखानेवाले को, यः=जिसने, अहिम्=अहि नाम के राक्षस को, जघान=मारा, दानुम्=दानु के पुत्र को, शयानम्=पड़े हुये, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिसने पर्वतों पर निवास करनेवाले शम्बर को चालीसवें शरद् ऋतु में ढूढ़ निकाला; जिसने (अपना) पराक्रम दिखानेवाले अहि को मारा; पड़े हुये दानु के पुत्र को (मारा); ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who discovered out Śambara dwelling in the mountains in fortieth autumn; who smote Ahi, displaying his vigour, and son of Dānu lying; o men, he is Indra.

Notes—क्षियन्तम्—√*kṣi* to dwell, pres. part. अन्वविन्दत्—√*vid* to find, impf. 3rd. sing.; not unaccented because preceded by यः. ओजायमानम्—From denom. base √*ojāya* to display vigour; see note on वृषायमाणम् (I. 32.3). शयानम्—√*śī* to lie. mid. pres. part.

यः । सप्तऽरश्मिः । वृषभः । तुविष्मान् । अवऽअसृजत् । सर्तवे । सप्त । सिन्धून् ॥ यः रौहिणम् । अस्फुरत् । वज्रऽबाहुः । द्याम् । आऽरोहन्तम् । सः । जनासः । इन्द्रः ॥१२॥

सा० भा०—यः सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य ते च रश्मयः । 'वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्चेत्येते ये चेमेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षन्ति वृष्टिभिः' (तै० आ० १. ९. ४-५) इति तैत्तिरीयारण्यके ह्याम्नाताः । वृषभः वर्षकः तुविष्मान् वृद्धिमान् बलवान् वा सप्त सर्पणस्वभावान् सिन्धून अपः सर्तवे सरणाय अवासृजत् अवसृष्टवान् । यद्वा गङ्गाद्याः सप्त मुख्या नदीरसृजत् । यः च वज्रबाहुः सन् द्यां दिवम् आरोहन्तं रौहिणम् असुरम् अस्फुरत् जघान ॥'स्फुर स्फुरणे' तुदादिः ॥

शब्दा०—यः=जिसने, सप्तरश्मिः=सात किरणोंवाले, वृषभः=वर्षा करनेवाले, तुविष्मान्=बलवान्, अवासृजत्=मुक्त किया, सर्तवे=बहन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

के लिये, सप्त=सात, सिन्धून्=नदियों को, यः=जिसने, रौहिणम्=रौहिण नामक अनावृष्टि के राक्षस को, अस्फुरत्=झटका दिया, वज्रबाहुः=हाथ में वज्र धारण करनेवाले ने, द्याम्=आकाश पर, आरोहन्तम्=चढ़ते हुये, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जिस सात किरणोंवाले, वर्षा करनेवाले, बलवान ने सात नदियों को बहने के लिये मुक्त किया; जिस वज्र धारण करनेवाले ने आकाश पर चढ़ते हुये रौहिण को झटका दिया; ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who the seven-rayed, the showerer, the powerful, set free the seven rivers to flow ; who, armed with the thunder bolt, jerked Rauhiṇa, ascending heaven ; O men, he is Indra.

Notes—सप्तरश्मिः—Bahuvrīhi compd. accented on the first member. Sāyaṇa understands it to mean 'having seven kinds of clouds that pour rain on the earth ; Macdonell thinks it probable to mean 'hard to restrain', irresistible' ; according to Ludwig, seven rays are the seven forms of Indra. तुविष्मान्—The suffix मान् is not separated from the stem by avagraha (see मनस्वान् -II. 12.1). अवासृजत्—√*sṛj* to emit, impf. 3rd. sing. ; not unaccented because preceded by यः. सर्तवे—Dative infinitive in तवे from √*sṛ* to flow. अस्फुरत्—√*sphur* to jerk, impf. 3rd. sing. ; not unaccented becuase preceded by यः. वज्रबाहुः—Bahuvrīhi compd. accented on the first member. आरोहन्तम्—√*ruh* to ascend. pres. part. acc. sing.

द्यावा॑ । चि॒त् । अ॒स्मै । पृ॒थि॒वी इति । न॒मे॒ते इति । शुष्मा॑त् । चि॒त् । अ॒स्य॒ । पर्व॑ताः । भ॒य॒न्ते ॥ यः । सो॒म॒ऽपाः । नि॒ऽचि॒तः । वज्र॑ऽबाहुः । यः । वज्र॑ऽहस्तः । सः । ज॒ना॒सः॒ । इन्द्रः॑ ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा०भा०—अस्मै इन्द्राय द्यावा पृथिवी। इतरेतरापेक्षया द्विवचनं 'प्र मित्रयोर्वरुणयोः' (ऋ० स० ७. ६६. १) इतिवत्। नमेते स्वयमेव प्रह्वी-भवतः। 'णमु प्रह्वत्वे'। कर्मकर्तरि 'न दुहस्नुनमां यक्चिणौ' इति यकः प्रतिषेधः। चित् अपि च अस्य इन्द्रस्य शुष्मात् बलात् पर्वताः भयन्ते बिभ्यति। यः सोमपाः सोमस्य पाता निचितः सर्वैः। यद्वा अन्येभ्योऽपि देवेभ्यो दृढाङ्गः। वज्रबाहुः वज्रसदृशबाहुः। यः च वज्रहस्तः वज्रयुक्तः सः इन्द्रः इत्यादि प्रसिद्धम्॥

शब्दा०—द्यावा=आकाश, चित्=भी, अस्मै=इसके सामने, पृथिवी =पृथिवी, नमेते=झुकते हैं, शुष्मात्=पराक्रम के सामने, चित्=भी, अस्य=इसके, पर्वताः=पर्वत, भयन्ते=भयभीत हो जाते हैं, यः=जो, सोमपाः=सोमपान करनेवाला, निचितः=पीसकर निचोड़े गये, वज्रबाहुः =हाथ में वज्र धारण करनेवाला, यः=जो, वज्रहस्तः=हाथ में वज्र धारण करनेवाला, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र।

हि० अ०—इसके सामने आकाश तथा पृथिवी भी झुकते हैं; इसके पराक्रम के सामने पर्वत भी भयभीत हो जाते ह; जो हाथ में वज्र धारण करनेवाला है, सोम पौधे को (पीसकर) निकाले गये सोम रस का पान करने-वाला है; जो हाथ में वज्र धारण करनेवाला है; ओ मनुष्यों, वह इन्द्र है।

Trans.—Even heaven and earth bow down before him; even the mountains fear before his power; who, the thunder-armed, is the drinker of soma juice, extracted (from Soma plant); who is the wielder of thunderbolt in his hands; O men, he is Indra.

Notes—**द्यावा**—The word **दिव** becomes **द्यावा** in the Dvandva compd. in which both the members are the names of deities (**दिवो द्यावा** Pāṇ VI. 3.29). See Appendix 'A' under compound I. (a). **पृथिवी**—Final **ई** is Pragṛhya; hence, **इति** in the Pada-text. **नमेते**—√*nam* to bend, pres. mid. 3rd. dual; final **ए** is Pragṛhya; hence, **इति** in the Pada-text. **भयन्ते**—√*bhī* to fear, pres. mid. 3rd. plu. **सोमपा**—Tatpuruṣa compd. accented on the second member. **निचितः**—√*ci* with **नि** to pile up,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

to heap up, past part. Sāyaṇa takes it to mean 'all', Wilson as 'the firm (of frame)', Griffith and Macdonell as 'known'. Past. passive Part. when compounded with preposition shifts its 'accent to preposition ; but it retains, when the preposition, prefixed, is not used independently (MVGS. p. 462).

यः । सुन्वन्तम् । अवति । यः । पचन्तम् । यः । शंसन्तम् । यः । शशमानम् । ऊती ॥ यस्य । ब्रह्म । वर्धनम् । यस्य । सोमः । यस्य । इदम् । राधः । सः । जनासः । इन्द्रः ॥१४॥

सा० भा०—यः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानम् अवति रक्षति । यः च पुरोडाशादीनि हवींषि पचन्तं यः च ऊती ऊतये । 'सुपां सुलुक्' इति चतुर्थ्याः पूर्वसवर्णदीर्घः । स्वरक्षायै शस्त्राणि शंसन्तं यः च शशमानम् अवति स्तोत्रं कुर्वाणं रक्षति । ब्रह्म परिवृढं स्तोत्रं यस्य वर्धनं वृद्धिकरं भवति । तथा यस्य सोमः वृद्धिहेतुर्भवति । यस्य च इदम् अस्मदीयं राधः पुरोडाशादि-लक्षणमन्नं वृद्धिकरं भवति । सः इन्द्रः इत्यादि प्रसिद्धम् ॥

शब्दा०—यः=जो, सुन्वन्तम्=पीसनेवाले को, अवति=रक्षा करता है, यः=जो, पचन्तम्=पुरोडाशादि हविरन्न पकानेवाले को, यः=जो, शंसन्तम्=प्रशंसा करनेवाले को, यः=जो, शशमानम्=परिश्रम करनेवाले को, ऊती=सहायता से, यस्य=जिसका, ब्रह्म=प्रार्थना, वर्धनम्=वृद्धि करनेवाला, यस्य=जिसका, सोमः=सोम, यस्य=जिसका, इदम्=यह, राधः=धन, सः=वह, जनासः=ओ मनुष्यों, इन्द्रः=इन्द्र ।

हि० अ०—जो (अपनी) सहायता से सोम पीसनेवाले की रक्षा करता है, जो (पुरोडाश) पकानेवाले की, जो प्रशंसा करनेवाले की, जो परिश्रम करनेवाले की (रक्षा करता है); जिसकी वृद्धि करनेवाला स्तोत्र है, जिसकी (वृद्धि करनेवाला) सोम है, जिसकी (वृद्धि करनेवाला) यह सम्पूर्ण धन है; ओ मनुष्यों, वह इन्द्र है ।

Trans.—Who protects the Soma-pressing (sacrificer), who (protects) the baking (sacrificer), who (protects) the praising (sacrificer), who (protects)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the toiling (sacrificer) with protection ; whose strengthener is the prayer, whose Soma, whose this treasure ; O men, he is Indra.

Notes—सुन्वन्तम्—√*su* to press Soma, pres. part. acc. sing. of सुन्वत्. अवति—√*av* to protect, pres. 3rd. sing. ; not unaccented because preceded by यः. पचन्तम्—√*pac* to bake, pres. part. acc. sing. of पचत्. शंसन्तम्—√*śaṁs* to praise, pres. part. acc. sing of शंसत्. शशमानम्—√*śam* to labour, perf. part. Sāyaṇa takes it to mean 'स्तोत्रं कुर्वाणं; Nighaṇṭu enumerates it in the list of the verbs meaning 'singing' (Nigh. III. 14.22) ; Yāska takes it as शंसमानम् praising (Nir. VI. 8). ऊती —Instr. sing. of ऊति from √*av* to protect, by Samprasāraṇa.

यः । सुन्वते । पचते । दुध्रः । आ । चित् । वाजम् । ददर्षि ।
सः । किल । असि । सत्यः ॥ वयम् । ते । इन्द्र । विश्वह ।
प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥१५॥

सा० भा०—इदानीमृषिः साक्षात्कृतमिन्द्रं प्रति ब्रूते । हे इन्द्र यः दुध्रः दुर्धरः सन् सुन्वते सोमाभिषवं कुर्वते पुरोडाशादिहवींषि पचते यजमानाय वाजम् अन्नं बलं वा आ ददर्षि भृशं प्रापयसि सः तादृशस्त्वं सत्यः यथार्थभूतः असि न पुनर्नास्तीति बुद्धियोग्योऽसि । किल इति प्रसिद्धौ । ते तव प्रियासः सुवीरासः कल्याणपुत्रपौत्राः सन्तः वयं विश्वह सर्वेष्वहःसु विदथं स्तोत्रम् आ वदेम ब्रूयाम ॥

शब्दा—यः=जो, सुन्वते=सोम पीसनेवाले के लिये, पचते=पुरोडाशादि पकानेवाले के लिये, दुध्रः=भयानक, चित्=आदर अर्थ में प्रयुक्त निपात, आ ददर्षि=बार-बार देते हो, सः=वह, किल=निश्चित रूप से, असि=हो, सत्यः=सत्य स्वरूप, वयम्=हमलोग, ते=तुम्हारे, इन्द्र=ओ इन्द्र, विश्वह=सर्वदा, प्रियासः=प्रिय, सुवीरासः=सुन्दर वीरो से युक्त, विदथम्=स्तोत्र, आ वदेम=बोलें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—जो भयानक तुम, सोम पीसनेवाले के लिये तथा (पुरोडाश) पकानेवाले के लिये बार-बार धन लाते हो, वह तुम निश्चित ही सत्य हो। हे इन्द्र तुम्हारे प्रिय, हमलोग, सुन्दर बहादुर पुत्रों से युक्त होकर सर्वदा सुन्दर स्तोत्र बोलें।

Trans.—Who, the fierce, gives food to him that presses Soma, that bakes (the cake); thou as such, indeed, art true, O Indra, may we, dear to thee, having hero sons, ever speak the hymn.

Notes—सुन्वते—Dative sing of सुन्वत् from √*su* to press Soma. पचते—Dative sing of पचत् from √*pac* to bake. दर्दर्षि—√*dṛ* to pierce, inte. 2nd. sing.; not unaccented, because syntactically connected with यः. सः असि—The use of 3rd person pronoun with the verb of 2nd person. see note on सा (I. 48.10).

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयेऽनुवाके दश सूक्तानि । तत्रेदमेकोनविंशत्यृचं गार्त्समदं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका —'गणानामेकोना ब्राह्मणस्पत्यं ह बार्हस्पत्यास्तु दृष्टलिङ्गाः पञ्चदशन्त्ये त्रिष्टुभौ' इति । पञ्चदश्येकोनविंशी च त्रिष्टुभौ । शिष्टा जगत्यः । यासु बृहस्पतिशब्दः श्रूयते ता बार्हस्पत्याः । शिष्टा ब्राह्मणस्पत्याः । प्रवर्ग्ये अभिष्टवे एतत्सूक्तम् । 'स्पृष्ट्वोदकम्' इति खण्डे सूत्रितं—'गणानां त्वा प्रथश्च यस्य' (आश्व० श्रौ० ४. ६) इति ॥

गणानाम् । त्वा । गणऽपतिम् । हवामहे । कविम् । कवीनाम् । उपमश्रवःऽतमम् ॥ ज्येष्ठऽराजम् । ब्रह्मणाम् । ब्रह्मणः । पते । आ । नः । शृण्वन् । ऊतिऽभिः । सीद । सदनम् ॥१॥

सा० भा०—हे ब्रह्मणस्पते ब्रह्मणोऽन्नस्य परिवृढस्य कर्मणो वा पते पालयितः गणानां देवादिगणानां संबन्धिनं गणपतिं स्वीयानां पतिम् । कवीनां क्रान्तिदर्शिनां कविम् । उपमश्रवस्तमम् । उपमीयतेऽनयेत्युपमा । सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः । अतिशयेनोपमश्रवा उपमश्रवस्तमः । उपमा 'माङ् माने' । 'आतश्चोपसर्गे' करणेऽङ्प्रत्ययः । 'ङ्याप्रातिपदिकात्' इति ह्रस्वत्वम् । ज्येष्ठराजम् । ज्येष्ठाः प्रशस्यतमाः । तेषां मध्ये राजन्तं ब्रह्मणां मन्त्राणां स्वामिनं त्वा त्वां हवामहे अस्मिन् कर्मण्याह्वयामः । किंच नः अस्माकं स्तुतीः शृण्वन् त्वं ऊतिभिः पालनैर्हेतुभूतैः सादनम् । सीदन्त्यस्मिन्निति सदनम् । यज्ञगृहं आ सीद उपविश ॥

शब्दा०—गणानाम्=गणों के, त्वा=तुमको, गणपतिम्=गणों के मालिक, हवामहे=बुलाते हैं, कविम्=कवि, कवीनाम्=कवियों में, उपमश्रवस्तमम्=सर्वश्रेष्ठ कीर्तिवाले, ज्येष्ठराजम्=सर्वश्रेष्ठ स्वामी, ब्रह्मणाम्=स्तुतियों के, ब्रह्मणस्पते=ओ प्रार्थनाओं के स्वामी, नः=हमारे, शृण्वन्=सुनते हुये, ऊतिभिः=सहायता के साथ, आ सीद=स्थान ग्रहण करो ।

हि० अ०—गणों के मालिक, कवियों में सर्वश्रेष्ठ कीर्तिवाले कवि, स्तुतियों के सर्वश्रेष्ठ स्वामी, तुमको हम बुलाते हैं; ओ प्रार्थनाओं के मालिक, हमारे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(आह्वान को) सुनते हुये इस यज्ञ-गृह में अपनी सहायता के साथ स्थान ग्रहण करो।

Trans.—We invoke thee, the lord of hosts, the most renowned poet among the poets, the senior-most lord of prayers; O lord of prayers, listening our (invocations) take thy seat in this house with your protection.

Notes—हवामहे—√*hū* to call, pres. mid. 1rst plu. उपमश्रवस्तमम्—Sāyaṇa explains it as उपमीयतेऽनयेत्युपमा। सर्वेषामन्नानामुपमानं श्रवोऽन्नं यस्य स तथोक्तः अतिशयेनोपमश्रवा'; Wilson takes it to mean 'abounding beyond measure in (every kind of)food', Griffith as 'the famousest of all', and Peterson as 'the most illustrious having the highest renown'; Bahuvrīhi compd. accented on the first member. ज्येष्ठराजम्—Tatpuruṣa compd. accented on the second member. ब्रह्मणस्पते—Voc. of ब्रह्मणस्पति; for accent see दुहितर्दिवः (I. 48.1). Sāyaṇa takes it to mean 'lord of food' or 'of great action'. शृण्वन्—√*śru* to hear, pres. part. ऊतिभिः—Instr. plu. of ऊति from √*av* to protect. सीद—√*sad* to sit, impf. 2nd. sing.

देवाः। चित्। ते। असुर्य। प्रऽचेतसः। बृहस्पते। यज्ञियम्। भागम्। आनशुः॥ उस्राःऽइव। सूर्यः। ज्योतिषा। महः। विश्वेषाम्। इत्। जनिता। ब्रह्मणाम्। असि॥२॥

सा० भा०—असुर्य असुराणां हन्तः हे बृहस्पते प्रचेतसः प्रकृष्टज्ञानाः ते त्वदीयाः देवाश्चित् देवा अपि यज्ञियं यज्ञार्हं भागम् आनशुः प्राप्नुवन्। यद्वा प्रचेतस इति बृहस्पतेर्विशेषणम्। प्रकृष्टज्ञानवतस्ते तव संबन्धिनो देवा इति योजनीयम्। यद्वा प्रचेतसः। विभक्तिपरिणामः। प्रचेतसि त्वयि सति देवा यज्ञियं भागमानशिरे। कर्मविघ्नकारिणामसुराणां रक्षोघ्नमन्त्रैरपाकरणात्। 'न वै ब्रह्मण्वद्रिष्यति' (ऐ० ब्रा० १.१३) इति श्रवणात। ज्यो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिषा तेजसा महः मंहनीयः सूर्यः उस्राइव। उस्राः किरणाः। 'स्फायितञ्चि' इत्यादिना रक्प्रत्ययः। यथा किरणान् जनयति तथा विश्वेषां सर्वेषां ब्रह्मणां मन्त्राणां जनिता जनयितैव असि। 'जनिता मन्त्रे' इति निपातनात् णिलोपः॥

शब्दा०—देवाः=देवता, चित्=भी, ते=तुम्हारे द्वारा, असुर्य=ओ असुरों को नष्ट करने वाले, प्रचेतसः=बुद्धिमान के, बृहस्पते=ओ बृहस्पति, यज्ञियम्=यज्ञ सम्बन्धी, भागम्=हिस्सा, आनशुः=पाया, उस्रा इव=जिस प्रकार किरणों को, सूर्यः=सूर्य, ज्योतिषा=अपने प्रकाश से, महः=महान्, विश्वेषाम्=सबका, इत्=पूर्ववर्ती शब्द पर जोर देने वाला निपात, जनिता=उत्पन्न करनेवाले, ब्रह्मणाम्=प्रार्थनाओं के, असि=हो।

हि० अ०—ओ असुरों को नष्ट करने वाले, बृहस्पति, बुद्धिमान तुम्हारे द्वारा ही, वास्तव में, देवताओं ने (अपना) यज्ञसम्बन्धी भाग पाया। सम्पूर्ण मन्त्रों को उत्पन्न करनेवाले तुम ही हो, जैसे महान् सूर्य अपने प्रकाश से किरणों को (उत्पन्न करनेवाला है)।

Trans.—O Bṛhaspati, the slayer of demons, gods, indeed, obtained their share in sacrifice through thee, the wise. thou art the generator of all prayers, as the great sun (is the begetter) of rays by his lustre.

Notes—असुर्य—'slayer of Asuras' (Sāyaṇa), 'immortal' (Griffith), 'divine' (Peterson). See note I. 24.14. प्रचेतसः—From √*cit* or √*kit* to know; Sāyaṇa explains this word variously taking it in different case-endings; (i) प्रकृष्टज्ञानाः—nom. plu. as an adj. of देवाः (2) प्रकृष्टज्ञानवतः—gen. sing, for Bṛhaspati ; (3) प्रचेतसि—loc. sing as a substantive of ते-त्वयि; Griffith and Peterson take it to mean 'of wise god.' आनशुः—√aṁś to attain, perf. 3rd. plu. जनिता—Generator ; nom. sing of जनितृ form √*jan* to generate, with the suffix तृच्.

आ। विऽबाध्य। परिऽरपः। तमांसि। च। ज्योतिष्मन्तम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रथम् । ऋतस्य । तिष्ठसि ॥ बृहस्पते । भीमम् । अमित्रऽदम्भनम् । रक्षःऽहनम् । गोत्रऽभिदम् । स्वःऽविदम् ॥३॥

सा० भा०—हे बृहस्पते परिरपः । परितो रपः पापरूपं रक्षः । यद्वा 'रप लप व्यक्तायां वाचि' । क्विप् । परिवदतो निन्दकान् तमांसि च विबाध्य तेजसा निराकृत्य ज्योतिष्मन्तं ज्योतिषा तद्वन्तम् ऋतस्य यज्ञस्य प्रापकं भीमं शत्रूणां भयंकरं अमित्रदम्भनम् शत्रूणां हिंसकम् । तदेवाह । रक्षोहणं रक्षसां हन्तारं गोत्रभिदं मेघानां भेत्तारं स्वर्विदं स्वर्गस्य लम्भकं रथम् आ तिष्ठसि अधितिष्ठसि ॥

शब्दा० विबाध्य=दूर कर, परिरपः=निन्दकों को, तमांसि=अन्धकार को, च=और, ज्योतिष्मन्तम्=प्रकाशमान, रथम्=रथ पर, ऋतस्य=यज्ञ के, आतिष्ठसि=आरूढ़ होते हो, बृहस्पते=ओ बृहस्पति, भीमम्=भयानक, अमित्रदम्भनम्=शत्रुओं का दमन करनेवाला, रक्षोहणम्=राक्षसों को मारनेवाला, गोत्रभिदम्=बादलों को तोड़नेवाला, स्वर्विदम्=प्रकाश को पाने वाला ।

हि० अ०=ओ बृहस्पति, निन्दकों को तथा अन्धकार को नष्ट कर, (तुम) यज्ञ के प्रकाशमान तथा भयानक रथ पर आरूढ़ होते हो, (जो) शत्रुओं का दमन करनेवाला, राक्षसों को मारनेवाला, बादलों को तोड़नेवाला एवं प्रकाश को पानेवाला है ।

Trans.—Having banished the revilers and the darkness thou mountest the luminous and terrible chariot of the sacrifice (which is), O Bṛhaspati, the killer of the enemies, slayer of demons, cleaver of clouds and the attainer of light.

Notes—विबाध्य—√*bādh* to oppress, gerund in य. परिरापः—'Revilers' (Wilson, Griffith), 'whisperers of evil words' (Grassmann), 'quibbles' 'evasions' (Geldner). The third syllable is lengthened in the Saṁhitā-text. ज्योतिष्मन्तम्—Suffix मान is not separated from the stem by avagraha (see notes on मनस्वान् II. 12.1). अमित्रदम्भनम्, रक्षोहणम्, गोत्रभिदम्, स्वर्विदम्—All are the Tatpuruṣa compds. accented on the second member.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सनीतिऽभिः । नयसि । त्रायसे । जनम् । यः । तुभ्यम् । दाशात् । न । तम् । अंहः । अश्नवत् ॥ ब्रह्मऽद्विषः । तपनः । मन्युऽमीः । असि । बृहस्पते । महि । तत् । ते । महिऽत्वनम् ॥४॥

सा० भा०—हे बृहस्पते सुनीतिभिः । शोभनं नीतयः येषु ते सुनीतयः येषु ते सुनीतयः सन्मार्गाः । तैः जनं नयसि । अपेक्षितफलं प्रापयसि । त्रायसे जनमापद्भ्योः रक्षसि च । यः यजमानः तुभ्यं हविर्लक्षणमन्नं दाशात् प्रयच्छेत् । 'दाशृ दाने' । लेट्याडागमः । तम् अंहः पापं पापरूपं दारिद्र्यं वा न अश्नवत् न प्राप्नुयात् । अश्नोतेर्लेटि व्यत्ययेन परस्मैपदम् । अडागमः । ब्रह्मद्विषः ब्राह्मणानां मन्त्राणां वा द्वेष्टुः तपनः तापकः असि । किंच मन्युमीः मन्योः क्रोधस्य परेषां ज्ञानस्य वा हिंसकोऽसि । 'मीङ् हिंसायाम्' । क्विप् । ते तव तत् तादृशं महि महत् प्रभूतं महित्वनं माहात्म्यमस्ति ॥

शब्दा० सुनीतिभिः=सुन्दर मार्ग दर्शन से, नयसि=ले चलते हो, त्रायसे=रक्षा करते हो, जनम्=मनुष्य की, यः=जो, तुभ्यम्=तुमको, दाशात्=हवि प्रदान करे, न=नहीं, तम्=उसको, अंहः=पाप, अश्नवत्=पहुंचे, ब्रह्मद्विषः=ब्राह्मण से द्वेष करने वाले को, तपनः=तपानेवाले, मन्युमीः=क्रोध को प्रभावहीन करनेवाले, असि=हो, बृहस्पते=ओ बृहस्पति, महि=महान्, तत्=वह, ते=तुम्हारी, महित्वनम्=महानता ।

हि० अ०—तुम सुन्दर मार्गदर्शन से ले चलते हो तथा (उससे) मनुष्य की रक्षा करते हो । जो तुमको (हवि) प्रदान करे, उसके पास पाप न पहुंचे । ओ बृहस्पति, तुम ब्राह्मणों से द्वेष करनेवाले को तपानेवाले हो, क्रोध को प्रभावहीन करनेवाले हो; तुम्हारी वह महानता वास्तव में महान् है ।

Trans.—Thou leadest with good guidance and protectest the man. May not the distress attain him who offers (three oblations). Thou art the tormentor of the prayer-haters and nullifier of the wrath, O Bṛhaspati, that greatness of thine is great.

Notes—सुनीतिभिः—Bahuhuvrīhi compd. accented on the second member. नीतिभि is derived from $\sqrt{nī}$ to

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

lead with noun making termination ति. त्रायसे—√*trā* to protect. pres. mid. 2nd. sing.; not unaccented because it begins a new sentence. दाशात्—√*dāś* to make offering, pres. subju. 3rd. sing.; not unaccented because preceded by यः. अश्नवत्—√*aṁś* to attain, pres. subju. 3rd. sing. ब्रह्मद्विषः—Tatpuruṣa compd. accented on the second member.

न । तम् । अंहः न । दुःऽइतम् । कुतः । चन । न । अरातयः । तितिरुः । न । द्वयाविनः ॥ विश्वाः । इत् । अस्मात् । ध्वरसः । वि । बाधसे । यम् । सुऽगोपाः । रक्षसि । ब्रह्मणः । पते ॥५॥

सा० भा०—हे ब्रह्मणस्पते सुगोपाः सुष्ठु पालयिता त्वं यं जनं रक्षसि पालयसि तं जनं अंहः आहन्तव्यं दुःखं न बाधते । दुरितं तत्कारणं पापं च न बाधते । अरातयः हिंसकास्तं जनं कुतश्चन सर्वासु दिक्षु न तितिरुः । तिरतिर्हिंसाकर्मा । लिट् । न हिंसन्ति । तथा द्वयाविनः । मनस्यन्यत्क्रियायां चान्यदित्येतद्द्वयं येषामस्ति ते द्वयाविनो वञ्चकाः । तेऽपि तं जनं न बाधन्ते । किंच ध्वरसः हिंसिकाः विश्वाः सर्वाः सेनास्तदर्थं वि बाधसे विशेषेण बाधस एव ।

शब्दा० - न=नहीं, तम्=उसको, अंहः=पाप, न=नहीं, दुरितम्=दुर्भाग्य, कुतः=कहीं से, चन=भी, न=नहीं, अरातयः=शत्रु, तितिरुः=पार पा सकते हैं, न=नहीं, द्वयाविनः=दोतरफा बोलनेवाले, विश्वा=सम्पूर्ण, इत्=पूर्ववर्ती शब्द पर जोर देनेवाला निपात, अस्मात्=उससे, विबाधसे=दूर कर देते हो, यम्=जिसकी, सुगोपाः=सुन्दर रक्षक, रक्षसि=रक्षा करते हो, ब्रह्मणस्पते=ओ प्रार्थना के स्वामी ।

हि० अ०—ओ ब्रह्मणस्पति, सुन्दर रक्षक तुम जिसकी रक्षा करते हो, उसको कहीं से न तो पाप न दुर्भाग्य ही, न तो शत्रु न दोतरफा बोलनेवाले वञ्चक ही पार पा सकते । सभी प्रकार की बरबादियों से तुम उसे निर्बाध कर देते हो ।

Trans.—Neither sin nor ill-luck from anywhere, neither enemies nor double-dealers overpower him;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

O lord of prayer, having a good protection, thou banishest all the destructive forces from him whom thou protectest.

Notes—अरातयः—Nom. plu. of अराति from √*ṛ* to go or अ+√*rā* (one who does not give), or अ+रै (one who possess no wealth). तितिरुः—√*tṝ* to overpower, to cross, perf. 3rd. plu. द्वयाविनः—Sāyaṇa explains it as मनस्यन्यत्क्रियायां चान्यदित्येतद्द्वयं येषामस्ति ते द्वयाविनो वञ्चकाः; Wilson takes it to mean 'dissemblers', Griffith as 'double tongued creatures' and Peterson as 'double-dealers'. ध्वरसः—From √*dhvṛ* to kill, to injure; Sāyaṇa takes it to mean 'destruction', 'destroying armies', Grassmann and Geldner as 'beguilers'. सुगोपा—Bahuvrīhi compd. accented on the second member. बाधसे—√*bādh* to oppress, pres. 2nd. sing. रक्षसि—√*rakṣ* to protect. pres. 2nd. sing.; not unaccented because preceded by यम्

त्वम् । नः । गोपाः । पथिऽकृत् । विऽचक्षणः । तव । व्रताय । मतिऽभिः । जरामहे ॥ बृहस्पते । यः । नः । अभिः । ह्वरः । दधे । स्वा । तम् । मर्मर्तु । दुच्छुना । हरस्वती ॥६॥

सा० भा०—हे बृहस्पते त्वं नः अस्माकं गोपाः पालयिता पथिकृत् सन्मार्गकृच्च भवसि । विचक्षणः विशेषेण द्रष्टा सर्वज्ञस्त्वम् । तव व्रताय त्वत्संबन्धिने यज्ञाय मतिभिः स्तोत्रैः जरामहे स्तुमः । जरतिः स्तुतिकर्मा । यः पुमान् नः अस्मान् अभि अभिलक्ष्य ह्वरः । 'ह्व कौटिल्ये' । भावेऽसुन् कौटिल्यं दधे विदधाति तं स्वा स्वीया दुच्छना दुर्बुद्धिः हरस्वती वेगवती सती मर्मर्तु मोचयतु । 'मृङ् प्राणत्यागे' । अन्तर्भावितण्यर्थस्य यङ्लुकि लोटिरूपम् ॥

शब्दा०—त्वम्=तुम, नः=हम लोगों के, गोपाः=रक्षक, पथिकृत्=सन्मार्ग दर्शक, विचक्षणः=बुद्धिमान, तव=तुम्हारे, व्रताय=यज्ञ के लिये, मतिभिः=स्तोत्रों से, जरामहे=गान करते हैं, बृहस्पते=ओ बृहस्पति, यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=जो, नः=हमारे, अभि=प्रति, ह्वरः=कौटिल्य, दधे=धारण करता है, स्वा=अपना, तम्=उसको, मर्मर्तु=नष्ट करे, दुच्छुना=दुर्भाग्य, हरस्वती =शीघ्र।

हि० अ०—तुम लोगों के रक्षक हो, बुद्धिमान मार्गदर्शक हो; तुम्हारे यज्ञ के लिये हम लोग स्तोत्रों से गान करते हैं। ओ बृहस्पति, जो हमारे प्रति कुटिलता धारण करता है उसको उसका अपना दुर्भाग्य ही अतिशीघ्र नष्ट करे।

Trans.—Thou art our protector and watchful leader of paths. We sing for thy rites with hymns. O Bṛhaspati, who lays his whirl upon us, him his own ill-luck may crush in haste.

Notes—जरामहे—√*jṛ* to sing, mid. pres. 1rst. plu. ह्वरः—From √*hvṛ* to be crooked; Sāyaṇa renders it by 'कौटिल्यं', Wilson as 'deceit', Griffith as 'snare' and Peterson as 'traps', 'wiles'. दधे—√*dhā* to put, perf. mid. 3rd. sing.; not unaccented because preceded by यः. मर्मर्तु—√*mṛ* to crush, inte. impv. 3rd. sing. हरस्वती—Sāyaṇa takes it to mean वेगवती, Wilson and Griffith as 'precipitate' and Peterson as 'in wrath'; वती is not separated from the stem (see not on मनस्वान् II. 12.1).

उत। वा। यः। नः। मर्चयात्। अनागसः। अरातिऽवा। मर्तः। सानुकः। वृकः॥ बृहस्पते। अप। तम्। वर्तय। पथः। सुऽगम्। नः। अस्यै। देवऽवीतये। कृधि॥७॥

सा० भा०—उत वा अपि च हे बृहस्पते अरातीवा अभिमुखमागमनवान् सानुकः समुच्छ्रितः। 'सानु समुच्छ्रितम्' (निरु० ८. २४) इति यास्कः। वृकः। 'वृक आदाने' धनादीनामादाता यः मर्तः मनुष्यः अनागसः अपराधहीनान् नः अस्मान् मर्चयात्। मर्चयतिर्हिंसाकर्मा। हिंस्यात्। तं मर्तं पथः वैदिकान्मार्गात् अप वर्तय निवर्तय। नः अस्माकं अस्यै देववीतये देवानां वीतिः सोमभक्षणम् अत्रेति देववीतिर्यज्ञः। अस्यै देववीतयेऽस्मै यज्ञाय नोऽस्माकं सुगं सुष्ठु गन्तव्यं मार्गं कृधि कुरु। यज्ञानुष्ठानाय सुमतिं देहीत्यर्थः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—उत=और, वा=भी, यः=जो कोई, नः=हमको, अनागसः=पाप रहित को, अरातीवा=शत्रुता रखनेवाला, मर्तः=मनुष्य, सानुकः=अभिमानी, वृकः=लालची, बृहस्पते=ओ बृहस्पति, तम्=उसको, अपवर्तय=अलग करो, पथः=मार्ग से, सुगम्=आसानी से पार करने योग्य, नः=हम लोगों के मार्ग को, अस्यै=इस, देववीतये=यज्ञ के लिये, कृधि=करो।

हि० अ०—और जो कोई शत्रुता रखनेवाला, अभिमानी तथा लालची व्यक्ति हम पाप रहितों को कष्ट पहुँचाये, ओ बृहस्पति, उसको हमारे मार्ग से दूर करो; इस यज्ञ के लिये हमारे (मार्ग को) सुगम करो।

Trans.—And also the inimical, arrogant, rapacious man who may injure us, the sinless ones ; O Bṛhaspati drive him away from our path and make (our path) easy to this sacrifice.

Notes—मर्चयात् –√*mṛc* to injure, subju. 3rd. sing. अनागसः—Peterson construes it with सानुकः वृकः and renders as 'veritable'; नञ् compd. accented on the first syllable. सानुकः—Arrogant (Wilson, Griffith), 'greedy' (Roth, Peterson). Roth and Grassmann derive it from √*san* to gain. अपवर्तय—√*vṛt* with अप to remove away, caus. impv. 2nd. sing. देववीतये—Dative sing of देववीति; वीति is derived from √*vī* to enjoy, with noun making termination ति. कृधि—√*kṛ* to make, root-aorist, impv. 2nd. sing.

त्रातारम् । त्वा । तनूनाम् । हवामहे । अवऽस्पर्तः । अधिऽवक्तारम् । अस्मऽयुम् ॥ बृहस्पते । देवऽनिदः । नि । बर्हय । मा । दुःऽएवाः । उत्ऽतरम् । सुम्नम् । उत् । नशन् ॥८॥

सा० भा०—अवस्पर्तः उपद्रवेभ्यः पारयितः । यद्वा अवसा रक्षणेनापद्भ्यः पारयितः हे बृहस्पते तनूनाम् अङ्गानां पुत्रादीनां वा त्रातारं पालयितारम् अधिवक्तारं अस्मासु पक्षपातेन अधिकं वक्तारम् अस्मयुं हविष्प्रदानस्मान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामयमानं त्वा त्वां हवामहे अस्मिन् कर्मण्याह्वयामः। किंच देवनिदः देवनिन्दकानसुरान् नि बर्हय विनाशय। दुरेवाः दुष्टगमना दुर्बुद्धयः शत्रवः उत्तरम्। उत्कृष्टतरं सुम्नं सुखं मा उन्नशन् मा व्याप्नुवन्तु ॥

शब्दा०—त्रातारम्=रक्षक, त्वा=तुमको, तनूनाम्=शरीर के, हवामहे=बुलाते हैं, अवस्पर्तः=ओ उपद्रवों से बचानेवाले, अधिवक्तारम्=हमारी ओर से बोलनेवाले, अस्मयुम्=हमारी तरफ झुकाववाले, बृहस्पते=ओ बृहस्पति, देवनिदः=देवताओं की निन्दा करनेवालों को, नि बर्हय=विनष्ट करो, मा=मत, दुरेवाः=दुष्ट बुद्धिवाले, उत्तरम्=बढ़कर, सुम्नम्=सुख, उत् नशन्=प्राप्त करें।

हि० अ०—शरीर के रक्षक, (हमारा) पक्ष करनेवाले, तथा हमारी तरफ झुकाव वाले तुमको, ओ उपद्रवों से बचानेवाले, हम बुलाते हैं। ओ बृहस्पति, देवताओं की निन्दा करनेवालों को विनष्ट करो; दुष्ट-बुद्धिवाले (हमसे) अच्छा सुख न प्राप्त करें।

Trans.—O defender (from distress)we invoke thee, the protector of our body, our advocate, well-disposed to us. O Bṛhaspati smite down the god-revilers and let not the evil-minded obtain loftier bliss (than ours).

Notes—हवामहे—See II. 23.1. अवस्पर्तः—Voc. of अवस्पर्तृ from √*spṛ* with अव to protect ; Sāyaṇa explains it as उपद्रवेभ्यः पारयितः। यद्वा। अवसा रक्षणेनापद्भ्यः पारयितः'. अधिवक्तारम्—'Speaker of encourageous words' (Wilson), 'comforter' (Griffith), 'befriend' (Peterson); Governing compd. accented on the second member. अस्मयुम्—From अस्म with the desirderative suffix यु (see not on देवयवः I. 154.5). देवनिदः—Tatpuruṣa compd. accented on the second member. नि बर्हय—√*bṛh* with नि to smite down, caus. impv. 2nd. sing. दुरेवाः—From दुर्+√*i* to go ; Sāyaṇa renderers it by 'दुष्टगमना दुर्बुद्धयः शत्रवः', Grassmann takes it to mean 'of evil manner or way', Geldner as 'of evil will or inclination or ardour',

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Peterson as 'evil-minded', Wilson as 'malevolent' and Griffith as 'unrighteous'. नशन् —√*naś* to attain, injun. 3rd. plu.

त्वया। वयम् । सुऽवृधा। ब्रह्मणः । पते। स्पार्हा । वसु । मनुष्या।
आ । ददीमहि ॥ याः । नः । दूरे । तळितः । याः । अरातयः ।
अभि । सन्ति । जम्भय । ताः । अनप्नसः ॥९॥

सा० भा०—हे ब्रह्मणस्पते सुवृधा सुष्ठु वर्धयित्रा त्वया हेतुना वयं स्पार्हा स्पृहणीयानि वसु धनानि मनुष्या । 'सुपां सुलुक्' इति चतुर्थीबहुवचनस्याकारः । मनुष्येभ्यो दातृभ्यः आ ददीमहि गृह्णीमहि । 'आङो दोऽनास्यविहरणे' इत्यात्मनेपदम् । दूरे दूरदेशे याः अरातयः याः च तळितः अन्तिकेऽरातयः नः अस्मान् अभि सन्ति अभि भवन्ति अनप्नसः कर्महीनान् ताः अरातीस्तान् शत्रून् जम्भय नाशय । 'जभि नाशने' । चुरादिः । अत्र निरुक्तं —'त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चान्तिकेऽरातयोऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप्न इति रूपनाम (निरु० ३. ११) इति ॥

शब्दा०—त्वया=तुम्हारे द्वारा, वयम्=हमलोग, सुवृधा=अच्छी प्रकार से बढ़ानेवाले, ब्रह्मणस्पते=ओ ब्रह्मणस्पति, स्पार्हा=स्पृहणीय, वसु =धन, मनुष्या=मनुष्यों की, आ ददीमहि=ग्रहण करें, याः=जो, नः= हमारे, दूरे=दूर के, तळितः=समीप के, याः=जो, अरातयः=शत्रु, अभि सन्ति=अभिभूत करते हैं, जम्भय=कुचल डालो, ताः=उनको, अनप्नसः =निश्चेष्ट ।

हि० अ०—ओ ब्रह्मणस्पति, अच्छी प्रकार से बढ़ानेवाले तुम्हारे द्वारा हम स्पृहणीय मानव सम्पत्ति को प्राप्त करें । दूर के और समीप के जो शत्रु हम पर आक्रमण करते हैं उनको कुचल डालो (जिससे) वे निश्चेष्ट हो जावें ।

Trans.—O lord of prayer, through thee, the excellent strengthener, may we obtain covetable human possessons. The enemies, far and near, who attack us, crush them inactive.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—आ ददीमहि—√*dā* with आ to take, pres. mid. opt. 1rst. plu. जम्भय—√*jambh* to chew, to devour. pres. impv. 2nd. sing.; not unaccented because beginning of a new sentence. अनप्नसः—Bahuvrihi compd. accented on the second member.

त्वया । वयम् । उत्ऽतमम् । धीमहे । वयः । बृहस्पते । पप्रिणा । सस्निना । यजा ॥ मा । नः । दुःऽशंसः । अभिऽदिप्सुः । ईशत । प्र । सुऽशंसाः । मतिऽभिः । तारिषीमहि ॥१०॥

सा० भा०—हे बृहस्पते पप्रिणा । 'पॄ पालनपूरणयोः' । आदृगमहन' इति किन्प्रत्ययः । छान्दसो यणादेशः । कामानां पूरकेण सस्निना शुद्धेन युजा सहायेन त्वया हेतुना उत्तमं वयः हविर्लक्षणमन्नं वयं धीमहे धारयामः । 'धी धारणे' । दैवादिकः । दुःशंसः दुःशंसनीयः अभिदिप्सुः अभिदम्भितुमभिभवितुमिच्छुः पुरुषः नः अस्माकं मा ईशत मा ईशिष्ट । ईश्वरो मा भवतु । 'ईश ऐश्वर्ये' । लेट्यडागमः । वयं मतिभिः स्तोत्रैः सुशंसाः शोभनशंसनोपेताः सन्तः प्र तारिषीमहि प्रकर्षेण वर्धेमहि ॥

शब्दा०—त्वया=तुम्हारे द्वारा, वयम्=हम, उत्तमम्=श्रेष्ठ, धीमहे =प्राप्त करें, वयः=शक्ति, बृहस्पते=ओ बृहस्पति, पप्रिणा=इच्छाओं को पूरा करनेवाली, सस्निना=प्रचुर धनवाली, युजा=मित्रता से, मा=मत, नः=हमारा, दुःशंसः=दुष्ट बुद्धिवाला, अभिदिप्सुः=हमें दबाने की इच्छावाला, ईशत=स्वामी बने, सुशंसाः=सुन्दर प्रार्थनावाले, मतिभिः= स्तुतियों के द्वारा, प्रतारिषीमहि=समृद्ध होवें ।

हि० अ०—ओ बृहस्पति, (इच्छाओं को) पूरा करनेवाली तथा प्रचुर धनवाली तुम्हारी मित्रता के द्वारा हम श्रेष्ठ शक्ति प्राप्त करें । हमें दबाने की इच्छावाला (कोई) दुष्ट-बुद्धि हमारे ऊपर मालिक न बने । सुन्दर प्रार्थनावाले हमलोग स्तुतियों के द्वारा समृद्ध होवें ।

Trans.—Through thy fulfilling and bounteous friendship, O Bṛhaspati, may we attain the highest vital strength. Let not the wicked, desiring (us) to

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

do harm, be our master. May we of excellent praises prosper with (our) prayers.

Notes—धीमहे—Sāyaṇa thinks the root √*dhī* to hold but many scholars derive it from √*dhā* to put; in either case it is form of root-aorist subju. 1rst. plu. पप्रिणा—Instr. sing. of पपृवांस् from √*pṝ* to fill. perf. part. सस्निना—Instr. sing of ससवांस् from √*san* to gain. अभिदिप्सुः—Noun, desid. from √*dabh* to harm. ईशत—√*īś* to be master, pres. injun. 3rd. sing. सुशंसाः—Bahuvrīhi compd. accented on the second member. प्रतारिषीमहि—√*tṝ* with प्र to prosper. 'iṣ'-aorist, opt. 1rst. plu.

अनन॒ऽदः । वृ॒षभः । जग्मिः । आ॒ऽह॒वम् । निःऽतप्ता । शत्रु॑म् । पृत॑नासु । स॒स॒हिः ॥ असि॑ । स॒त्यः । ऋ॒णऽयाः । ब्रह्म॑णः । प॒ते॒ । उ॒ग्रस्य॑ । चि॒त् । द॒मि॒ता । वी॒ळु॒ऽह॒र्षिणः ॥११॥

सा० भा०—हे ब्रह्मणस्पते अनानुदः । अनु पश्चाद्ददातीत्यनुदः । स यस्य नास्तीत्यननुदः । दात्रन्तरशून्य इत्यर्थः अत एव वृषभः कामानां वर्षिता आहवम् आहूयतेऽत्रेत्याहवो युद्धम् । 'आङि युद्धे' (पा० सू० ३. ३. ७३) इत्यप्प्रत्ययः संप्रसारणं च । तद्युद्धं जग्मिः गन्ता । 'आदृगमहन' इति किन्प्रत्ययः । लिड्वद्भावादाहवमित्यत्र षष्ठीप्रतिषेधः । शत्रुं शातयितारं निष्टप्ता नितरां तस्य तापकः । तृनन्तत्वात् षष्ठीप्रतिषेधः । 'निसस्तपतावनासेवने' (पा० सू० ८. ३. १०२) इति षत्वम् । 'तादौ च निति' इति गतेः स्वरः । पृतनासु संग्रामेषु सासहिः शत्रूणामभिभविता । एतादृशस्त्वं सत्यः सत्यपराक्रमः सत्यप्रज्ञो वा असि । ऋणयाः ऋणस्य यावयितासि । 'यु मिश्रणामिश्रणयोः' । ण्यन्तस्य क्विपि णिलोपे 'लोपो व्योर्वलि' इति वलोपः । किंच उग्रस्य चित् ओजस्विनोऽपि दमिता उपशमयिता वीळुहर्षिणः दृढहर्षस्य कामुकस्य नास्तिकस्य चिद्दमितासि ॥

शब्दा०—अनानुदः=कभी समर्पण न करनेवाले, वृषभः=शक्तिशाली, जग्मिः=जानेवाले, आहवम्=युद्ध में, निष्टप्ता=तपानेवाले, शत्रुम्=शत्रु को, पृतनासु=युद्ध में, सासहिः=विजेता, असि=हो, सत्यः=वास्तव में,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋणयाः=ऋण से दूर करनेवाले, ब्रह्मणस्पते=ओ प्रार्थना के स्वामी, उग्रस्य=भयानक का, चित्=भी, दमिता=दमन करनेवाले, वीळुहर्षिणः =अभिमानी बलवान का।

हि० अ०—ओ बृहस्पति, तुम वास्वत में, कभी समर्पण न करनेवाले, शक्तिशाली, युद्ध में जानेवाले, शत्रु को तपानेवाले, युद्ध में विजयी, ऋण से दूर करनेवाले तथा भयानक एवं अभिमानी बलवानों को भी दबानेवाले हो।

Trans.—Thou art unyielding mighty, goer to the battle, tormentor of enemies, victorious in the battles; O lord of prayer, truly thou art remover from debts and subduer even of the terrible and strong excited.

Notes.—अनानुदः—From √*dā* with अनु te yield; Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pāṇ. VI. 2. 172). The second syllable of the word अनानु is lengthened (Ṛg. Prāt. IX. 33) जग्मिः—From the perf. base of √*gam* by adding the noun making termination इ (cf. ददिः, दधिः, वव्रिः etc.). सासहिः—Victorious; derived from the perfect base of √*sah* to conquer; final इ is a noun-making termination as in जग्मिः; the first syllable is lengthened. ऋणयाः—From ऋण+ √*yu* to separate; Tatpuruṣa compd. accented on the second member. वीळुहर्षिणः—Sāyaṇa explains it as 'दृढहर्षस्य कामुकस्य नास्तिकस्य', Wilson as 'exulting', Griffith as 'widely passionate' and Peterson as 'stubborn excite'; Bahuvrīhi compd. accented on the second member.

अदेवेन । मनसा । यः । रिषण्यति । शासाम् । उग्रः । मन्यमानः । जिघांसति ॥ बृहस्पते । मा । प्रणक् । तस्य । नः । वधः । नि । कर्म । मन्युम् । दुःऽएवस्य । शर्धतः ॥१२॥

सा० भा०—यः पुमान् अदेवेन देवानमन्यमानेन यद्वा आसुरवृतिविशिष्टेन मनसा अस्मान् रिषण्यति हिनस्ति। 'दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति' इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निपातितः । यश्च उग्रः पापचित्तः मन्यमानः आत्मानं बहु मन्यमानः पुमान् शासाम् उक्थस्य शंसितारम् । यद्वा अस्माकमाशंसाम् । शासां शासितॄणामुग्र इति वा योजनीयम् । अस्मान् जिघांसति हन्तुमिच्छति । हन्तेः सनि 'अज्झनगमां सनि' इति दीर्घः । हे बृहस्पते तस्य वधः । वध्यतेऽनेनेति वधः आयुधम् । नः अस्मान् मा प्रणक् । 'पृची संपर्के' । श्नम्विकरणी । व्यत्ययेनाभागमः । 'चादिलोपे' इति न निघातः । व्यत्ययेनाद्युदात्तः । किंच दुरेवस्य दुष्टगमनस्य शर्धतः बलवतः । यद्वा दुष्टाभिसंधेर्वेगं कुर्वतः तस्य मन्युं क्रोधं ज्ञानं वा नि कर्म त्वत्प्रसादान्निराकुर्मश्च ॥

शब्दा०- अदेवेन=अपवित्र, मनसा=मन से, यः=जो रिषण्यति=नुकसान करने पर तुला है, शासाम्=स्तुतिगायक को, उग्रः=भयानक, मन्यमानः=अपने को बड़ा समझता हुआ, जिघांसति=मारना चाहता है, बृहस्पते=ओ बृहस्पति, मा=मत, प्रणक्=प्राप्त करे, तस्य=उसका, नः हम लोगों को, वधः=अस्त्र, निकर्म=प्रभावहीन करें, मन्युम्=क्रोध को, दुरेवस्य=दुष्ट के, शर्धतः=शक्तिशाली ।

हिं० अ० -अपवित्र मन से जो नुकसान करने पर तुला है; (जो) भयानक अपने को बड़ा समझता हुआ, स्तुति-गायक (हम लोगों) को मारना चाहता है, ओ बृहस्पति उसका शस्त्र हम लोगों को न पावे । उस शक्तिशाली दुष्ट के क्रोध को हमलोग प्रभावहीन करें ।

Trans.—Who with ungodly mind is bent on harm ; and (who) the terrible, regarding himself powerful, wants to kill the praise-singer, O Bṛhaspati let not his weapon attain us. May we inact the wrath of mighty wicked.

Notes.—रिषण्यति—Denom. from ऋषन् or ऋषण् (originally from √*riṣ* to enjure), 3rd. sing. ; not unaccented because preceded by यः. शासाम् –'Praise-singers' (Sāyaṇa), 'worshipper' (Wilson), 'mid-lords' (Griffith), 'revilers' (Grassmann), 'among those that command' (Geldner) 'by commands' (Oldenberg), 'by his ability to punish' (Peterson). मन्यमानः— √*man* to think, pres. passive part. जिघांसति— √*han* to kill,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

desid. pres. 3rd. sing.; not unaccented because preceded by यः. प्रणक् –Sāyaṇa derives it from √*pṛc* to mix and Macdonell from √*naś* to attain: injun. 3rd. sing.; not unaccented because the conjunctive च, joining third and fourth pāda is dropped (चादिलोपे विभाषा –Pāṇ VIII. 1.63). निकर्म – √*kṛ* with prefix नि to inact, to humiliate, root-aorist, injuṅ. 1rst. plu.

भरेषु । हव्यः । नमसा । उपऽसद्यः । गन्ता । वाजेषु । सनिता । धनंमऽधनम् । विश्वाः । इत् । अर्यः । अभिऽदिप्स्वः । मृधः । बृहस्पतिः । वि । ववर्ह । रथानऽइव ॥१३॥

सा० भा०—सः बृहस्पतिः भरेषु संग्रामेषु हव्यः योद्धृभिः स्वरक्षणार्थम् आह्वातव्यः नमसोपसद्यः सर्वैर्नमसोपसदनीयः किंच वाजेषु गन्ता संग्रामेषु रक्षार्थं गमनशीलः । तथा धनंधनं सनिता संभक्ता दाता । तृनन्तत्वात् षष्ठी-प्रतिषेधः । तथा अर्यः स्वामी बृहस्पतिः अभिदिप्स्वः अभिभवनेच्छावती विश्वाः इत् सर्वा एव मृधः हिंसिकाः सेनाः रथानिव युद्धे वेगेन परकीयान् रथानिव वि ववर्ह विशेषेण शिथिलीचकार । यद्वा इवशब्दश्चार्थे । रथांश्च वि ववर्ह । लडर्थे लिट् ॥

शब्दा०—भरेषु=युद्ध में, हव्यः=बुलाने योग्य, नमसा=नमस्कार द्वारा, उपसद्यः=समीप आनेवाले, गन्ता=जानेवाले, वाजेषु=युद्ध में, सनिता=जीतनेवाले, धनंधनम्=प्रत्येक प्रकार के धन को, विश्वाः=सम्पूर्ण, इत्=पूर्ववर्ती शब्द पर जोर देनेवाला निपात, अर्यः=स्वामी, अभिदिप्स्वः =मारने के इच्छा रखनेवाले, मृधः=शत्रुओं को, बृहस्पतिः=बृहस्पति ने, वि ववर्ह=नष्ट कर दिया है, रथाँ इव=युद्ध में टूटे हुये रथों की तरह ।

हि० अ०—युद्ध में बुलाने योग्य, नमस्कार द्वार समीप आनेवाले, युद्ध में जानेवाले, प्रत्येक प्रकार के धन को जीतनेवाले स्वामी बृहस्पति ने (हमें) मारने की इच्छा रखने वाली सम्पूर्ण शत्रु-सेनाओं को (युद्ध में टूटे हुये) रथों की तरह नष्ट कर दिया है ।

Trans.—Lord Bṛhaspati, to be invoked in the battles, to be approached through salutation, goer in

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the battles, winner of every kind of wealth, has destroyed all the foe armies, desiring to kill (us), like war chariots (of the enemies).

Notes.—उपसद्य—Gerundive in य. from √*sad* to sit. धनंधनम्—Iterative compd. accented on the first member. अभिदिप्स्वः—Vide Appendix-B under कम्पस्व०. ववर्ह—√*vṛh* to tear, perf. 3rd. sing. रथाँ इव. For euphonic combination see Appendix 'A'. Under आन्पद-पद-वृत्ति.

तेजिष्ठया । तपनी । रक्षसः । तप । ये । त्वा । निदे । दधिरे । दृष्टवीर्यम् ॥ आविः । तत् । कृष्व । यत् । असत् । ते । उक्थ्यम् । बृहस्पते । वि । परिऽरपः । अर्दय ॥१४॥

सा० भा०—हे बृहस्पते तेजिष्ठया अतिशयेन तिग्मया तपनी तापकारिण्या हेत्या रक्षसः राक्षसान् तप तापय । ये राक्षसाः दृष्टवीर्यं युद्धेषु दृष्टपराक्रमं त्वां निदे निन्दाया विषयं दधिरे कृतवन्तः तान् तापयेति समन्वयः । ते तव उक्थ्यं सर्वैः प्रशंसनीयं यत् वीर्यं असत् पूर्वमासीत् तत् अधुना आविः कृष्व प्रकटीकुरु । तेन च वीर्येण परिरापः परिवदतः निन्दकानसुरान् वि अर्दय विशेषेण बाधस्व ॥

शब्दा०—तेजिष्ठया=अत्यन्त तीक्ष्ण, तपनी=जलानेवाले शस्त्र से, रक्षसः=राक्षसों को, तप=जलाओ, ये=जो, त्वा=तुम्हारी, निदे=निन्दा, दधिरे=धारण करते हैं अर्थात् करते हैं, दृष्टवीर्यम्=जिनका पराक्रम देखा गया है, तत्=उस पराक्रम को, आविष्कृष्व=प्रकट करो, यत्=जो, असत्=हो, ते=तुम्हारा, उक्थ्यम्=प्रशंसनीय, बृहस्पते=ओ बृहस्पति, परिरापः=निन्दकों को, वि अर्दय=विशेष रूप से दूर करो ।

हि० अ०—तीक्ष्ण जलानेवाले (अपने) शस्त्र से राक्षसों को जलाओ, जो तुम्हारी जिसकी शक्ति देखी गई है, निन्दा करते हैं । जो तुम्हारा प्रशंसनीय (पराक्रम) हो उसे प्रकट करो । ओ बृहस्पति, निन्दकों को विशेष रूप से अलग करो ।

Trans.—With (thy) sharp-pointed weapon burn the demons who have disdain for thee, whose power

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

has been seen. Make manifest that which may be thine to be praised ; O Bṛhaspati stir variously the revilers.

Notes.—तप—√*tap* to burn, impv. 2nd sing. दधिरे—√*dhā* to put, perf. 3rd. plu. ; not unaccented because preceded by ये. दृष्टवीर्यम्—Whose power is seen or felt ; Bahuvrīhi compd. आविस्कृष्व—√*kṛ* with आविः to make manifest, root-aorist, mid impv. 2nd sing. असत् —√*as* to be pres. subju. 3rd sing ; not unaccented because preceeded by यत्. उक्थ्यम्—See I.48. 12. परिरापः—See II. 23.3. अर्दय—√*ṛd* to stir, caus. pres. impv. 2nd. sing.

बृहस्पते । अति । यत् । अर्यः । अर्हात् । द्युऽमत् । विऽभाति । क्रतुऽमत् । जनेषु ॥ यत् । दीदयत् । शवसा । ऋतऽप्रजात । तत् । अस्मासु । द्रविणम् । धेहि । चित्रम् ॥१५॥

सा० भा०—बार्हस्पत्ये पशावेषा हविषोऽनुवाक्या । 'प्रदानानाम्' इति खण्डे सूत्रितं—'वृहस्पते अति यदर्यो अर्हात्तमृत्विया उप वाचः सचन्ते' (आश्व० श्रौ० ३.७) इति । एषैवाश्विनशस्त्रे परिधानीया । सूत्रितं—'बृहस्पते अति यदर्यो अर्हादिति परिधानीया' (आश्व० श्रौ० ६.५) इति ।

ऋतप्रजात सत्येनोत्पन्न हे बृहस्पते अर्यः श्रेष्ठो ब्राह्मणः सर्वान् कामानतीत्य यत् ब्रह्मवर्चसं तेजः अर्हात् पूजयेत् । अर्ह पूजायाम्' । लेट्याडागमः । जनेषु । ब्राह्मणेषु द्युमत् दीप्तियुक्तं क्रतुमत् ज्ञानोपेतं यद्ब्रह्मवर्चसं विभाति विशेषेण दीप्यते । यत् च शवसा बलेन स्वाश्रयं जनं दीदयत् । दीदयति-दीप्तिकर्मा । दीपयति । चित्रं चायनीयं तत् ब्रह्मवर्चसरूपं द्रविणम् अस्मासु धेहि निधेहि । यद्वा । अर्य उदारोऽपि त्वया दत्तं धनम् अतीवार्हात् श्रद्दधीत । यच्च त्वद्दत्तं धनं जनेषु तव स्तोत्रं कुर्वाणेषु दीप्तियुक्तं कर्मसाधनं च विभाति यच्च धनं शवसा अन्नादिसमृद्ध्या दीदयत् स्वाश्रयं दीपयति तादृशं धनमस्मासु धेहि । तथा च ब्राह्मणं—'बृहस्पते अति यदर्यो अर्हादित्येतया परिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोऽतीव वान्यान्ब्रह्मवर्चसमर्हति द्युमदिति द्युमदिव वै ब्रह्मवर्चसं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विभातीति वीव वै ब्रह्मवर्चसं भाति यद्दीदयच्छवस ऋतप्रजातेति दीदायेव वै ब्रह्मवर्चसं तदस्मासु द्रविणं धेहि. चित्रमिव वै ब्रह्मवर्चसं ब्रह्मयशसी भवति (ऐ० ब्रा० ४.११) इति ॥

शब्दा०—बृहस्पते=ओ बृहस्पति, अति=अधिक रूप से, यत्=जिससे, अर्यः=श्रेष्ठ आर्य, अर्हात्=पूजा कर सकें, द्युमत्=प्रकाश से युक्त, विभाति=चमकता है, क्रतुमत्=शक्ति से युक्त, जनेषु=मनुष्यों में, यत्=जो, दीदयत्=प्रकाशित हो, शवसा=शक्ति से, ऋतप्रजात=ओ यज्ञ के पुत्र, तत्=ऐसा, अस्मासु=हमें, द्रविणम्=धन, धेहि=प्रदान करो, चित्रम्=विचित्र ।

हि० अ०—ओ बृहस्पति, जिससे श्रेष्ठ आर्य अधिक रूप से पूजा कर सकें, जो प्रकाश तथा शक्ति से युक्त मनुष्यों के बीच चमकता है, जो सामर्थ्य से प्रकाशित हो; ओ यज्ञ के पुत्र, ऐसा (उपर्युक्त गुणों वाला) विचित्र धन हमें प्रदान करो ।

Trans.—O Bṛhaspati, wherewith the pious may worship exceedingly, endowed with lustre and will-power (which) shines among man, which may shine with strength ; O born of sacrifice, bestow upon us that wonderful treasure.

Notes—अति यदर्यो अर्हात्—This Pāda has variously been interpreted by the scholars : Wilson following Sāyaṇa translates as 'wherewith the pious man may worship exceedingly', Griffith renders as 'that which the foe deserves not' ; and Peterson as 'such as would be worth beyond the reach of our opponents'. अर्हात्—√*arh* to worship, pres. subju. 3rd. sing. ; not unaccented because preceded by यत्. विभाति—√*bhā* to shine, pres. 3rd sing. ; not unaccented because syntactically connected with यत्. दीदयत्—√*dī* to shine, pres. subju. 3rd. sing. ; not unaccented because preceded by यत्. धेहि—√*dhā* to put, impv. 2nd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मा । नः । स्तेनेभ्यः । ये । अभि । द्रुहः । पदे । निरामिणः । रिपवः । अन्नेषु । जगृधुः ॥ आ । देवानाम् । ओहते । वि । व्रयः । हृदि । बृहस्पते । न । परः । साम्नः । विदुः ॥१६॥

सा० भा०—हे बृहस्पते नः अस्मान् स्तेनेभ्यः । स्त्यानमस्ति येष्विति स्तेनाश्चौराः । तेभ्यो मा दाः । तान् दर्शयति । ये चौराः द्रुहः प्राणद्रोहस्य पदे स्थाने निरामिणः नितरां रमणशीलाः रिपवः हिंसकाः सन्तः अन्नेषु परकीयेषु अभि जागृधुः अभिकाङ्क्षन्ति । 'गृधु अभिकाङ्क्षायाम्' । लिटि रूपम् । ये च देवानां वि व्रयः विशेषेण वर्जनम् । व्री व्ली इति धातू वर्जने वर्तेते । 'य एवं' विद्वान् दक्षिणां प्रतिगृह्णाति नैनं दक्षिणा व्लीनाति' (तै० ब्रा० २. २. ५. १) इत्येकस्य वर्जनार्थे दृष्टत्वादपरस्यापि वर्जनार्थत्वम् । तत् हृदि स्वकीये हृदये आ ओहते आवहन्ति । देवानां यागान् स्तुतीश्च न करवामेति मन्यन्त इति यावत् । तेभ्योऽस्मान् मा दा इति समन्वयः । ये पुमांसः साम्नः साममयात्त्वत्तः परः परस्तादन्यदुत्कृष्टं साम यद्रक्षोघ्नम् । साम वै रक्षोहेति । न विदुः न जानन्ति । किंतु सर्वसाधकं साम त्वामेव विदुषोऽस्मान् स्तेनेभ्यो मा दाः ।

शब्दा०—मा=मत, नः=हम लोगों को, स्तेनेभ्यः=चोर शत्रुओं के लिये, ये=जो, द्रुहस्पदे=हत्या करनेवाले स्थान पर, निरामिणः=आनन्द पूर्वक घूमते हुये, रिपवः=शत्रु, अन्नेषु=दूसरों के धन का अभिजागृधुः=लालच करते हैं, देवानाम्=देवताओं को, आ ओहते=लाते हैं, वि व्रयः=अलग करने का विचार, हृदि=हृदय में, बृहस्पते=ओ बृहस्पति, न=नही, परः=सीमा, साम्नः=सामन् की, विदुः=जानते हैं ।

हि० अ०—ओ बृहस्पति, हम लोगों को चोर शत्रुओं के लिये मत (दो), जो हत्या करनेवाले स्थान पर आनन्दपूर्वक घूमते हुये (दूसरों के) धन का लोभ करते हैं और देवताओं को अलग करने का विचार हृदय में लाते हैं, (तुम्हारे) सामन् (शस्त्र) की (महिमा की सीमा) नहीं जानते ।

Trans.—Give us not to the thieves, the enemies who taking delight at slaughtering place covet the food (of others); (who) cherish in (their) hearts the abandonment of gods. O Bṛhaspati (they) do not know the extent of (thy) Sāman (against evil spirits).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—निरामिणः—From नि+√*ram* to take delight; Wilson following Sāyaṇa translates it as 'delighting', Griffith as 'who sits at ease' and Peterson as 'stopping. जागृधुः—√*gṛdh* to covet, perf. 3rd. plu.; not unaccented because syntactically connected with ये. The first syllable is lengthened in the Saṁhitā-text (Ṛg. Prāt. IX. 52), the original being restored in the Pada-text. ओहते—(1) √*ūh* to consider, pres. 3rd. plu. (Roth. Grassmann, Whitney, Macdonell); Macdonell also takes it in 3rd sing. (2) √*oh* to triumph, 3rd. sing. (Peterson), plu. (Oldenberg, Geldner). According to Geldner it is similar to *aoj* and *aog* of Avesta; not unaccented because the antithesis is indicated by आ and वि. व्रयः—Form √*vri* to forbid; 'abandonment' (Wilson, Griffith), 'excessive power' (Oldenberg), 'weakness' (Geldner), 'oppressive power' (Peterson). आ देवानामोहते वि व्रयः हृदि—This Pāda has variously been interpreted by scholars: '(who) in their hearts little mind the tyrannical power of the gods' (Olderberg), 'they affirm the weakness of the gods and deny (the weakness) in their own hearts' (Geldner), 'who cherish in their hearts the abandonment of the Gods' (Wilson, Griffith)., 'the oppressive power of the Gods triumphs directly and in diverse ways in their heart' (Peterson). बृहस्पते न परः साम्नो विदुः—Sāyaṇa construes it with नः in the first Pāda. Wilson, Griffith, Peterson all explain taking it as the adj. clause of स्तेनेभ्यः in the first Pāda: 'Who do not know the extent of thy powers (against evil spirits)' (Wilson), 'no further rest shall they obtain' (Griffith), 'they know of nothing higher than the Sāman (which is (thy) weapon (Peterson).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वेभ्यः । हि । त्वा । भुवनेभ्यः । परि । त्वष्टा । अजनत् । साम्नःऽसाम्नः । कविः ॥ सः । ऋणऽचित् । ऋणऽयाः । ब्रह्मणः । पतिः । द्रुहः । हन्ता । महः । ऋतस्य । धर्तरि ॥१७॥

सा० भा०—हे ब्रह्मणस्पते त्वष्टा प्रजापतिः विश्वेभ्यः भुवनेभ्यः परि सर्वेभ्यो भूतजातेभ्य उत्कृष्टं त्वां अजनत् हि अजीजनत् खलु। ततस्त्वं साम्नः साम्नः सर्वस्यापि साम्नः कविः। 'कु शब्दे'। 'अच इः' इति इप्रत्ययः। उच्चारयिता कर्तासि। यद्वा कविः क्रान्तदर्शी त्वष्टा साम्नःसाम्नः सर्वस्यापि साम्नः सारेण त्वाम् अजीजनत्। किंच सः ब्रह्मणस्पतिः महः महतः ऋतस्य यज्ञस्य धर्तरि धारके यजमाने ऋणचित् स्तोतृकाममृणमिव चिनोतीति ऋणचित्। किंच ऋणयाः पापरूपस्य ऋणस्य यावयिता पृथक्कर्त्ता च द्रुहः कर्मणो द्रोग्धुरसुरस्य हन्ता भवति ॥

शब्दा०—विश्वेभ्यः=सभी, हि=वास्तव में, त्वा=तुमको, भुवनेभ्यः=प्राणियों से, परि=श्रेष्ठ, त्वष्टा=त्वष्टा ने, अजनत्=उत्पन्न किया, साम्नःसाम्नः=प्रत्येक सामन् से, कविः=कवि, सः=वह, ऋणचित्=ऋण को जाननेवाला, ऋणयाः=ऋण को दूर करनेवाला, ब्रह्मणस्पति=प्रार्थना के स्वामी, द्रुहः=शत्रुओं को, हन्ता=मारनेवाला, महः=महान्, ऋतस्य=यज्ञ के, धर्तरि=धारण करनेवाले के।

हि० अ०—कवि त्वष्टा ने वास्तव में सभी प्राणियों से उपर, प्रत्येक सामन् से (सारभूत) तुमको उत्पन्न किया। वह ब्रह्मणस्पति महान् यज्ञ करनेवाले के ऋण को जाननेवाला है। (यजमान के) ऋण को दूर करनेवाला तथा (उसके) शत्रुओं को मारनेवाला है।

Trans.—(O Bṛhaspati) Tvaṣṭṛ, the poet, indeed, generated thee from each Sāman, above all the creatures. That Bṛhaspati is acknowledger of (worship as it were) debt to the supporter of great sacrifice; he is the remover of debt and slayer of the enemies (of his worshipper).

Notes.—अजनत्—√*jan* to generate, impf. 3rd, sing.; not unaccented because preceded by हि. साम्नःसाम्नः—From each sāman; Iterative compd. accented on the

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

first member.. ऋणचित्—According to Sāyaṇa ऋणचित् means 'one who gives head to worship as it were a debt' Wilson takes it to mean 'one who acknowledges the debt', Griffith as 'guilt-scourger' and Peterson as 'collector of debct. धर्तरि–Locacive infinitive from √*dhṛ* to bear. Sāyaṇa construes it with ऋणचित् and ऋणयाः, while Griffith and Peterson take it as a separate predicative attribute of Bṛhaspati.

तवं । श्रिये । वि । अजिहीत । पर्वतः । गवाम् । गोत्रम् । उत्-ऽअसृजः । यत् । अङ्गिरः ॥ इन्द्रेण । युजा । तमसा । परिऽवृतम् । बृहस्पते । निः । अपाम् । औब्जः । अर्णवम् ॥१८॥

सा०भा०—अङ्गिरः अङ्गिरस हे बृहस्पते गवाम् आवारको वलेनाधिष्ठितः पर्वतः तव श्रिये आश्रयणार्थं व्यजिहीत विवृतद्वारतामगच्छत् । ततस्त्वं यत् यदा गोत्रम् । 'इनित्रकट्यचश्च' इति समूहार्थे त्रप्रत्ययः । गवां समूहं उदसृज निरगमयः तदा इन्द्रेण युजा सहायेन युक्तस्त्वं तमसा वृत्रासुरेण परीवृतं परित आक्रान्तम् अपाम् अर्णवं स्थानभूतं मेघं नि औब्जः नितराम् अधोमुखमकार्षीः ॥

शब्दा०—तव=तुम्हारे, श्रिये=आश्रय के लिये, वि अजिहीत=खोल दिया, पर्वतः=पर्वत ने, गवाम्=गायों के, गोत्रम्=बाड़े को, उदसृजः=खोला, यत्=जब, अङ्गिरः=ओ अङ्गिरस, इन्द्रेण=इन्द्र की, युजा=मित्रता से, तमसा=अन्धकार से, परिवृतम्=चारों तरफ से ढके हुये, बृहस्पते=ओ बृहस्पति, अपाम्=जल के, निरौब्ज=बहाया, अर्णवम्=समुद्र को ।

हि० अ०—ओ अङ्गिरस, जब तुमने गायों के बाड़े को (जिसमें वल ने उन्हें बंद किया था) खोला, पर्वत ने तुम्हारे आश्रय के लिये (अपने द्वार को अपने आप) खोल दिया । इन्द्र के साथ से, ओ बृहस्पति, तुमने जल के समुद्र को बहाया, जो अन्धकार से ढका हुआ था ।

Trans—O Aṅgiras, the mountain cleft itself apart for thy resort, when thou openedst the stall of the

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

kine. O Bṛhaspati, with Indra for ally thou released the ocean of waters, enveloped with darkness.

Notes.—श्रिये—From √*śri* to resort, dat. sing. Griffith takes it to mean 'for glory'. व्यजिहीत् —√*hā* with वि to cleave apart, to open out, impf. mid. 3rd. sing. उदसृजः—√*sṛj* to emit, impf. 2nd. sing. ; not unaccented because followed by यत् (यद्धितुपरं छन्दसि—Pāṇ VIII. 1.56). परिवृतम् –Past part. from √*vṛt* with परि to surround ; for accent see निहिताः (I. 24.7). नि औब्जः—√*ubj* with नि to let loose, impf. 2nd. sing.

ब्रह्मणः । पते । त्वम् । अस्य । यन्ता । सूऽउक्तस्य । बोधि । तनयम् । च । जिन्व ॥ विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥१९॥

सा० भा०—हे ब्रह्मणस्पते ब्रह्मणां स्तोत्राणामधिपते अस्य जगतः यन्ता नियामकः त्वं सूक्तस्य अस्मदीयमिदं ब्राह्मणस्पत्यं सूक्तं बोधि बुध्यस्व । त्वं तनयं पुत्रपौत्रादिलक्षणं संतानं जिन्व । जिविः प्रीणनार्थः । लोटि रूपम् । प्रीणय । भवादृशाः देवाः यदवन्ति रक्षन्ति तत् तादृशं विश्वं सर्वं भद्रं कल्याणं भवति । अतो वयं विदथे अस्मिन् यज्ञे सुवीराः शोभनपुत्रपौत्राः सन्तः बृहत् प्रभूतमिदं स्तोत्रं वदेम ब्रूयाम ।

शब्दा०—ब्रह्मणस्पते=ओ प्रार्थना के स्वामी, त्वम्=तुम, अस्य=इस, यन्ता=नियामक, सूक्तस्य=सुन्दर स्तोत्र के, बोधि=होवो, तनयम्=पुत्र पौत्रों को, च=और, जिन्व=कार्य में प्रवृत्त करो, विश्वम्=सभी, तत्=वे, भद्रम्=कल्याणकारी, यत्=जिसकी, अवन्ति=रक्षा करते हैं, देवाः=देवता, बृहत्=जोर से, वदेम=बोलें, विदथे=यज्ञ में, सुवीराः=वीर पुत्रों से युक्त ।

हि० अ०—ओ ब्रह्मणस्पति, तुम इस सुन्दर स्तोत्र के नियामक होवो; पुत्र पौत्रों को (कार्य में) प्रवृत्त करो। वे सभी चीजें कल्याणकारी होती हैं जिसकी रक्षा (आप जैसे) देवता करते हैं; वीर पुत्रों से युक्त (हम) यज्ञ में जोर से गान करें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—O Brahmaṇaspati, be thou the regulator of this excellent speech, and inspire our offsprings. All is auspicious, that gods protect. May we accompanied with heroes speak aloud in the sacrifice.

Notes.—यन्ता—Nom. sing. of यन्तृ from √*yam* to restrain. सूक्तस्य—Of the excellent hymn; उक्त is the past part. of √*vac* to speak, by Samprasāraṇa. बोधि—√*budh* to know, root-aorist impv. 2nd sing. तनयम्—acc. sing. of तनय from √*tan* to stretch, meaning propagating a family, belonging to one's own family (तनयं तनोतेः—Nir.X.7). According to Yāska तनय means grandchild (Nir.XII.6). जिन्व—√*ji* or √*jinv* to inspire, pres. impv. 2nd. sing. अवन्ति—√*av* to protect, pres. 3rd. plu.; not unaccented because preceded by यत् वदेम—√*vad* to speak, pres. opt. 1rst. plu. विदथे—This word has been derived and interpreted variously: (1) √*vid* to find (Roth, Grassmann), (2) √*vidh* to sacrifice (Regnaud), (3) वि + √*dhā* to ordain (Oldenberg); 'sacrifice' (Sāyaṇa, Wilson), 'wisdom', 'spiritual or priestly knowledge', 'counsels of the wise' (Geldner). Griffith and Peterson follow Geldner in translating it as 'assembly'. सुवीराः—Bahuvrīhi compd. accented on the second member बृहद्वदेम विदथे सुवीराः—'May we with valiant men mightily raise our voice at the determining (of ordinances etc.)' (Oldenberg); 'May we lead the great word as masters in wisdom' (Geldner); 'Loud may we speak with heroes in assembly' (Griffith).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थेऽनुवाके एकादश सूक्तानि । तत्र 'आ ते पितः इति पञ्चदशर्चं प्रथमं सूक्तं गृत्समदस्यार्षं त्रैष्टुभं रौद्रम् । अनुक्रान्तं च—'आ ते पञ्चोना रौद्रम्' इति । शूलगवादिरुद्रयज्ञेषु अनेन सूक्तेन प्रतीची दिगुपस्थेया । सूत्रितं च—'कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम्' (आश्व० गृ० ४.८.२३) इति । रुद्रदेवत्ये पशौ 'आ ते पितः' इति हविषोऽनुवाक्या । सूत्रितं च—'आ ते पितर्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीच इति तिस्रः' (आश्व० श्रौ० ३. ८) इति । अत्र शौनकः—चतुर्दशीमुपोष्यैकां कृष्णस्य जुहुयाच्चरुम् । आतेसूक्तेन रौद्रेण प्रत्यृचं वाग्यतः शुचिः । पूर्वमाज्याहुतीर्हुत्वाथोपस्थाय च शंकरम् । हविःशेषेण वर्तेत एकान्तरमतन्द्रितः । पूर्णमासे जयेन्मृत्युं रोगैश्च परिमुच्यते (ऋग्वि० १. १६८-१७०) इति ।

आ । ते । पितः । मरुताम् । सुम्नम् । एतु । मा । नः । सूर्यस्य सम्ऽदृशः । युयोथाः ॥ अभि । नः । वीरः । अर्वति । क्षमेत । प्र । जायेमहि । रुद्र । प्रऽजाभिः ॥१॥

सा० भा०—हे मरुतां पितः मरुत्संज्ञानां देवानामुत्पादक रुद्र । 'परमपि छन्दसि' इति षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावात् सर्वानुदात्तत्वम् । ते त्वदीयमस्मभ्यं दातव्यं सुम्नं सुखम् आ एतु आगच्छतु । रुद्रस्य च मरुतां पितृत्वम् 'इदं पित्रे मरुताम्' (ऋ० सं० १.११४.६) इत्यत्राख्यायिकामुखेनावादिष्म । तथा त्वं नः अस्मान् सूर्यस्य संदृशः संदर्शनात् मा युयोथाः मा पृथक्कार्षीः । 'यु मिश्रणामिश्रणयोः' । लङि छान्दसः शपः श्लुः । 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन ङित्त्वाभावात् गुणः । अर्वति शत्रौ । 'भ्रातृव्यो वा अर्वा' (तै० सं० ६.३.८.४) इति श्रुतेः । नः अस्माकं वीरः वीर्यवान् पुत्रादिः अभि क्षमेत अभिभवतु । यद्वा वीरस्त्वं नोऽस्मानभिक्षमेथाः अस्मान् कृतापराधानभिक्षमस्व । हे रुद्र प्रजाभिः पुत्रपौत्रादिभिः प्र जायेमहि प्रभुताः स्याम ।

शब्दा०—ते=तुम्हारा, पितर्मरुताम्=ओ मरुतों के पिता, सुम्नम्=सुख, आ एतु=आवे, मा=मत, नः=हम लोगों को, सूर्यस्य=सूर्य की,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संदृशः—दृष्टि से, युयोथाः=अलग करो। नः=हमारे, वीरः=बहादुर (पुत्र पौत्रादि), अर्वति=शत्रु को, अभिक्षमेत=पराजित करें, प्र जायेमहि=वृद्धि को प्राप्त करें, रुद्र=ओ रुद्र देवता, प्रजाभिः=संतति द्वारा।

हि० अ०—ओ मरुतों के पिता (रुद्र), तुम्हारे द्वारा प्रदत्त सुख (हमारे पास) आवे। सूर्य की दृष्टि से मुझे अलग मत करो। हमारे वीर (पुत्र, पौत्रादि) शत्रु को पराजित करें; हम संतति से वृद्धि को प्राप्त करें।

Trans.—O father of the Maruts, may thy bliss come (to us); separate us not from the sight of the sun. May our heroes overcome the enemies ; O Rudra, we be multiplied with offsprings.

Notes—पितर्मरुताम्—See notes on दुहितर्दिवः (I.48.1). एतु—√*i* to go, impv. 3rd. sing. युयोथाः—√*yu* to separate, mid. IIIrd conjugation, 2nd, sing. injun. अभि नो वीरो अर्वति क्षमेत—Wilson following Sāyaṇa renders, 'our valiant (descendents) may overcome (these) foes. Sāyaṇa takes it also to mean 'may the valiant (Rudra) forgive our sins committed'; Griffith translates, 'gracious to our fleet courses be the Hero' According to Ludwig 'let our brave son be mighty with the charger'. क्षमेत—√*kṣam* to endure, mid. opt. 3rd. sing. जायेमहि—√*jā* to be born. mid. 1rst, plu. opt.

त्वाऽदत्तेभिः। रुद्र। शम्ऽतमेभिः। शतम्। हिमाः। अशीय।
भेषजेभिः॥ वि। अस्मत्। द्वेषः। विऽतरम्। वि। अंहः। वि।
अमीवाः। चातयस्व। विषूचीः॥२॥

सा० भा०—हे रुद्र त्वादत्तेभिः त्वया दत्तैः शंतमेभिः अतिशयेन सुखकरैः भेषजेभिः भेषजैरौषधैः शतं हिमाः शतं हेमन्तान् शतसंवत्सरान् अशीय व्याप्नुयाम्। अश्नोतेर्लिङि छान्दसो विकरणस्य लुक्। अपि च अस्मत् अस्मत्तः द्वेषः द्वेष्टॄन् वि चातयस्व विनाशय। तथा अंहः पापं वितरम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्यन्तं विचातयस्व। अमीवाः रोगान् विषूचीः विषु नाना अञ्चतीः कृत्स्न-शरीरव्यापकान् रोगान् विचातयस्व अस्मत्तः पृथक्कृत्य विनाशय ॥

शब्दा०—त्वादत्तेभिः=तुम्हारे द्वारा प्रदत्त, रुद्र=ओ रुद्र देवता, शंतमेभिः=कल्याणकारी, शतम्=सौ, हिमाः=शरद् ऋतु, अशीय=प्राप्त करें, भेषजेभिः=औषधियों से, अस्मत्=हमसे, द्वेषः=शत्रुओं को, वितरम्=अत्यन्त, अंहः=पाप को, अमीवाः=रोगों को, वि चातयस्व=नष्ट करो, विषूचीः=सम्पूर्ण शरीर में व्याप्त रहनेवाले।

हि० अ०—तुम्हारे द्वारा प्रदत्त कल्याणकारी औषधियों से, ओ रुद्र, हम सौ शरत् ऋतु (वर्ष की आयु) प्राप्त करें। शत्रुओं को हमसे दूर कर अत्यन्त नष्ट करो; पापों को पूर्णतया नष्ट करो; सम्पूर्ण शरीर में व्याप्त रोगों को नष्ट करो।

Trans.—Given by thee, O Rudra, with the most auspicious medicines may I attain the hundred winters (i.e. years). Remove far away from us the enemies; completely remove sin (committed); remove all-pervading diseases.

Notes—त्वादत्तेभी—Tatpuruṣa compd. accented on the first member (तृतीया कर्मणि—Pāṇ, 1.2.48); the final syllable is lengthened. अशीय—√*aṁś* to attain, 'root'-aorist, mid. opt. 1rst. sing. वितरम्—Wilson takes it as an adjective of अंहः. Here Wilson differs from Sāyaṇa who thinks वितरम् as an adverb which modifies the verb चातयस्व. According to Macdonell it is the comparative form of वि, which means 'farther'. चातयस्व—√*cat* to destroy, mid. caus. 2nd. sing. विषूचीः—From विष्वक्+√*añc* to go in various directions. व becomes उ by Samprasāraṇa. When अञ्च् of अञ्च् is dropped the preceding syllable is lengthened. व्य॒स्मत्—See Appendix—B under सन्धिज and कम्प स्व०.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रेष्ठः । जातस्य । रुद्र । श्रिया । असि । तवःऽतमः । तवसाम् । वज्रबाहो इति वज्रऽबाहो ॥ पर्षि । नः । पारम् । अंहसः । स्वस्ति । विश्वाः । अभिऽइतीः । रपसः । युयोधि ॥३॥

सा० भा०—हे रुद्र जातस्य उत्पन्नस्य सर्वस्य जगतो मध्ये श्रिया ऐश्वर्येण श्रेष्ठः प्रशस्यतमः असि भवसि । तथा हे वज्रबाहो आयुधहस्त रुद्र तवसां प्रवृद्धानां मध्ये तवस्तमः अतिशयेन प्रवृद्धोऽसि । स त्वं नः अस्मान् अंहसः पापस्य पारं तीरं स्वस्ति क्षेमेण पर्षि पारय । तथा रपसः पापस्य विश्वाः सर्वाः अभीतीः अभिगमनानि युयोधि पृथक्कुरु । यौतेश्छान्दसः शपः श्लुः । 'वा छन्दसि' इति अपित्त्वस्य विकल्पनात् ङित्त्वाभावे 'अङितश्च' इति हेर्धिः ॥

शब्दा०—श्रेष्ठः=सबसे अच्छा, जातस्य=उत्पन्न होनेवाले का, रुद्र=ओ रुद्र, श्रिया=यश से, असि=हो, तवस्तमः=सबसे शक्तिमान, तवसाम्=शक्तिशालियों में, वज्रबाहो=ओ वज्रधारण करनेवाले, पाष=पार करो, नः=हम लोगों को, पारम्=पार, अंहसः=पाप से, स्वस्ति=सुरक्षापूर्वक, विश्वाः=सम्पूर्ण, अभीतीः=प्रहारों से, रपसः=पाप के, युयोधि=अलग करो ।

हि० अ०—ओ रुद्र, यश में, उत्पन्न प्राणियों में तुम सर्वश्रेष्ठ हो; ओ वज्र धारण करनेवाले, शक्तिशालियों में तुम सबसे शक्तिमान हो । सुरक्षा पूर्वक पाप के समुद्र से हमे पार करो; पाप के सम्पूर्ण प्रहारों से दूर करो ।

Trans.—The best of beings (thou) art, O Rudra, in glory ; (thou art) the mightiest of the mighties, O wielder of the bolt. Pass us in safety over the (ocean of) sin ; keep us apart from all the attacks of mischief.

Notes—वज्रबाहो—The final ओ of the vocative is treated as Pragṛhya in the Pada-text; hence, इति follows. वज्रबाहो is repeated after इति in the Pada-text only to separate the two members by avagraha. पर्षि—√*pṛ* to pass, pres., 2nd. sing. युयोधि—√*yu* to separate, pres. impv. 2nd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मा । त्वा । रुद्र । चुक्रुधाम । नमःऽभिः । मा । दुःऽस्तुती । वृषभ । मा । सऽहूती ॥ उत् । नः । वीरान् । अर्पय । भेषजेभिः । भिषक्ऽतमम् । त्वा । भिषजाम् । शृणोमि ॥४॥

सा० भा०—हे रुद्र त्वा त्वां नमोभिः अयथाक्रियमाणैर्नमस्कारैर्हविर्भिर्वा मा चुक्रुधाम मा क्रोधयाम क्रुद्धं मा कार्ष्म । 'क्रुध कोपे' । अस्माण्ण्यन्तात् लुङि चङि रूपम् । हे वृषभ कामानां वर्षितः दुष्टुती दुःस्तुत्या अशोभनया स्तुत्या मा चुक्रुधामेत्येव । तथा सहूती सहूत्या विसदृशैरन्यैर्देवैः सहाह्वानेन मा क्रोधयाम । श्रेष्ठो हि स्वस्मान्न्यूनेन सहाह्वाने क्रुद्धो भवति । स त्वं नः अस्माकं वीरान् पुत्रान् भेषजेभिः त्वदीयैर्भेषजैरौषधैः उत् अर्पय उत्कृष्टं संयोजय । हे रुद्र त्वा त्वां भिषजां चिकित्साभिज्ञानां मध्ये भिषक्तमम् अतिशयेन भैषज्यस्य कर्तारं शृणोमि । 'प्रथमो दैव्यो भिषक्' (तै० सं० ४.५.१.२; वा० सं० १६.५) इति च मन्त्रान्तरेऽप्युक्तम् ॥४॥

शब्दा०—मा=मत, त्वा=तुमको, चुक्रुधाम=क्रोधित करें, उत्तेजित करें, नमोभिः=(अधूरी) स्तुतियों द्वारा, मा=मत, दुष्टुती=अयोग्य स्तुतियों द्वारा, वृषभ=ओ शक्तिशाली, मा=मत, सहूती=अन्य महत्वहीन देवताओं की एक साथ स्तुति द्वारा, नः=हमारे, वीरान्=पुत्र पौत्रादिकों को, उदर्पय =उत्कृष्ट करो, भेषजेभिः=औषधियों से, भिषक्तमम्=सर्वश्रेष्ठ वैद्य, त्वा =तुमको, भिषजाम्=वैद्यों में, शृणोमि=सुनता हूँ ।

हि० अ०—ओ रुद्र, (अपूर्ण) प्रार्थनाओं से (हम) तुमको उत्तेजित न करें; ओ शक्तिशाली, अयोग्य स्तुतियों द्वारा न (क्रोधित करें); (अन्य महत्व-हीन देवताओं की) सहस्तुतियों द्वारा न (क्रोधित करें) । हमारे वीरों (पुत्र पौत्रादिकों) को अपनी औषधियों से उत्कृष्ट करो; (क्योंकि) तुमको वैद्यों में सबसे बड़ा वैद्य सुनता हूँ ।

Trans.—O Rudra, let us not provoke (thee with (inadequate) salutations; not with unworthy praise; not with joint invocations (of other inferior deities), O mighty. Strengthen our heroes (offsprings) with (thy) medicines, (for) I hear of thee (as) the best physician of physicians.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—चुक्रुधाम —√*krudh* to be angry, 'red.'-aorist, subju. 1rst. plu. Being subju. in form, in the context with the prohibitive particle मा, it is injunctive. दुष्टुती—Instr, sing. of दुष्टुति; stems ending in इ very often lengthen the final vowel in the 1rst. sing. सहूती—Instr. sing. of सहूति. उदपर्य—उद्+√*ṛ* to strengthen, caus. impv. 2nd. sing. शृणोमि —√*śru* to hear, pres. 1rst. sing.

हवीमऽभिः । हवते । यः । हविःऽभिः । अव । स्तोमेभिः । रुद्रम् । दिषीय ॥ ऋदूदरः । सुऽहवः । मा । नः । अस्यै । बभ्रुः । सुऽशिप्रः । रीरधत् । मनायै ॥५॥

सा० भा० - यः रुद्रः हविर्भिः चरुपुरोडाशादिभिः सहितैः हवीमभिः आह्वानैः स्तुतिलक्षणैः हवते आहूयते स्तूयते व्यत्ययेन कर्मणि कर्तृप्रत्ययः । 'बहुलं छन्दसि' इति ह्वयतेः संप्रसारणम् । तं रुद्रं स्तोमेभिः स्तोत्रैः अव दिषीय अवखण्डयामि पृथक्करोमि । अपगतक्रोधं करोमीति यावत् । 'दो अवखण्डने' व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इतीत्वम् । ऋदूदरः । 'ऋदूदरो मृदूदरः' (निरु० ६. ४) इति यास्कः । सुहवः शोभनाह्वानः बभ्रुः भर्ता सर्वस्य बभ्रुवर्णो वा । सुशिप्रः । शिप्रे हनू नासिके वा । शोभनशिप्रः । एवंगुणविशिष्टः स रुद्रः अस्यै मनायै । हन्मीति मन्यमाना बुद्धिर्मना । तस्यै नः अस्मान् मा रीरधत् । मा वशं नैषीत् । 'रध हिंसासंराद्धयोः' । अस्माण्ण्यन्तात् लुङि चङि रूपम् । 'रध्यतिर्वशगमने' इति यास्कः ।

शब्दा०—हवीमभिः=आह्वानों द्वारा, हवते=पूजा जाता है, बुलाया जाता है, यः=जो, हविर्भिः=हविद्रव्यों द्वारा, स्तोमेभिः=स्तोत्रों द्वारा, रुद्रम्=रुद्र को, अव दिषीय=शान्त करूँ, ऋदूदरः=उदार, सरल हृदय-वाला, सुहवः=आसानी से प्रार्थनाओं को सुननेवाला, मा=मत, नः=हम लोगों को, अस्यै=उस, बभ्रुः=भूरे रंगवाला, सुशिप्रः=सुन्दर ओष्ठवाला, रीरधत्=शिकार बनावे, मनायै=क्रोध का ।

हि० अ० —(उस) रुद्र को स्तुतियों से शान्त करूँ जो आह्वानों तथा यज्ञों द्वारा पूजा जाता है । उदार, आसानी से (प्रार्थनाओं को) सुननेवाला भूरे वर्णवाला, सुन्दर ओष्ठवाला (रुद्र) हमको (अपने विख्यात) क्रोध का शिकार न बनावे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—With songs of praise I may pacify Rudra who is worshipped with invocations and oblations. Let not the soft-bellied, easy to invoke, brown-coloured, fair-lipped (Rudra) subject us to that malevolent disposition.

Notes—हवीमभिः—Instr. plu. of the stem हवीमन् from √*hū* to call. हवते—√*hū* to call mid. pres. 3rd. sing.; not unaccented because followed by यः (यद्धितुपरं छन्दसि—Pāṇ VIII-1-56). दिषीय—√*dā* to divide, 1rst. sing. 's'-aorist, opt. ऋदूदरः—Bahuvrīhi compd. accnted on the second member. Yāska followed by Sāyaṇa renders it by ऋदु उदर or मृदु उदर soft-bellied. Griffith takes it mean 'gracious' and Macdonell as 'compassionate. सुहवः—Bahuvrīhi compd. accented on the second member; 'swift hearing' (Griffith), 'easy to invoke' (Macdonell) 'reverently invoked' (Wilson). रीरधत्—√*randh* to make subject, red.-aorist, injun. 3rd. sing.

उत् । मा । ममन्द । वृषभः । मरुत्वान् । त्वक्षीयसा । वयसा । नाधमानम् ॥ घृणिऽइव । छायाम् । अरपाः । अशीय । आ । विवासेयम् । रुद्रस्य । सुम्नम् ॥६॥

सा० भा०—वृषभः कामानां वर्षिता मरुत्वान् मरुद्भिः पुत्रैर्युक्तो रुद्रः नाधमानं याचमानं मा मां त्वक्षीयसा दीप्तेन वयसा अन्नेन उत् ममन्द उत्कर्षेण तर्पयतु । अपि चाहं घृणीव छायां यथा सूर्यकिरणसंतप्तः छायां प्रविशति एवं रुद्रस्य सुम्नं सुखम् अरपाः अपापः सन् अशीय व्याप्नुयाम् । तदर्थं तं रुद्रम् आ विवासेयं परिचरेयम् । विवासतिः परिचरणकर्मा ॥

शब्दा०—मा=मुझको, उत् ममन्द=आनन्दित करे, वृषभः=शक्तिशाली रुद्र, मरुत्वान्=मरुतों के साथ, त्वक्षीयसा=तेजस्वी, वयसा=शक्ति से, नाधमानम्=प्रार्थना करनेवाले को, घृणीव=सूर्य किरणों से संतप्त

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्यक्ति की तरह, छायाम्=छाया की, अरपाः=पापरहित होकर, अशीय=प्राप्त करूँ, आ विवासेयम्=सेवा करूँ, रुद्रस्य=रुद्र के, सुम्नम्=सुख को।

हि० अ०—शक्तिशाली (रुद्र) मरुतों के साथ मुझ स्तुति करनेवाले को अपनी तेजस्वी शक्ति से आनन्दित करे। मैं (रुद्र की) सेवा करूँ (ताकि) पापरहित होकर रुद्र के सुख को उसी प्रकार प्राप्त करूँ जिस प्रकार सूर्य-किरणों से संतप्त (व्यक्ति) छाया में (सुख पाता है)।

Trans.—May the mighty one, accompanied with Maruts, gladden me, his worshipper, with shining vitality. I, free from sin, propitiate (so that) I may attain the bliss of Rudra as a (man) distressed by heat attains (relief) in shades.

Notes ममन्द—√*mand* to exhilerate, perf. 3rd. sing. नाधमानम्—√*nādh* to seek aid, pres. part. acc. sing. अरपाः—Bahuvrīhi compd. accented on the second member because the first member is अ (नञ्सुभ्याम्—Pāṇ. VI. 2. 172). अशीय—√*aṁś* to attain, mid. root-aorist, opt. 1rst. sing. विवासेयम्—√*van* to win. opt. desid. 1rst. sing.

क्व। स्यः। ते। रुद्र। मृळयाकुः। हस्तः। यः। अस्ति। भेषजः। जलाषः॥ अपऽभर्ता। रपसः। दैव्यस्य। अभि। नु। मा। वृषभ। चक्षमीथाः॥७॥

सा० भा०—हे रुद्र ते तव मृळयाकुः सुखयिता स्यः सः हस्तः क्व कुत्र वर्तते। यः हस्तः भेषजः भैषज्यकृत् जलाषः सर्वेषां सुखकरः अस्ति भवति। स हस्तो विद्यते एव। तेन हस्तेन मां रक्षेति भावः। अपि च हे वृषभ कामानां वर्षितः दैव्यस्य देवकृतस्य रपसः पापस्य अपभर्ता अपहर्ता विनाशयिता भूत्वा कृतापराधं मा मां नु क्षिप्रम् अभि चक्षमीथाः अभिक्षमस्व। 'क्षमष् सहने'। लङि छान्दसः शपः श्लुः। 'बहुलं छन्दसि' इतीडागमः॥

शब्दा०—क्व=कहां स्यः=वह, ते=तुम्हारा, रुद्र=ओ रुद्र देवता, मृळयाकुः=सुखदायी, हस्तः=हाथ, यः=जो, अस्ति=है, भेषजः=स्वास्थ्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देनेवाला, जलाषः=शीतलता पहुँचानेवाला, अपभर्ता=दूर करनेवाले, रपसः=पाप को दैव्यस्य=देवताओं द्वारा भेजा हुआ, नु=अभी, मा=मेरे ऊपर, वृषभ=ओ शक्तिशाली, अभि चक्षमीथाः=दया करो।

हि० अ०—ओ रुद्र, वह तुम्हारा सुखदायी हाथ जो सबको स्वास्थ्य एवं शीतलता (आराम) पहुँचानेवाला है, कहाँ है? ओ शक्तिशाली, देवताओं द्वारा प्रेषित पाप को (भी) दूर करनेवाले (जो तुम हो) मेरे उपर दया करो।

Trans.—Where is that thy gracious hand, O Rudra, which is curing and cooling (i.e. giving comforts to all). (As thou art) the dispeller of sin coming from gods, quickly have compassion upon me, O mighty.

Notes—क ! स्य—Vide Appendix—B under कम्प स्व०.

चक्षमीथाः— √*kṣam* to endure, perf. opt. 2nd. sing.

प्र। बभ्रवे। वृषभाय। श्वितीचे। महः। महीम्। सुऽस्तुतिम्। ईरयामि॥ नमस्य। कल्मलीकिनम्। नमःऽभिः। गृणीमसि। त्वेषम्। रुद्रस्य। नाम॥८॥

सा० भा०—बभ्रवे विश्वस्य भर्त्रे बभ्रुवर्णाय वा वृषभाय कामानां वर्षित्रे तद्वत्प्रसह्यकारिणे वा श्वितीचे श्वैत्यमञ्चते। 'स्विता वर्णे'। औणादिक इन्प्रत्ययः श्वितिमञ्चतीत्यञ्चतेः 'ऋत्विक्' इत्यादिना क्विन्। चतुर्थ्येकवचने 'अचः' इत्यकार लोपे 'चौ' इति दीर्घत्वम्। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। एवंगुणविशिष्टाय रुद्राय महो महीं महतोऽपि महतीं सुष्टुतिं शोभनस्तुतिं प्र ईरयामि प्रकर्षेणोच्चारयामि। हे स्तोतः कल्मलीकिनम्। ज्वलतो नामधेयमेतत् (निरु० १. १७)। ज्वलन्तम्। कलयति अपगमयति मलमिति कल्मलीकं तेजः। तद्वन्तं रुद्रं नमोभिः नमस्कारैः हविर्भिर्वा नमस्य पूजय। वयं च रुद्रस्य महादेवस्य त्वेषं दीप्तं नाम गृणीमसि गृणीमः संकीर्तयामः। 'गॄशब्दे'। क्र्यादिकः। इदन्तो मसिः। 'प्वादीनां ह्रस्वः'॥

शब्दा०—बभ्रवे=भूरे वर्णवाले, वृषभाय=शक्तिशाली के लिये श्वितीचे=सफेद आकृतिवाले, महः=बड़े से (भी) महीम्=बड़ी, सर्वश्रेष्ठ, सुष्टुतिम्=सुन्दर स्तुति को, प्र ईरयामि=अर्पित करता हूँ, भेजता हूँ,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमस्य=नमस्कार करो, कल्मलीकिनम्=कलुष को नष्ट करने वाले, नमोभिः =स्तुतियों द्वारा, गृणीमसि=गान करते हैं, त्वेषम्=दीप्तिमान, रुद्रस्य= रुद्र देवता के, नाम=नाम का।

हिं० अ०—भूरे वर्णवाले, शक्तिशाली, सफेद आकृतिवाले (रुद्र) को मैं अपनी सर्वश्रेष्ठ सुन्दर स्तुति अर्पित करता हूँ। कलुष को नष्ट करनेवाले (रुद्र) को स्तुतियों द्वारा नमस्कार करो। हमलोग रुद्र के दीप्तिमान नाम का गान करते हैं।

Trans.—I utter forth the mightiest laudation to the mighty, brown-coloured, the white-complexioned (Rudra). Adore the brilliant (i.e. consumer of darkness) with salutations. We glorify the shining name of Rudra.

Notes—शिवतीचे—Dative, sing from the stem शिवत्यञ्च्. ईरयामि—√*ir* to set in motion, caus. pres. 1rst, sing. नमस्या—√*nam* to bend, impv. 2nd. sing. Final syllable is metrically lengthened. Macdonell takes it as subju. 1rst sing. नमस्या कल्मलीकिनं नमोभिः— Wilson following Sāyaṇa translates: 'adore the consumer (of sin) with prostrations: Macdonell renders: 'I will adore the radiant one with obeisances', According to Griffith 'we serve the brilliant God with adorations'. गृणीमसि—√*gṛ* to sing, pres. 1rst. plu.; accented because it begins the Pāda. त्वेषम् —'Illustrious' (Yāska, Sāyaṇa) 'terrible' (Macdonell),

स्थिरेभिः। अङ्गैः। पुरुऽरूपः। उग्रः। बभ्रुः। शुक्रेभिः। पिपिशे। हिरण्यैः॥ ईशानात्। अस्य। भुवनस्य। भूरेः। न। वै। ऊँ इति। योषत्। रुद्रात्। असुर्यम्॥९॥

सा० भा०—स्थिरेभिः स्थिरैः दृढैः अङ्गैः अवयवैर्युक्तः पुरुरूपः अष्टमूर्त्यात्मकैर्बहुभी रूपैरुपेतः उग्रः उद्गूर्णस्तेजस्वी बभ्रुः भर्ता बभ्रुवर्णो वा रुद्रः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुक्रेभिः दीप्तैः हिरण्यैः हिरण्मयैर्हितरमणीयैर्वालंकारैः पिपिशे दीप्यते। 'पिश अवयवे'। कर्मणि लिट्। ईशानात् ईश्वरात् अस्य भुवनस्य भूतजातस्य भूरेः भर्तुः रुद्रात् असुर्यम्। 'असु क्षेपणे'। असेरुरन्। असुरः क्षेप्ता। 'तत्र साधुः'। असुर्यं बलं न वा उ योषत् नैव पृथक् भवति। यौतेर्लेट्यडागमः। 'सिब्बहुलं लेटि' इति सिप्॥

शब्दा०=स्थिरेभिः=दृढ़, अङ्गः=अङ्गों से युक्त, पुरुरूपः=अनेक रूपवाले, उग्रः=भयानक, बभ्रुः=भूरे रंगवाले, शुक्रेभिः=चमकते हुए, पिपिशे=अलंकृत किया है, हिरण्यैः=स्वर्णाभूषणों से, ईशानात्=शासक से, अस्य=इस, भुवनस्य=लोक के, भूरेः=सबके मालिक, न=नही, वै=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, योषत्=अलग होती है, असुर्यम्=प्राणदातृ शक्ति।

हि० अ०--दृढ अङ्गों से युक्त, अनेक रूपवाले, भयानक, भूरे रंगवाले (रुद्र) ने चमकते हुये स्वर्णाभूषणों से अपने को अलंकृत किया है। इस लोक के शासक, सबके मालिक रुद्र से प्राणदातृ शक्ति कभी अलग नहीं होती।

Trans.—Furnished with firm limbs, having many forms, terrible, brown coloured (Rudra) has adorned himself with illustrious golden ornaments. The life-giving force never departs from Rudra, the supreme ruler and the lord of this world.

Notes—पुरुरूपः—Bahuvrīhi compd. accented on the second member, because the first member is dissyllabic adjective ending in 'उ' In the Ṛ.V. it invariably happens when the first member is बहु or पुरु. (MVGS. p. 455). पिपिशे—√*piś* to adorn, mid. perf. 3rd. sing. ईशानात्—Abl. sing. of pres. participial stem ईशान from √*īś* to be master. योषत्—√*yu* to separate, 's'-aorist, 3rd. sing.

अर्हन्। बिभर्षि। सायकानि। धन्व। अर्हन्। निष्कम्। यज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तम् । वि॒श्वऽरू॑पम् ॥ अर्ह॑न् । इ॒दम् । द॒यसे॒ । विश्व॑म् । अभ्व॑म् । न । वै । ओजी॑यः । रु॒द्र॒ । त्वत् । अ॒स्ति॒ ॥१०॥

सा० भा०—हे रुद्र त्वम् अर्हन् अर्हो योग्य एव सन् सायकानि शरान् धन्व धनुश्च बिभर्षि धारयसि। तथा अर्हन् एव यजतं यजनीयं पूजनीयं विश्वरूपं बहुविधरूपयुक्तं निष्कं हारं बिभर्षि। तथा अर्हन् एव इदं विश्वं सर्वम् अभ्वम्। महन्नामैतत्। अतिविस्तृतं जगत् दयसे रक्षसि। 'देङ् रक्षणे'। हे रुद्र त्वत् त्वत्तोऽन्यत् किंचित् ओजीयः ओजस्वितरं बलवत्तरं न वै अस्ति न खलु विद्यते। अतस्त्वमेव उक्तव्यापारेषु योज्य इत्यर्थः। ओजः शब्दात् मत्वर्थीयो विनिः। ततः आतिशायनिकः इष्टन्। 'विन्मतोर्लुक्'। 'टेः' इति टिलोपः॥

शब्दा०—अर्हन्=ओ योग्य, बिभर्षि=धारण करते हो, सायकानि=बाणों को, धन्व=धनुष को, अर्हन्=ओ योग्य, निष्कम्=हार, यजतम्=पूजनीय, विश्वरूपम्=विभिन्न रूपों की, अर्हन्=ओ योग्य, इदम्=इसको, दयसे=विभाजित करते हो, विश्वम्=सम्पूर्ण, अभ्वम्=विस्तृत सृष्टि का, न=नहीं, वै=पूर्ववर्ती शब्द पर जोर देने वाला एक निपात, ओजीयः=अधिक शक्तिशाली, रुद्र=ओ रुद्र देवता, त्वत्=तुमसे अलग, अस्ति=है।

हि० अ०—ओ योग्य (रुद्र), (तुम) बाण तथा धनुष धारण करते हो; ओ योग्य, (तुम) पूजनीय तथा विभिन्न रूप की माला (धारण करते हो)। ओ योग्य (तुम) सम्पूर्ण सृष्टि का विभाजन करते हो; तुमसे बढ़कर शक्तिशाली, ओ रुद्र, कोई नहीं है।

Trans.—O worthy, thou bearest arrows and bow; O worthy, thou (bearest) adorable and omniformed necklace. O worthy, thou dividest the whole extent; none is more powerful than thou, O Rudra.

Notes—अर्हन् –Vocative sing, accented on the first syllable. Accordig to Sāyaṇa it is participle. Macdonell takes it as adverb. बिभर्षि—√*bhṛ* to bear, pres. 2nd, sing. विश्वरूपम्—Bahuvrīhi compd. accented on the first member. दयसे—√*dā* to divide, pres. 2nd. sing. Sāyaṇa derives दयसे from देङ् to prc-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

tect. In the line स्थिरा चिदन्ना दयते विजम्भैः (IV.7.10) he derives दयते from √*dā* to divide. इदं दयसे विश्वमभ्वं— Wilson following Sāyaṇa translates: 'thou preservest all this vast universe'. Griffith renders: 'thou cuttest here each fiend to pieces'. According to Macdonell, 'thou wieldest all this force. ओजीयः— Comparative degree of ओजः.

स्तुहि । श्रुतम् । गर्तऽसदम् । युवानम् । मृगम् । न । भीमम् । उपऽहत्नुम् । उग्रम् ॥ मृळ । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नि । वपन्तु । सेनाः ॥११॥

सा० भा० —हे स्तोतः श्रुतं विश्रुतं प्रख्यातं रुद्रं स्तुहि । कीदृशम् गर्तसदं गर्तो रथः । तत्र सीदन्तं वानं नित्यतरुणं मृगं न भीमं मृगं सिंहमिव भयंकरम् । उपहत्नुम् उपहन्तारं शत्रूणाम् उग्रं उद्गूर्णं हे रुद्र त्वं स्तवानः अस्माभिः स्तूयमानः सन् जरित्रे स्तोत्रे मह्यं मृळ सुखय । ते त्वदीयाः सेनाः अस्मत् अन्यम् अस्मद्व्यतिरिक्तं पुरुषं नि वपन्तु निघ्नन्तु ।

शब्दा० स्तुहि=स्तुति करो, श्रुतम्=विख्यात, गर्तसदम्=रथ पर बैठे हुये, युवानम्=युवक को, मृगम्=जंगली पशु की, न=तरह, भीमम्=भयानक, उपहत्नुम्=शत्रु को मारनेवाले, उग्रम्=भयानक, मृळ=दया करो, जरित्रे=स्तुति करने वाले के लिये, रुद्र=हे रुद्र देवता, स्तवानः=स्तूयमान होकर, अन्यम्=दूसरे को, ते=तुम्हारे, अस्मत्=हमसे भिन्न को, नि वपन्तु =नष्ट करें, सेनाः=शस्त्र ।

हि० अ०—विख्यात, रथ पर बैठे हुये, युवक, जंगली पशु की तरह भयंकर, (शत्रु को) मारनेवाले, भयानक रुद्र की स्तुति करो । हे रुद्र, स्तूयमान होकर स्तुतिगायक के लिये दया करो । तुम्हारे शस्त्र हमसे अन्य (शत्रु) का विनाश करें ।

Trans.—Praise the well-known, sitting on the chariot, the young, the fierce like a wild beast, the slayer (of the enemies), the terrible (Rudra). O

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Rudra, being praised, be merciful to the singer. Let thy weapons smite down another than us.

Notes—स्तुहि—√*stu* to praise, impv. 2nd. sing. गर्तसदम्—Tatpuruṣa compd. accented on the second member. The first member is locative in sense and the second member is a verbal noun. मृळ—√*mṛd* to be gracious, pres. impv. 2nd. sing.; accented because it begins the Pāda. स्तवानः—√*stu* to praise pres. part. pass. in sense. वपन्तु—√*vap* to strew, impv. 3rd. plu.

कुमारः । चित् । पितरम् । वन्दमानम् । प्रति । ननाम । रुद्र । उपऽयन्तम् ॥ भूरेः । दातारम् । सत्ऽपतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥१२॥

सा० भा०—वन्दमानम् आयुष्मान्भव सौम्य इति स्तुवन्तं पितरं कुमारश्चित् यथा कुमारः । चिदित्येतदुपमार्थे । हे रुद्र उपयन्तम् अस्मत्समीपे गच्छन्तं त्वां प्रति ननाम प्रतिनतोऽस्मि । अपि च भूरेः बहुनो धनस्य दातारं सत्पतिं सतां पालयितारम् । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् । हे रुद्र एवंभूतं त्वां गृणीषे स्तौमि । मिपः 'तिङां तिङो भवन्ति' इति सेआदेशः । स्तुतः च त्वम् अस्मे अस्मभ्यं भेषजा भेषजानि रासि देहि ।

शब्दा०—कुमारः=पुत्र, चित्= उपमा अर्थ का वाची एक निपात, पितरम्=पिता को, वन्दमानम्=आशीर्वचनम् बोलने वाले, प्रति=की ओर, ननाम=प्रणाम करता हूँ, रुद्र=ओ रुद्र देवता, उपयन्तम्=अपने पास आनेवाले तुमको, भूरेः=प्रचुर, दातारम्=देनेवाले, सत्पतिम्=सत्यस्वामी की, गृणीषे=गाता हूँ, स्तुतः=स्तूयमान होकर, त्वम्=तुम, भेषजा=औषधियाँ रासि=प्रदान करते हो । अस्मे=हम लोगों के लिये ।

हि० अ०—जिस प्रकार एक पुत्र आशीर्वचन बोलनेवाले पिता को (प्रणाम करता है) उसी प्रकार, ओ रुद्र, मैं अपने पास आनेवाले, तुमको प्रणाम करता हूँ । मैं, प्रचुरता में देनेवाले सत्यस्वामी (तुम्हारी) स्तुति गाता हूँ । (उन गुणों से युक्त) तुम, स्तूयमान होकर हमको औषधियां प्रदान करते हो ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—As a son before (his) sire, bestowing a blessing, O Rudra we bow to thee, coming (towards us). I glorify (thee) the profound bestower and true lord; thou (as such) being praised do grant us medicines.

Notes.—नानाम—√*nam* to bend, perf. 1rst sing. First syllable is metrically lengthened. Macdonell takes it as perf. 3rd sing. He translates कुमारश्चित्—उपयन्तम् as: 'A son bows towards his father who approving approaches him, O Rudra'. सत्पतिम्—Tatpuruṣa compd. accented on the first member (पत्यावैश्वर्ये—Pāṇ—VI.2.18). गृणीषे—√*gṛ* to sing. mid. pres. 1rst. sing. स्तुतः—√*stu* to praise, past part. रासि—√*rā* to give, pres. 2nd. sing.; Sāyaṇa and Griffith translate it in imperative sense, while Macdonell in pres. indicative sense. अस्मे—For अस्मभ्यम्; final ए is Pragṛhya; hence, इति in the Pada-text.

या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽभु ॥ यानि । मनुः । अवृणीत । पिता । नः । ता । शम् । च । योः । च । रुद्रस्य । वश्मि ॥१३॥

सा० भा०—हे मरुतः रुद्रपुत्राः वः युष्माकं या यानि भेषजा भेषजान्यस्मदारोग्यहेतुभूतान्यौषधानि शुचीनि शुद्धानि निर्मलानि सन्ति। हे वृषणः कामानां वर्षितारो मरुतः या यानि च युष्मदीयानि भेषजानि शंतमा अतिशयेन सुखकराणि। या यानि च भेषजानि मयोभु मयोभूनि मयसः सुखस्य भावयितृणि नः अस्मत्पिता मनुः यानि भेषजानि युष्मदीयानि अवृणीत वृतवान् ता तानि भेषजानि रुद्रस्य महादेवस्य संबन्धि शं च योश्च यच्छमनीयानां रोगाणामुपशमनं यावनीयानां भयानां यद्यावनमस्मत्तः पृथक्करणं तदुभयं च वश्मि कामये॥ 'वश कान्तौ'। आदादिकः।

शब्दा०—या=जो, वः=तुम्हारी, भेषजा=औषधियाँ, मरुतः=ओ मरुत्गण, शुचीनि=पवित्र, या=जो, शंतमा=अत्यधिक कल्याणकारी,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृषणः=ओ शक्तिशालियों, या=जो, मयोभु=हितकारी, यानि=जिनको, मनुः=मनु ने, अवृणीत=चुना था, पिता=पिता, नः=हम लोगों के, ता=उन औषधियों की, शम्=आनन्द, च=और, योः=कल्याण, च=और, रुद्रस्य=रुद्र की, वशिम=इच्छा करता हूँ।

हि० अ०—ओ मरुद्गण, तुम्हारी औषधियां जो पवित्र हैं, जो अत्यधिक सुख देनेवाली हैं, ओ शक्तिशाली, जो हितकारी हैं, जिनको हमारे पूर्वज मनु ने चुना था; उन (औषधियों) की तथा रुद्र की (औषधियों) की जो आनन्द तथा कल्याण प्रदान करने वाली है, इच्छा करता हूँ।

Trans.—O Maruts, your medicines that are pure, that are the most pleasant, O powerful, that are beneficent, that our forefather Manu chose; these and those of Rudra that are pleasure-giving (by cure) and blessing (by defending from danger), I crave.

Notes.—**शंतमा**—The superlative degree of शम् (pleasant). **अवृणीता**—√*vṛ* to choose, mid. impf. 3rd. sing. Final syllable is lengthened. **वशिम**—√*vaś* to desire, pres. 1rst. sing.

परि । नः । हेतिः । रुद्रस्य । वृज्याः । परि । त्वेषस्य । दुःऽमतिः । मही । गात् ॥ अव । स्थिरा । मघवत्ऽभ्यः । तनुष्व । मीढ्वः । तोकाय । तनयाय । मृळ ॥१४॥

सा० भा०—रुद्रस्य महादेवस्य हेतिः आयुधं नः अस्मान् परि वृज्याः परिवर्जयतु। तथा त्वेषस्य दीप्तस्य रुद्रस्य मही महती दुर्मतिः दुःखकारिणी बुद्धिश्च परि गात् अस्मान् वर्जयित्वा अन्यत्र गच्छतु। 'अपपरी वर्जने' (पा० सू० १. ४. ८८)। हे मीढ्वः सेचनसमर्थ रुद्र स्थिरा स्थिराणि त्वदीयानि धनूंषि मघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः अव तनुष्व अवततज्यानि कुरु। तथा तोकाय अस्मत्पुत्राय तनयाय तत्पुत्राय च मृळ सुखं कुरु॥

शब्दा०—नः=हम लोगों को, हेतिः=शस्त्र, रुद्रस्य=रुद्र का, परि वृज्याः=दूर रखे, त्वेषस्य=तेजस्वी रुद्र का, दुर्मतिः=कोध, मही=भया-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नक, परि गात्=दूर जावे, स्थिरा=दृढ़, मघवद्भ्यः=उदार दाताओं के लिये, अव तनुष्व=ढीला करो, मीढ्वः=ओ दयालु, तोकाय=पुत्रों पर, तनयाय,=पौत्रों पर, मृळ=दया करो।

हि० अ० - रुद्र का शस्त्र हमको अलग रखे; तेजस्वी (रुद्र) का भयानक क्रोध हमसे दूर रहे। (हमारे) उदारदाताओं के लिये (अपने) दृढ़ शस्त्र को ढीला करो; ओ दयालु (रुद्र), (हमारे) पुत्र पौत्रादिकों पर दया करो।

Trans.—May the missile of Rudra avoid us. May the great ill-disposition (i.e. wrath) of the terrible one avoid us; loosen (thy) firm (bow) for our liberal patrons; O bounteous, be gracious to our sons and grandsons.

Notes.—वृज्याः—√*vṛj* to twist, root-aorist, prec. 3rd. sing. गात्—√*gā* to go, root-aorist injun. 3rd. sing. तनुष्व—√*tan* to stretch mid. impv. 2nd. sing. मीढ्वः—Voc. from unreduplicated perf. part. मीढ्वांस्. It begins the Pāda; hence, accented. मृळ—√*mṛḍ* to be gracious, impv. 2nd. sing.

एव। बभ्रो इति। वृषभ। चेकितान। यथा। देव। न। हृणीषे। न। हंसि॥ हवनऽश्रुत्। नः। रुद्र। इह। बोधि। बृहत्। वदेम। विदथे। सुऽवीराः॥१५॥

सा० भा०—हे बभ्रो जगतो भर्तर्बभ्रुवर्ण वा वृषभ कामानां वर्षितः चेकितान सर्वं जानन् हे देव द्योतमान् रुद्र यथा येन प्रकारेण न हृणीषे न क्रुध्यसि न च हंसि। 'हृणीङ् लज्जायाम्'। अयं क्रुध्यतिकर्मा च। एवं हवनश्रुत् अस्मदीयमाह्वानं शृण्वन् नः अस्मान् हे रुद्र इह अस्मिन् देशे बोधि बुध्यस्व। विदथे यज्ञे गृहे वा सुवीराः शोभनपुत्राः सन्तः बृहत् प्रौढं त्वदीयं स्तोत्रं वदेम उच्चारयाम॥

शब्दा०—एव=इस प्रकार, बभ्रो=ओ भूरे रंगवाले, वृषभ=ओ शक्तिशाली, चेकितान=ओ सर्वज्ञ, यथा=जिस प्रकार, देव=ओ देव, न =नहीं, हृणीषे=क्रोध करो, न=नहीं, हंसि=मार सको, हवनश्रुत्=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तुतियों को सुननेवाले, नः=हमारी, रुद्र=ओ रुद्र देवता, इह=यहाँ, बोधि =होवो, बृहत्=जोर से, वदेम=बोलें, विदथे=यज्ञ मण्डप में, सुवीराः= पुत्र पौत्रादिकों से युक्त ।

हि० अ०—ओ भूरे रंगवाले ओ शक्तिशाली, ओ सर्वज्ञ, ओ देव, (ऐसे तुम) हमारी स्तुतियों को सुननेवाले होवो, जिससे ओ रुद्र, तुम (मुझपर) क्रोध न कर सको, मार न सको। वीर (पुत्र पौत्रादिकों) से युक्त हम यज्ञमण्डप में जोरों से (तुम्हारा) गान करें ।

Trans.—O tawny-coloured, O powerful, O omniscient, O god, (thou as such) be listening our invocations here, O Rudra, so that thou may not be angry, nor slay us. May we accompanied with heroes speak aloud in the assembly.

Notes.—बभ्रो—Final ओ of the vocative is Pragṛhya ; hence, इति in the Pada-text. चेकितान—Voc. of inte. pres. part. चेकितत् from √*cit* to know. हवनश्रुत्—Tatpuruṣa comp. the final member of which is a verbal noun. बोधि—√*bhū* to be, root-aorist impv. 2nd. sing. वदेम—√*vad* to speak, pres. opt. 1rst plu.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'उपेम्' इति षड्पदशर्चं तृतीयं सूक्तं गार्त्समदं त्रैष्टुभम् अपांनपाद्-देवताकम्। तथा चानुक्रान्तम्—'उपेमपोनप्त्रीयम्' इति। सूक्तविनियोगो लैङ्गिकः ॥

उप॑। ई॒म्। अ॒सृ॒क्षि॒। वा॒ज॒ऽयुः। व॒च॒स्याम्। चनः॑। द॒धी॒त॒। ना॒द्यः। गिरः॑। मे॒ ॥ अ॒पाम्। नपा॑त्। आ॒शु॒ऽहेमा॑। कु॒वित्। सः। सु॒ऽपेश॑सः। क॒र॒ति॒। जोषि॑षत्। हि ॥१॥

सा० भा०—वाजयुः वाजमन्नमात्मन इच्छन्नहम् ईम् एनां वचस्यां वचसः स्तोत्रस्येच्छाम् उप असृक्षि उपासृजामि उत्पादयामि। अपां नपातं स्तोतुं प्रवृत्तोऽस्मीत्यर्थः। सृजेश्छान्दसो लुङ्। 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वाद्गुणाभावः। सः च नाद्यः नदीनां शब्दकारिणीनां मेघस्थानामपां संबन्धी आशुहेमा आशु शीघ्रं गन्ता। 'हि गतौ' इत्यस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। एवंभूतः अपां नपात् अपां पौत्रस्थानीयः। अद्भ्यः ओषधिवनस्पतयो जायन्ते ओषधिवनस्पतिभ्यः एषोऽग्निर्जायत इति तत्पौत्रत्वम्। एतत्संज्ञको देवः गिरः गृणातीति गीः स्तोता। तस्य मे मम कुवित् बहुनामैतत्। बहुलं चनः अन्नं दधीत दधातु विदधातु। प्रयच्छत्वित्यर्थः। अपि चास्मान् सुपेशसः शोभनरूपान् शोभनालंकारान् वा करति करोतु। करोतेर्व्यत्ययेन शप्। 'कः करत्करतिकृधिकृतेष्वनदितेः' (पा० सू० ८.३.५०) इति विसर्जनीयस्य सत्वम्। हि यस्मात अयं देवः जोषिषत् स्तोत्राणि सेवते तस्मादस्मानेवमनुगृह्णात्वित्यर्थः। 'जुषी प्रीति सेवनयोः'। लेट्यडागमः। विकरणः सिप्। इडागमश्च। 'हि च' इति निघातप्रतिषेधः ॥

शब्दा०—उप=समीप, ईम्=इसके, असृक्षि=मैंने भेजी है, वाजयुः=धन की इच्छावाला, वचस्याम्=वाणी को, चनः=प्रसन्नतापूर्वक, दधीत=स्वीकार करे, नाद्यः=नदी से उत्पन्न, गिरः=वाणी को, मे=मेरी, अपां नपात्=जल का पुत्र, आशुहेमा=शीघ्रगामी, कुवित्=शायद, सः=वह,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुपेशसः=सुन्दर रूप वाला, करति=करेगा, जोषिषत=आनन्द लेगा, हि=निश्चित रूप से ।

हि० अ० –धन की इच्छा से (मैंने अपनी) वाणी को (उसके पास) भेजी है। नदी का पुत्र मेरी वाणी को प्रसन्नतापूर्वक स्वीकार करे। शीघ्रगामी अपां नपात् शायद उनको अलंकृत करेगा क्योंकि (वही) उनका आनन्द लेगा।

Trans.—Desirous of booty I have uttered forth this hymn ; may the son of streams accept my songs with favour. He, the swift-moving son of waters, perchance will make (them) adorned, for verily he will enjoy (them).

Notes—असृक्षि—√*sṛj* to emit, mid. 's'-aorist, sing. वाजयुः—A desiderative suffix यु is added to वाज like कियु, मायु, अवस्यु etc. ; 'desiring food' (Wilson) 'eager for spoil' (Griffith). चनः—Accordig to Sāyaṇa चनः is the object of दधीत and means 'abundant food'. Griffith and Macdonell take it as an adverb and translate : 'With favour' (Griffith), 'gladly' (Macdonell). दधीत—√*dhā* to put, mid. opt. 3rd. sing. आशुहेमा—हेमा from √*hi* to go with the suffix मनिन्; Bahuvrīhi compd. accented on the second member (vide note on पुरुरूप—II. 33.9). कुवित्—A pronominal interrogative particle which is employed as an elliptical expression of doubt. सुपेशसः—Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pān. VI.2.172). करति—√*kṛ* to do, root-aorist subju. 3rd. sing.; unaccented because कुवित् which could accent the verb is not in the same Pāda. जोषिषत्—√*juṣ* to enjoy, 'iṣ'-aorist, subju. 3rd. sing ; accented because firstly, it begins a new sentence and secondly, it is followed by हि (यद्धितुपरं छन्दसि—Pāṇ. VIII.1.56)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इमम् । सु । अस्मै । हृदः । आ । सुऽतष्टम् । मन्त्रम् । वोचेम । कुवित् । अस्य । वेदत् ॥ अपाम् । नपात् । असुर्यस्य । मह्ना । विश्वानि । अर्यः । भुवना । जजान ॥२॥

सा० भा०—अस्मै अपांनपात्संज्ञकाय देवाय हृदः हृदयात् सुतष्टं सुष्ठु निर्मितम् इमं मन्त्रं सुष्ठु, आ आभिमुख्येन वोचेम ब्रवाम । अस्य अस्माभिरुक्तमिमं मन्त्रं कुवित वेदत् बहुलं जानातु । वेत्तेर्लेट्यडागमः । 'निपातैर्यद्यदिहन्त' इति निघातप्रतिषेधः । किं स्तोत्रमिति चेदुच्यते । अर्यः स्वामी अपांनपात्संज्ञको वैद्युतोग्निः असुर्यस्य । असुरः शत्रून् क्षेप्ता । तस्य स्वभूतस्य बलस्य मह्ना महिम्ना महत्त्वेन विश्वानि सर्वाणि भुवना भुवनानि वृष्ट्युदकानि वृष्ट्युत्पादनेन भूतजातानि वा जजान जनयामास ॥

शब्दा०—इमम्=इस, सु=अच्छी प्रकार से, अस्मै=उसके लिये, हृदः=हृदय से, सुतष्टम्=अच्छी प्रकार से निर्मित, मन्त्रम्=मन्त्र को, आ वोचेम=सम्मुख गावें, कुवित्=शायद, अस्य=इसका अभिप्राय, वेदत्=जाने, अपां नपात्=जल का पुत्र, असुर्यस्य=प्राणदातृ शक्ति की, मह्ना=महिमा से, विश्वानि=सम्पूर्ण, अर्यः=स्वामी, भुवना=लोकों को, जजान=उत्पन्न किया है ।

हि० अ०—हम अच्छी प्रकार से हृदय से उद्भूत इस मंत्र को उसके लिये गावें । शायद वह उसको समझे । (सबके) स्वामी जल के पुत्र ने (अपनी) प्राणदात्रृ शक्ति की महिमा से सम्पूर्ण प्राणियों को उत्पन्न किया है ।

Trans.—Let us speak forth for him this well-fashioned hymn from our heart. Perhaps he will know of it. The son of waters, the lord by greatness of (his) life-giving force, has created all beings.

Notes—सुतष्टम्—Governing compd. accented on the first member. अस्मै—Unaccented because it replaces a substantive. अस्य—unaccented like अस्मै. वोचेम—√*vac* to speak pres. opt. 1rst plu. वेदत्—√*vid* to know, pres. subju. 3rd. sing; accented because

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

preceded by कुवित्. असुर्यस्य–For accent see वीर्याणि (I.32.1). जजान – √*jan* to generate, perf. 3rd. sing.

सम् । अन्याः । यन्ति । उप । यन्ति । अन्याः । समानम् । ऊर्वम् । नद्यः । पृणन्ति ॥ तम् । ऊँ इति । शुचिम् । शुचयः । दीदिवांसम् । अपाम् । नपातम् । परि । तस्थुः । आपः ॥३॥

सा० भा०—अन्याः वर्ष्याः आपः सं यन्ति भूम्या संगच्छन्ते । अन्याः च पूर्वं तत्रावस्थिताः उप यन्ति उपगच्छन्ति । ताः सर्वा आपः समानं सह नद्यः नदीभूताः ऊर्ध्वं समुद्रमध्ये वर्तमानं वडवानलं पृणन्ति प्रीणयन्ति । 'प्रीण प्रीणने' । तौदादिकः तमु तमेव अपां नपातं शुचिं निर्मलं दीदिवांसं दीप्यमानम् । दीदेतिश्छान्दसो दीप्तिकर्मा । लिटः क्वसुः । 'वस्वेकाजाद्धसाम्' । इति नियमादिडभावः । 'छन्दसि वेति वक्तव्यम्' इति वचनात् द्विर्वचनाभावः । एवंभूतं शुचयः शुद्धाः आपः परि तस्थुः परिवत्य तिष्ठन्ति । एष हि वैद्युताग्निरूपेण मेघे वर्तमानः अस्मानजीजनदिति बुद्ध्या वडवानलरूपेण वर्तमानं तं पर्युपासते इत्यर्थः । यद्वा अन्या एकधनाख्या आपः संयन्ति चात्वालोत्करयोर्मध्ये वसतीवरीभिः संगच्छन्ते । अन्या वसतीवर्याख्या आपश्चोपयन्ति उपगच्छन्ति । ऐकमत्यं प्राप्ता भवन्ति । एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्यवृष्टिद्वारा नद्यो भूत्वा ऊर्वं पृणन्ति इत्यादि समानम् । एवं हि 'आपो वा अस्पर्धन्त वयं पूर्वं यज्ञं वक्ष्यामः (ऐ० ब्रा० २. २०) इत्यादिकं ब्राह्मणविनियोगश्चानुगृह्यते ॥

शब्दा० - अन्याः=कुछ, संयन्ति=एक साथ बहता है, उपयन्ति=जाता है, अन्याः=दूसरे, कुछ, समानम्=समान रूप से, ऊर्वम्=समुद्र को, नद्यः=नदियाँ, पृणन्ति=भरती हैं, तम्=उसको, उ=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, शुचिम्=पवित्र को, शुचयः=पवित्र, दीदिवांसम्=चमकनेवाले, अपां नपातम्=जल के पुत्र को परितस्थुः=चारों तरफ से घेरा हुआ है, आपः=जल ।

हि० अ०—कुछ (वर्षा का जल पृथ्वी पर ऊपर से) एक साथ बहता है; कुछ दूसरा (जो पृथ्वी पर पहले से एकत्रित है) एक ओर जाता है; (सभी जलों के मेल से बनी) नदियां समुद्र को समान रूप से भरती हैं । उस पवित्र, चमकनेवाले जल के पुत्र को पवित्र जल चारों तरफ से घेरे हुए है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Some (rain waters) flow together (on the earth); some others (already collected on the earth) flow to (the sea); (all combined together forming themselves as) streams fill the common reservoir (i.e. sea). Him, the pure and shining son of waters, the pure waters stand around.

Notes—समन्या यन्त्युप यन्त्यन्या are antithetical clauses. The first verb of the two antithetical clauses is accented when the antithesis is clearly indicated by the words अन्य अन्य, एक एक, च च or वा वा. पृणन्ति — √*pṛ* or √*pṛṅ* to fill. pres. 3rd. plu. दीदिवांसम्—Perf. part. acc. sing. of दीदिवांस् from √*dī* or *dīdī* to shine. तस्थुः — √*sthā* to stand, perf. 3rd. plu.

तम् । अस्मेराः । युवतयः । युवानम् । मर्मृज्यमानाः । परि । यन्ति । आपः ॥ सः । शुक्रेभिः । शिक्वऽभिः । रेवत् । अस्मे इति । दीदाय । अनिध्मः । घृतऽनिर्निक् । अप्ऽसु ॥४॥

सा० भा०—तम् अपां नपातमग्निम् अस्मेराः अस्मयमाना दर्परहिताः युवतयो युवानं युवराजमिव मर्मृज्यमानाः अत्यर्थमलंकुर्वाणाः आपः । 'मृजू शौचालंकारयोः' । परि यन्ति परितो गच्छन्ति प्राप्नुवन्ति । घृतनिर्निक् क्षरणशीलोदकनिर्नेजनः । यद्वा निर्निगिति रूपनाम । दीप्तरूपः सः अपां नपादग्निः अप्सु मेघान्तर्गतासु समुद्रगतासु वा मध्ये अनिध्मः इन्धनरहित एव सन् अस्मे अस्माकं रेवत् धनयुक्तमन्नं यथा भवति तथा शुक्रेभिः शुभ्रैः निर्मलैः शिक्वभिः तेजोभिः दीदाय दीप्यते ॥

शब्दा०—तम्=उस, अस्मेराः=न मुस्करानेवालीं, युवतयः=युवतियां, युवानम्=युवक को, मर्मृज्यमानाः=अलंकृत करती हुई, परि यन्ति=चारों तरफ से बहती हैं, आपः=नदियां, सः=वह, शुक्रेभिः=प्रकाशमान, शिक्वभिः=लपटों से, रेवत्=धनवान, अस्मे=हम लोगों के लिये, दीदाय =प्रकाशित होता है, अनिध्म=बिना इन्धन के ही, घृतनिर्णिक्=घृत से आवृत, अप्सु=जल में ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—न मुस्करानेवालीं (गम्भीर) युवतियां, नदियां उस युवक को अलंकृत करती हुईं (उसके) चारों तरफ विचरण करती हैं, वह प्रकाशमान लपटों द्वारा, हमारे लिये धनवान (होता हुआ), बिना इन्धन के ही, घृत से आवृत, नदियों (युवतियों) में हमारे लिये प्रकाशित होता है।

Trans.—The not-smiling (i.e. modest) young maidens, the waters, wiping (him) move around him, the youth. He with brilliant flames bountifully shines for us in waters, (though) unfed with fuel, enveloped in clarified butter.

Notes—अस्मेराः—'Modest' (Wilson) 'carefully' (Griffith) 'not-smiling' (Macdonell). It is an adj. of युवतयः which are waters and nothing else; नञ् compd. accented on the first member. मर्मृज्यमानाः—√*mṛj* to wipe, inte. part. रेवत्—'Abundance' (Wilson) 'splendid beauty' (Griffith) 'bountifully' (Macdonell). दीदाय—√*dī* to shine, perf. 3rd. sing.; accented because it begins the Pāda. अनिध्मः—Bahuvrīhi compd. accented on the second member. घृतनिर्निक्—'Cleansed with clarified butter' (Wilson), 'oil enveloped' (Griffith) 'having a garment of ghee' (Macdonell); Bahuvrīhi compd. accented on the first member.

अस्मै । तिस्रः । अव्यथ्याय । नारीः । देवाय । देवीः । दिधिषन्ति । अन्नम् ॥ कृताःऽइव । उप । हि । प्रऽसर्त्रे । अप्ऽसु । सः । पीयूषम् । धयति । पूर्वऽसूनाम् ॥५॥

सा० भा०—नारीः नेत्र्यः तिस्रः देवीः देव्यः इळासरस्वतीभारत्याख्याः अव्यथ्याय अव्यथनाय अस्मै देवाय अपां नपाते अन्नं सोमाख्यं दिधिषन्ति धारयन्ति। 'धिष शब्दे', जौहोत्यादिकः। व्यत्ययेनान्तादेशः। धातूनामनेकार्थत्वादत्र धारणार्थः। अप्सु उदकेषु कृता इव उप प्रसर्त्रे प्रसरन्ति। 'सृ गतौ'।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लिटि 'इरयो रे' रेआदेशः। छान्दसो हलादिशेषाभावः। यस्मादेवं तस्मात् पूर्वसूनां पूर्वं ब्रह्मणः सकाशादुत्पन्नानामपां पीयूषं सारभूतं सोमाख्यममृतं सः अपां नपादग्निः धयति पिबति। हि पूरणः॥

शब्दा० - तस्मै=उस, तिस्रः=तीन, अव्यथाय=कभी व्यथित न होनेवाले के लिये, नारीः=स्त्रियां, देवाय=देव के लिये, देवीः=देवियां, दिधिषन्ति=धारण करने की इच्छा करती है, अन्नम्=अन्न, कृता इव=नवजात की तरह, हि=निश्चित अर्थ का वाचक एक निपात, उप प्रसर्त्रे=ऊपर फैलता है, अप्सु=जलों में पीयूषम्=अमृत, धयति=पान करता है, पूर्वसूनाम्=प्रथम उत्पन्न करने वाली माताओं का।

हि० अ०—उस अव्यथितमान देव (अपां नपात्) के लिये तीन स्वर्गीय युवतियां भोजन देने की इच्छा करती हैं। चूँकि नवजात (बच्चे) की तरह जल में तैरता है (इसलिये) वह प्रथम उत्पन्न करनेवाली (माताओं) का दुग्धपान करता है।

Trans.—To him, the uninjurable god, the three divine ladies desire to give food. Since, like a newly born (child) floats on the waters, he sucks the nector (i.e. milk) of the mothers that first bring forth.

Notes—तिस्रो देवीः—Three goddesses Ilā, Sarasvati and Bhārati are meant. According to Griffith these three goddesses are the personifications of prayer and worship. According to Macdonell three goddesses are the waters in the three worlds. अव्यथ्याय—'Uninjurable' (Wilson), 'immovable' (Macdonell); Bahuvrīhi compd. accented on the second member. दधिषन्ति—√*dhā* to put. desid. 3rd. plu. कृता इव प्रसर्त्रे—Wilson following Sāyaṇa translates the line : 'as if formed in the waters they spread abroad'. Griffith renders : 'within the waters hath he pressed as hollows'. According to Macdonell, 'for he has stretched forth as it were to the breasts'. प्रसर्त्रे—√*sṛ* to flow, with prefix प्र, pres.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

inte, 3rd. sing. accented because preceded by हि. धयति—√*dhā* to suck, pres. 3rd. sing.

अश्वस्य । अत्र । जनिम । अस्य । च । स्वः । द्रुहः । रिषः । सम्ऽपृचः । पाहि । सूरीन् ॥ आमासु । पूर्षु । परः । अप्रऽमृष्यम् । न । अरातयः । वि । नशन् । न । अनृतानि ॥६॥

सा० भा०—अत्र अस्मिन्नपांनपात्संज्ञके देवे अश्वस्य जनिम जन्म भवति । अपांनप्त्रधिष्ठितात् समुद्रात् उच्चैःश्रवसो जातत्वात् । किं बहुना । अस्य च स्वः सुष्ठ्वरणीयस्य सर्वस्य जगतो जन्म अस्मिन्नेव भवति । अयं हि मेघमध्ये वर्तमानो वृष्टिद्वारेण सर्वं जगज्जनयति । तादृशोऽपांनपात्त्वं द्रुहः द्रोग्धुः अपहर्तुः रिषः हिंसकस्य च संपृचः संपर्कात् सूरीन् स्तोतॄनस्मान् पाहि रक्ष । आमासु अपरिपक्वासु पूर्षु पूरयितव्यास्वप्सु परः परस्तात् वर्तमानम् अप्रमृष्यम् अप्रधृष्यमाणं देवम् अरातयः अदातारः पुरुषाः न वि नशन् न प्राप्नुवन्ति । नशतिर्व्याप्तिकर्मा । लेट्यडागमः । अनृतानि मायाविनो रक्षांसि च न प्राप्नुवन्ति ॥

शब्दा० - अश्वस्य=अश्व का, अत्र=यहाँ, जनिम=जन्म, अस्य=उसका, च=और, स्वः=द्युलोक में, द्रुहः=द्वेष करनेवाले, रिषः=सतानेवाले, संपृचः=संपर्क से, पाहि=रक्षा करो, सूरीन्=उदार दाताओं को, आमासु=कच्चे, पूर्षु=दुर्ग में अर्थात् बादलों में, परः=बहुत दूर, अप्रमृष्यम्=कभी नष्ट न होनेवाले, कभी न हारनेवाले, न=नहीं, अरातयः=शत्रु, वि नशन्=प्राप्त करें, अनृतानि=मायावी, झूठ बोलनेवाले ।

हि० अ०—अश्व (अपां नपात्) का जन्म स्थान यही (पार्थिव जल) है; द्युलोक में भी उसका (जन्मस्थान है) । उदार दाताओं को द्वेष करनेवालों तथा सतानेवालों के संपर्क से रक्षा करो । बहुत दूर कच्चे दुर्ग (बादलों) में रहनेवाले कभी नष्ट न होनेवाले (देव) को शत्रु तथा मायावी न प्राप्त करें ।

Trans.—The birth of the horse (is) here (in the terrestrial water) ; his (is) also in heaven. Protect the bounteous givers from the company of haters

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

and oppressors. Let not the miser and deceitful ones attain him, the inconceivable (god) (dwelling) for away, in the raw (i.e. natural) fortress.

Notes.—संपृचः—Abl. infinitive from√*pṛc* to mix. पाहि—√*pā* to protect. impv. 2nd. sing. पूर्ष—Griffith and Macdonell take it as the locative plu. of पुर् which means 'fort.' परः—An adverb and means 'far away'. If the accent is on the first syllable it becomes nom. sing. adj. meaning 'other'. अप्रमृष्यम्—'inconceivable' (Wilson) 'indestructible' (Griffith) 'not to be forgotten' (Macdonell) Bahuvrīhi accented on the second member. नशन्—√*naś* to attain. pres. injun. 3rd. plu.

स्वे । आ । दमे । सुऽदुघा । यस्य । धेनुः । स्वधाम् । पीपाय । सुऽभु । अन्नम् । अत्ति ॥ सः । अपाम् । नपात् । ऊर्जयन् । अप्ऽसु । अन्तः । वसुऽदेयाय । विधते । वि । भाति ॥७॥

सा० भा०—यः अपां नपात् स्वे दमे स्वकीये गृहेऽन्तरिक्षलक्षणे आ सीदति । यस्य च धेनुः माध्यमिका वाक् सुदुघा सुखेन दोग्धव्या भवति । स देवः स्वधां वृष्ट्युदकं पीपाय वर्धयति । 'प्यायी वृद्धौ' । 'लिड्यङोश्च' इति पीभावः । सुभु सुष्ठु भूतं कृष्टेः सकाशादुत्पन्नं हविर्लक्षणम् अन्नं च अत्ति भक्षयति । सः अपांनपात्संज्ञको देवः ऊर्जयन् बलं कुर्वन् अप्स्वन्तः मेघस्थास्वप्सु मध्ये विधते परिचरते यजमानाय वसुदेयाय धनदानार्थं वि भाति विशेषेण दीप्यते ॥

शब्दा०—स्वे=अपने, दमे=घर में, सुदुघा=अच्छी प्रकार से दूध देनेवाली, यस्य=जिसकी, धेनुः=गाय, स्वधाम्=अमृत को, पीपाय=उड़ेलता है, सुभु=सुन्दर बने, अन्नम्=भोजन, अत्ति=खाता है, सः=वह, अपां नपात्=जल के पुत्र, ऊर्जयन्=शक्ति बढ़ाता हुआ, अप्सु=जलों में, अन्तः बीच में, वसुदेयाय=धन देने के लिये, विधते=पूजा करनेवाले को, विभाति=प्रकाशित होता है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—(वह) जिसके अपने घर में अच्छी प्रकार से दूध देने वाली गाय हो, अमृत को उड़ेलता है, सुन्दर बने (पदार्थ) का भोजन करता है। वह जल का पुत्र, जल के बीच अपनी शक्ति बढ़ाता हुआ पूजा करनेवाले को धन देने की इच्छा से विशेष रूप से प्रकाशित होता है।

Trans.—(He) in whose, own house is a cow, yielding good milk, swells the nector and eats well-prepared food. He (as such), the son of waters gathering vigour in the waters, shines forth with a view to conferring wealth upon the worshipper.

Notes.—पीपाय —√*pi* to swell, perf. 3rd. sing, with lengthened red. syllable. अप्स्व ¹ न्तर्—Vide Appendix —B under सन्धिज and कम्प स्व०. विधते–Dative sing. of pres. part विधत् from √*vidh* to worship.—भाति√ *bhā* to shine, pres. 3rd. sing.

यः । अ॒प्ऽसु । आ । शुचिना । दैव्येन । ऋ॒तऽवा॑ । अज॑स्रः । उ॒र्विया । वि॒ऽभाति॑ ॥ व॒याः । इत् । अ॒न्या । भुव॑नानि । अ॒स्य॒ । प्र । जा॒य॒न्ते॒ । वी॒रुधः॑ । च॒ । प्र॒ऽजाभिः॑ ॥८॥

सा० भा०—यः अपां नपात् ऋतावा। ऋतमित्युदकनाम। तद्वान् सत्यवान् वा अजस्रः नित्यः एकरूपेण सदा वर्तमानः उर्विया उरुविस्तीर्णः अप्सु मेघस्थासु मध्ये शुचिना शोचकेन दैव्येन देवसंबन्धिना तेजसा आ समन्तात् विभाति विशेषेण प्रकाशते। अस्य अपांनपातः अन्या अन्यानि भुवनानि सर्वाणि भूतजातानि वया इत् शाखा एव। वीरुधः ओषधयः प्रजाभिः स्वकीयाभिः पुष्पफलादिभिः सह अस्मादेव प्र जायन्ते। च पूरणः॥

शब्दा०—यः=जो, अप्सु=जलों में, शुचिना=प्रकाश से, दैव्येन=देवत्व से, ऋतावा=सत्यवान्, अजस्रः=कभी न थकनेवाला, अजर, उर्विया=विस्तृत रूप में, आ विभाति=चारों तरफ से प्रकाशित होता है, वयाः=शाखायें, इत्=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, अन्या=दूसरे, भुवनानि=लोक, अस्य=उसी से, प्र जायन्ते=उत्पन्न होती हैं, वीरुधः=वनस्पतियां, च=और, प्रजाभिः=पुष्प फलादि के साथ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० —सत्यवान् अजर (अपां नपात्) जो जल में तेज तथा देवत्व से विस्तृत रूप में चारो तरफ से प्रकाशित होता है, सम्पूर्ण प्राणी उस (जल के पुत्र) की शाखायें हैं; (सम्पूर्ण) वनस्पतियां फल फूल सहित उसी से उत्पन्न होती हैं।

Trans.—The truthful, the unaging one, who in the waters widely shines forth with lustre and divinity, all other beings (are) his offshoots ; (all) the vegetables with fruits and flowers are born (of him).

Notes.—ऋतावा—The short syllable अ preceding the suffix वा is lengthened in the Saṁhitā-text, while it is retained in the Pada-text. भाति—√*bhā* to shine, pres. 3rd. sing. ; accented because preceded by यः. जायन्ते—√*jā* to be born, mid. pres. 3rd. sing.

अपाम् । नपात् । आ । हि । अस्थात् । उपऽस्थम् । जिह्मानाम् । ऊर्ध्वः । विऽद्युतम् । वसानः ॥ तस्य । ज्येष्ठम् । महिमानम् । वहन्तीः । हिरण्यऽवर्णाः । परि । यन्ति । यह्वीः ॥९॥

सा० भा० – अपांनपात्संज्ञकोऽग्निः उपस्थम् अपामुपस्थानमन्तरिक्षम् आ ह्यस्थात् आस्थितवान् आरूढ़वान् खलु । किं कुर्वन् । जिह्मानां कुटिलगतीनामपां मध्ये ऊर्ध्वः स्वयमूर्ध्वं ज्वलन् विद्युतं विद्योतमानम् मेघं वसानः आच्छादयन् । अन्तरिक्षमास्थाय वर्षणं कृतवान् । तस्य वर्षितुरपांनपातः ज्येष्ठं प्रशस्यतमं महिमानं माहात्म्यं वहन्तीः वहन्त्यः सर्वत्र प्रापयन्त्यः यह्वीः यह्व्यः महत्यः हिरण्यवर्णाः । नदीनामैतत् । हिरण्यवन्निर्मलरूपा नद्यः परि यन्ति परितो गच्छन्ति । अपांनप्त्रा महती वृष्टिरस्माकं प्रवहनायोत्पादिता इति कृतज्ञतया तदीयं माहात्म्यं सर्वत्र प्रकटयन्त्य इव नद्यः प्रवहन्तीत्यर्थः ॥

शब्दा०—अपां नपात्=जल का पुत्र, हि=निश्चित रूप से, आ अस्थात्=स्थित है, उपस्थम्=गोद में, जिह्मानाम्=नीचे जानेवाले, ऊर्ध्वः =ऊपर, विद्युतम्=विजली से, वसानः=आवेष्ठित, तस्य=उसकी, ज्येष्ठम् =श्रेष्ठ, महिमानम्=महिमा को, वहन्तीः=ढोती हुई, हिरण्यवर्णाः= स्वर्ण रंग वाली, परि यन्ति=चारों तरफ से बहती हैं, यह्वीः=नदियां।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—जल का पुत्र निश्चित रूप से अधोगामी जल की गोद में, (स्वयं) उपर विद्युत् से आवेष्ठित स्थित है। उसकी श्रेष्ठ महिमा को ढोती हुई स्वर्ण वर्णवाली नदियां उसके चारो तरफ विचरण करती हैं।

Trans.—The son of waters has stationed in the lap of waters directed downwards, (himself) above, wearing lightning (as garment). Bearing his sublimest glory, the rivers of golden colour flow around him.

Notes.—अस्थात्—√*sthā* to stand, root-aorist, 3rd. sing. जिह्मानाम्—'Tortuously moving' (Wilson) 'curled' (Griffith) 'prone' (Macdonell). वसानः—√*vas* to wear pres. part. वहन्तीः—√*vah* to carry, pres. part. हिरण्यवर्णाः—Bahuvrīhi compd. accented on the first member. यन्ति—√*i* to go, pres. 3rd. sing. यह्वीः—'Great' (Sāyaṇa), 'swift' (Roth) 'young' (Geldner).

हिरण्यऽरूपः। सः। हिरण्यऽसंदृक्। अपाम्। नपात्। सः। इत्। ऊँ इति। हिरण्यऽवर्णः॥ हिरण्ययात्। परि। योनेः। निऽसद्य। हिरण्यऽदाः। ददति। अन्नम्। अस्मै ॥१०॥

सा० भा०—सः अपां नपात् हिरण्यरूपः। रूप्यते इति रूपं शरीरम्। सुवर्णमयशरीरो हितरमणीयशरीरो वा। तथा हिरण्यसंदृक्। सम्यक् पश्यन्तीति संदृश इन्द्रियाणि। सुवर्णमयेन्द्रियो हितरमणीयेन्द्रियो वा। सेदु स एवापांनपात् हिरण्यवर्णः हिरण्यसदृशकान्तियुक्तः। एवंभूतः सन् हिरण्ययात् सुवर्णमयात् योनेः स्थानात् परि उपरि निषद्य उपविश्य राजते इति शेषः। अस्मै ईदृग्विधाय अपां नपाते हिरण्यदाः दक्षिणारूपस्य सुवर्णस्य दातारो यजमानाः अन्नं हविर्लक्षणं ददति प्रयच्छन्ति।

शब्दा०—हिरण्यरूपः=स्वर्ण के समान रूपवाला, सः=वह, हिरण्यसंदृक्=स्वर्ण की तरह आकृतिवाला, अपां नपात्=जल का पुत्र, सः=वह, इदु=इत और उ दोनों पूर्ववर्ती शब्द पर जोर देने वाले निपात हैं, हिरण्यवर्णः=स्वर्ण रंगवाला, हिरण्ययात्=स्वर्णमय, परि=ऊपर, योनेः=स्थान पर

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

से, निषद्य=बैठकर, हिरण्यदाः=स्वर्ण दान करनेवाले यजमान, ददति=प्रदान करते हैं, अन्नम्=भोजन, अस्मै=उसके लिये।

हि० अ०—स्वर्ण के समान रूपवाला, स्वर्ण की तरह आकृतिवाला वह जल का पुत्र, स्वर्ण के समान रंगवाला (है)। स्वर्णमय स्थान पर बैठकर वहीं से चमकता है। स्वर्णदान करनेवाले यजमान उसको हवि प्रदान करते हैं।

Trans.—He (is) of golden form, of golden appearance; verily he, the son of waters, (is) of golden colour. Seated upon the golden seat (shines) therefrom; givers of gold give him food.

Notes.—हिरण्यरूपः, हिरण्यसंदृक्, हिरण्यवर्णः—All are the Bahuvrīhi compds. accented on the first member. सेदु—For enphonic combination see I.32.15. हिरण्यदाः—Tatpuruṣa compd. accented on the second member. ददति—√*dā* to give, pres. 3rd. plu.

तत्। अस्य। अनीकम्। उत। चारु। नाम। अपीच्यम्। वर्धते। नप्तुः। अपाम्॥ यम्। इन्धते। युवतयः। सम्। इत्था। हिरण्यऽवर्णम्। घृतम्। अन्नम्। अस्य॥११॥

सा० भा०—अस्य अपां नप्तुः देवस्य अनीकं रश्मिसमूहरूपं शरीरं चारु शोभनम्। उत अपि च अस्य नाम संज्ञा च चारु शोभनम्। न पातयति न विनाशयतीति नपादिति तद्व्युत्पत्तेः। तदुभयम् अपीच्यम्। अन्तर्हितनामैतत्। मेघान्तर्हितं सत् वर्धते। युवतयः संगमनस्वभावा आपः हिरण्यवर्णं हिरण्यसमानतेजसं यम् अपांनपातम् इत्था अमुत्रान्तरिक्षे सम् इन्धते सम्यक् दीपयन्ति। अस्य च देवस्य घृतं क्षरणशीलमुदकम् अन्नं भक्ष्यम्। अबिन्धनो ह्यसौ वैद्युतोऽग्निः॥

शब्दा०—तत्=वह, अस्य=उसकी, अनीकम्=किरणों की समूहरूपात्मक आकृति, उत=और, चारु=सुन्दर, नाम=नाम, अपीच्यम्=रहस्य में, वर्धते=बढ़ता है, नप्तुः अपाम्=जल के पुत्र का, यम्=जिसको, इन्धते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=प्रज्ज्वलित करती हैं, युवतयः=युवतियाँ, सम्=संयुक्त रूप से, इत्था =इस प्रकार, हिरण्यवर्णम्=स्वर्ण रंगवाले को, घृतम्=घी, अन्नम्= भोजन, अस्य=इसका।

हि० अ०—उस जल के पुत्र की वह आकृति और (वह) सुन्दर नाम रहस्य में बढ़ता है। जिस स्वर्ण वर्णवाले को युवतियाँ (जल) इस प्रकार संयुक्त रूप से प्रज्ज्वलित करती हैं, घी उसका भोजन है।

Trans.—That face of his and dear name of the son of waters flourish in secret. Whom, the golden coloured, the young maidens thus kindle collectively, clarified butter (is) his food.

Notes.—वर्धते—√*vṛdh* to grow, mid. pres. 3rd. sing. इन्धते—√*idh* to kindle, mid. pres. 3rd. plu. accented because preceded by यम्.

अस्मै । बहूनाम् । अवमाय । सख्ये । यज्ञैः । विधेम । नमसा । हविःऽभिः ॥ सम् । सानु । मार्ज्मि । दिधिषामि । बिल्मैः । दधामि । अन्नैः । परि । वन्दे । ऋक्ऽभिः ॥१२॥

सा० भा०—अस्मै पुरोवर्तिने बहूनाम् देवानाम् अवमाय आद्याय सख्ये अस्माभिः समानख्यानाय अपां नपाते यज्ञैः यागसाधनैः हविर्भिः चरुपुरोडाशादिभिः नमसा नमस्कारेण च विधेम परिचरेम। अस्यापांनपातः सानु समुच्छ्रितप्रदेशं सं मार्ज्मि सम्यक् शोधयामि अलंकरोमि वा। मृजू शौचालंकारयोः।' 'चादिलोपे विभाषा' इत्यस्य निघातप्रतिषेधः॥ दिधिषामि धारयामि च बिल्मैः भासनैः काष्ठैरेनम्। 'धिष शब्दे'। अयं धारणार्थोऽपि। जुहोत्यादित्वात् शपः श्लुः। मिपो व्यत्ययेनाडागमः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। दधामि धारयामि चैनं गार्हपत्यादिरूपेण स्थितम् अन्नैः हविर्लक्षणैः। तथा ऋग्भिः मन्त्रैः परि वन्दे परितः स्तौमि॥

शब्दा०—अस्मै=उस, बहूनाम्=सबसे अधिक, अवमाय=समीपवर्ती, सख्ये=मित्र के लिये, यज्ञैः=यज्ञों द्वारा, विधेम=पूजा करें, नमसा= नमस्कार द्वारा, हविर्भिः=हविद्रव्यों द्वारा, सानु=श्रेष्ठ स्थान, संमार्ज्मि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=अच्छी प्रकार से साफ करता हूँ, दिधिषामि=धारण करने की इच्छा करता हूँ, बिल्मैः=लकड़ी के टुकड़ों से, दधामि=धारण करता हूँ, अन्नैः=भोजन से, परिवन्दे=चारों तरफ से बन्दना करता हूँ ।

हि० अ० – उस सबसे अधिक समीपवर्ती, मित्र (अग्नि) की हम यज्ञों, नमस्कारों तथा हविद्रव्यों से पूजा करें । उसके श्रेष्ठ स्थान (वेदी) को (मैं) अच्छी प्रकार से साफ करता हूँ; (उस अग्नि को) लकड़ी के टुकड़ों से धारण करने की इच्छा करता हूँ; (उस अग्नि को) भोजन (घृतादि हवि पदार्थों) द्वारा प्रज्वलित रखता हूँ; ऋचाओं द्वारा (उस अग्नि की) चारों तरफ से बन्दना करता हूँ ।

Trans.—To him, the closest of many, the friend, may we worship with sacrifices, salutation, and oblations. (I) wipe (his) high place (i.e. altar) carefully; (I) desire to support (him) with pieces of wood; (I) nourish (him) with food; (I) greet (him) with hymns.

Notes—अवमाय—'First' (Wilson) 'nearest' (Griffith and Macdonell). According to Macdonell अव means low and म is superlative termination. विधेम—√*vidh* to worship, pres. opt. 1rst. plu. संमार्ज्मि—√*mṛj* to wipe, pres. 1rst. sing.; accented because the conjunctive च joining मार्ज्मि and दिधिषामि is dropped (चादि लोपे विभाषा—Paṇ—VIII.1.63). दिधिषामि—√*dhā* to put, pres. desid. 1rst. sing; accented because beginning of a new sentence. दधामि—√*dhā* to put, pres. 1rst. sing.; accented because beginning of a new sentence. वन्दे—√*vand* to greet, mid. pres. 1rst. sing.

सः । ईम् । वृषा । अजनयत् । तासु । गर्भम् । सः । ईम् । शिशुः । धयति । तम् । रिहन्ति ॥ सः । अपाम् । नपात् । अनभिम्लातऽवर्णः । अन्यस्यऽइव । इह । तन्वा । विवेष ॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा०भा०—स ईं सोऽयमपांनपात्संज्ञको देवः वृषा सेक्ता भूत्वा तासु मेघस्थास्वप्सु गर्भम् अजनयत् स्वात्मानमेव गर्भरूपेण वर्षणार्थं कृतवानित्यर्थः। गर्भो भूत्वा च स ईं सोऽयं माध्यमिकः वैद्युतोऽग्निस्तासां शिशुः पुत्रः सन् धयति मेघस्थास्ताः पिबति अबिन्धनो ह्यसौ। तं पुत्रस्थानीयमद्भिः आपश्च रिहन्ति लिहन्ति। 'लिह आस्वादने'। कपिलकादित्वाल्लत्वविकल्पः। सः अयम् अपां नपात् वृष्ट्या सह भूमौ निपतितः अनभिम्लातवर्णः अभितो म्लातो म्लानः क्षीणो वर्णो यस्य तद्विपरीतोऽत्यर्थं दीप्यमानः सन् इह अस्मिन् लोके अन्यस्येव। इवशब्दोऽवधारणे। अन्यस्य पार्थिवस्यैवाग्नेः तन्वा शरीरेण काष्ठेन्धनत्वलक्षणेन विवेष व्याप्तो बभूव। 'विष्लृ व्याप्तौ॥

शब्दा०—सः=वह, ईम्=यही, वृषा=शक्तिशाली, अजनयत्=उत्पन्न किया है, तास=उन जलों में, गर्भम्=गर्भ रूप में, सः=वह, ईम्=यही, शिशुः=कुमार, धयति=दुग्धपान करता है, तम्=उसको, रिहन्ति=प्यार से चाटती हैं, चुम्बन करती हैं, सः=वह, अपां नपात्=जल का पुत्र, अनभिम्लातवर्णः=कभी मलिन न होनेवाले रंगवाला अर्थात् सर्वदा प्रकाशित होनेवाला, अन्यस्य इव=दूसरे की तरह अर्थात् पार्थिव यज्ञाग्नि के रूप में, इह=यहाँ, तन्वा=शरीर से, विवेष=कार्य करता है।

हि० अ०—उसी शक्तिशाली ने (अपने को) उनमें (जल में) गर्भ (रूप में) उत्पन्न किया है; वही कुमार (उनका) दुग्धपान करता है; (वे भी) उसको (प्यार से) चुम्बन करती हैं। वह जल का पुत्र, चमकीले वर्णवाला, यहाँ (पृथ्वी पर) दूसरे की तरह (पार्थिव यज्ञाग्नि के रूप में) शरीर से कार्य करता है।

Trans.—Verily he, the vigorous, has generated (himself as) embryo in them (i.e. waters); verily he, the child, sucks (them) (and they, too,) lick him. He (as such), the son of waters, of unfaded colour, acts here with body as it were of another.

Notes—अजनयत्—√*jan* to generate, caus. impf. 3rd. sing. धयति—√*dhā* to suck, pres. 3rd. sing. रिहन्ति—√*rih* to lick, pres. 3rd. plu. अनभिम्लातवर्णः—Bahuvrīhi compd. accented on the first member. विवेष—√*viṣ* to be active, perf. 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अस्मिन् । पदे । परमे । तस्थिऽवांसम् । अध्वस्मऽभिः । विश्वहा । दीदिऽवांसम् ॥ आपः । नप्त्रे । घृतम् । अन्नम् । वहन्तीः । स्वयम् । अत्कैः । परि । दीयन्ति । यह्वीः ॥१४॥

सा० भा०—परमे उत्कृष्टे अस्मिन् पदे अन्तरिक्षलक्षणे स्थाने तस्थिवांसं स्थितवन्तम् अध्वस्मभिः ध्वंसनरहितैस्तेजोभिः विश्वहा सर्वाण्यहानि दीदिवांसं दीप्यमानमपां नपातं यह्वीः यह्व्यो महत्यः आपः स्वयम् आत्मनैव अत्कैः अतनशीलैः सततगन्तृभिः स्वकीयै रूपैः परि दीयन्ति परिगच्छन्ति । दीयतिर्गतिकर्मा । 'दीङ् क्षये' । व्यत्ययेन परस्मैपदम् । किं कुर्वत्यः । नप्त्रे अपां नपाते घृतं क्षरणशीलोदकात्मकम् अन्नं वहन्तीः वहन्त्यः ॥

शब्दा०—अस्मिन्=इस, पदे=स्थान में, परमे=सर्वोच्च, तस्थिवांसम्=बैठे हुये को, अध्वस्मभिः=विनाश रहित किरणों से, विश्वहा=सदा, दीदिवांसम्=चमकनेवाले को, आपः नप्त्रे=जल के पुत्र के लिए, घृतम्=घी, अन्नम्=भोजन, वहन्तीः=लाती हुई, स्वयम्=अपनी, अत्कैः=निरन्तर गति से, परिदीयन्ति=चारों तरफ से बहती हैं, यह्वीः=बड़ी नदियां ।

हि० अ० - इस सर्वोच्च स्थान में बैठे हुये, विनाश रहित (किरणों) से सदा चमकनेवाले के चारों तरफ, महान् नदियां अपने पुत्र के लिए घी का भोजन लाती हुई, अपनी निरन्तर गति से विचरण करती हैं ।

Trans.—(Him) seated in this highest place, shining with imperishable (light) for ever, the great waters carrying clarified butter (as) food for the son of waters, themselves fly around with their movements.

Notes—तस्थिवांसम्—Perf. part. acc. sing. from √*sthā* to stand. दीदिवांसम्—See notes (II. 35.3) अत्कैः—'Movement' (Wilson), 'wandering' (Griffith), 'garment' (Macdonell). दीयन्ति—√*dī* to fly, pres. 3rd. plu. वहन्तीः—√*vah* to carry, pres. part. fem.

अयांसम् । अग्ने । सुऽक्षितिम् । जनाय । अयांसम् । ऊँ इति । मघवत्ऽभ्यः । सुऽवृक्तिम् ॥ विश्वम् । तत् । भद्रम् । यत् । अवन्ति । देवाः । बृहत् । वदेम । विदथे । सुऽवीराः ॥१५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा० – हे अग्ने सुक्षितिं शोभननिवासं त्वाम् अयांसम् उपागच्छम। किमर्थम्। जनाय अस्मदीयपुत्रादिजनार्थम्। तथा मघवद्भ्यः हविर्लक्षण-धनयुक्तेभ्यो यजमानेभ्यश्च सुवृक्तिं शोभनावर्जकं त्वद्विषयं स्तोत्रम् अयांसम् उपागच्छम्। 'यम उपरमे'। अतः कारणात् यत् भद्रं सर्वे देवाः अवन्ति रक्षन्ति विश्वं सर्वं तत् भद्रम् अस्माकं भवतु। सुवीराः सुपुत्रा वयं विदथे यज्ञे गृहे वा बृहत् प्रौढं स्तोत्रं वदेम उच्चारयाम॥

शब्दा०—अयांसम्=आया हूँ, अग्ने=ओ अग्नि, सुक्षितिम्=सुन्दर निवासवाले, जनाय=संतति के लिये, अयांसम्=आया हूँ, उ=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, मघवद्भ्यः=प्रचुर धन देनेवाले यजमानों के लिए, सुवृक्तिम्=सुनिर्मित प्रार्थनावाले, विश्वम्=सम्पूर्ण, तत्=वे चीजें, यत्=जिनकी, अवन्ति=रक्षा करते हैं, देवाः=देवता, बृहत्=जोर से, वदेम=बोलें, विदथे=यज्ञ मण्डप में, सुवीराः=वीरों से युक्त।

हि० अ०—ओ अग्नि, सुन्दर निवासवाले (तुम्हारे पास) मैं संतति के लिए आया हूँ; सुनिर्मित प्रार्थना वाले (तुम्हारे पास) मैं प्रचुर धन देनेवाले यजमानों के लिए आया हूँ। वे सभी कल्याण कारी चीजें जिनकी रक्षा देवता करते हैं (हमारी होवें); वीरों से युक्त (हम) यज्ञ में जोरों से गान करें।

Trans.—I have come, O Agni, (to thee) of good dwelling for offspring; I have come (to thee) of well-fashioned hymn for the bounteous patrons. May all auspicious that gods protect, be of ours; may we accompanied with heroes speak aloud in the assembly (i.e. at the place of sacrifice).

Notes—अयांसम् – √*yam* to stretch out, 's'-aorist, 1rst. sing. सुक्षितिम्—Bahuvrīhi compd. accented on the second member. Griffith and Macdonell take it to mean 'good dwelling' सुवृक्तिम्—Bahuvrīhi compd. accented on the second member. 'With propitiatory hymns' (Wilson), 'goodly preparation' (Griffith), 'a song of praise' (Macdonell). अवन्ति—√*av* to protect, 3rd. plu.; accented because preceded by यत्.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'उदु ष्यः' इत्येकादशर्चं षष्ठं सूक्तं गार्त्समदं त्रैष्टुभं सवितृदेवताकम्। अत्रानुक्रमणिका—'उदु ष्य एकादश सावित्रम्' इति। व्यूढे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे एतत्सूक्तं सावित्रनिविद्धानीयम्। 'व्यूळ्हश्चेत्' इति खण्डे सूत्रितं—'षष्ठस्योदु ष्य देव इति गार्त्समदम्' (आश्व० श्रौ० ८·८) इति।

उत्। ऊँ इति। स्यः। देवः। सविता। सवाय। शश्वत्ऽतमम्। तत्ऽअपाः। वह्निः। अस्थात्॥ नूनम्। देवेभ्यः। वि। हि। धाति। रत्नम्। अथ। आ। अभजत्। वीतिऽहोत्रम्। स्वस्तौ॥१॥

सा० भा०—स्यः सः देवः द्योतमानः सविता सवाय लोकानां प्रसवाय अनुज्ञायै शश्वत्तमं प्रतिदिनम् उत् अस्थात् उत्तिष्ठति। कीदृशः सविता। तदपाः तत्प्रसवकर्मा। अपः अप्नः (नि० २. १. १) इति कर्मनामसु पाठात्। वह्निः वोढा जगताम्। किंच नूनं संप्रति देवेभ्यः स्तोतृभ्यः रत्नं धनं वि हि धाति प्रयच्छति। हि इति पूरणे। अथ अपि च वीतिहोत्रं कान्तयज्ञं यजमानं स्वस्तौ अविनाशे क्षेमे अभजत् भागिनं करोतु। यद्यपि स्वस्तिशब्दः विभक्त्यन्तनिर्दिष्टः शब्दपरः तथापि अपर्यवसानादर्थपरो भवति॥

शब्दा०—स्यः=वह, देवः=देव, सविता=सवितृ देव, सवाय=उत्पन्न करने के लिये, शश्वत्तमम्=सर्वदा, तदपाः=जिनका यही काम है, वह्निः=लानेवाले, उदस्थात्=उदित होते हैं, नूनम्=इस समय, देवेभ्यः=पवित्र लोगों को, हि=निश्चित रूप से विधाति=प्रदान कर रहे हैं, रत्नम्=कीमती धन, अथ=इस प्रकार, आ अभजत्=प्रदान करें, वीतिहोत्रम्=हवि प्रदान करनेवाले को, स्वस्तौ=कल्याण।

हि० अ०—(जगत् को प्रकाश में) लानेवाले सवितृ देव, जिनका यही काम है, (प्राणियों को) उत्पन्न करने के लिये सर्वदा उदित होते हैं। इस समय वे पवित्र लोगों को कीमती धन प्रदान कर रहे हैं, इसलिये हवि प्रदान करनेवाले को कल्याण प्रदान करें।

Trans. :—That god Savitar, the carrier (of the world), having that his office, constantly rises to sti-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

mulate (mankind). Now he grants the precious treasures to the pious worshippers. Therefore, may he grant bliss to the sacrificer.

Notes :—स्यः—nom. sing (masc.), 3rd. per. pronoun. It works as a demonstrative adj. सवाय—Dative sing. of सव from √*su* to generate, stimulate, तदपाः—Bahuvrīhi compd. accented on the first member. 'Who neglects not his duty' (Griffith), 'for that exclusive mission of his' (Peterson). वह्निः—From √*vah* to carry; 'carrier' (Sāyaṇa), 'priest' (Griffith), 'driving in a chariot' (Peterson). उदस्थात्—√*sthā* with उत् to rise, root-aorist, 3rd sing. धाति—√*dhā* with वि to give, to grant, pres. 3rd. sing. ; not unaccented because preceded by हि. अथ—A later form of अध. It generally comes in the beginning of a Pāda or a sentence, and expresses the sense of 'and', 'then', 'so'. आ अभजत्—√*bhaj* with आ to grant, injun. 3rd. sing. वीतिहोत्रम्—वीति is derived from √*vī* to enjoy, with noun making termination ति; Bahuvrīhi compd. accented on the first member.

विश्वस्य । हि । श्रुष्टये । देवः । ऊर्ध्वः । प्र । बाहवा । पृथुऽपाणिः । सिसर्ति ॥ आपः । चित् । अस्य । व्रते । आ । निऽमृगाः । अयम् ।। चित् । वातः । रमते । परिऽज्मन् ॥२॥

सा० भा०—देवः द्योतमानः सविता पृथुपाणिः महत्कारः विश्वस्य श्रुष्टये जगतः सुखाय ऊर्ध्वः उद्गतः सन् बाहवा बाहू प्र सिसर्ति प्रसारयति । आपश्चित् आपोऽपि अस्य व्रते प्रसवाख्ये कर्मणि सति । 'व्रतं कर्वरम्' (नि० २. १. ७) इति तन्नामसु पाठात् । आ स्यन्दन्त इति शेषः । ताश्च निमृगाः नितरां शोधयित्र्यो गङ्गादिरूपेण जगत्पावयन्तीत्यर्थः । अयं चिद्वातः अयमपि वायुः परिज्मन् परितो गते व्याप्तेऽन्तरिक्षे रमते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—विश्वस्य=सबके, श्रुष्टये=कल्याण के लिये, सुख के लिये, देवः=देव, ऊर्ध्वः=ऊँचे स्थित, बाहवा=भुजाओं को अर्थात् किरणों को, पृथुपाणिः=लम्बी भुजावाले, सिसर्ति=फैला रहे हैं, आपः=जल, चित्=भी, अस्य=इसकी, व्रते=आज्ञा में, आ=बहती है, निमृगाः=पवित्र, अयम्=यह, चित्=भी, वातः=वायु, रमते=विचरण करता है, परिज्मन्=अन्तरिक्ष में।

हि० अ०—ऊँचे स्थित, लम्बी भुजावाले (सवितृ) देव, सबके कल्याण के लिये अपनी भुजाओं (किरणों) को फैला रहे हैं; पवित्र नदियां उन्हीं की आज्ञा में (बहती हैं); यह वायु (उन्हीं की आज्ञा में) अन्तरिक्ष में रमण करता है।

Trans.—Having gone up on high, broad-handed god stretches forth his arms for the welfare of all. Even the purifying waters are in his commandment ; even this wind rests in the circumbient (region).

Notes—श्रुष्टये—Dative sing of श्रुष्टि from √*śruṣ* to hear, with noun-making termination ति; 'for the weflare of all world' (Sāyaṇa), 'that all may mark him' (Griffith), 'that all might obey' (Peterson). पृथुपाणिः—Broad-handed ; Bahuvrīhi compd. accented on the first member. प्र सिसर्ति—√*sṛ* with प्र to stretch, III conjug. pres. 3rd. sing. ; not unaccented because preceded by हि. निमृगाः—'Purifying' (Wilson), 'bent down' (Griffith), 'submissive', 'suvservient' (Peterson). मृगः is derived from √*mṛj* to wipe. रमते—√*ram* to rest, pres. 3rd. sing. परिज्मन्—Loc. sing. of परिज्मन् from √*gam* to go ; 'in the circumbient region' (Sāyaṇa, Griffith) 'in the course' (Peterson).

आशुऽभिः। चित्। यान्। वि। मुचाति। नूनम्। अरोरमत्। अतमानम्। चित्। एतोः॥ अह्यर्षूणाम्। चित्। नि। अयान्। अविष्याम्। अनु। व्रतम्। सवितुः। मोकी। आ। अगात्॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—यान् गच्छन् सविता आशुभिश्चित् शीघ्रगामिभिरपि रश्मिभिः वि मुचाति विमुच्यते। नूनम् इति पूरणः। अतमानं चित् सततं गच्छन्तमपि जनम् एतोः गमनात् अरीरमत् उपरमयति। किंच अह्यर्षूणाम्। अहिमाहन्तारं शत्रुमर्षन्त्यभिगच्छन्तीत्यह्यर्षवः। तेषामपि अविष्यां गमनेच्छां न्ययान् नियच्छति। सवितुः प्रेरकस्य सूर्यस्य व्रतं कर्म अनु पश्चात् मोकी रात्रिः। 'मोकी शोकी' (नि० १. ७. १८) इति रात्रिनामासु पाठात्। अगात् आगच्छति। सवितुश्चेष्टोपरतौरात्रिरागच्छतीति यावत्॥

शब्दा०—आशुभिः=शीघ्रगामी किरणों के द्वारा, चित्=भी, यान्=घूमते हुये, वि मुचाति=छोड़ दिये गये हैं, नूनम्=अब, अरीरमत्=रोक दिया है, अतमानम्=जानेवाले को, चित्=भी, एतोः=जाने से, अह्यर्षूणाम्=शत्रु पर आक्रमण करनेवालों की, नि अयान्=नियंत्रित किया है, अविष्याम्=इच्छा को, अनु=पीछे, व्रतम्=कार्य काल के, सवितुः=सवितृ देव के, मोकी=रात्री, आ अगात्=आई है।

हि० अ०—घूमते हुये (सवितृ देव) अब अपनी शीघ्रगामी किरणों के द्वारा छोड़ दिये गये हैं; (उन्होंने) जानेवाले को जाने से रोक दिया है; शत्रुओं पर आक्रमण करनेवाले की इच्छा को नियंत्रित किया है। सवितृ देव के कार्यकाल के पश्चात् रात्री आई है।

Trans.—Going (Sun) is now liberated by his quick (rays); (he) has stayed the wanderer from going. (He) has restrained the desire for combat of the warriors. The night has approached after the office of Savitar.

Notes—यान्—√*yā* to go, pres. part. वि मुचाति—√*muc* to release, pres. subju. 3rd sing. Sāyaṇa explains it as विमुच्यते. According to him Savitar himself is liberated by his rays at evening. Griffith and Peterson supply 'rider' to मुचाति. अरीरमत्—√*ram* to stop, red.–aorist, 3rd. sing.; not unaccented because it begins the Pāda. अतमानम्—√*at* to wander, pres. part. एतोः—From going; abl. sing of एतु from √*i* to go. नि अयान्—√*yam* with नि to restrain, 's'-aorist, 3rd. sing. अगात्—√*gā* to go, root–aorist, 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनरिति । सम् । अव्यत् । विऽततम् । वयन्ती । मध्या । कर्तोः । नि । अधात् । शक्म । धीरः ॥ उत् । सम्ऽहाय । अस्थात् । वि । ऋतून् । अदर्धः । अरमतिः । सविता । देवः । आ । अगात् ॥४॥

सा० भा०—वयन्ती वस्त्रं वयन्ती नारीव रात्रिः विततम् आलोकं पुनः समव्यत् संवेष्टयते । पुनः शब्दः पूर्वेद्युरप्येवमकार्षीदिति द्योतयति । धीरः प्रज्ञोऽपि सर्वो लोकः कर्तोः क्रियमाणं कर्म । 'कर्तोः कर्तवै' (नि० २. १. १८) इति तन्नामसु पाठात् । शक्म कर्तुं शक्यमपि मध्या मध्ये उपक्रान्तं कर्मापरिसमाप्येत्यर्थः । न्यधात् निहितवान् सवितर्युपरते इति शेषः । सर्वो लोकः संहाय शय्यां विहाय उत् अस्थात् । अवशिष्टं कर्म कर्तुं पुनरुतिष्ठति । संपूर्वो जहातिः शय्यापरित्यागे वर्तते । तथा च श्रूयते—'कलिः शयानो भवति संजिहानस्तु द्वापरः' (ऐ० ब्रा० ७. १५) इति । सविता सर्वस्य प्रसविता सूर्यः अरमतिः अनुपरतिः देवः द्योतमानः आगात आगच्छति उदेतीति यावत् । ऋतून् कालविशेषांश्च वि अदर्धः विदारयति ॥

शब्दा०—पुनः=फिर, समव्यत्=आवृत कर लिया है, विततम्=फैले हुये प्रकाश को, वयन्ती=बुनती हुई, मध्या=बीच में, कर्तोः=कार्य के, नि अधात=रोक दिया, शक्म=शक्ति को, धीरः=बुद्धिमान ने, संहाय=छोड़कर, उदस्थात=चल पड़ा, ऋतून्=समय को, वि अदर्धः=विभाजित किया, अरमतिः=कभी न रुकनेवाले, सविता=सवितृ, देवः=देव, आ अगात्=आ गये ।

हि० अ०—(कपड़ा बुननेवाली स्त्री के समान) बुनती हुई (रात्री ने) फैले हुये प्रकाश को पुनः आवृत कर लिया है; बुद्धिमान (सवितृ) ने (अपनी) शक्ति को कार्य के बीच में ही रोक दिया; (प्रत्येक व्यक्ति शय्या को) छोड़कर (कार्य के लिये) चल पड़ा । कभी न रुकनेवाले सवितृ देव (जन्होंने) समय का विभाजन (दिन-रात के रूप में) किया है, आ गये ।

Trans.—(The night) has enveloped the extended light again (like a woman) weaving (a garment); the wise (Savitar) has stopped, (his) power in the midst of the work. (Everybody) having left the bed sprang up, when the unstaying god Savitar (who) has divided the time (into day and night) appeared.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—पुनः—Visarjanīya is rhotasized one ; hence, इति is added after it in the Pada-text. समव्यत्— √*vī* with सम् to envelope, impf. 3rd. sing. विततम्—According to Sāyaṇa वितत means day-light and it is the object of समव्यत्. Oldenberg thinks it as object of वयन्ती and supplies 'all-beings' as object to समव्यत्. Griffith takes it to mean 'what was spread out' and Peterson as 'extended web of darkness'. वयन्ती— √*vā* to weave, pres. part. fem. कर्तोः—Gen. infinitive from √*kṛ* to make. कर्तोः has been enumerated in the list of the names of 'action' (Nigh II. 1.18). न्यधात्— √*dhā* with नि to stop, root-aorist, 3rd. sing. शक्म— 'Work', (Geldner) 'labour' (Griffith) 'Power' (Peterson). संहायः— √*hā* to leave, gerund in य; 'having left the bed' (Sāyaṇa), 'from rest' (Griffith), 'other lying quiet (at day time)' (Peterson). अस्थात्—See II.38.1. वि अदर्धः—√*dhṛ* with वि to divide, inte. impf. 3rd. sing. अरमतिः—'Unwearied' (Wilson), 'holy-minded' (Griffith), 'not resting' (Roth), 'genus of prayer' (Grassmann), 'punctual' (Geldner), 'servant as well as 'service' (Maxmüller), 'the fierce red glow of the sky deified' (Peterson). अगात्— √*gā* to go, root-aorist, 3rd. sing.

नाना । ओकांसि । दुर्यः । विश्वम् । आयुः । वि । तिष्ठते । प्रऽभवः । शोकः । अग्नेः ॥ ज्येष्ठम् । माता । सूनवे । भागम् । आ । अधात् । अनु । अस्य । केतम् । इषितम् । सवित्रा ॥५॥

सा० भा० - प्रभवः प्रभूतः अग्नेः शोकः तेजः दुर्यः गृह्यो गृहे भवः नानौकांसि यजमानानां पृथग्भतान् गृहान् वि तिष्ठते अधितिष्ठति । विश्वमायुः सर्वमन्नं चाधितिष्ठति । 'आयुः सुनृता' (नि० २.७.२३) इत्यन्ननामसु पाठात् । माता उषाः सवित्रा अनु इषितं प्रेषितम् अस्य केतं प्रज्ञापकमग्नेः ज्येष्ठं प्रथममग्निहोत्राख्यं भागं सूनवे अग्नये आधात् आदधाति ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—नाना=अनेक, ओकांसि=गृहों में, दुर्यः=घर में उत्पन्न, विश्वम्=सम्पूर्ण, आयुः=जीवन के लिये, वि तिष्ठते=अधिष्ठित हो रहा है, प्रभवः=शक्तिशाली, शोकः=प्रकाश, अग्नेः=अग्नि का, ज्येष्ठम्=श्रेष्ठ, माता=माता (उषा) ने, भागम्=हिस्सा, आ अधात्=प्रदान किया है, अनु=अनुसार, अस्य=उसकी, केतम्=इच्छा के, इषितम्=भेजा गया है, सवित्रा=सवितृ देव के द्वारा।

हि० अ०—अग्नि का गृहों में उत्पन्न शक्तिशाली प्रकाश सम्पूर्ण जीवन के लिये घर-घर में अधिष्ठित हो रहा है। माता (उषा) ने पुत्र (अग्नि) को प्रथम अग्निहोत्र नामक हिस्सा प्रदान किया है, जो सवितृ (देव) के द्वारा उस की इच्छा के अनुसार भेजा गया है।

Trans.—The mighty home-born lustre of Agni spreads through the various dwellings for whole life-time. The mother (dawn) has placed to the son (fire) the largest share (which is) imparted by Savitar in accordance with (his) will.

Notes—ओकांसि—Nom. plu. of ओक from √*uc* to be pleased. Dwelling is called ओक because every one is pleased there. दुर्यः—(From दुर door); Geldner takes it to mean 'whosoever has a house', विश्वमायुः—आयु means food (Nigh. II. 7.23). Geldner takes it to mean 'persons of all ages', Griffith 'through entire existence', Peterson as 'a whole life time'. तिष्ठते—√*sthā* to stand, mid. pres. 3rd. sing. According to Sāyaṇa it has two objects नाना ओकांसि and विश्वमायुः; Griffith, Geldner and Peterson understand it as having only one object नाना ओकांसि. The verb in it's un-accented form indicates that both नाना ओकांसि and विश्वमायुः cannot be two clauses, for in that case it would have been accented according to the rule चाहलोप एवेत्यवधारणम् Pāṇ-VIII. 1.62; see also MVGS. p. 468. शोकः—From √*śuc* to shine. माता—Sāyaṇa and Griffith understand

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

it for 'Dawn' but Peterson takes it for 'Night': सूनवे—Dat. sing. of सूनु, son who is Agni. केतम्—(From √*kit* or √*cit* to know); 'manifestation' (Sāyaṇa), 'summons' (Griffith), 'desire' (Peterson). इषितम्—√*iṣ* to send, past. part. अन्वस्य केतमिषितं सवित्रा—Wilson following Sāyaṇa translates: 'which is the manifestation of him imparted by Savitar'; Griffith renders as 'Savitar hath sped to meet his summons'; Peterson as 'it being sent by Savitar in accordance with his desire'.

सम्ऽआववर्ति । विऽस्थितः । जिगीषुः । विश्वेषाम् । कामः । चरताम् । अमा । अभूत् ॥ शश्वान् । अपः । विऽकृतम् । हित्वी । आ । अगात् । अनु । व्रतम् । सवितुः । दैव्यस्य ॥६॥

सा० भा०—जिगीषुः विजयेच्छुः योद्धा विष्ठितः युद्धार्थं प्रस्थितः समाववर्ति समावर्तयति। विश्वेषां सर्वेषां चरतां जङ्गमानाम् अमा। 'अमा दमे' (नि० ३. ४. ११) इति गृहनामसु पाठात्। गृहं प्रति कामः अभूत् भवति। शश्वान् नित्यं कर्मरतः अपः कर्म विकृतम् अर्धकृतं हित्वी हित्वा आगात् गृहमागच्छति। एतत्सर्वं दैव्यस्य दिविभवस्य सवितुः प्रेरकस्य सूर्यस्य व्रतम् अस्तमयाख्यं कर्म अनु जायते इत्यर्थः।

शब्दा०—समाववर्ति=लौट रहा है, विस्थितः=बाहर गया हुआ, जिगीषुः=युद्ध की इच्छावाला, विश्वेषाम्=सम्पूर्ण की, कामः=इच्छा, चरताम्=जंगम प्राणियों की, अमा=घर के प्रति, अभूत्=हो गई है, शश्वान्=सभी, अपः=कार्य को, विकृतम्=अधूरा, हित्वी=छोड़कर, आ अगात्=आ गया है अनु=पश्चात्, व्रतम्=कार्य के, सवितुः=सवितृ देव के, दैव्यस्य=द्युलोक में रहनेवाले के।

हि० अ०—विजय की इच्छ से बाहर गया योद्धा लौट रहा है। सम्पूर्ण जंगम प्राणियों की इच्छा घर की तरफ हो गई है। सवितृ देव के कार्य के समाप्त होने पर प्रत्येक (व्यक्ति) काम को अधूरा छोड़कर आ गया है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Warrior, desirous of victory, who had gone out, returns. The desire of all moving ones became homewards. Everyone leaving one's work half-done has gone, after the office of divine Savitar.

Notes—समाववर्ति सम्+आ+√*vṛt* to turn, pres. from the perf. base, 3rd sing. Verb having reduplicated base accents the reduplicated syllable (अभ्यस्तानामादिः—Pāṇ VI.1.189). But when it is compounded with two prepositions it shifts the accent to the immediately preceding preposition, the first remains unaccented. विष्ठितः—√*sthā* with वि to go out, past. part. For accent see निहिताः (I.24.7.) जिगीषुः—Desid. noun from √*ji* to win. अमा—Home (Nigh. III. 4.11); here it is used as an adverb-'homewards'. विकृतम्—√*kṛ* with वि to change. past part.; 'half done' (Sāyaṇa), 'work which has assumed diverse forms' (Peterson), 'evil doing' (Griffith). हित्वी—√*hā* to leave, gerund in त्वी.

According to Griffith it is a description of morning. He renders the verse : 'He comes again, unfolded, fain for conquest : at home was he the love of all things moving. Each man hath come leaving his evil doings, after the Godlike Savitar's commandament.'

त्वया॑ । हि॒तम् । अप्य॑म् । अ॒प्ऽसु । भा॒गम् । धन्व॑ । अनु॑ । आ । मृ॒ग॒यसः॑ । वि । त॒स्थुः॒ ॥ वना॑नि । विऽभ्यः॑ । नकिः॑ । अ॒स्य॒ । तानि । व्र॒ता । दे॒वस्य॑ । स॒वि॒तुः । मि॒न॒न्ति॒ ॥७॥

सा० भा०—हे सवितः त्वया अप्सु अन्तरिक्षे । 'आपः पृथिवी' (नि० १. ३. ८) इत्यन्तरिक्षनामसु पाठात् । जलाधारे वा हितं निहितम् अप्यम् अपां संबन्धिनं भागं धन्वानु निर्जलप्रदेशेष्वरण्येषु मृगयसः मृगयमाणा मृगाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आ समन्तात् वि तस्थुः अधितिष्ठन्ति । किंच वनानि वृक्षाः विभ्यः पक्षिभ्यः आवासादिरूपेण त्वया भागो दत्तः । अस्य देवस्य सवितुः तानि तादृशानि व्रता व्रतानि कर्माणि नकिः मिनन्ति केऽपि न हिंसन्ति ॥

शब्दा०—त्वया=तुम्हारे द्वारा, हितम्=निर्धारित किया गया है, अप्यम्=जलचर, अप्सु=जल में, भागम्=हिस्से के, धन्व=मैदान में, अनु=अनुसार, आ=चारों तरफ, मृगयसः=जंगली जानवर, वि तस्थुः=फैले हैं, वनानि=जंगल, विभ्यः=पक्षियों के लिये, नकिः=कोई नहीं, अस्य=उसके, तानि=उन, व्रता=कार्यों को, देवस्य=देव के, सवितुः=सवितृ के, मिनन्ति=उलंघन करते हैं ।

हि० अ०—अपने-अपने हिस्से के अनुसार जो तुम्हारे द्वारा निर्धारित किया गया है, जलचर जल में (फैले हैं), जंगली जानवर, मैदान में फैले हैं । पक्षियों के लिये बन (निर्धारित है) । इस सवितृ देव की उन आज्ञाओं का उलंघन कोई नहीं करता ।

Trans.—The equatic creatures spread in the waters and beasts in plain lands, according to their share which have been assigned by thee. Forests (have been assigned) to the birds. No one violates those commandaments of this god Savitar.

Notes—हितम्–√*dhā* to put, past part. अप्यम्–'Watery' (Sāyaṇa), 'equatic creature' (Peterson). Sāyaṇa, Griffith and Wilson construe अप्यम् with भागम्. Peterson takes it as an independant substantive. वि तस्थुः—√*sthā* with वि to spread. त्वया हितम्....वि तस्थुः–Griffith following Sāyaṇa translates, 'The wild beasts spread through desert places seeking their watery share thou hast set in waters; Peterson treats the first Pāda as an elliptical clause and he supplies the verb वि तस्थुः from the second Pāda to त्वया अप्सु हितं भागं अप्यम् 'over the portion assigned by thee to it, in the waters, the equatic creation (has spread). The two clauses are connected by conjunctive आ. मिनन्ति—√*mī* to damage, pres. 3rd. plu.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यात्ऽराध्यम् । वरुणः । योनिम् । अप्यम् । अनिऽशितम् । निऽमिषि । जर्भुराणः ॥ विश्वः । मार्ताण्डः । व्रजम् । आ । पशुः । गात् । स्थऽशः । जन्मानि । सविता । वि । आ । अकरित्यकः ॥८॥

सा० भा०—वरुणः याद्राध्यं यातां गच्छतां राध्यं संराधनीयम् अप्यम् आप्तुं योग्यम् अनिशितम् अतीक्ष्णम् । सुखकरमिति यावत् । योनिं स्थानं निमिषि निमेषे सवितुरस्तमये सति विश्रमार्थं प्राणिभ्यः प्रयच्छति । वरुणस्य रात्रेर्निर्वाहकत्वात् । जर्भुराणः भृशं गच्छन् विश्वः सर्वः मार्ताण्डः मृताद्भिन्नात् अण्डादुत्पद्यमानः पक्षी आ गात् आगच्छति । विश्वः पशुः अपि व्रजं गोष्ठमागात् । सविता प्रेरकः स्थशः स्थाने स्थाने जन्मानि जातानि भूतानि व्याकः पृथगकार्षीत् ।

शब्दा०—याद्राध्यम्=अति शीघ्रता से, वरुणः=वरुण देवता, योनिम्=स्थान, अप्यम्=जलवाले, अनिशितम्=बिना किसी रोक के, निमिषि=सवितृ देव के पलक मारने पर अर्थात् सन्ध्या के समय, जर्भुराणः=उड़ते हुये, विश्वः=सभी, मार्ताण्डः=पक्षी, व्रजम्=बेड़े में, पशुः=जानवर, आ=और, गात्=चले गये, स्थशः=स्थान के अनुसार, जन्मानि=उत्पन्न जीवों को, सविता=सवितृ ने, वि आ अकः=अलग-अलग स्थित किया है ।

हि० अ०—(सवितृ देव के) आंखे बन्द करने पर, वरुण अपने जलवाले स्थान पर, बिना रोक के, जल्दी ही (चले गये); और जानवर (अपने) बाड़े में चले गये । सावितृ देव ने सभी उत्पन्न जीवों को अपने स्थान के अनुसार अलग-अलग स्थित किया है ।

Trans.—At the closing of the eyes (of Savitar), Varuṇa (has gone) incessantly to his watery abode as quickly as possible ; all the birds flying (have gone to the nest) and the cattle have gone to the stalls. Savitar has lodged all the beings, created, separately in their respective places.

Notes—याद्राध्यम्—Sāyaṇa explains it as 'यातां गच्छतां संराधनीयम्', Griffith as 'with utmost speed', and Peterson as 'this much having been vouchsafed'. According

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

to Macdonell याद्राध्यम् is a syntactical compd. which literally means 'in so for as attainable' i.e. as quickly as possible. यात् is identical with later यावत् and राध्यम् is derived from √*rādh* to succeed; gerundive in य. अप्यम्—Sāyaṇa takes it to mean attainable (आप्तुं योग्यम्) while in the preceding verse he has explained it as watery (अपां संबन्धिनं). Wilson thinks it as 'cool' and Peterson as watery. अनिशितम्—Comfortable (Sāyaṇa), 'agreeable' (Wilson), 'in restless haste' (Griffith), 'restlessly' (Peterson). जर्भुराणः—√*bhur* to quiver, inte. part.; Sāyaṇa construes it with मार्ताण्डः and Wilson with वरुणः. याद्राध्यं····जर्भुराणः—'The ever-going Varuṇa grants a cool, accessible and agreeable place (of rest) to all moving (creatures)' (Wilson); 'with utmost speed in restless haste at sunset Varuṇa seeks his watery habitation' (Griffith) ; 'Varuṇa has gone to his watery residence this much having been vouchsafed to him by Savitar, restlessly agitating while his eyes are closed (for a nap)' (Peterson). आ—Sāyaṇa connect it with गात्, but here it should mean 'and' because if it expresses a sense other than conjunctive the verb गात् to be supplied in the two clauses must have been accented in the absence of च (चाहलोप एवेत्यवधारणम्—Pāṇ. VIII. 1.62). गात्—√*gā* to go, root-aorist subju. 3rd. sing. अकः—√*kṛ* to make, root-aorist, 3rd. sing. Vide Appendix-B. under rules of rendering Saṁhitā-text in to Pada-text

न । यस्य । इन्द्रः । वरुणः । न । मित्रः । व्रतम् । अर्यमा । न । मिनन्ति । रुद्रः ॥ न । अरातयः । तम् । इदम् । स्वस्ति । हुवे । देवम् । सवितारम् । नमःऽभिः ॥९॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—यस्य सवितुर्देवस्य व्रतं प्रसवाख्यं कर्म इन्द्रः न मिनाति न हिनस्ति। वरुणः च न मिनाति। मित्रः च अर्यमा च न मिनाति। रुद्रः च न मिनाति। अरातयः असुराश्च न मिनन्ति। मिनातीति श्रुतमाख्यातं यथायोगं विपरिणामेन प्रत्येकमभिसंबध्यते। तं सवितारं सर्वस्य प्रेरकं देवं द्योतमानम् इदम् इदानीं नमोभिः अन्नरूपैर्हविर्भिः सह। 'नमः आयुः' (नि० २. ७. २२) इत्यन्ननामसु पाठात्। स्वस्ति क्षेमाय हुवे स्तौमि॥

शब्दा० - न=नहीं, यस्य=जिसकी, इन्द्रः=इन्द्र, वरुणः=वरुण, न=नहीं, मित्रः=मित्र, व्रतम्=कार्य का, आज्ञा का, अर्यमा=अर्यमन्, न=नहीं, मिनन्ति= उल्लंघन करते हैं, रुद्रः=रुद्र, न=नहीं, अरातयः=शत्रु तम्=उस को, इदम्=यहाँ, इस समय, स्वस्ति=कल्याण के लिये, हुवे=बुलाता हूँ, देवम=देव को, सवितारम्=सवितृ, नमोभिः=नमस्कारों द्वारा।

हि० अ० - जिसकी आज्ञा का उल्लंघन न तो इन्द्र, वरुण, मित्र, अर्यमा, रुद्र करते हैं न तो शत्रु ही; उस सवितृ देव को मै यहां नमस्कारों द्वारा कल्याण के लिये बुलाता हूँ।

Trans.—Whose office neither Indra, nor Varuṇa, nor Mitra, nor Aryaman nor Rudra nor the enemies violate; him, god Savitar, I invoke here with salutations for welfare.

Notes—मिनन्ति—See II. 38.7. हुवे—√*hū* to call, pres. mid. 1rst. sing; not unaccented because it begins the Pāda.

भगम्। धियम्। वाजयन्तः। पुरम्ऽधिम्। नराशंसः। ग्नाःपतिः। नः। अव्याः॥ आऽअये। वामस्य। सम्ऽगथे। रयीणाम्। प्रियाः। देवस्य। सवितुः। स्याम॥१०॥

सा० भा०—भगं भजनीयं धियं ध्यातव्यं पुरंधिं पुरस्य धारयितारं बहुप्रज्ञं वा सवितारम्। 'पुरंधिर्बहुधीः' (निरु० ६. १३) इति यास्कः। वाजयन्तः वाजिनं बलिनं कुर्वतः। विभक्तिव्यत्ययः। नः स्तुवतोऽस्मान् नराशंसः नरैः शंशनीयः ग्नास्पतिः देवपत्नीनां पतिः छन्दसां पतिर्वा। तथा च श्रूयते-'छन्दांसि वै ग्नाः' इति, 'उत ग्ना व्यन्तु देवपत्नीः' (ऋ० सं० ५. ४६. ८) इति च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सविता अव्याः अव्यात् । किंच वामस्य धनस्य रयीणां पशूनां च । तथा च श्रूयते—'पशवो वै रयिः' इति । आये आगमने संगथे संगमने च निमित्ते देवस्य द्योतमानस्य सवितुः प्रेरकस्य वयं प्रियाः स्याम भवेम ॥

शब्दा०—भगम्=भाग्य को, धियम्=बुद्धि को, वाजयन्तः=बढ़ाते हुये, पुरंधिम्=ज्ञान को, नराशंसः=मनुष्यों द्वारा प्रशंसनीय देव, ग्नास्पतिः =देवियों के पति, नः=हमारी, अव्याः=रक्षा करें, आये=लाने में, वामस्य=धन के, सङ्गथे=एकत्रित करने में, रयीणाम्=पशुओं के, प्रियाः =प्रिय, देवस्य=देव के, सवितुः=सवितृ के, स्याम=होवें ।

हि० अ०—नराशंस तथा देवियों के पति (सवितृ) (हमारे) भाग्य, विचार तथा ज्ञान को बढ़ाते हुये हमारी रक्षा करें । हम सवितृ देव के प्रिय बनें (जिससे) धन लाने में तथा पशुओं को एकत्रित करने में (सफल हों) ।

Trans.—May Narāśaṁsa and the Lord of goddesses protect us strengthening (our) fortune, thought and wisdom. May we be dear unto god Savitar (that we may be successful) in bringing of wealth and in gathering of cattle.

Notes—भगम्, धियम्, पुरंधिम् are according to Sāyaṇa, the adjectives of सवितारम् understood. Peterson takes them as separate deities. Here they are abstract nouns as Griffith interprets. वाजयन्तः—Sāyaṇa construes it with नराशंसः and ग्नास्पतिः; Peterson follows Sāyaṇa in taking it as participle of नराशंसः and ग्नास्पतिः; Geldner thinks वाजयन्तः as the adj. of वयम् understood; Griffith supplies 'they' as the substantive of वाजयन्तः नराशंसः and ग्नास्पतिः are the epithets of Savitar. Agni is called नराशंस, but here according to Sāyaṇa, Savitar is नराशंस, for he is praised by men. Sāyaṇa takes ग्नास्पतिः too, as the epithet of Savitar. In the Ṛgveda he has been frequently called husband of maidens (I. 152.4). Griffith understands ग्नास्पतिः as Tvaṣṭṛ who is also represented as attending or attended by ग्नाः, goddesses.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अव्याः—√*av* to protect, root-aorist, prec. 3rd. sing., termination त् has been dropped. आ अये—Dative sing. of अयि from √*i* to go.

अस्मभ्यम् । तत् । दिवः । अत्ऽभ्यः । पृथिव्याः । त्वया । दत्तम् । काम्यम् । राधः । आ । गात् ॥ शम् । यत् । स्तोतृऽभ्यः । आपये । भवाति । उरुऽशंसाय । सवितः । जरित्रे ॥११॥

सा० भा०—हे सवितः अस्मभ्यं त्वया दत्तं तत् प्रसिद्धं काम्यं कमनीयं राधः धनं दिवः द्युलोकात् अद्भ्यः अन्तरिक्षलोकात् पृथिव्याः भूमेश्च आ गात् आगच्छतु । किंच स्तोतृभ्यः स्तोतॄणाम् आपये बन्धवे तद्वंशजाय यत् धनं शं सुखकरं भवति भवेत् उरुशंसाय बहुस्तुतये जरित्रे स्तोत्रे मह्यम् । 'जरिता कारुः' (नि० ३. १६. २) इति स्तोतृनामसु पाठात् । हे सवितः तत्प्रयच्छ ॥

शब्दा० - अस्मभ्यम्=हम लोगों के लिये, तत्=वह, दिवः=आकाश से, अद्भ्यः=जल से, पृथिव्याः=पृथिवी से, त्वया=तुम्हारे द्वारा, दत्तम्=दिया हुआ, काम्यम्=वरणीय, राधः=धन, आ गात्=आवे, शम्=कल्याणकर, सुखकर, यत्=जो, स्तोतृभ्यः=स्तोताओं के लिये, आपये=वंश के लिये, भवाति=हो, उरुशंसाय=बहुत प्रशंसा करनेवाले, सवितः=ओ सवितृ देव, जरित्रे=स्तुति गानेवाले को ।

हि० अ०—तुम्हारे द्वारा प्रदत्त वह वरणीय धन हम लोगों के लिये आकाश से, जल से तथा पृथिवी से आवे; स्तोताओं के वंश के लिये जो धन है, सुखकर हो; ओ सवितृ, उसे बहुत प्रशंसा करनेवाले तथा स्तुति गानेवाले (मुझको प्रदान करो) ।

Trans.—May that desirable wealth given by thee come to us from heaven, from water and from earth ; (the wealth) which is auspicious to the race of chanting priests, O Savitar, (bestow on us) the singer, of wide praise.

Notes—गात्—See II. 38.8. आपये—According to Sāyaṇa आपि means 'descendents' ; Peterson takes it to mean 'patrons' and Griffith as 'friends'. भवाति—√*bhū*

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

to be, pres. subju. 3rd. sing. ; not unaccented because preceded by यत्. उरुशंसाय—Bahuvrīhi compd. accented on the second member. शम् यत्··· जरित्रे—Wilson following Sāyaṇa translates : 'and may the happiness which belongs to the race of those who eulogise thee devolve upon me repeating diligently thy praise' ; Griffith renders, 'that it be well with friends and those who praise thee and Savitar, with loud-lauding singer'. According to Peterson, 'as would bring back to the chanting priests to the patron and to the singer, eloquent in speech'.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'प्र पर्वतानाम्' इति त्रयोदशर्चं चतुर्थं सूक्तम्। अत्रेयमनुक्रमणिका—'प्र पर्वतानां सप्तोना संवादो नदीभिर्विश्वामित्रस्योत्तितीर्षोस्तत्र नदीवाक्यं चतुर्थी-षष्ठ्यष्टमीदशम्यः षष्ठीसप्तम्योस्त्विन्द्रस्तुतिरन्त्यानुष्टुप्' इति। अत्र चतुर्थी-षष्ठ्यष्टमीदशमीनां नदीवाक्यत्वान्नद्य एव ऋषयः शिष्टानां विश्वामित्रवाक्य-त्वात्स एव ऋषिः। अन्त्यानुष्टुप् शिष्टास्त्रिष्टुभः। इन्द्रो देवता। यद्यपि षष्ठ्यां सप्तम्यां च विश्वामित्रो नद्यश्च स्तूयन्ते तथापीन्द्र एव देवता। सूक्त-विनियोगो लैङ्गिकः। पुरा किल विश्वामित्रः पैजवनस्य सुदासो राज्ञः पुरोहितो बभूव। स पौरोहित्येन लब्धधनः सर्वं धनमादाय विपाट्छुतुद्र्योः संभेदमाययौ अनुययुरितरे। अथोत्तितीर्षुर्विश्वामित्रः अगाधजले ते नद्यौ दृष्ट्वा उत्तरणार्थम् आद्याभिः तिसृभिस्तुष्टाव॥

प्र। पर्वतानाम्। उशती इति। उपऽस्थात्। अश्वे इवेत्यश्वे-ऽइव। विषिते इति विऽसिते। हासमाने इति॥ गावाऽइव। शुभ्रे इति। मातरा। रिहाणे इति। विऽपाट्। शुतुद्री। पयसा। जवेते इति॥१॥

सा० भा० पर्वतानां गिरीणां शैलानाम् उपस्थात् उत्सङ्गान्निर्गत्य उशती समुद्रगमनं कामयमाने। गमने दृष्टान्तः। अश्वे इव। यथा विषिते मन्दु-रातो विमुक्ते हासमाने अन्योन्यजवेन स्पर्धमाने। यद्वा हृष्यन्त्यावश्वे इव वडवे इव त्वरया गच्छन्त्यौ परस्परं हृष्यन्त्यौ। तथा गावेव शुभ्रे। यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने। किंच मातरा। यथा मातरौ धेनू रिहाणे। अन्तर्णीतसन्नर्थो लिहिः। वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत् समुद्रं गन्तुं जवात् गच्छन्त्यौ पयसा संयुक्ते विपाट्। कूलविपाट-नात् विपाशनाद्वा विमोचनाद्वा विपाट्। शुतुद्री। शु क्षिप्रं तु तुन्ना तुन्नेव द्रवति गच्छतीति शुतुद्री। एतन्नामके नद्यौ प्र जवेते समुद्रं प्रति शीघ्रं गच्छतः। अत्र निरुक्तं—'पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते' (निरु०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९.३९) इति। उशती। 'वश कान्तौ'। अस्य शतुर्ङित्त्वात् 'ग्रहिज्यावयि' इत्यादिना संप्रसारणम्। विषिते। 'षिञ् बन्धने' इत्यस्य कर्मणि निष्ठा। संहितायां 'परिनिविभ्यः सेवसितसयसिवुसह' इत्यादिना षत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः। हासमाने। हासतिः स्पर्धाकर्मा हसे हसने वा। शानच्। तस्य लसार्वधातुकस्वरे कृते धातुस्वरः। रिहाणे। 'लिह आस्वादने'। स्वरितेत्त्वादुभयपदी। शानच्। अदादित्वाच्छपो लुक्। लकारस्य रेफश्छान्दसः। रेफमवलम्ब्य णत्वम्। चित्त्वादन्तोदात्तः। विपाट्। 'पट गतौ' 'पश बाधनस्पर्शयोः' इति वा ण्यन्तावेतौ विपूर्वौ शकारस्य व्रश्चादिना षत्वम्। शुतुद्री। छान्दसी रूपसिद्धिः। जवेते। जुङ् गतौ' भौवादिः। ङित्त्वादात्मनेपदम्। 'आतो ङितः' इति इयादेशः। निघातः॥

शब्दा०—पर्वतानाम्=पर्वतों की, उशती=इच्छा करती हुई, उपस्थात्=गोद से, अश्वे इव=दो घोड़ियों की तरह, विसिते=खुले लगाम वाली, हासमाने=परस्पर स्पर्धा से दौड़ती हुई, गावेव=दो गायों की तरह, शुभ्रे=सफेद रंग की, मातरा=मातायें, रिहाणे=चाटती हुई, विपाट्=विपाट् नामकी सिन्धु की सहायक एक नदी, शुतुद्री=शुतुद्री नामकी सिन्धु की एक सहायक नदी, पयसा=जल के प्रवाह से, प्र जवेते=तेजी से बह रही हैं।

हि० अ०—पर्वतों की गोद से निकल कर, (समुद्र की ओर जाने की) इच्छा करती हुई, (परस्पर) स्पर्धा से दौड़ती हुई, खुले बाग वाली दो घोड़ियों की तरह, (बछड़े को) चाटती हुई दो सफेद माता गायों की तरह, विपाट् और शतुद्री (अपने) प्रवाह से तेजी से बह रही हैं।

Trans.—From the lap of mountains, longing (to reach ocean), like two mares let-loose like two white mother cows, licking (the calf), Vipāt and Śutudrī flow rapidly with their water.

Notes—उशती—√*vaś* to desire, pres. part. fem. उ is the Samprasāraṇa of व; final ई forming dual is Pragṛhya ; hence, इति in the Pada-text. अश्वे इव—ए of the अश्वे is Pragṛhya ; hence, इति should be added after it, but it is added after इव beause it is a

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नित्य समास; and the repetition of अश्वे इव after इति is with a veiw to analyse the compound. विसिते—Past part. from √*sā* or √si with वि to let-loose ; final ए is Pragṛhya ; hence, इति in the Pada-text; the repetition being with a view to analyse the compound. हासमाने —√*hās* to contend, to run a race, pres. part.; final ए is Pragṛhya. रिहाणे—√*rih* (class. lih) to lick, pres. part.; final ए is Pragṛhya. जवेते—√*jū* to speed, pres. mid. 3rd. dual ; final ए is Pragṛhya.

इन्द्रेषिते इतीन्द्रऽइषिते । प्रऽसवम् । भिक्षमाणे इति । अच्छ । समुद्रम् । रथ्याऽइव । याथः ॥ समाराणे इति समऽआराणे । ऊर्मिऽभिः । पिन्वमाने इति । अन्या । वाम् । अन्याम् । अपि । एति । शुभ्रे इति ॥२॥

सा०भा०—हे नद्यौ इन्द्रेषिते इन्द्रेण प्रेषिते प्रसवं तस्येन्द्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने युवां समुद्रम् अच्छ आभिमुख्येन याथः गच्छथः । तत्र दृष्टान्तः । रथ्येव इति । यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत् । किं कुर्वत्यौ । समाराणे परस्परं संगच्छन्त्यौ ऊर्मिभिः तरङ्गैः पिन्वमाने परिसर-प्रदेशं संतर्पयन्त्यौ शुभ्रे शोभमाने । युवां समुद्रं गच्छथ इति पूर्वेणान्वयः । तथा वां युवयोर्मध्ये अन्या एका अन्याम् अपरां नदीम् अप्येति अपिगच्छति । परस्पर-मैक्यमापद्यत इत्यर्थः । इन्द्रेषिते । 'इष गतौ' इत्यस्य कर्मणि निष्ठाया, 'तीषसह' इत्यादिना इडागमः । 'तृतीया कर्मणि' इति पूर्वपदस्वरः । प्रसवम् । 'षू प्रेरणे' इत्यस्य अप् । थाथादिस्वरः । भिक्षमाणे । 'भिक्ष याच्ञायाम्' । आत्मनेपदी । शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः । रथ्येव । रथस्येमौ । तस्येदम् इत्यर्थे 'रथाद्यत्' इति यत्प्रत्ययः । तित्स्वरितः । इवेन विभक्त्यलोपः इत्यादि । याथः । यातेर्लटि रूपम् । समाराणे । 'ऋ गतौ' इत्यस्य लिट् । संपूर्वस्यार्तेः 'समो गमि' इत्यादिना आत्मनेपदत्वात् तस्य कानजादेशः । 'ऋच्छत्पृताम्' इति गुणः । पिन्वमाने । 'पिवि सेचने' । भ्वादिः । लसार्वधातुकस्वरेण शानचो-ऽनुदात्तत्वे धातुस्वरः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा० इन्द्रेषिते=इन्द्र के द्वारा भेजी गई, प्रसवम्=प्रवाहित होने के लिये, भिक्षमाणे=प्रार्थना करती हुई, अच्छ=ओर, समुदम्=समुद्र की, रथ्येव=दो रथियों की तरह, याथः=जा रही हो, समाराणे=एक साथ जाती हुई, ऊर्मिभिः=लहरों से, पिन्वमाने=उमड़ती हुई, अन्या=एक, वाम्=तुम दोनों में से, अन्याम्=दूसरे के पास, अपि=भी, एति=जा रही है, शुभ्रे=ओ सफेद वर्ण वाली।

हि० अ०—इन्द्र द्वारा भेजी गई, बहने के लिये प्रार्थना करती हुई, दो रथियों की तरह समुद्र की ओर जा रही हो। एक साथ जाती हुई, लहरों से उमड़ती हुई, तुममें से प्रत्येक एक दूसरे की ओर जा रही हो।

Trans.—Sped by Indra, seeking acceleration (you two) are approaching the ocean like two charioteers. Going together, swelling with torrents, each of you flows, into the other, O beautiful ones,.

Notes—इन्द्रेषिते—√*iṣ* to send, past part. Tatpuruṣa compd. accents the second member, but when the first member is in instrumental form, and second member a participle in passive sense, it accents the first member (तृतीया कर्मणि Pāṇ. VI. 2.48) ; final ए is Pragṛhya. प्रसवम्—'Commandment' (Sāyaṇa), 'acceleration' (Peterson); from √*sū* to impel. भिक्षमाणे—√*bhikṣ* to beg, pres. part, ; final ए is Pragṛhya. याथः—√*yā* to go, pres. 2nd. dual. समाराणे—√*ṛ* with सम् to go together, perf. part. ; final ए is Pragṛhya. पिन्वमाने—√*pinv* to fatten, pres. part. ; final ए is Pragṛhya. एति—√*i* to flow into, pres. 3rd. sing.

अच्छ। सिन्धुम्। मातृऽतमाम्। अयासम्। विऽपाशम्। उर्वीम्। सुऽभगाम्। अगन्म॥ वत्समऽइव। मातरा। संरिहाणे इति सम्ऽरिहाणे। समानम्। योनिम्। अनु। संचरन्ती इति सम्ऽचरन्ती ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—हे नद्यौ मातृतमाम् अतिशयेन मातरं सिन्धुं स्रवन्तीं शुतुद्रीं त्वाम् अच्छ आभिमुख्येन अयासं विश्वामित्रोऽहं प्राप्तोऽभूवम्। उर्वीं महतीं सुभगां सौभाग्यवतीं विपाशं त्वाम् अगन्म वयं प्राप्ताः स्म। किं कुर्वत्यौ। मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे अन्तर्णीतसन्नर्थो लिहिः। जिह्वया लेढुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत् समानम् एकं योनिं स्थानं समुद्रम् अनु अभिलक्ष्य संचरन्ती सम्यक् चरन्त्यौ। युवामयासिषमिति पूर्वेणान्वयः। अयासम्। 'या प्रापणे' इत्यस्य रूपम्। इडभावश्छान्दसः। अगन्म। गमेर्लङि 'बहुलं छन्दसि' इति शपो लुक्। 'स्वोश्च' इति मकारस्य नकारः। निघातः। संचरन्ती। चरतिर्गत्यर्थः। तृतीयायुक्तत्वाभावात् आत्मनेपदाभावः। शतुर्लसार्वधातुकस्वरेणानुदात्तत्वे कृते धातुस्वरः॥

शब्दा०—अच्छ=ओर, सिन्धुम्=नदी मातृतमाम्=श्रेष्ठ माता, अयासम्=आया हूँ, विपाशम्=विपाट् नदी, ऊर्वीम्=चौड़ी, सुभगाम्=सुन्दर, सौभाग्यवती, अगन्म=आया हूँ, वत्समिव=बछड़े की तरह, मातरा मातायें, संरिहाणे=एक साथ चाटती हुई, समानम्=समान, योनिम्=स्थान, अनु=लक्ष्य कर, संचरन्ती=एक साथ बहती हुई।

हि० अ०—श्रेष्ठ नदी माता (शुतुद्री) के पास आया हूँ; चौड़ी तथा सुन्दर विपाट् के पास आया हूँ; बछड़े को चाटती हुई दो माताओं की तरह, एक ही स्थान (समुद्र को लक्ष्य कर) बहती हुई (शुतुद्री और विपाट् के पास आया हूँ)।

Trans.—I have approached the most motherly rivers (Śutudrī). We have come to the broad and beautiful Vipāṭ, like two mothers licking their calf, flowing along a common bed.

Notes—अयासम्—√*yā* with अच्छ to approach, 's'-aorist, 3rd. sing. सुभगाम्—Bahuvrīhi compd. accented on the second member. संरिहाणे—See III. 33.1. अगन्म—√*gam* to go, root—aorist 1rst. plu. संचरन्ती—√*car* to move, pres. part. fem.; final ई is Pragṛhya.

एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः॥ न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति॥४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः। एना एनेन पयसा पिन्वमानाः संतर्पयन्त्यः देवकृतं देवेनेन्द्रेण कृतं संदिष्टं योनिं स्थानं समुद्रम् अनु लक्षीकृत्य चरन्तीः गच्छन्त्यः वयम् आस्महे। द्वयोर्बहुवचनं पूजार्थम्। तासामस्माकं सर्गतक्तः सर्गे गमने प्रवृत्तः प्रसवः उद्योगः न वर्तये निवर्तनाय न भवति। किंयुः किमिच्छन् असौ विप्रः ब्राह्मणः नद्यः नदीः अस्मान् जोहवीति भृशमाह्वयति। एना। एतच्छब्दस्य तृतीयाया एनादेशः। 'सुपां सुलुक्' इति तृतीयाया आजादेशः। 'उडिदम्' इति विभक्तेरुदात्तत्वम्। पिन्वमानाः। 'पिवि सेचने'। देवकृतम्। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। वर्तवे। 'वृतु वर्तने'। तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। सर्गतक्तः। 'क्ते च' इति पूर्वपदप्रकृतिस्वरः। किंयुः। किमिच्छन्। 'क्यचि मान्ताव्ययप्रतिषेधः' (पा० सू० ३. १. ८. १) इति छान्दसत्वादत्र प्रतिषेधो न भवतीति क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। प्रत्ययस्वरः नद्यः। छान्दसो यणादेशः। जोहवीति। ह्वेञः यङ्लुकि 'अभ्यस्तस्य च' इति संप्रसारणे कृते 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः। 'यङो वा' इति इडागमः। गुणः। निघातः।

शब्दा० - एना=ऐसी,वयम=हम लोग, पयसा=धारा से, पिन्वमानाः=उमड़ती हुई, अनु=लक्ष्य कर, योनिम्=स्थान को, देवकृतम्=देवताओं द्वारा निर्मित, चरन्तीः=विचरण करती हुई, न=नहीं, वर्तवे=रुकने के लिये, प्रसवः=गति, सर्गतक्तः=स्वाभाविक रूप से प्रवाहित, किंयुः=किस इच्छा से, विप्रः=ब्राह्मण, नद्यः=नदियों की, जोहवीति=बार-बार स्तुति कर रहा है।

हि० अ०—ऐसी हम लोग, अपनी धारा से उमड़ रही हैं तथा देवताओं द्वारा निर्मित स्थान पर चल रही हैं। स्वाभाविक रूप से प्रवाहित हमलोगों की गति रुकने के लिये नहीं है। किस इच्छा से ऋषि (विश्वामित्र) नदियों की बार-बार स्तुति कर रहा है।

Trans.—We (as such are) swelling with this torrent flowing in a common bed fashioned by god (Indra). Our torrent rushing with its natural urge, is not be to stopped. With what desire the inspired one does invoke frequently.

Notes—देवकृतम्—Sāyaṇa understands it as fashioned by Indra; for accent see इन्द्रेषिते (III. 33.2).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरन्ती—See संचरन्ती (III. 33.3.) वर्तवे—Dative infinitive in तवे from √*vṛt* to turn. सर्गतक्तः—Sāyaṇa explains it as सर्गे गमने प्रवृत्तः'; Wilson takes it to mean 'appointed for our going', Griffith as 'urged to motion' and Peterson as 'rushing with its original urge ; Tatpuruṣa compd. having first member dative in sense and second, past part., accent the first member (क्ते च—Pāṇ. VI. 2.45) किंयुः—यु is a desiderative suffix which being added to the stem gives the sense of desiring (cf. अवस्यु, श्रवस्यु, देवयु etc.). जोहवीति—√*hū* to call inte. pres. 3rd. sing.

रमध्वम् । मे । वचसे । सोम्याय । ऋतऽवरीः । उप । मुहूर्तम् । एवैः ॥ प्र । सिन्धुम् । अच्छ । बृहती । मनीषा । अवस्युः । अह्वे । कुशिकस्य । सूनुः ॥५॥

सा० भा०—विश्वामित्रो नदीः प्रति ब्रूते । ऋतावरीः । ऋतमुदकम् तद्वत्यो हे नद्यो यूयं मे विश्वामित्रस्य मम सोम्याय । उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने वचसे तदर्थम् एवैः । पञ्चम्यर्थे तृतीया । शीघ्रगमनेभ्यः मुहूर्तं मुहूर्तमात्रम् उप रमध्वम् । उपपूर्वो रमिरूपसंहारे वर्तते । क्षणमात्रं शीघ्रगमनादुपरता भवत । सामान्येन नदीषूच्यमानासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते । कुशिकस्य राजर्षेः सूनुः विश्वामित्रोऽहं बृहती महत्या मनीषा मनीषया स्तुत्या अवस्युः आत्मनो रक्षणमिच्छन् सन् सिन्धुं शुतुद्रीं त्वाम् अच्छ आभिमुख्येन प्र अह्वे प्रकर्षेणाह्वयामि । अत्र निरुक्तम्—'उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवस्य ऋतमित्युदकनाम प्रत्पृतं भवति मुहूर्तमेवैरयनैरवनैर्वा । प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः । कुशिको राजा बभूव (निरु० २. २५) इति । रमध्वम् । 'रमु उपरमे' । उपपूर्वाद्रमतेः 'विभाषाकर्मकात्' (पा० सू० १. ३. ८५) इत्यात्मनेपदम् । ऋतावरीः ऋतशब्दान्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप् । 'वनो र च' इति ङीप् रेफश्चान्तादेशः । 'वा छन्दसि' इति सवर्णदीर्घः । आमन्त्रितस्य पादादित्वात् षाष्ठिकमाद्युदात्तत्वम् । एवैः । 'इण् गतौ' । 'इण्शीङ्भ्यां वन्' । आर्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातुकलक्षणो गुणः । नित्स्वरः । बृहती मनीषा । उभयत्र तृतीयायाः पूर्वसवर्ण-दीर्घः । अवस्युः । अवो रक्षणमिच्छन् । सुप आत्मनः क्यच् । 'नः क्ये' इति नकारान्तस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुर्न भवति । 'क्याच्छन्दसि' इत्युप्रत्ययः । अह्वे । ह्वयतेर्लुङि सिचः 'आत्मनेपदेष्वन्यतरस्याम्' इत्यङादेशः । गुणः । निघातः ॥५॥

शब्दा० - रमध्वम्=रुक जावो, मे=मेरे, वचसे=वचन के लिये, सोम्याय=सोम भरे, ऋतावरीः=ओ पवित्र जलवाली, मूहूर्तम्=थोड़े देर के लिये, एवैः=जाने से, सिन्धुम्=नदी को, अच्छ=लक्ष्य कर, बृहती=ऊँची, मनीषा=स्तुति से, अवस्युः=सहायता चाहनेवाला, प्र अह्वे=आह्वान किया हूँ, कुशिकस्य=कुशिक का, सूनुः=पुत्र ।

हि० अ० - ओ पवित्र जलवाली, सोम-भरे मेरे वचनों (के आदर) में अपनी यात्रा से क्षण भर के लिये रुक जावो । (अपनी) सहायता का इच्छुक, कुशिक का पुत्र (मैंने) ऊँची स्तुति से नदी (शुतुद्री) का आह्वान किया है ।

Trans.—O of holy waters, in deference to my speech, accompanied with soma, stop for a moment from your courses. With a sublime hymn, desirous of (our) protection (I) the son of Kuśika have invoked the river (Śutudrī).

Notes—रमध्वम् – √*ram* to stop, impv. 2nd plu. एवैः—From √*i* to go. अवस्युः—See क्रियुः (III. 33.4.). अह्वे—√*hū* to call, 'a'-aorist, mid, 1rst. sing.

इन्द्रः । अस्मान् । अरदत् । वज्रऽबाहुः । अप । अहन् । वृत्रम् । परिऽधिम् । नदीनाम् ॥ देवः । अनयत् । सविता । सुऽपाणिः । तस्य । वयम् । प्रऽसवे । यामः । उर्वीः ॥६॥

सा० भा०—नद्यः प्रत्यूचुः । हे विश्वामित्र वज्रबाहुः वज्रयुक्तो बाहुर्यस्यासौ वज्रबाहुः । तादृशो बलवान इन्द्रः नदीः अस्मान् अरदत् । रदतिः खनतिकर्मा । अखनत् । कथमखनत् । उच्यते । नदीनां शब्दकारिणीनामपां परिधिं परितो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निहितमुदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः। तादृशं वृत्रम्। वृणोत्याकाशमिति वृत्रो मेघः। तं मेघम् अपाहन् जघान। तस्मिन् हते आपः पतिताः। ताभिर्गच्छन्तीभिर्वयं खाताः। एवं मेघहननद्वारेणाखनत्। न केवलमखनत् किं तर्हि सविता सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात्तादृशः देवः द्योतमानः इन्द्रः अस्मान् अनयत्। मेघभेदनं कृत्वोदकप्रेरणेन समुद्रमपूरयत्। तस्य तादृशसामर्थ्योपेतस्य इन्द्रस्य प्रसवे अभ्यनुज्ञायां वर्तमानाः ऊर्वीः उदकैः प्रभूताः वयं यामः गच्छामः। न तव वचनादुपरमामहे। उक्तार्थं यास्को ब्रवीति 'इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनतिकर्मपाहन्वृत्रं परिधिं नदीनामिति व्याख्यातम्। देवोऽनयत्सविता सुपाणिः कल्याणपाणिः। पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति। तस्य वयं प्रसवे याम उर्वीरुर्व्यः (निरु० २. २६) इति। अरदत्। रदतेर्लङि रूपम्। वज्रबाहुः बहुव्रीहौ पूर्वपदस्वरः। अहन्। हन्तेर्लङि रूपम्। निघातः। परिधिम्। 'डुधाञ् धारणपोषणयोः' इत्यस्मात् कर्मण्युपसर्गे 'घोः किः' इति किप्रत्ययः। आतो लोपः। कृदुत्तरपदस्वरः। अनयत्। नयतेर्लङिरूपम् सुपाणिः। 'पण व्यवहारे स्तुतौ च'। 'अशिपणाय्यो रुडायलुकौ च' (उ० सू० ४. ५७२) इतीण्। आयलुक्। बहुव्रीहौ 'नञ्सुभ्याम्' इति स्वरः। प्रसवे 'षू प्रेरणे'। 'ऋदोरप्' इति भावेऽप्प्रत्ययः। 'थाथघञ्क्ता' इत्युत्तरपदान्तोदात्तत्वम्। यामः। 'या प्रापणे' इत्यस्य लटि रूपम्। निघातः। उर्वीः। उरुशब्दात् 'वोतो गुणवचनात्, इति ङीष्। 'वा छन्दसि' इति सवर्ण दीर्घः। प्रत्ययस्वरः।

शब्दा०—इन्द्रः=इन्द्र ने, अस्मान्=हम लोगों को, अरदत्=खोदकर बाहर किया, वज्रबाहुः=हाथ में वज्र धारण करनेवाले ने, अप अहन्=मारा, वृत्रम=वृत्र नामक असुर को, परिधिम्=घेरनेवाला, नदीनाम्=नदियों का, देवः=देव ने, अनयत्=लाया, सविता=सवितृ ने, सुपाणिः=सुन्दर हाथवाले, तस्य=उनकी, वयम्=हमलोग, प्रसवे=आज्ञा में, यामः=जा रही हैं, उर्वीः=चौड़ी।

हि० अ०—हाथ में वज्र धारण करनेवाले इन्द्र ने हमको खोद कर बाहर किया। उसने नदियों को घेरनेवाले वृत्र को मारा। सुन्दर हाथवाले सवितृ देव ने हम लोगों को लाया। हम जितनी चौड़ी है, उसी की आज्ञा में (निरन्तर) बहती हैं।

Trans.—The thunder-armed Indra drag us out. He slew the Vṛtra the encompasser of the rivers.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Beautiful-handed god Savitar led us. We flow, broad as we are, in his command.

Notes—अस्माँ अरदत्—For sandhi see Appendix A. under आन्पद-पद-वृत्ति. अरदत्—√*rad* to dig, impf. 3rd. sing. अहन्—See I. 32. 1. परिधिम्—From √*dhā* with परि to surround. अनयत्—√*nī* to lead, impf. 3rd. sing. याम—√*yā* to go, pres. 1rst. plu.

प्रऽवाच्यम् । शश्वधा । वीर्यम् । तत् । इन्द्रस्य । कर्म । यत् । अहिम् । विऽवृश्चत् ॥ वि । वज्रेण । परिऽसदः । जघान । आयन् । आपः । अयनम् । इच्छमानाः ॥७॥

सा० भा०—योऽयमिन्द्रः अहिं मेघं विवृश्चत् उदकप्रेरणार्थं जघानेति यत् कर्म छेदनरूपं तत् इदम् तस्य इन्द्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यं प्रकर्षेण वचनीयम् । तथा स इन्द्रः परिषदः परितः सीदत आसीनान् प्रतिबन्धकारिणोऽसुरान् वज्रेण वि जघान । अथ अयनं स्थानम् इच्छमानाः इच्छन्त्यः आपः आयन् यान्ति । प्रवाच्यम् । 'वच परिभाषणे' इत्यस्मात् 'ऋहलोर्ण्यत्' इति ण्यत् । णित्त्वादुपधावृद्धिः । 'वचोऽशब्दसंज्ञायाम्' (पा० सू० ७. ३. ६७) इति कुत्वाभावः । व्यत्ययेनाद्युदात्तत्वम् । यद्वा वाचयतेः 'अचो यत्' । 'यतोऽनावः' इति स्वरः । शश्वधा । शश्वच्छब्दात् स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः । विवृश्चत् । 'ओव्रश्चू छेदने' । तुदादिः । लङि 'ग्रहिज्यावयि' इत्यादिना संप्रसारणम् । 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः । समासस्वरः । परिषदः । क्विप् । संहितायां 'सदिरप्रतेः' इति षत्वम् । जघान हन्तेर्लिटिणलि रूपम् । निघातः । आयन् । 'अय गतौ' इत्यस्य लङि रूपम् । पादादित्वादनिघातः । इच्छमानाः । इषु इच्छायाम् इत्यस्मात् व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः ॥

शब्दा० – प्रवाच्यम्—कहने योग्य, शश्वधा=सर्वदा, वीर्यम्=पराक्रमयुक्त, तत्=वह, इन्द्रस्य=इन्द्र का, कर्म=कार्य, यत्=जो, अहिम्=अहि नामक असुर को जिसने जल को रोक रखा था, विवृश्चत्=काट डाला, वज्रेण =वज्र से, परिसदः=प्रतिबंधकों को, वि जघान=मारा, आयन्=प्रवाहित हुआ, आपः=जल, अयनम्=मार्ग, इच्छमानाः=ढूंढ़ता हुआ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—इन्द्र का वह पराक्रम युक्त कार्य, जो उसने अहि को मारा, अवश्य कहने योग्य है। उसने वज्र से (जल के) प्रतिबंधकों को काट डाला। जल अपना मार्ग खोजता हुआ प्रवाहित हुआ।

Trans.—That heroic deed of Indra that he rent into pieces the dragon, must be proclaimed for ever. He smote away the obstructors (of waters) with his thunderbolt. Waters flowed seeking their way.

Notes—प्रवाच्यम्—Gerundive in य from √*vac* to speak. वीर्यम्—See वीर्याणि (I.32.1) ; also see note on उक्थ्यम् (I. 48.12). विवृश्चत्—√*vraśc* to cut up, impf. 3rd sing. ; not unaccented because preceded by यत्. जघान—See I. 32. 7. आयन्—√*i* to go, impf. 3rd. plu.; not unaccented because it begins the Pāda अयनम्—Way, course ; from √*i* to go. इच्छमानाः—√*icch* to desire, pass. part.

एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते । घोषान् । उत्ऽतरा । युगानि ॥ उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि । करिति कः । पुरुषऽत्रा । नमः । ते ॥८॥

सा० भा०—नद्यः प्रसङ्गादिन्द्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः। जरितः स्तोतः हे विश्वामित्र ते त्वदीयं यत् संवादात्मकं वचः त्वं नः अभीत्या घोषान् उद्घोषयन् वर्तसे तद्वचः मापि मृष्ठाः मा विस्मार्षीः। किं कारणम्। उत्तरा युगानि उत्तरेषु याज्ञिकेषु युगेषु अहःसु उक्थेषु कारो शस्त्राणां कर्तस्त्वं नः अस्मान् प्रति जुषस्व संवादात्मकेन तेन वाक्येन प्रतिसेवस्व। इदानीं नः अस्मान् पुरुषत्रा पुरुषेषु मा नि कः। उक्तिप्रत्युक्तिरूपसंवादवाक्याध्यापनेन नितरां पुंवत् प्रागल्भाः मा कार्षीः। ते तुभ्यं नमः। मृष्ठाः। 'मृजूष् शुद्धौ' इत्यस्य लङि व्यत्ययेन आत्मनेपदम्। अदादित्वाच्छपो लुक्। व्रश्चादिना षत्वम्। निघातः। घोषान्। 'घुषिर् संशब्दने' इत्यस्य शतरि सर्वविधीनां छन्दसि विकल्पितत्वात् 'अतो गुणे' इति पररूपत्वाभावः। सवर्णदीर्घः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शतुर्लसार्वधातुकस्वरे कृते धातुस्वरः। युगानि। 'युजिर् योगे'। उञ्छादिषु घञन्तत्वेन निपातनादगुणत्वम्। विशिष्टविषयं च निपातनमिष्यते। 'कालविशेषे रथाद्युपकरणे च' इति तत्र पाठादेवान्तोदात्तत्वम्। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। कारो। करोतेः 'कृवापाजिमि' इत्यादिना उण्प्रत्ययः। आमन्त्रितत्वान्निघातः। कः करोतेर्लुङि च्लेः 'मन्त्रे घस्' इत्यादिना लुक्। हल्ङ्यादिना सिचो लोपः। 'न माङ्योगे' इत्यडभावः। पुरुषत्रा। 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' इति सप्तम्यर्थे त्राप्रत्ययः। प्रत्ययस्वरः॥

शब्दा०—एतत=इस, वचः=वचन को, जरितः=ओ स्तुतिगायक, मा=मत, अपि=कभी भी, मृष्ठाः=भूलो, यत्=जिससे, ते=तुम्हारे वचन को, आ घोषान्=सुन सकें, उत्तरा=भावी, युगानि=युगों के व्यक्ति, उक्थेषु=स्तुतियों में, कारो=ओ कवि, प्रति=लिये नः=हमारे, जुषस्व=आदर करो, मा=मत, नः=हमलोगों को, नि कः=नीचे करो, पुरुषत्रा=पुरुषो में, नमः=नमस्कार है, ते=तुमको।

हि० अ०—ओ स्तुति गायक, इस वचन को मत भलो ताकि भावी युगों के लोग इसे सुन सकें। ओ कवि, अपनी स्तुतियों में हमारा आदर रखो। हमलोगों को (उक्ति प्रत्युक्ति द्वारा) मनुष्यों (की कोटि) में मत लावो; (हम लोगों का) तुम्हें नमस्कार है।

Trans.—O singer, never forget this word of thine (so) that (men of) future ages may hear it. O poet, in prayers be favourable to us. Do not make us down amongst men; we bow unto thee.

Notes—जरितः—Voc. sing. of जरितृ from √*jṛ* to sing. मृष्ठाः—√*mṛs* to forget, root-aorist, 2nd. sing. injun. घोषान्—√*ghus* with आ to listen, pres. subju. 3rd. plu.; not unaccented because preceded by यत्. Sayaṇa takes घोषान् as a participle and renders as 'उद्घोषयन्'; Grassmann takes घोषान् to mean 'proclaim loudly', Geldner as 'listen', Wilson as 'words' Griffith as 'reecho' and Peterson as 'listen'. कारो—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Final ओ is Pragṛhya only before इति in the Pada-text (सम्बुद्धौ शाकल्यस्येतावनार्षे—Pāṇ I. 1.16). प्रति जुषस्व—√*juṣ* with प्रति to show affection to, to be favourable, impv. mid. 2nd. sing. कः—√*kṛ* to make, root-aorist injun. 2nd. sing. Vide Appendix 'B' under the rules of rendering Sanihitā-text into Pada-text. पुरुषत्रा —See note on पुरुत्रा (I. 32.7).

ओ इति । सु । स्वसारः । कारवे । श्रृणोत । ययौ । वः । दूरात् । अनसा । रथेन । नि । सु । नमध्वम् । भवत । सुऽपाराः । अधः-ऽअक्षाः । सिन्धवः । स्रोत्याभिः ॥९॥

सा० भा०—विश्वामित्रो नदीः प्रत्युवाच । स्वसारः भगिन्यः सिन्धवः हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सु सुष्ठु ओ श्रृणोत श्रृणुतैव । अनसा शकटेन रथेन च सह दूरात् विप्रकृष्टाद्देशात् वः युष्मान् ययौ प्राप्तोऽस्मि । यूयं सु सुष्ठु नि नमध्वम् आत्मना स्वयं प्रह्वाः भवत । तथा सुपाराः रथादीनां तीरात् सुखेनावरोहणावरोहणे यथा स्यातां तथा शोभनरोधसश्च भवत । किंच यूयं स्रोत्याभिः स्रवणशीलाभिरद्भिः अधोअक्षाः रथाङ्गस्याक्षस्याधस्ताद्भवत । यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते । तस्मात् तत्परिमाणोदकाः भवतेति अर्थाभिप्रायः । ओ इति प्रगृह्यसंज्ञा । श्रृणोत । 'श्रु श्रवणे' इत्यस्य लोटि तप्रत्ययस्य 'तप्तनप्तनथनाश्च' इति तबादेशः । पित्त्वाद्गुणः । निघातः । ययौ । 'या प्रापणे' इत्यस्य भूतमात्रे लिट्युत्तमे णलि 'आत औ णलः' इत्यौकारः एकादेशस्वरः । वः । युष्मच्छब्दस्य द्वितीयायाः 'बहुवचनस्य वस्नसौ' इति वसादेशः । षू । 'निपातस्य' इति संहितायां दीर्घः । नमध्वम् । 'णमु प्रह्वत्वे शब्दे च' इत्यस्य कर्मकर्तरि 'न दुहस्नुनमां यक्चिणौ' इति प्रतिषेधात् यगभावः । अधोअक्षाः अधरशब्दस्य 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' इत्यसिप्रत्ययोऽधादेशश्च । अक्षशब्दः 'अशूव्याप्तौ' इत्यस्मात् 'अशेर्देवने' (उ० सू० ३. ३४५) इति सप्रत्ययान्तः । कृदुत्तरपदप्रकृतिस्वरः । सिन्धवः । आमन्त्रितत्वान्निघातः । स्रोत्याभिः । स्रोतःशब्दात् 'स्रोतसो विभाषा ङ्यङ्ङ्यौ' (पा० सू० ४. ४. ११३) इति ङ्यप्रत्ययः । डित्त्वात् टिलोपः । प्रत्ययस्वरः ॥

शब्दा०—ओ=सम्बोधन का वाचक, स्वसारः=ओ बहनों, कारवे=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कवि की बात, शृणोत=सुनो, ययौ=आया हूँ, वः=तुम लोगों के पास, दूरात् =बहुत दूर से, अनसा=गाड़ी से, रथेन=रथ से, सु=अच्छी प्रकार, नि नमध्वम् =नीचे झुक जावो, भवत=हो जावो, सुपाराः=आसानी से पार करने योग्य, अधोअक्षाः=चक्के के धूरे से नीचे होकर, सिन्धवः=ओ नदियों, स्रोत्याभिः=अपनी जलधारा से।

हि० अ०—ओ सुन्दर बहनों, (मुझ) कवि की (बात) सुनो, (क्योंकि मैं) तुम्हारे पास बहुत दूर से गाड़ी तथा रथ के साथ आया हूँ। अच्छी प्रकार से झुक जावो। ओ नदियों, अपनी जलधारा से अक्ष के नीचे होकर (बहती हुई) आसानी से पार करने योग्य हो जावो।

Trans.—O fair sisters, listen to (me) the poet; (I) have come to you from afar with cart and chariot. Please bend down well and be easily crossable, O rivers, with streams (reaching) below the axle.

Notes—ओ—(=आ+उ) as an independent word ओ is Pragṛhya (पदं चान्यः—Ṛg. Prāt. I. 69); hence, इति is added after it in the Pada-text. शृणोत—√*śru* to hear, impv. 2nd. plu. ययौ—√*yā* to go, perf. 1rst. sing.; not unaccented because it begins the Pāda. नमध्वम्—√nam. to bend, mid. impv. 2nd. plu. भवत—√*bhū* to be, impv. 2nd. plu.; not unaccented because it is regarded as beginning of a new sentence.

आ। ते। कारो इति। शृणवाम। वचांसि। ययाथ। दूरात्। अनसा। रथेन॥ नि। ते। नंसै। पीप्यानाऽइव। योषा। मर्यायऽइव। कन्या। शश्वचै। त इति ते॥१०॥

सा० भा०—नद्यः पूर्वं विश्वामित्रं प्रत्याख्यायानयर्चां तस्य वाक्यमाशुश्रुवुः। कारो स्तोत्रं कुर्वाण हे विश्वामित्र ते तव वचांसि इमानि वाक्यानि आ शृणवाम शृणुमः। तव समीहितं प्रयोजनं कुर्म इत्यर्थः। अनसा शकटेन रथेन च सह ययाथ। यतो दूरात् आगतोऽसि। वयं च ते त्वदर्थं नि नंसै नीचैर्नमाम। प्रत्येकविवक्षया अत्रैकवचनम्। रथेन गन्तुं गाधोदका भवामेत्यर्थः। तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दृष्टान्तः। पीप्यानेव योषा। पीप्याना पुत्रं स्तनं पाययन्ती योषा माता यथा प्रह्वीभवति। दृष्टान्तान्तरम्। यथा कन्या युवतिः मर्यायेव मनुष्याय पित्रे भ्रात्रे वा शश्वचै परिष्वजनाय नम्रीभवति तद्वत् ते त्वदर्थं प्रह्वीभवामः। ते इति पुनरुक्तिरादरार्थम्। एतामृचं यास्क एवं व्याचष्टे – 'आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा' (निरु० २. २७) इति। कारो। 'संबुद्धौ शाकल्यस्येतौ' (पा० सू० १. १. १६) इति प्रगृह्यसंज्ञा। शृणवाम। 'श्रु श्रवणे' इत्यस्य लोटि 'आडुत्तमस्य पिच्च' इत्याडागमः। पित्त्वात् गुणः। निघातः। ययाथ। 'या प्रापणे' इत्यस्य भूतमात्रे लिटि थलि 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेधः। लित्स्वरः। अनसा। सहार्थे तृतीया। नंसै। 'णमु प्रह्वत्वे' इत्यस्य लेटयुत्तमे लेटि सिब्बहुलमिति सिप्। 'वैतोऽन्यत्र' इत्यैकारादेशः। निघातः। पीप्यानेव। 'पीङ् पाने' इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपम्। चित्स्वरः। योषा। 'यु मिश्रणे'। 'वृतृवदिहनि' (उ० सू० ३. ३४२) इत्यादिना सप्रत्ययः। यौतीति योषा। वृषादित्वादाद्युदात्तः। शश्वचै। 'ष्वञ्ज परिष्वङ्गे' इत्यस्मात् संपदादिलक्षणो भावे क्विप्। पृषोदरादित्वादिष्टरूपसिद्धिरन्तोदात्तश्च ॥१०॥

शब्दा०—ते=तुम्हारी, कारो=ओ कवि, आ शृणवाम=सुनती हैं, वचांसि=बातों को, ययाथ=आये हो, दूरात्=दूर से, अनसा=गाड़ी से, रथेन=रथ से, ते=तुम्हारे लिये, नि नंसैः=नीचे झुकती हूँ, पीप्यानेव=दूध भरे स्तनवाली की तरह, योषा=औरत,मर्यायेव=जैसे प्रेमी के लिये, कन्या=युवती, शश्वचै=आलिंगन करने के लिये, ते=तुम्हारे लिये।

हि० अ०—ओ कवि, हम तुम्हारी बातें सुनती हैं, (क्योंकि तुम) बहुत दूर से गाड़ी तथा रथ के साथ आये हो। तुम्हारे लिये मैं नीचे झुकती हूँ जैसे दूध भरे स्तनवाली औरत (अपने पुत्र के लिये) तथा जैसे युवती अपने प्रेमी का आलिंगन करने के लिये (झुकती है)।

Trans.—O poet, we listen your words, (for) you have come from afar with cart and chariot. I bend down for thee as a woman with swelling bossom (for her son), as a maiden to embrace her lover.

Notes—शृणवाम—√*śru* to hear, pres. subju. 1rst. plu. ययाथ—√*yā* to go, perf. 2nd. plu. ; not unaccented

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

because it begins the Pāda. नंसै—√*nam* to bend, 'a'-aorist, mid. 1rst. sing. subju. पीप्याना—√*pyā* to swell, perf. part. fem. मर्याय—Man (Nigh. II. 3.11, Sāyaṇa), 'lover' (Griffith, Peterson). शश्वचै—Sāyaṇa takes it as dative infinitive from √*śvac* to embrace ; according to Macdonell, Peterson etc. it is verbal form (perf. mid. 1rst sing. subju.) not unaccented because it begins a new sentence. ते—Vide Appendix 'B' II. 6. (d)

यत् । अङ्ग । त्वा । भरताः । सम्ऽतरेयुः । गव्यन् । ग्रामः । इषितः । इन्द्रऽजूतः ॥ अर्षात् । अह । प्रऽसवः । सर्गऽतक्तः । आ । वः । वृणे । सुऽमतिम् । यज्ञियानाम् ॥११॥

सा० भा०—विश्वामित्रो नदीः प्रत्युवाच । अङ्ग इत्यामन्त्रणे । हे नद्यः यत् यस्मात् युष्माभिरुत्तितीर्षोः ममोत्तरणमभ्यनुज्ञातं तस्मात् भरताः भरतकुलजा मदीयाः सर्वे त्वा परस्परमेकतामापन्नां नदीं त्वां संतरेयुः सम्यगुत्तीर्णा भवेयुः । तदेव विशिनष्टि । गव्यन् गा उदकानि तरीतुमिच्छन् इषितः त्वयाभ्यनुज्ञातः इन्द्रजूतः युष्माकं प्रवर्तकेनेन्द्रेण च प्रेरितः ग्रामः भरतानां संघः अर्षात् संतरेत् । यतः सर्गतक्तः गमनाय प्रवृत्तः प्रसवः तेषामुद्योगः अह पूर्वं युष्माभिरनुज्ञातः । अहं तु यज्ञियानां यज्ञार्हाणां वः युष्माकं सुमतिं शोभनां स्तुतिम् आ वृणे सर्वतः संभजे । भरताः । भरतशब्दादुत्सादित्वादञ् । तस्य 'यञञोश्च' इति लुक् । अतच्प्रत्ययस्वरः । संतरेयुः । तरतेर्लिङि जुसि रूपम् । झेर्लसार्वधातुकस्वरे धातुस्वरः । 'तिङि चोदात्तवति' इति गतेर्निघातः । गव्यन् । गा आत्मन् इच्छन् । सुपः क्यच् । एकादेशस्वरः । ग्रामः । 'ग्रसतेरा च' (उ० सू० १. १४०) इति मन्प्रत्यय आकारादेशश्च । नित्स्वरः । इन्द्रजूतः । जू इति सौत्रो धातुर्गत्यर्थः । 'श्युकः किति' इति निष्ठायामिट्प्रतिषेधः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः । अर्षात् । 'ऋ गतौ' इत्यस्य लेटि तिपि 'सिब्बहुलम्' इति सिप् । लेट आडागमः । 'एकाचः' इतीट्प्रतिषेधः । गुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वृणे । 'वृङ् संभक्तौ' इत्यस्य लटि रूपम् । यज्ञियानाम् । 'यज्ञर्त्विग्भ्यां घखञौ' इति घप्रत्ययः । प्रत्ययस्वरः ।

शब्दा०—यत्=चूँकि तुम्हारी अनुमति मिल गई है इसलिये, अङ्ग=सम्बोधन का वाचक शब्द, त्वा=तुमको, भरताः=भरतवंशी विश्वामित्र तथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उनके अनुयायी, संतरेयुः=एक साथ पार करें, गव्यन्=पार जाने की इच्छा-वाला, ग्रामः=झुण्ड, इषितः=तुम्हारे द्वारा अनुज्ञात, इन्द्रजूतः=इन्द्र द्वारा भेजा गया, अर्षात्=बहे, अह=एक निपात, प्रसवः=प्रवाह, सर्गतक्तः=स्वाभाविक रूप से प्रवाहित, वः=तुम्हारी, आवृणे=चाहता हूँ, सुमतिम्=समर्थन करनेवाली सुन्दर मति, यज्ञियानाम्=पवित्र नदियों की।

हि० अ०—ओ (नदियों), चूँकि (तुम्हारी अनुमति मिल गई है इस-लिये) भरतवंशी (हमलोग) तुमको पार करें; पार जाने की इच्छावाला (तुम्हारे द्वारा) अनुज्ञात एवं इन्द्र द्वारा भेजा गया, (भरत वंशियों का) झुण्ड (पार करे)। (तुम्हारा) प्रवाह अपनी स्वभाविक गति में प्रवाहित होता हुआ, बहे। मैं पवित्र नदियों का समर्थन चाहता हूँ।

Trans.—O (rivers), since (you have allowed me, so) may Bharatas cross (the rivers); may the band (of Bharatas), seeking to cross (pass over) allowed (by thee) and sped by Indra. May the torrent flow rushing in its natural urge. I seek the favour of holy ones.

Notes—अङ्ग—A particle of address. Macdonell takes it as an emphatic particle and renders it as 'just when', 'just because'. संतरेयुः—√*tṝ* to cross, opt. 3rd. plu.; not unaccented because preceded by यत्. गव्यन्—'Seeking to cross the water' (Sāyaṇa), 'cow-seeking' (Peterson). इन्द्रजूतः—जूत is past part. from √*jū* to speed. For accent see इन्द्रेषितः (III. 33.2). अर्षात्—√*ṛṣ* to rush, pres. subju. 3rd. sing. वृणे—√*vṛ* to choose, pres. mid. 1rst. sing.

अतारिषुः। भरताः। गव्यवः। सम्। अभक्त। विप्रः। सुऽमतिम्। नदीनाम्॥ प्र। पिन्वध्वम्। इषयन्तीः। सुऽराधाः। आ। वक्षणाः। पृणध्वम्। यात। शीभम्॥१२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा० – गव्यवः गा आत्मन इच्छन्तः भरताः भरतकुलजाः सर्वे अतारिषुः तां नदीं समतरन् विप्रः मेधावी विश्वामित्रः नदीनां सुमतिं शोभनां स्तुतिं समभक्त समभजत। यूयं तु यथापूर्वम् इषयन्तीः कुल्यादिद्वारा अन्नं कुर्वाणा अत एव सुराधाः शोभनधनोपेता यूयं वक्षणाः कृत्रिमसरितः कुल्याः प्र पिन्वध्वं प्रकर्षेण तर्पयत। आ पृणध्वं ताः सर्वतः पूरयतः च। शीभं शीघ्रं यात गच्छत च। अतारिषुः। 'तॄफलभजत्रपश्च' इत्यस्य लुङि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः। अडागमस्वरः। गव्यवः। सुपः क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। तस्य स्वरः। अभक्त। 'भज सेवायाम्' इत्यस्य लुङि सिचः 'झलो झलि' इति लोपः। पादादित्वादनिघातः। पिन्वध्वम्। 'पिवि सेचने' इत्यस्य लोटि रूपम्। निघातः। इषयन्तीः। इषं कुर्वत्यः। 'तत्करोति' इति णिच्। 'णाविष्ठवत्प्रातिपदिकस्य' इति इष्ठवद्भावात् 'टेः' इति टिलोपः। 'वा छन्दसि' इति सवर्णदीर्घः। प्रत्ययस्वरः। पृणध्वम्। 'पृण प्रीणने'। लोटि रूपम्। व्यत्ययेनात्मनेपदम्। वाक्यभेदादनिघातः। यात। 'या प्रापणे' इत्यस्य लोटि रूपम्। अत्रापि न निघातः। शीभम्। 'शीभृ कत्थने'। श्लाघ्यतेऽनेन तद्वानिति करणे घञ्। ञित्स्वरः ॥१२॥

शब्दा०—अतारिषुः=पार कर लिया, भरताः=भरतवंशियों ने, गव्यवः =पार जाने की इच्छावाले, समभक्त=प्राप्त कर लिया, विप्रः=ब्राह्मण ने, सुमतिम्=समर्थन, नदीनाम्=नदियों का, प्र पिन्वध्वम्=प्रवाहित होवो, इषयन्तीः=धन लाती हुई, सुराधाः=सुन्दर धनवाली तुमलोग, वक्षणाः= अपनी जगह पर, आ पृणध्वम्=भर जावो, यात=बहो, शीभम्=शीघ्रता से।

हि० अ० – पार जाने की इच्छावाले भरतवंशियों ने पार कर लिया; ब्राह्मण ने नदियों का समर्थन प्राप्त कर लिया। सुन्दर धनवाली (तुमलोग) धन लाती हुई अपनी जगह पर प्रवाहित होवो; भर जावो, शीघ्रता से बहो।

Trans.—The Bharatas, seeking to cross the waters, have crossed; the poet has found the favour of the rivers. (You) possessing of excellent riches, bringing food, swell forth in your bed; overflow; go swiftly.

Notes—अतारिषुः— √*tṛ* to cross, 'iṣ'-aorist, 3rd. plu.
अभक्त – √*bhaj* to divide, mid. 's'-aorist, 3rd. sing.
पिन्वध्वम् – √*pinv* to swell, mid., impv. 2nd. plu.
इषयन्ती —Sāyaṇa takes it as denom. and renders 'अन्नं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुर्वाणा'; Macdonell and Peterson take it as caus. part. from √*iṣ*. Wilson takes it to mean 'dispersing food', Griffith as 'hastening' and Peterson as 'enlivening'. सुराधाः—Possessing excellent wealth; Bahuvrīhi compd. वक्षणा—River-bed. (see I. 32.1). पृणध्वम् — √*pṛṇ* to fill, mid. impv. 2nd. plu.; not unaccented because it is regarded as a new sentence. यात — √*yā* to go impv. 2nd. plu.; not unaccented because it begins a new sentence.

उत् । वः । ऊर्मिः । शम्याः । हन्तु । आपः । योक्त्राणि । मुञ्चत ॥ मा । अदुःऽकृतौ । विऽएनसा । अघ्न्यौ । शूनम् । आ । अरताम् ॥१३॥

सा० भा०—पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वा अधुना उत्तितीर्षुः पुनराह। हे नद्यः वः युष्माकम् ऊर्मिः तरङ्गः शम्याः युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः उत् ऊर्ध्वं यथा भवन्ति तथा हन्तु गच्छतु। स तरङ्गो रज्जूनामधो गच्छत्वित्यभिप्रायः। तथा हे आपः यूयं योक्त्राणि ता रज्जूः मुञ्चत। यथा न स्पृशन्ति तथा यान्त्वित्यभिप्रायः। व्येनसा विगतपापे अत एव अदुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्यौ अघ्न्ये न केनापि तिरस्करणीये विपाट्छुतुद्र्यौ शूनं समृद्धं मा आरताम् आगच्छताम्। एवं विश्वामित्रो नदीः स्तुत्वा ताभिरनुज्ञातोऽतरदिति। ऊर्मिः। 'ऋ गतौ'। अर्तेरूच्च' इति मिप्रत्ययः। 'ऊः' इत्ययमादेशो धातोः। ऋच्छतीत्यूर्मिः। प्रत्ययस्वरः। शम्याः। 'शमु उपशमे'। 'पोरदुपधात्' इति यत्प्रत्ययः। 'यतोऽनावः' इत्याद्युदात्तत्वम्। हन्तु। 'हन हिंसागत्योः' इत्यस्य लोटि रूपम्। निघातः। योक्त्राणि। 'युजिर् योगे'। करणे 'दाम्नीशसयुयुज' इत्यादिना ष्ट्रन्प्रत्ययः। नित्स्वरः। मुञ्चत। 'मुच्लृ मोक्षणे'। निघातः। अदुष्कृतौ। 'इसुसोः सामर्थ्ये' इति विसर्जनीयस्य षत्वम्। व्येनसा। बहुव्रीहौ पूर्वपदस्वरः। सुपो डादेशः। अघ्न्यौ। 'हन हिंसागत्योः' इत्यस्य नञ्पूर्वस्य 'अघ्न्यादयश्च' इति निपातनात् यक्। कित्त्वादुपधालोपः। 'हो हन्तेः' इति घत्वम्। सर्वविधीनां छन्दसि विकल्पितत्वादत्र औङः शीभावाभावः। एकादेशस्वरः। शूनम्। श्वयतेः 'नपुंसके भावे क्तः' इति क्तः। यजादित्वात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संप्रसारणम् । 'हलः' इति दीर्घत्वम् । 'ओदितश्च' इति निष्ठानत्वम् । 'निष्ठा च द्व्यजनात्' इत्याद्युदात्तः । अरताम् । 'ऋ गतौ' इत्यस्य लुङि च्लेः 'सर्ति-शास्त्यर्तिभ्यश्च' इत्यङादेशः । 'ऋदृशोऽङि गुणः' । 'न माङ्योगे' इत्यडभावः । निघातः ॥

शब्दा०—वः=तुम्हारी, ऊर्मिः=धारा, शम्याः=जुवा की कील को, उत् हन्तु=ऊपर से आघात करे, अर्थात् जुवा की कील के नीचे से बहे, आपः =जल, योक्त्राणि=रस्सियों को, मुञ्चत=छोड़ दे, मा=मत, अदुष्कृतौ =कुकृत्यों से रहित, व्येनसा=पापरहित, अघ्न्यौ=तिरस्कार न करने योग्य, शूनम्=वृद्धि, आ अरताम्=प्राप्त करें ।

हि० अ०—तुम्हारी धारा जुवा की कील के नीचे से बहे; जल रस्सी को छोड़ दे, दुष्कृतों से रहित, पाप रहित, तथा तिरस्कार न करने योग्य (ये नदियाँ) वृद्धि न प्राप्त करें ।

Trans.—Let your torrent strike up the yoke-pins (from below). Let the waters leave the yokes. Let not (the rivers), free from evil deeds, sinless, and not to be censured, show increase.

Notes—मुञ्चत् —√*muc* to release, injun. 3rd. plu. शूनम्—'Increase', 'prosperity' (Sāyaṇa) 'waste' (Griffith) 'privation' (Peterson). अरताम्— √*ṛ* to go, 'a'-aorist impv. 3rd. dual.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'अयमिह' इत्येकादशर्चं सप्तमं सूक्तं वामदेवस्यार्षमाग्नेयम् । आद्या जगती द्वितीयाद्याः पञ्चानुष्टुभः शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—'अयमिहादौ जगती पञ्चानुष्टुभः' इति । सूक्तविनियोगो लैङ्गिकः । अग्निप्रणयने 'अयमिह' इति वैश्यस्य प्रतिपत् । तथा च सूत्रितम् —'अयमिह प्रथमो धायि धातृभिरिति तु राजन्यवैश्ययोराद्ये' (आश्व० श्रौ० २. १७) इति ।

अयम् । इह । प्रथमः । धायि । धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ॥ यम् । अप्नवानः । भृगवः । विऽरुरुचुः । वनेषु । चित्रम् । विऽभ्वम् । वशेऽविशे ॥१॥

सा० भा०—धातृभिः यज्ञार्थं कर्म कुर्वद्भिरध्वर्युभिः इह अस्मिन् यज्ञे होता देवानामाह्वाता यजिष्ठः अतिशयेन यष्टा अध्वरेषु यागेषु ईड्यः ऋत्विग्भिः स्तूयमानः प्रथमः सर्वेषां देवानां मुख्यः अयम् आहवनीयादिस्थानेषु प्रत्यक्षेणोपलभ्यमानोऽग्निः धायि अधायि निहितः । दधातेः कर्मणि लुङ् । 'बहुलं छन्दस्यमाङ्योगे' इत्यडभावः । 'तिङ्ङतिङः' इति निघातः । अयमग्निरित्युक्तम् । कोऽसावग्निरित्यत आह । अप्नवानः भृगुसंबन्धी कश्चिदृषिः । स चान्ये भृगवः च वनेषु अरण्येषु चित्रं दावाग्निरूपेण बहुधा दर्शनीयं विशेविशे । वीप्सया सर्वजनव्याप्तिर्गृह्यते । सर्वस्या विशः प्रजायाः विभ्वं विभुमीश्वरं यं देवानां हविर्वाहकत्वेन प्रसिद्धमग्निं विरुरुचुः दीप्तियुक्तं कुर्वन्ति स्म । यमिति यच्छब्दस्यायमिति इदंशब्देन संबन्धः ॥

शब्दा०—अयम्=यह, इह=यहां यज्ञवेदी पर, प्रथमः=सभी देवताओं से पहिले, धायि=रखा गया है, धातृभिः=यज्ञ संपादन करनेवालों के द्वारा, होता=होता नामक ऋत्विज, यजिष्ठः=श्रेष्ठ यज्ञकर्ता, अध्वरेषु=यज्ञों में, ईड्यः=पूजने योग्य, यम्=जिसको, अप्नवानः=अप्नवान नामक ऋषि, भृगवः=भृगुवंशी ऋषियों ने, विरुरुचुः=प्रज्ज्वलित किया है, वनेषु=वनों में, चित्रम्=चमकनेवाला, विभ्वम्=व्याप्त रहनेवाला, विशेविशे=प्रत्येक घर में ।

हि० अ०—होता, श्रेष्ठ यज्ञकर्ता, यज्ञ में पूजने योग्य, यह (अग्नि), यज्ञ संपादन करनेवालों के द्वारा (सभी देवताओं से) पहिले, यहां (यज्ञवेदी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर) रखा गया है। जिसको अप्नवान तथा भृगु परिवार के ऋषियों ने प्रज्ज्वलित किया है; (जो) वन में (दावाग्नि के रूप में) चमकनेवाला तथा प्रत्येक घर में व्याप्त रहनेवाला (है)।

Trans.—This (Agni), the invoker, the best sacrificer, to be praised at sacrifices, has been placed first, here (at the sacrificial altar) by the supporters of the sacrifices. Whom, Apnavāna and the seers of the family of Bhṛgu have lighted, the bright-coloured in the forests, omnipresent in every dwelling.

Notes—धायि—√*dhā* to put. pass. aorist, 3rd. sing. The augment (अ) has been dropped even without prohibitive particle मा. ईड्यः—Gerundive in य from √*īḍ* to praise. विरुरुचुः—√*ruc* to shine, perf. 3rd. plu.; not unaccented because preceded by यम्. विशे-विशे—Iterative compd. accented on the first member.

अग्ने। कदा। ते। आनुषक्। भुवत्। देवस्य। चेतनम्॥ अध। हि। त्वा। जगृभ्रिरे। मर्तासः। विक्षु। ईड्यम्॥२॥

सा० भा०—हे अग्ने अध अतः कारणात् देवस्य द्योतमानस्य ते तव संबन्धि चेतनं तेजः कदा आनुषक् अनुषक्तं भुवत् भवेत्। लेट्यडागमः। 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'भूसुवोस्तिङि' इति गुणप्रतिषेधः। अतः कारणादित्युक्तम्। कस्माद्धेतोरित्युच्यते। हि यस्मात् कारणात् मर्तासः मनुष्याः विक्षु विड्भिः प्रजाभिः ईड्यं स्तुत्यं त्वा त्वां जगृभ्रिरे जगृहिरे गृह्णन्ति। ग्रहेर्धातोर्लिटि 'हृग्रहोर्भः' इति भत्वम्। 'बहुलं छन्दसि' इति रुडागमः॥

शब्दा०—अग्ने=ओ अग्नि, कदा=कब, ते=तुम्हारा, आनुषक्=निर्बाध रूप से, भुवत्=प्रकट होगा, देवस्य=देव का, चेतनम्=तेज, अध=इसी कारण से, हि=क्योंकि, त्वा=तुमको, जगृभ्रिरे=स्वीकार किया है, मर्तासः=मनुष्यों ने, विक्षु=घरों में, ईड्यम्=पूज्य को।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ अग्नि तुम्हारा, देव का, तेज कब निर्बाध रूप से प्रकट होगा। क्योंकि उसी कारण से मनुष्यों ने प्रत्येक घर में पूज्य तुमको स्वीकार किया है।

Trans.—O Agni, when thy, the glory of god, be uninterruptedly manifested? For, that's why the mortals have received thee, the worthy of praises in dwellings.

Notes—आनुषक्—Manifested' (Wilson) 'suddenly shown forth' (Griffith). M.W.D, derives आनुषक् from अनु+√*sañj* meaning 'in continuous order', 'uninterruptedly', 'one after the other'. भुवत्—√*bhū* to be, root-aorist, subju. 3rd. sing.; accented because beginning of a Pāda. जगृभ्रिरे—√*grabh* to seize mid. perf. 3rd. plu.; accented because preceded by emphatic particle हि in the same Pāda.

ऋतऽवानम्। विऽचेतसम्। पश्यन्तः। द्याम्ऽइव। स्तृऽभिः॥
विश्वेषाम्। अध्वराणाम्। हस्कर्तारम्। दमेऽदमे॥३॥

सा० भा०—ऋतावानम् अमायिनं विचेतसं विशिष्टज्ञानं स्तृभिः नक्षत्रैः परिवृतं द्यामिव विस्फुलिङ्गैः समेतं विश्वेषां सर्वेषाम् अध्वराणां यज्ञानां हस्कर्तारं प्रभासकं वृद्धेः कर्तारं वा अग्निं पश्यन्तः ऋत्विगादयः दमेदमे सर्वस्मिन् यज्ञगृहे। जगृभ्रिरे इति पूर्वेण संबन्धः॥

शब्दा०—ऋतवानम्=सत्यवान, विचेतसम्=विशिष्ट ज्ञानी, पश्यन्तः=देखते हुये, द्यामिव=आकाश की तरह, स्तृभिः=तारों से आवृत, विश्वेषाम्=सम्पूर्ण, अध्वराणाम्=यज्ञों के, हस्कर्तारम्=प्रकाशक, दमेदमे=प्रत्येक घर में।

हि० अ०—सत्यवान्, विशिष्ट ज्ञानी, तारों से (आवृत) आकाश की तरह (अपने स्फुलिंगों से घिरे हुये), सम्पूर्ण यज्ञों के प्रकाशक (अग्नि) को देखते हुये (यज्ञकर्ताओं ने) प्रत्येक घर में (स्वीकार किया है)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Seeing (Agni), the truthful, the most sapient, (covered with sparks) as heaven with stars, the illuminator of all the sacrifices, (the worshippers have received him) in every house.

Notes—ऋतावानम्—See ऋतावा(II. 34.8). पश्यन्तः—√*paś* to see, pres. part. According to Geldner पश्यन्तः means 'recognising'. Rajavade conjectures it to be पिशन्तं. Thus according to him the passage would be पिशन्तं द्यामिव स्तृभिः—'spangling heaven as it were with stars.

आ॒शुम् । दू॒तम् । वि॒वस्व॑तः । विश्वाः॑ । यः । च॒र्षणीः॑ । अ॒भि ॥
आ । ज॒भ्रः॒ । के॒तुम् । आ॒यवः॑ । भृग॑वाणम् । वि॒शेऽवि॑शे ॥४॥

सा० भा०—यः अग्निः विश्वाः चर्षणीः सर्वाः प्रजाः अभि भवति आयवः मनुष्याः । आयव इति मनुष्यनाम 'आयवः यदवः' (नि० २. ३.१७) इति मनुष्यनामसु पाठात् । आशुं क्षिप्रगामिनं विवस्वतः मनुष्यस्य यजमानस्य दूतम् । विवस्वन्त इति मनुष्यनाम । केतुं प्रज्ञापकं भृगवाणं भृगुवदाचरन्तम् । दीप्यमानमित्यर्थः । 'सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः' इति क्विप् । तदन्ताल्लटो व्यत्ययेन शानच् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वात् आद्युदात्तत्वम् । तमग्निं विशेविशे सर्वस्यै प्रजायै आ जभ्रुः आजहुः ।'हृग्रहोर्भः' इति भत्वम् ॥

शब्दा०—आशुम् = शीघ्रगामी, दूतम् = दूत को, विवस्वतः = यजमान के, विश्वाः = सम्पूर्ण, यः = जो, चर्षणीः = प्राणियों को, अभि = अभिभूत करनेवाला, आ जभ्रुः = लाया है, केतुम् = यज्ञ का पताका, आयवः = मनुष्यों ने, भृगवाणम् = भृगु की तरह आचरण करनेवाला अर्थात् चमकनेवाला, विशेविशे = प्रत्येक घर में ।

हि० अ०—यजमान के शीघ्रगामी दूत को, जो सभी प्राणियों को अभिभूत करनेवाला है, (जो यज्ञ का) पताका है, भृगु की तरह आचरण करनेवाला (अर्थात् चमकनेवाला) है, मनुष्यों ने प्रत्येक घर में (उसको) लाया है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—(Him) the quick messenger of the worshipper, (him) who rules over all mankind, the ensign, acting like Bhṛgu (i.e. glittering), the living beings have brought in every dwelling.

Notes—जभ्रुः—√*bhṛ* to bear perf. 3rd. plu. भृगवाणम्—'The resplendent' (Wilson), 'moving like Bhṛgu' (Griffith); Sāyaṇa takes it to mean 'acting like Bhṛgu'. M. W. D. derives it from √*bhrāj* to shine.

तम् । ईम् । होतारम् । आनुषक् । चिकित्वांसम् । नि । सेदिरे । रण्वम् । पावकऽशोचिषम् । यजिष्ठम् । सप्त । धामऽभिः ॥५॥

सा० भा०—ऋत्विगादयो मनुष्याः आनुषक् आनुपूर्व्येण होतारं देवानामाह्वातारं चिकित्वांसं जानन्तम् । 'कित ज्ञाने' । लिटः क्वसुः । द्विर्भावहलादिशेषचुत्वदीर्घाः । प्रत्ययस्वरः । तमीं तमिममग्निं नि षेदिरे निषादयन्ति स्म । कीदृशम् रण्वं रमणीयम् पावकशोचिषं शोधकदीप्तिं यजिष्ठं यष्टृतमं सप्त सप्तभिः धामभिः तेजोभिर्युक्तम् ॥

शब्दा० – तम्=उस, ईम्=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, होतारम्=होता, आनुषक्=निर्बाध रूप से, चिकित्वांसम्=जाननेवाले, निषेदिरे=बैठाया है, रण्वम्=रमणीय, पावकशोचिषम्=पवित्र प्रकाशवाले, यजिष्ठम्=श्रेष्ठ यज्ञकर्ता, सप्त=सात प्रकार के, धामभिः=तेज से युक्त ।

हि० अ०—उस होता, जानने वाले, रमणीय, पवित्र प्रकाशवाले, श्रेष्ठ यज्ञकर्ता, सात प्रकार के तेज से युक्त (अग्नि) को (यज्ञ करनेवालों ने) निर्बाध रूप से (अपने घरों में) बैठाया है ।

Trans.—Verily him, the invoker, the sapient, (they) have placed uninterruptedly, the elegant, purifyingly radiant, the best sacrificer (endowed) with sevenfold flames.

Notes—चिकित्वांसम्—√*cit* to perceive, perf. part. acc. sing. सेदिरे—√*sad* to sit, mid. 3rd. plu. पावकशोचिषम्—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Having purified radiance ; Bahuvrihi compd. accented on the first member.

तम् । शश्वतीषु । मातृषु । वने । आ । वीतम् । अश्रितम् ॥
चित्रम् । सन्तम् । गुहा । हितम् । सुऽवेदम् । कूचित्ऽअर्थिनम् ॥६॥

सा० भा०—शश्वतीषु बह्वीषु मातृषु अप्सु । ताः सस्यादिनिर्मातृकत्वात् मातर इत्युच्यन्ते । वने आ वृक्षसमूहे च । आकारश्चार्थे । सन्तं विद्यमानं वीतं कान्तम् अश्रितं प्राणिभिर्दाहभयात् असेवितम् । दुरासदमित्यर्थः । चित्रं चायनीयं गुहा गुहायां हितं निहितं सुवेदं सुविज्ञानं सुधनं वा कूचिदर्थिनं क्वापि हविर्ष्यर्थिनं समिदाज्यपुरोडाशादि हविः स्वीकुर्वन्तम् । क्व इत्यत्र वकारस्य छान्दसे संप्रसारणे परपूर्वत्वे च 'हलः' इति दीर्घत्वम् । एवंभूतं तम् अग्निं निषेदिरे इति पूर्वेण संबन्धः ॥

शब्दा०—तम्=उसको, शश्वतीषु=शाश्वत्, मातृषु=माताओं में अर्थात् जलों में, वने=वन में, आ=और, वीतम्=सबके द्वारा अभिलषित, अश्रितम्=असेवित, चित्रम्=प्रकाशमान, सन्तम्=होते हुये, गुहा=गुप्त स्थान में, हितम्=पड़े हुये, सुवेदम्=सुन्दर ज्ञानवाले, कूचिदर्थिनम्=कहीं से भी हवि द्रव्य की इच्छा करनेवाले ।

हि० अ०—शाश्वत माताओं (जलों) तथा वृक्षों में (निवास करनेवाले) सबके द्वारा अभिलषित, (फिर भी) असेवित, प्रकाशमान होते हुये, रहस्य में पड़े हुए, सुन्दर ज्ञानवाले, कहीं से भी हविद्रव्य की इच्छा करनेवाले उस (अग्नि) को (उन्होंने वेदी पर बैठाया है) ।

Trans.—Him (abiding) in the perpetual mothers (i.e. waters) and in the wood, desired one (yet) unapproached, bright-coloured, placed in secret, endowed with knowledge, seeking (oblations) from anywhere, (they have placed at the sacrificial altar).

Notes—**वीतम्**—√*vī* to enjoy, pres. part. acc. sing. Wilson takes it to mean 'loved' and Griffith as 'concealed'. **अश्रितम्**—√*śri* to resort, past part. with negative particle 'अ'. **सन्तम्**—√*as* to be, pres. part.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

acc. sing. हितम् —√*hi* to impel. or √*dhā* to put. past part. सुवेदम् —'endowed with knowledge' (Wilson), 'quickly-found' (Griffith); Bahuvrīhi compd. accented on the second member. कूचिदर्थिनम् - कू is the Samprasāraṇa of क्व

स॒सस्य॑ । यत् । वि॒ऽयु॑ता । सस्मि॑न् । ऊध॑न् । ऋ॒तस्य॑ । धाम॑न् । र॒णय॑न्त । दे॒वाः ॥ म॒हान् । अ॒ग्निः । नम॑सा । रा॒तऽह॑व्यः । वेः । अ॒ध्व॒राय॑ । सद॑म् । इत् । ऋ॒तऽवा॑ ॥७॥

सा० भा०—प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि 'ससस्य यद्वियुता' इत्याद्याः पञ्चर्चः । सूत्रितं च—'ससस्य यद्वियुतेति पञ्च' (आश्व० श्रौ० ४. १३) इति ।

यत् यमग्निं देवाः स्तोतारः ससस्य स्वप्नस्य वियुता वियुते वियोगे । उषसीत्यर्थः । ऋतस्य उदकस्य धामन् धामनि स्थाने सस्मिन् सर्वस्मिन् ऊधन् ऊधनि यज्ञे रणयन्त रमयन्ति । स्तोत्रैरिति शेषः । महान् प्रभूतः नमसा नमस्कारेण रातहव्यः दत्तहविष्कः ऋतावा सत्यवान् सः अग्निः सदमित् सदैव अध्वराय अध्वरं यजमानैः कृतं यज्ञम् । 'सुपां सुपो भवन्तीति वक्तव्यम्' (पा० म० ७. १. ३९) इति वचनादत्र द्वितीयार्थे चतुर्थी । वेः वेत्ति जानाति । यद्वा । देवा इन्द्रादयः ससस्य ऋत्विग्भिः सेव्यस्य यद्यस्याग्नेर्वियुता विशिष्टे सस्मिन् भजनीये ऋतस्य सत्यस्य धामन् धामनि योनौ ऊधन्नूधनि यज्ञे रणयन्त रमयन्ते । महान् प्रभूतो नमसा हविषा रातहव्यो दत्तहविष्क ऋतावा सत्यवान् सोऽग्निरध्वराय यज्ञार्थं सदमित् सदैव वेः गन्ता भवति । अध्वराय यज्ञं वेः कामयते वा ॥

शब्दा०—ससस्य=स्वप्न के, यत्=जिस, वियुता=बीतने पर, अलग होने पर, सस्मिन्=सभी, ऊधन्=यज्ञवेदियों पर, ऋतस्य=यज्ञ के, धामन् =स्थान पर, रणयन्त=प्रसन्न करते हैं, देवाः=पूजा करनेवाले यजमान, महान्=बड़ा, अग्निः=अग्नि देवता, नमसा=नमस्कार द्वारा, रातहव्यः =हवि की आहुति प्रदान किया जानेवाला, वेः=आनन्द लेता है, अध्वराय =यज्ञ का, सदम्=सर्वदा, इत्=ही, ऋतावा=सत्यवान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—स्वप्न (रात्रि) के बीतने पर (अर्थात् उषा का आगमन होने पर) ऋत के स्थान सभी यज्ञवेदियों पर, पूजा करनेवाले यजमान जिस (अग्नि) को (स्तुतियों द्वारा) प्रसन्न करते हैं, (वह) महान् एवं सत्यवान् अग्नि, जिसको नमस्कार द्वारा हव्य की आहुति प्रदान की जाती है, प्रत्येक यज्ञ का सर्वदा ही आनन्द लेता है।

Trans.—At the departure of slumber (i.e. at the break of dawn), whom the godly people (worshippers) gratify (with prayers) at all the sacrifices, the seat of eternal order, the great Agni, the truthful, to whom the oblation is offered with salutation, enjoys the sacrifices always.

Notes—**ससस्य**—Sāyaṇa gives its alternative meaning (1) 'at the departure of slumber i.e. at the break of dawn and (2) served by the priests. Griffith takes it to mean 'food' which is served to Agni at the sacrifice. **रणयन्त**—√*ran* to rejoice, caus. pres. 3rd. plu. **वेः**—√*vī* to enjoy, pres. injun. 3rd. sing. Griffith takes it to mean 'flies'; accented because beginning of the Pāda.

वेः। अध्वरस्य। दूत्यानि। विद्वान्। उभे इति। अन्तरिति। रोदसी इति। सम्ऽचिकित्वान्॥ दूतः। ईयसे। प्रऽदिवः। उराणः। विदुःऽतरः। दिवः। आऽरोधनानि॥८॥

सा० भा०—हे अग्ने विद्वान् सर्वं जानानस्त्वम् अध्वरस्य यज्ञस्य संबन्धीनि दूत्यानि दूतकर्माणि वेः वेत्सि कामयसे वा। यद्वा वेरिति यज्ञविशेषणम्। वेर्यजमानस्याभीष्टफलजनकस्याध्वरस्य यागस्य संबन्धीनि दूत्यानि दूतकर्माणि विद्वान् जानन्। उभे रोदसी उभयो रोदस्योर्द्यावापृथिव्योः अन्तः मध्ये स्थितमन्तरिक्षं संचिकित्वान् सम्यक् जानन् प्रदिवः पुराणः। पुराणनामेदं प्रत्नं प्रदिवः' (नि० ३. २७. २) इति पुराणनामसु पाठात्। उराणः अल्पमपि हविः उरु बहु कुर्वाणः। 'उराण उरु कुर्वाणः' इति यास्केनोक्तत्वात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विदुष्टरः विद्वत्तरो देवानां दूतः त्वं दिवः स्वर्गस्य आरोधनानि आरोहणानि । आरोहणार्हाणि स्थानानीत्यर्थः । देवानां हवींष्यर्पयितुम् ईयसे गच्छसि ।

शब्दा० - वेः=जानते हो, अध्वरस्य=यज्ञ के, दूत्यानि=दौत्य कर्मों को, विद्वान्=जाननेवाले, उभे=दोनों आकाश तथा पृथिवी, अन्तः=दोनों के बीच को, रोदसी=आकाश तथा पृथिवी, संचिकित्वान्=अच्छी प्रकार से जानकर, दूतः=दूत, ईयसे=जाते हो, प्रदिवः=प्राचीन, उराणः=चाहनावाले, विदुष्टरः=अधिक बुद्धिमान, दिवः=द्युलोक के, आरोधनानि=आरोहों पर ।

हि० अ० -सब कुछ जाननेवाले तुम यज्ञ सम्बन्धी दौत्यकर्मों को जानते हो । दोनों आकाश तथा पृथिवी और जो उन दोनों के बीच में है (उन सबको) अच्छी प्रकार से जानकर तुम, दूत, प्राचीन, चाहनावाले, अधिक बुद्धिमान् द्युलोक के आरोहों पर जाते हो ।

Trans.—All-knowing thou knowest the functions of a messenger of the sacrifice. Having known well the two worlds—heaven and earth, and what is between them, (thou) the envoy, the ancient, desiring one, more intelligent (than any god), go to the recesses of the heaven.

Notes—वेः—'Understand' or 'desire' or 'yielding fruits' (Sāyaṇa), 'bird' (Griffith). वेरध्वरस्य दूत्यानि विद्वान्—'(Thou) who art all knowing understandest the functions of a messenger (of the gods at the sacrifices)' (Wilson); 'Bird of each rite skilled in envoy's duties' (Griffith). विद्वान् -√*vid* to know, pres. part. nom. sing. अन्तः—The word अन्तः accented on the last syllable is rhotacized; hence, इति in the Pada-text (Ṛg. Prāt. I. 78). संचिकित्वान् -√*cit* to perceive, perf. part. nom. sing. ईयसे -√*i* to go, mid. pres. 2nd. sing. उराणः—√*vṛ* to choose, root-aorist part. उ is the Samprasāraṇa of व् in √*vṛ*. Sāyaṇa on the authority of Yāska takes it to mean 'amplifying' and Griffith as 'willing'.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृष्णम्। ते। एम। रुशतः। पुरः। भाः। चरिष्णु। अर्चिः। वपुषाम्। इत्। एकम्॥ यत्। अप्रऽवीता। दधते। ह। गर्भम्। सद्यः। चित्। जातः। भवसि। इत्। ऊँ इति। दूतः॥९॥

सा० भा०—हे अग्ने रुशतः रोचमानस्य ते तव संबन्धि। अत्र एमञ्शब्देन गमनमार्गं उच्यते। एम वर्त्म कृष्णं कृष्णवर्णं भवति। भाः तव संबन्धिनी दीप्तिः पुरः पुरस्ताद्भवति। चरिष्णु संचरणशीलम् अर्चिः त्वदीयं तेजः वपुषां वपुष्मतां रूपवताम्। तेजस्विनामित्यर्थः। एकम् इत् मुख्यमेव भवति। यत् यं त्वाम् अप्रवीता अनुपगता यजमानाः गर्भं त्वज्जननहेतुमरणिं दधते ह धारयन्ति खलु। स त्वं सद्यश्चित् सद्यः एव जातः उत्पन्नः सन् दूतः भवसीदु यजमानस्य दूतो भवस्येव॥

शब्दा०—कृष्णम्=काला, ते=तुम्हारा, एम=मार्ग, रुशतः=चमकनेवाले, पुरः=सामने, भाः=तेज, चरिष्णु=संचरणशील, अर्चिः=किरण, वपुषाम्=सुन्दर रूपवालों में, इत्=ही, एकम्=एक, यत्=जब, अप्रवीता=उपस्थित यजमान, दधते=धारण करता है, ह=निश्चित अर्थ का वाचक एक निपात, गर्भम्=गर्भ अर्थात् दो अरणियाँ जिनसे अग्नि की उत्पत्ति होती है, सद्यः=शीघ्र, चित्=भी, जातः=उत्पन्न होकर, भवसि=बनते हो, इत्=निश्चित् अर्थ का वाचक निपात, दूतः=दूत।

हि० अ०—चमकनेवाले तुम्हारा मार्ग काला (है); तेज सामने (है) तुम्हारी संचरणशील रश्मि सुन्दर रूप वालों में एक ही है। उपस्थित यजमान जब गर्भ (अर्थात् दो अरणियाँ जिनसे अग्नि की उत्पत्ति होती है) धारण करता है, शीघ्र उत्पन्न होकर (ओ अग्नि), वास्तव में (तुम उसके) दूत बन जाते हो।

Trans.—Black (is) thy, the shining one's path; light (is) before; (thy) moving flame is the one (i.e. chief) of all the luminous bodies. When the worshippers, attending, hold the womb (i.e. the pieces of wood in which the fire is produced by rubbing), immediately being born thou becomest, indeed, the messenger.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—रुशतः—Gen. sing. of रुशत् from √*ruc* to shine. चरिष्णु—Derived from √*car* to move with the suffix इष्णुच् (Pāṇ. III. 2.136). अप्रवीता—वीता is past part. from √*vī* to go (Sāyaṇ), to pregnate (M W D.). Griffith takes it to mean 'unimpregnate'. नञ् compd. accented on the first syllable. दधते—√*dhā* to put, mid. pres. 3rd. sing.; not unaccented because preceded by यत्. भवसि–Not unaccented because followed by इत् in the same Pāda.

स॒द्यः । जा॒तस्य॑ । दद॑शानम् । ओज॑ः । यत् । अ॒स्य॒ । वात॑ः । अ॒नु॒ऽवाति॑ । शो॒चिः ॥ वृ॒णक्ति॑ । ति॒ग्माम् । अ॒त॒सेषु॑ । जि॒ह्वाम् । स्थि॒रा । चि॒त् । अन्ना॑ । द॒यते॒ । वि । जम्भैः॑ ॥१०॥

सा० भा०—सद्यो जातस्य अरणिनिर्मथनादनन्तरमेवोत्पन्नस्याग्नेः ओजः तेजः ददृशानम् । ऋत्विगादिभिर्दृश्यमानं भवतीति शेषः । वातः वायुः यत् यदा अस्य अग्नेः शोचिः दीप्तिम् अनु लक्षीकृत्य वाति गच्छति तदा सोऽयमग्निः अतसेषु वृक्षसंघेषु तिग्मां तीक्ष्णां जिह्वां ज्वालां वृणक्ति संयोजयति । स्थिरा चित् स्थिराण्यपि अन्ना अन्नरूपाणि काष्ठादीनि जम्भैः तेजोभिः वि दयते विखण्डयति । भक्षयतीत्यर्थः ॥

शब्दा०—सद्यः=शीघ्र, जातस्य=उत्पन्न अग्नि का, ददृशानम्=देखने में आता है, ओजः=पराक्रम, यत्=जब, अस्य=उसकी, वातः=वायु, अनुवाति=हवा करता है, शोचिः=लपटों को, वृणक्ति=संयुक्त करता है, तिग्माम्=तीक्ष्ण, अतसेषु=सूखी लकड़ियों पर, जिह्वाम्=जीभ को, स्थिरा =खड़े, चित्=भी, अन्ना=वृक्षादि भोजन को, वि दयते=खाता है, जम्भैः=दांतो से ।

हि० अ०—शीघ्र उत्पन्न अग्नि का पराक्रम देखने में आता है, जब वायु उसकी लपटों को हवा करता है । (उस समय वह अपनी) तीक्ष्ण जिह्वा को सूखी लकड़ियों से संयुक्त करता है; यहाँ तक कि खड़े वृक्षों को भी अपने दाँतों से खा जाता है ।

Trans.—The vigour of the immediately born (Agni) is to be seen, when the wind fans his flames.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

He lays his sharpened tongue on the dry woods; (he) consumes with his jaws even the solid food.

Notes.—दृदृशानम्—√*dṛś* to see. perf. part. acc. sing. अस्य—Unaccented because it replaces the preceding substantive. अनुवाति—√*vā* to blow, pres. 3rd. sing. वृणक्ति—√*vṛj* to twist, pres. 3rd. sing. दयते—√*dā* to divide, mid. pres. 3rd. sing.

तृषु । यत् । अन्ना । तृषुणा । ववक्ष । तृषुम् । दूतम् । कृणुते । यह्वः । अग्निः ॥ वातस्य । मेळिम् । सचते । निऽजूर्वन् । आशुम् । न । वाजयते । हिन्वे । अर्वा ॥११॥

सा० भा०—यत् यः अग्निः तृषु क्षिप्रमेव अन्ना अन्नानि काष्ठादीनि तृषुणा क्षिप्रेण रश्मिसमूहेन ववक्ष वहति । दहतीत्यर्थः । यह्वः महान् सः अग्निः तृषुम् आत्मानं दूतं कृणुते यजमानदूतं करोति । निजूर्वन् काष्ठानि निःशेषेण दहन्नग्निः वातस्य वायोः मेळिं बलं सचते सेवते । आशुं न अश्वसादी यथाश्वं तथा अर्वा गमनशीलोऽग्निः स्वरश्मि वाजयते वाजिनं बलवन्तं करोति । हिन्वे प्रेरयति च ॥

शब्दा०—तृषु=शीघ्र, यत्=जब, अन्ना=काष्ठादि भोजन को, तृषुणा=शीघ्रगामी किरणपुञ्जों से, ववक्ष=लाता है, तृषुम्=शीघ्रगामी, दूतम्=दूत, कृणुते=बनाता है, यह्वः=महान्, अग्निः=अग्नि देवता, वातस्य=वायु के, मेळिम्=बल की, सचते=संगति करता है, निजूर्वन्=निःशेष, रूप से खाते हुये, आशुम्=घोड़े को, न=समान, वाजयते=शक्तिशाली बनाता है, हिन्वे=प्रेरित करता है, अर्वा=शीघ्रगामी अग्नि ।

हि० अ०—जब अग्नि शीघ्रगामी (किरणपुंजों) से (काष्ठादि) अन्न को शीघ्र लाता है (तब) महान् (अग्नि) अपने को (यजमान का) शीघ्रगामी दूत बनाता है । उन सबको निःशेष रूप से खाते हुये वायु के बल की संगति करता है । जैसे (एक सईस) घोड़े को (वैसे) शीघ्रगामी (अग्नि) (अपनी लपटों को) शक्तिशाली बनाता है तथा प्रेरित करता है ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Quickly when (he) carries food with quick (radiance), the great Agni makes himself a quick messenger. Consuming (the trees) (he) enjoys the company of wind. As (a horseman speeds his) horse, the moving one (i.e. Agni) strengthens and impels (his flames).

Notes.—ववक्ष—√*vakṣ* to increase, pref. 3rd. sing. Sāyaṇa derives it from √*vah* to carry. कृणुते—√*kṛ* to make, mid. 3rd. sing. सचते—√*sac* to accompany, mid. pres. 3rd. sing. निजूर्वन्—√*jūrv* to consume, pres. part. वाजयते—√*vājaya* to be strong, denom. mid. 3rd. sing. हिन्वे—√*hi* to impel, mid. pres. 3rd. sing.; accented because beginning of a new sentence.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'यस्त्वामग्ने' इति षड्ऋचं द्वितीयं सूक्तम् । वामदेव ऋषिः । त्रैष्टुभं छन्दः । अग्निर्देवता । यस्त्वाम्' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

यः । त्वाम् । अग्ने । इनधते । यतऽस्रुक् । त्रिः । ते । अन्नम् । कृणवत् । सस्मिन् । अहन् ॥ सः । सु । द्युम्नैः । अभि । अस्तु । प्रऽसक्षत् । तव । क्रत्वा । जातऽवेदः चिकित्वान् ॥१॥

सा० भा० – हे अग्ने यतस्रुक् स्रुचा संबद्धः यः यजमानः त्वाम् इनधते दीप्तियुक्तं कुर्यात् यः सस्मिन्नहन् सर्वस्मिन्नहनि ते तुभ्यं त्रिः त्रिवारं सवनत्रये अन्नं हविर्लक्षणमन्नं कृणवत् कुर्यात् । हे जातवेदः जातानां वेदितरग्ने तव तोषकेण क्रत्वा इन्धनादिहेतुना कर्मणा प्रसक्षत् प्रसहमानं त्वदीयं तेजः चिकित्वान् जानन् सः यजमानः द्युम्नैः धनैर्यशोभिर्वा सु अत्यन्तम् अभ्यस्तु शत्रून् अभिभवतु ॥

शब्दा०—यः=जो, त्वाम्=तुमको, अग्ने=ओ अग्नि, इनधते=प्रज्ज्वलित करे, यतस्रुक्=नियमित स्रुवा से, त्रिः=तीन बार, ते=तुमको, अन्नम्=भोजन, कृणवत्=प्रदान करे, सस्मिन्=सभी, अहन्=दिन, सः=वह, सु=अच्छी प्रकार से, द्युम्नैः=धन से, अभ्यस्तु=अभिभूत करे, प्रसक्षत्=विजय प्राप्त करे, तव=तुम्हारे, क्रत्वा=शक्ति से, जातवेदः=ओ जातवेदस् अग्नि, चिकित्वान्=बुद्धिमान ।

हि० अ०—ओ अग्नि जो (कोई) तुमको नियमित स्रुवा से प्रज्ज्वलित करे; दिन में तीन बार तुमको हवि प्रदान करे; वह बुद्धिमान धन से (शत्रुओं को) अभिभूत करे; ओ जातवेदस्, तुम्हारे पराक्रम से विजय प्राप्त करे ।

Trans.—Whoever, O Agni, with uplifted ladle kindles and offers food to thee thrice every day, may he, the knowing one, fully surpass with riches, may prevail, O Jātavedas, with thy power.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes.—इनधते —√*indh* to kindle ; mid. pres. subju. 3rd. sing. ; accented because preceded by यः यतस्रुक् — यत is past part. from √*yam* to stretch out; Bahuvrīhi compd. ; accented on the first member. कृणवत् —√*kṛ* to make, pres. subju. 3rd. sing. ; accented because syntactically connected with यः. अभ्यस्तु—√*as* with अभि to surpass. pres. impv. 3rd. sing. प्रसक्षत् —√*sah* to prevail, 's'-aorist, subju. 3rd. sing. ; accented because it is treated as the beginning of a new sentence. क्रत्वा —"By the act' (Wilson), 'through mental power' (Griffith) ; instr. sing. of क्रतु from √*kṛ* to make. चिकित्वान् —√*cit* to perceive, pref. part.

इ॒ध्मम् । यः । ते॒ । ज॒भर॑त् । श॒श्र॒मा॒णः । म॒हः । अ॒ग्ने॒ । अनी॑कम् । आ । स॒प॒र्यन् ॥ सः । इ॒धा॒नः । प्रति॑ । दो॒षाम् । उ॒षस॑म् । पुष्य॑न् । र॒यिम् । स॒च॒ते॒ । घ्नन् । अ॒मित्रा॑न् ॥२॥

सा०भा० – हे अग्नेः यः यजमानः ते तुभ्यम् इध्मं होमसाधनं समिज्जातं जभरत् आहरेत् । 'हृञ् हरणे' लिङर्थे लेट् । तस्य तिपः 'इतश्च लोपः' इति इकारलोपः । 'बहुलं छन्दसि' इति शपः श्लुः । द्विर्वचनादिकार्यम् । 'लेटोऽडाटौ' इत्यडागमः । 'हृग्रहोर्भः' इति भत्वम् । शश्रमाणः इध्माद्याहरणे श्राम्यन् महः महतः तव आ अनीकम् । आकारश्चार्थे तेजश्च सपर्यन् परिचरन् यो यजमानः दोषां प्रति रात्रिं लक्षीकृत्य उषसं प्रति उषः कालं च लक्षीकृत्य । कालद्वयेपीत्यर्थः । इधानः इन्धानस्त्वां दीप्तियुक्तं करोति पुष्यन् प्रजाभिः पशुभिश्च पुष्टः सन् सः यजमानः अमित्रान् शत्रून् घ्नन् हिंसन् रयिं धनं सचते सेवते । सर्वदा पश्वादिधनसमृद्धो भवतीत्यर्थः ॥

शब्दा०—इध्मम्=इन्धन, यः=जो, ते=तुम्हारे लिये, जभरत्=लाता है, शश्रमाणः=परिश्रम करता हुआ, महः=शक्तिशाली, अग्ने=ओ अग्नि, अनीकम्=तेजपुञ्ज का, आ=और, सपर्यन्=सत्कार करता हुआ, सः=वह, इधानः=प्रज्ज्वलित करनेवाला, प्रति दोषम्=प्रत्येक रात्रि, उषसम्=सुबह, पुष्यन्=समृद्ध होता हुआ, रयिम्=धन, सचते=पाता है, घ्नन्=मारता हुआ, अमित्रान्=शत्रुओं को ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० —ओ अग्नि, परिश्रम करता हुआ, शक्तिशाली तुम्हारे तेज का सत्कार करता हुआ, जो तुम्हारे लिये इन्धन लाता है, वह प्रत्येक रात्रि तथा सुबह (तुमको) प्रज्ज्वलित करता हुआ, (स्वयं) समृद्ध होता हुआ, तथा शत्रुओं को मारता हुआ, धन को पाता है।

Trans.—Whoever toiling, brings fuel to thee, O Agni, honouring (thy) mighty splendour, kindling (thee) at every night and morning, flourishing, and killing the enemies, he accompanies the riches.

Notes.—जभरत्—√*bhṛ* to bear, pref. subju. 3rd sing. accented because preceded by यः. शश्रमाणः—√*śram* to toil, pref., part. सपर्यन्—√*saparya* to honour, denom. pres. part. इधानः—√*indh* to kindle, aorist part. पुष्यन्—√*puś* to flourish, pres. part. सचते—√*sac* to accompany, mid. pres. 3rd. sing. घ्नन्—√*han* to kill, pres. part.

अग्निः । ईशे । बृहतः । क्षत्रियस्य । अग्निः । वाजस्य । परमस्य । रायः ॥ दधाति । रत्नम् । विधते । यविष्ठः । वि । आनुषक् । मर्त्याय । स्वधाऽवान् ॥३॥

सा० भा०—उखासंभरणीयेष्टौ अग्नेः क्षत्रभृतोऽनुवाक्या । तथा च सूत्रितम्—'अग्निरीशे बृहतः क्षत्रियस्यार्चामि ते सुमतिं घोष्यर्वाक्' (आश्व० श्रौ० ४.१) इति ॥

अग्निः बृहतः महतः क्षत्रियस्य बलस्य ईशे ईश्वरः भवति । वर्तमानेऽर्थे लिट् । किंच अग्निः परमस्य उत्कृष्टस्य वाजस्य अन्नस्य रायः पश्वादेर्धनस्य चेशे । यविष्ठः युवतमः स्वधावान् अन्नवान् तेजस्वी वाग्निः विधते परिचरते । 'विधतिः परिचरणकर्मा' इति यास्कः । मर्त्याय मनुष्याय यजमानाय रत्नं रमणीयं धनम् आनुषक् अनुषक्तं वि दधाति करोति ॥

शब्दा०—अग्निः=अग्नि देवता, ईशे=शासन करता है, बृहतः=बड़े, क्षत्रियस्य=राजशक्ति का, अग्निः=अग्नि देवता, वाजस्य=अन्न का, पर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मस्य=श्रेष्ठ, रायः=पश्वादि धन का, दधाति=धारण करता है, रत्नम्=कीमती धन, विधते=प्रार्थना करने वाले के लिये, यविष्ठः=श्रेष्ठ युवक, आनुषक्=निर्बाध रूप से, मर्त्याय=मनुष्य के लिये, स्वधावान्=आत्म शक्तिवाला।

हि० अ०—अग्नि महान् राजशक्ति का शासक है; अग्नि अन्न का तथा श्रेष्ठ (पश्वादि) धन का (शासक है)। श्रेष्ठ युवक, आत्मशक्तिवाला (अग्नि) प्रार्थना करनेवाले मनुष्य को निर्बाध रूप से कीमती धन प्रदान करता है।

Trans.—Agni is the master of great sovereignty. Agni (is the master) of food and of excellent riches. The most youthful (Agni) the self-powerful god, bestows the precious (riches) upon the worshipful mortal uninterruptedly.

Notes.—ईशे—√*īś* to be master, mid. pres. 3rd. sing. दधाति—√*dhā* to put, pres. 3rd. sing.; accented because beginning of the Pāda. स्वधावान्—'Abounding in sustenance' (Wilson), 'self-reliant God' (Griffith).

यत्। चित्। हि। ते। पुरुषऽत्रा। यविष्ठ। अचित्तिऽभिः। चकृम। कत्। चित्। आगः॥ कृधि। सु। अस्मान्। अदितेः। अनागान्। वि। एनांसि। शिश्रथः। विष्वक्। अग्ने ॥४॥

सा० भा०—हे यविष्ठ युवतम अग्ने यच्चिद्धि यद्यपि खलु ते त्वदीयेषु पुरुषत्रा परिचारकेषु पुरुषेषु अचित्तिभिः अज्ञानैः कच्चिदागः किंचिदपि पापं वयं चकृम तथापि हे अग्ने अस्मान् अदितेः भूमेः अनागान् अनागसः पापरहितान् सु अत्यन्तं कृधि कुरु। हे अग्ने विष्वक् सर्वतो विद्यमानानि एनांसि अस्माभिः कृतानि पापानि वि शिश्रिथः विश्लथय शिथिलीकुरु।

शब्दा०—यत्=यदि, चित्=भी, हि=निश्चित रूप से, ते=तुम्हारे, पुरुषत्रा=मनुष्यों के बीच होने के नाते, यविष्ठ=ओ श्रेष्ठ युवक, अचित्तिभिः=अज्ञानवश, चकृम=किया है, कत्=कोई, चित्=भी, आगः=पाप,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृधि=करो, सु=अच्छी प्रकार से, अस्मान्=हम लोगों को, अदितेः=अदिति के सामने, अनागान्=पाप रहित, एनांसि=पापों को, वि शिश्रथः=नष्ट करो, शिथिल करो, विष्वक्=चारों तरफ से, अग्ने=ओ अग्नि।

हि० अ०—ओ श्रेष्ठ युवक (अग्नि), तुम्हारे मनुष्य होने के नाते अज्ञानवश यदि हमने कोई पाप किया है (तो भी) हमको अदिति के सामने पूर्णतया पापरहित करो; ओ अग्नि चारों तरफ से पापों को नष्ट करो।

Trans.—O the most youthful (Agni), if (we) as human beings, have ever committed any sin unknowingly, (even then) make us fully sinless before Aditi; entirely remove our sins from all sides, O Agni.

Notes.—पुरुषत्रा—See III. 33.8. चकृमा—√*kṛ* to make, pref. 1rst, plu.; accented because preceded by यत् चित् and हि. Final syllable is metrically lengthened. कृधि—√*kṛ* to make, root-aorist, impv. 2nd. sing.; accented because beginning of the Pāda. शिश्रथः—√*śrath* to slacken. red.—aorist, 2nd. sing.

म॒हः । चि॒त् । अ॒ग्ने॒ । एन॑सः । अ॒भीके॑ । ऊ॒र्वात् । दे॒वाना॑म् । उ॒त । मर्त्या॑नाम् ॥ मा । ते॒ । सखा॑यः । सद॑म् । इत् । रि॒षा॒म॒ । यच्छ॑ । तो॒काय॑ । तन॑याय । शम् । योः ॥५॥

सा० भा०—हे अग्ने देवानाम् इन्द्रादीनाम् उत अपि च मर्त्यानां मनुष्याणाम् अभीके अन्तिके। अभीक इत्यन्तिकनामैतत्। अस्माभिर्यत्पापं कृतं महश्चित् महतोऽपि ऊर्वात् विस्तृतादस्मात् एनसः पापात् ते त्वदीयाः सखायः मित्रभूताः स्तोतारो वयं सदमित् सर्वदैव मा रिषाम मा हिंसिता भूम। हे अग्ने त्वं तोकाय पुत्राय तनयाय पौत्राय शं पापरूपोपद्रवाणां शान्ति योः सुकृतोत्पादितं सुखं च यच्छ देहि॥

शब्दा०—महः=बड़े, चित्=भी, अग्ने=ओ अग्नि, एनसः=पाप से, अभीके=सम्मुख, ऊर्वात्=विस्तृत, देवानाम्=देवताओं के, उत=और, मर्त्यानाम्=मनुष्यों के, मा=मत, ते=तुम्हारे, सखायः=मित्र, सदम् इत्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=कभी भी, रिषाम=कष्ट सहें, यच्छ=प्रदान करो, तोकाय=पुत्रों को, तनयाय=पौत्रों को, शम्=शान्ति, योः=प्रसन्नता।

हि० अ०—ओ अग्नि, बड़े तथा विस्तृत पापों से भी, जिनको (हमलोगों ने) देवताओं तथा मनुष्यों के सम्मुख किया है, (हम) तुम्हारे मित्र कभी भी कष्ट न सहें; (प्रत्युत) (हमारे) पुत्र तथा पौत्रों को शान्ति एवं प्रसन्नता प्रदान करो।

Trans.—Even from the great and extensive sins (committed) in the presence of the gods and men, O Agni, let not thy friends ever suffer harm; grant for (our) sons and grandsons, tranquility and happiness.

Notes.—रिषाम—√*riss* to be hurt, 'a'-aorist subju. 1rst. plu. यच्छ—√*yam* to stretch out, pres. impv. 2nd. sing.

यथा। ह। त्यत्। वसवः। गौर्यम्। चित्। पदि। सिताम्। अमुञ्चत। यजत्राः॥ एवो इति। सु। अस्मत्। मुञ्चत। वि। अंहः। प्र। तारि। अग्ने। प्रऽतरम्। नः। आयुः॥६॥

सा० भा०—यजत्राः यजनीयाः पूजार्हा हे वसवः निवासयितारः अग्नयः यूयं यथा ह यथैव त्यत् त्यां तां पदि पादे सितां बद्धां गौर्यं चित् गौरीं गामपि अमुञ्चत त्यक्तवन्तो भूयास्त। एवो एवमेव अस्मत् अस्मत्तः अंहः पापं सु अत्यन्तं वि मुञ्चत विमुक्तं कुरुत। बहुवचनं पूजार्थम्। हे अग्ने त्वया प्रतरं प्रवृद्धं नः अस्मदीयम् आयुः प्र तारि प्रवृद्धं क्रियताम्॥

शब्दा०—यथा=जिस प्रकार, त्यत्=उस, वसवः=ओ वसुओं, गौर्यम्=गाय को, चित्=भी, पदि=पैर में सिताम्=बंधी हुई को, अमुञ्चत=मुक्त किया, यजत्राः=ओ पूजनीय, एवो=उसी प्रकार, सु=पूर्ण रूप से, अस्मत्=हमसे, विमुञ्चत=मुक्त करो, अंहः=पाप को, प्र तारि=लम्बी होवे, अग्ने=ओ अग्नि, प्रतरम्=लम्बी, नः=हमारी, आयुः=उम्र।

हि० अ०—ओ वसुओं, ओ पूजनीय (अग्नि), जिस प्रकार पैर में बंधी गाय को (तुमने) मुक्त किया उसी प्रकार (हमको) हमारे पापों से पूर्णरूप से मुक्त करो; ओ अग्नि, हमारी लम्बी आयु और लम्बी होवे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—O Vasus, O adorable ones, as you liberated the cow bound by the foot, similarly, set us free entirely from sin ; O Agni, let our long life be extended.

Notes—सिताम् —√*sā* to bind, past part. fem. acc. sing. अमुञ्चत—√*muc* to release impf. 2nd. plu. ; accented because preceded by यथा. एवो—Final ओ is pragṛhya ; hence, followed by इति in the Pada-text. मुञ्चत—√*muc* to release, pres. impv. 2nd. plu. तारि—√*tṝ* to cross, passive aorist, injun. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'अच्छा वद' इति दशर्चमेकादशं सूक्तं भौमस्यात्रेरार्षम्। अत्रेयमनुक्रमणिका—'अच्छ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपान्त्यानुष्टुप्' इति। 'यत्पर्जन्य' इत्येषा नवम्यनुष्टुप् 'वि वृक्षान्' इत्याद्यास्तिस्रो जगत्यः शिष्टाः षट् त्रिष्टुभः। पर्जन्यो देवता। अनेन सूक्तेन प्रत्यृचं वा दिशः उपस्थेयाः। सूत्रितं च—'संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन वा' (आश्व० श्रौ० २. १३) इति॥

अच्छ। वद। तवसम्। गीःऽभिः। आभिः। स्तुहि। पर्जन्यम्। नमसा। आ। विवास॥ कनिक्रदत्। वृषभः। जीरऽदानुः। रेतः। दधाति। ओषधीषु। गर्भम्॥१॥

सा० भा०—हे स्तोतः तवसं बलवन्तं पर्जन्यम् अच्छ अभिप्राप्य वद प्रार्थय। पर्जन्यशब्दो यास्केन बहुधा निरुक्तः—'पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्रार्जयिता वा रसानाम्' (निरु० १०. १०) इति। आभिः गीर्भिः स्तुवाग्भिः स्तुहि। नमसा अन्नेन हविर्लक्षणेन आ विवास सर्वतः परिचर। यः पर्जन्यः वृषभः अपां वर्षिता जीरदानुः क्षिप्रदानः कनिक्रदत् गर्जनशब्दं कुर्वन् ओषधीषु गर्भं गर्भस्थानीयं रेतः उदकं दधाति स्थापयति तं स्तुहि॥

शब्दा०—अच्छ वद=प्रार्थना करो, तवसम्=शक्तिशाली की, गीर्भिः=ऋचाओं से, आभिः=इन, स्तुहि=स्तुति करो, पर्जन्यम्=पर्जन्य की नमसा=नमस्कार द्वारा, आ विवास=प्रसन्न करने की इच्छा करो, कनिक्रदत्=गर्जन करता हुआ, वृषभः=शक्तिशाली, जीरदानुः=शीघ्र देनेवाला, रेतः=बीज, दधाति=धारण करता है, ओषधीषु=वनस्पतियों में, गर्भम्=गर्भ के रूप में।

हि० अ०—इन ऋचाओं से शक्तिशाली की प्रार्थना करो; पर्जन्य की स्तुति करो; (हविरादि द्रव्यों से युक्त) नमस्कार द्वारा (उसे) प्रसन्न करने की इच्छा करो। गर्जन करता हुआ, शीघ्र देनेवाला, शक्तिशाली (पर्जन्य) ओषधियों में गर्भ के रूप में बीज धारण करता है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Salute the mighty with these songs; praise Parjanya; seek to win him with salutation (accompanied with oblation). Roaring, the mighty, of hastening gift, puts seed in the herbs as a germ.

Notes.—वद् —√*vad* to speak, pres. impv. 2nd. sing. with the preposition अच्छा the verb वद means to salute. स्तुहि—√*stu* to praise, pres. impv. 2nd. sing.; accented because beginning of the Pāda. विवास—√*van* to win, desid. 2nd. sing. कनिक्रदत् —√*krand* to cry out, inte, pres. part. जीरदानू—जीर from √*jinv* to speed; Bahuvrīhi compd. accented on the first member. For सन्धि see Appendix—'A' under नियत. दधाति—√*dhā* to put, pres. 3rd. sing.

वि । वृक्षान् । हन्ति । उत । हन्ति । रक्षसः । विश्वम् । बिभाय । भुवनम् । महाऽवधात् ॥ उत । अनागाः । ईषते । वृष्ण्यऽवतः । यत् । पर्जन्यः । स्तनयन् । हन्ति । दुःऽकृतः ॥२॥

सा० भा०—अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः तदेवात्र लिख्यते—'पर्जन्यो विहन्ति वृक्षान्विहन्ति च रक्षांसि सर्वाणि चास्माद्भूतानि बिभ्यति महावधात् महान् ह्यस्य वधः। अप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृतः' (निरु० १०. ११) इति ॥

शब्दा०—वृक्षान्=वृक्षों को, विहन्ति=नष्ट भ्रष्ट कर देता है, उत=और, हन्ति=मारता है, रक्षसः=राक्षसों को, विश्वम्=सम्पूर्ण, बिभाय=डरता है, भुवनम्=लोक, महावधात्=शक्तिशाली शस्त्रवाले पर्जन्य से, उत—और, अनागाः=पापरहित, ईषते=भागते हैं, वृष्ण्यावतः=शक्तिशाली के सामने, यत्=जब, पर्जन्यः=पर्जन्य, स्तनयन्=गरजन करता हुआ, हन्ति=मारता है, दुष्कृतः—पापी मेघों को।

हि० अ०—(वह) वृक्षों को टुकड़े टुकड़े करके नष्ट कर देता है; और राक्षसों को नष्ट करता है; शक्तिशाली शस्त्रवाले (पर्जन्य) से सम्पूर्ण संसार

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

डरता है। यहाँ तक कि निरपराध भी (उस) शक्तिशाली के सामने भाग खड़े होते हैं, जब (वह) पर्जन्य गरजता हुआ पापी मेघों को नष्ट करता है।

Trans.—(He) shatters down the trees apart; and slays the demons; the entire world fears before him of great weapon. Even the sinless flies before the mighty, when Parjanya thundering smites down the malignants.

Notes.—बिभाय—√*bhī* to fear, perf. 3rd. sing. महावधात्—From him of great weapon; Bahuvrīhi compd. accented on the first member. ईषते—√*iṣ* to move, pres. 3rd. sing. स्तनयन्—√*stan* to thunder, pres. part.

रथीऽइव । कशया । अश्वान् । अभिऽक्षिपन् । आविः । दूतान् । कृणुते । वर्ष्यान् । अह ॥ दूरात् । सिंहस्य । स्तनथाः । उत् । ईरते । यत् । पर्जन्यः । कृणुते । वर्ष्यम् । नभः ॥३॥

सा० भा०—रथीव रथस्वामीव। स यथा कशया अश्वान् अभिक्षिपन् दूतान् भटान् आविष्करोति तद्वदसौ पर्जन्योऽपि कशया अश्वान् मेघान् अभिक्षिपन् अभिप्रेरयन् वर्ष्यान् वर्षकान् दूतान् दूतवत् वृष्टिप्रेरकान् मेघान् मरुतो वा आविः कृणुते प्रकटयति। अह इति पूरणः। एवं सति सिंहस्य। सहतेर्हिंसतेर्वा शब्दकर्मणः सिंहशब्दः। अवर्षणेनाभिभवितुः शब्दयितुर्वा मेघस्य स्तनथाः गर्जनशब्दाः दूरात् उदीरते उद्गच्छन्ति। कदा। यत् यदा पर्जन्यः नभः अन्तरिक्षं वर्ष्यं वर्षोपेतं कृणुते करोति तदा॥

शब्दा०—रथीव=सारथी की तरह, कशया=कोड़े से, अश्वान्=घोड़ों को, अभिक्षिपन्=प्रेरित करते हुये, दूतान्=दूतों को, आविष्कृणुते=प्रकट करता है, वर्ष्यान्=वर्षा के, अह=पूर्ववर्ती शब्द पर जोर देनेवाला निपात, दूरात्=दूर से, सिंहस्य=सिं की तरह पर्जन्य की, स्तनथाः=गर्जनायें, उदीरते=उठती है, यत्=जब, पर्जन्य=पर्जन्य देवता, कृणुते=करता है, वर्ष्यम्=वर्षा से युक्त, नभः=आकाश को।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—कोड़े से घोड़ों को प्रेरित करते हुये सारथी की तरह (वह) अपने वर्षा के दूतों (बादलों) को निश्चितरूप से प्रकट करता है। दूर से सिंह (की तरह पर्जन्य) की गर्जनायें उठती हैं; जब पर्जन्य आकाश को वर्षा (के बादलों) से युक्त करता है।

Trans.—Like a charioteer pricking his horses with a whip, he makes manifest the messenger of rain. From afar the thunderings of a lion (Parjanya) arise, when Parjanya makes the sky rainy.

Notes.—अभिक्षिपन् – √*kṣip* to throw, pres. part. For सन्धि between अश्वान् and अभिक्षिपन् see Appendix—'A' under आन्पद-पद-वृत्ति. ईरते— √*īr* to set in motion, mid. pres. 3rd. sing. वर्ष्यां३ अह, वर्ष्यं१ नभः—See Appendix—'B' under कम्प स्वरित.

प्र । वाताः । वान्ति । पतयन्ति । विऽद्युतः । उत् । ओषधीः । जिहते । पिन्वते । स्व१रिति स्वः ॥ इरा । विश्वस्मै । भुवनाय । जायते । यत् । पर्जन्यः । पृथिवीम् । रेतसा । अवति ॥४॥

सा० भा०—'प्र वाताः' इति चतुर्थी पर्जन्यस्य चरोर्याज्या। सूत्रितं च—'प्र वाता वान्ति पतयन्ति विद्युत इत्यग्न्याधेयप्रभृति' (आश्व० श्रौ० २. १५) इति ॥

प्र वान्ति वाताः वृष्ट्यर्थम्। पतयन्ति गच्छन्ति समन्तात् सचरन्ति विद्युतः। ओषधीः ओषधयः उत् जिहते उद्गच्छन्ति प्रवर्धन्ते। स्वः अन्तरिक्षं पिन्वते क्षरति। इरा भूमिः विश्वस्मै सर्वस्मै भुवनाय सर्वजगद्धिताय जायते समर्था भवति। कदैवमिति। यत् यदा पर्जन्यः देवः पृथिवीं रेतसा उदकेन अवति रक्षति अभिगच्छति वा तदैवं भवति ॥

शब्दा०— वाताः=हवायें प्र वान्ति=बहती हैं, पतयन्ति=गिरती हैं, विद्युतः=बिजलियां, ओषधीः=वनस्पतियां, उज्जिहते=उगती हैं, पिन्वते=उड़ेलता है, स्वः=आकाश, इरा=अन्न, विश्वस्मै=सम्पूर्ण, भुवनाय=लोक के लिये, जायते=उत्पन्न होता है, यत्=जब, पर्जन्यः=पर्जन्य, पृथिवीम्=पृथिवी को, रेतसा=जल से, अवति=रक्षा करता है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—हवायें बहती हैं; विजलियां गिरती हैं; ओषधियां उगती ह; आकाश (पानी) उड़ेलता है; सम्पूर्ण प्राणियों के लिये अन्न उत्पन्न होता है; जब पर्जन्य जल से पृथिवी की रक्षा करता है।

Trans.—The winds blow forth; lightnings fall down; the herbs spring up; the heaven swells; nutritious food is born for the whole world; when Parjanya supports earth with seed (i.e. water).

Notes.—वान्ति—√*vā* to blow, pres. 3rd. plu. For accent see notes on यन्ति (II.35.3); see also note on बाधते (I.35.9) पतयन्ति—√*pat* to fall. caus. pres. 3rd. plu. accented because beginning of a new sentence. जिहते—√*hā* to go forth, mid. pres. 3rd. sing. mid. For accent see notes on बाधते (I.35.9). पिन्वते—√*pinv* to fatten, mid. pres. 3rd. sing.; accented because beginning of a new sentence. स्वः—Vide Appendix—'B' under rules of rendering Sanihitā-text in to Pada-text (II.6 (d). जायते—√*jā* to be born, mid. pres. 3rd. sing. Sāyaṇa explains it as 'समर्था भवति'. अवति—√*av* to protect, pres. 3rd. sing.; accented because preceded by यत्.

यस्य॑ । व्र॒ते । पृ॒थि॒वी । नन्न॑मीति । यस्य॑ । व्र॒ते । श॒फऽव॑त् । जर्भु॑रीति ॥ यस्य॑ । व्र॒ते । ओष॑धीः । वि॒श्वऽरू॑पाः । सः । नः॒ । पर्ज॑न्य । महि॑ । शर्म॑ । य॒च्छ॒ ॥५॥

सा० भा०—यस्य पर्जन्यस्य व्रते कर्मणि पृथिवी नन्नमीति अत्यर्थं नमति सर्वेषामधो भवति। यस्य व्रते शफवत् पादोपेतं गवादिकं जर्भुरीति भ्रियते पूर्यते गच्छतीति वा। यस्य व्रते कर्मणि ओषधीः ओषध्यः विश्वरूपाः नानारूपा भवन्ति हे पर्जन्य सः महांस्त्वं नः अस्मभ्यं महि शर्म महत् सुखं यच्छ प्रयच्छ ॥

शब्दा०—यस्य=जिसकी, व्रते=आज्ञा में, पृथिवी=पृथिवी नन्नमीति =झुकी रहती है, यस्य=जिसकी, व्रते=आज्ञा में शफवत्=खुरवाले पशु,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जर्भुरीति=विचरण करते हैं, यस्य=जिसकी, व्रते=आज्ञा में, ओषधीः =वनस्पतियां, विश्वरूपाः=नाना रूपवाली हैं; सः=वह, नः=हमको, पर्जन्य=ओ पर्जन्य, महि=महान्, शर्म=सुरक्षा, यच्छ=प्रदान करो।

हि० अ०—जिसकी आज्ञा में पृथिवी (अत्यन्त रूप से) झुकी रहती है; जिसकी आज्ञा मे खुरवाले पशु विचरण करते हैं; जिसकी आज्ञा में ओषधियां नाना रूपवाली होती है; ओ पर्जन्य, ऐसे तुम हमको महान् सुरक्षा प्रदान करो।

Trans.—In whose command the earth bows down; in whose command all the two hoofed animals move about, in whose command herbs are the omniform; O Parjanya, (thou) as such grant us great protection.

Notes.—नन्नमीति—√*nam* to bend, inte. pres. 3rd. sing.; accented because preceded by यस्य. जर्भुरीति—√*bhur* to quiver, inte. pres. 3rd. sing.; accented because preceded by यस्य. विश्वरूपाः—Having all forms; Bahuvrīhi compd. accented on the first member especially on the final syllable (बहुव्रीहौ विश्वं संज्ञायाम् Pāṇ. VI.2.106.). यच्छ—√*yam* to stretch out, pres. impv. 2nd. sing.

दिवः । नः । वृष्टिम् । मरुतः । ररीध्वम् । प्र । पिन्वत । वृष्णः । अश्वस्य । धाराः ॥ अर्वाङ् । एतेन । स्तनयित्नुना । आ । इहि । अपः । निऽसिञ्चन् । असुरः । पिता । नः ॥६॥

सा० भा०—हे मरुतः यूयं दिवः अन्तरिक्षसकाशात् नः असमदर्थं वृष्टिं ररीध्वं दत्त। वृष्णः वर्षकस्य अश्वस्य व्यापकस्य मेघस्य संबन्धिन्यः धाराः उदकधाराः प्र पिन्वत प्रक्षरत। हे पर्जन्य त्वम् एतेन स्तनयित्नुना गर्जता मेघेन सह अर्वाङ् अस्मदभिमुखम् एहि आगच्छ। किं कुर्वन्। अपः अम्भांसि निषिञ्चन् स देवः असुरः उदकानां निरसितापि सन् नः अस्माकं पिता पालकश्च॥

शब्दा०—दिवः=आकाश से, नः=हमको, वृष्टिम्=वर्षा, मरुतः= ओ मरुतों, ररीध्वम्=प्रदान करो, प्र पिन्वत्=बहावो, वृष्णः=शक्तिशाली,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अश्वस्य=घोड़े अर्थात् बादल की, धाराः=जल की धारा, अर्वाङ्=हमारी तरफ, एतेन=इस, स्तनयित्नुना=गर्जन के साथ, आ इहि=आवो।

हि० अ०—ओ मरुतों, आकाश से हमको वृष्टि प्रदान करो; अपने शक्तिशाली घोड़े (बादल) के जल की धारा (हमारी तरफ) बहावो; इस गर्जन के साथ जल छिड़कते हुये हमलोगों के पिता (तुम) हमारी तरफ आवो।

Trans.—O Maruts, give us rain from the sky; pour down streams of the mighty horse (i.e. cloud); with this thundering come hitherwards sprinkling waters, (thou) our life-giving father.

Notes.—ररीध्वम्—√*rā* to give, III. conjug. mid. pres. impv. 2nd. plu. पिन्वत—√*pinv* to fatten, pres. impv. 2nd. plu. इहि—√*i* to go, pres. impv. 2nd. sing. निषिञ्चन्—नि+√*sic* to pour, pres. part.

अभि। क्रन्द। स्तनय। गर्भम्। आ। धाः। उदन्ऽवता। परि। दीय। रथेन॥ दृतिम्। सु। कर्ष। विऽसितम्। न्यञ्चम्। समाः। भवन्तु। उत्ऽवतः। निऽपादाः॥७॥

सा० भा०—अभि भूम्यभिमुखं क्रन्द शब्दय। तदेव पुनरुच्यते दार्ढ्यार्थं। स्तनय गर्ज। गर्भं गर्भस्थानीयमुदकम् ओषधीषु आ धाः आधेहि। तदर्थम् उदन्वता उदकवता रथेन परि दीय परितो गच्छ। दृतिं दृतिवदुदकधारकं मेघं विषितं विशेषेण सितं बद्धं न्यञ्चं न्यक् अधोमुखं सु सुष्ठु कर्ष आकर्ष वृष्ट्यर्थम्। यद्वा। विषितं विमुक्तबन्धनमेवं कर्ष। एवं कृते उद्वतः ऊर्ध्ववन्तः उन्नतप्रदेशाः निपादाः न्यग्भूतपादा निकृष्टपादा वा निम्नोन्नतप्रदेशाः समाः एकस्थाः भवन्तु उदकपूर्णा भवन्त्वित्यर्थः॥

शब्दा०—अभिक्रन्द=शब्द करो, स्तनय=गर्जन करो, गर्भम्=गर्भ, आ धाः=धारण करो, उदन्वता=पानी भरे, परि दीय=चारों तरफ घूमो, रथेन=रथ से, दृतिम्=थैले को, सु=अच्छी प्रकार से, कर्ष=लावो, विसितम्=बन्धन रहित, न्यञ्चम्=अधोमुख करके, समाः=बराबर, भवन्तु=हो जावें, उद्वतः=ऊंचे, निपादः=नीचे स्थान।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—(पृथिवी की ओर) शब्द करो; गर्जन करो; (ओषधियों में) गर्भ धारण करो; पानी भरे अपने रथ से चारों तरफ घूमो; बंधनरहित जल के थैले को अधोमुख करके अच्छी प्रकार से लावो; (ताकि) ऊंचे तथा नीचे स्थान (जल से) बराबर हो जावें।

Trans.—Bellow towards (the earth); thunder; put the seed (in the herbs); traverse around with the water-laden chariot; draw well the unfastened waterskin downwards; (so that) be leval the high and low places.

Notes.—क्रन्द—√*krand* to cry out, pres. impv. 2nd. sing. स्तनय—√*stan* to thunder, pres. impv. 2nd. sing.; accented because beginning of a new sentence. धाः—√*dhā* to put, root-aorist, 2nd. sing. दीया—√*dī* to fly, pres. impv. 2nd. sing.; final syllable is metrically lengthened. कर्ष—√*kṛs* to plough, pres. impv. 2nd. sing. विषितम्—√*si* to bind, past part. acc. sing. with prep. वि; Sāyaṇa gives alternative meanings—विशेषेण सितन् बद्धम् or विमुक्त बन्धनम्; Wilson takes it to mean 'tight fastened'; Griffith, Macdonell and Peterson as 'unfastened'. न्यञ्चम्—From ni+√*añc*, directed down wards.

महान्तम्। कोशम्। उत्। अच। नि। सिञ्च। स्यन्दन्ताम्। कुल्याः। विऽसिताः। पुरस्तात्॥ घृतेन। द्यावापृथिवी इति। वि। उन्धि। सुऽप्रपानम्। भवतु। अघ्न्याभ्यः॥८॥

सा० भा०—हे पर्जन्य त्वं महान्तं प्रवृद्धं कोशं कोशस्थानीयं मेघम् उदच उद्गच्छ। उद्गमय वा। तथा कृत्वा नि षिञ्च नीचैः क्षारय। कुल्याः नद्यः विषिताः विश्लथाः सत्यः स्यन्दन्तां प्रवहन्तु पुरस्तात् पूर्वाभिमुखम्। प्रायेण नद्यः प्राच्यः स्यन्दन्ते घृतेन उदकेन द्यावापृथिवी दिवं च पृथिवीं च व्युन्धि क्लेदय अत्यधिकम्। अघ्न्याभ्यः गोभ्यः सुप्रपाणं सुष्ठु प्रकर्षेण पातव्यमुदकं भवतु॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा० महान्तम्=महान्, कोशम्=जलपात्र, उद्‌च=उपर ले जावो, नि सिञ्च=नीचे की तरफ बरसावो, स्यन्दन्ताम्=बहें, कुल्याः=नदियां, विसिता=बन्धनरहित होकर, पुरस्तात्=आगे, घृतेन=घी से, द्यावापृथिवी =आकाश तथा पृथिवी को, वि उन्धि=भिगो दो, सुप्रपानम्=पर्याप्त मात्रा में पीने योग्य, भवतु=होवे, अघ्न्याभ्यः=अवध्य गायों के लिये।

हि० अ०—(ओ पर्जन्य) महान् जलपात्र (बादल) को उपर ले जावो; (वहाँ से) नीचे (जल) बरसावो; नदियाँ बन्धनरहित होती हुई आगे बहें; घृत (वर्षा के जल) से दोनों आकाश तथा पृथिवी को भिगो दो; अवध्य गायों के (पीने के) लिये पर्याप्त पानी होवे।

Trans.—(O Parjanya), raise up the great cask; (and therefrom) pour down (waters); flow forward the streams, released; sprinkle both heaven and earth with ghṛta (water); abundant be the drink for cows.

Notes.—अच—√*ac* to bend, pres. impv. 2nd. sing. नि षिञ्च—√*sic* to pour, pres. impv. 2nd. sing. स्यन्दन्ताम्—√*syand* to move on, mid. pres. impv. 3rd. plu.; accented because beginning of a new sentence. द्यावापृथिवी—See notes I.35.9. वि उन्धि—√*ud* to wet, pre. impv. 2nd. sing.

यत्। पर्जन्य। कनिक्रदत्। स्तनयन्। हंसि। दुःऽकृतः॥ प्रति। इदम्। विश्वम्। मोदते। यत्। किम्। च। पृथिव्याम्। अधि॥९॥

सा० भा०—हे पर्जन्य यत् यदा त्वं कनिक्रदत् अत्यर्थं शब्दयन् स्तनयन् दुष्कृतः पापकृतो मेघान् हंसि विदारयसि तदानीम् इदं विश्वं जगत् प्रति मोदते। विश्वं विशेष्यते। यत्किं च पृथिव्यामधि भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं विश्वं मोदते हृष्यति। वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धम्॥

शब्दा०—यत्=जब, पर्जन्य=ओ पर्जन्य, कनिक्रदत्=शब्द करते हुये, स्तनयन्=गरजते हुये, हंसि=मारते हो, दुष्कृतः=पापी मेघो को, इदम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

=यह, विश्वम्=सम्पूर्ण संसार, प्रति मोदते=प्रसन्न होता है, यत्=जो किञ्च=कोई भी, पृथिव्याम्=पृथिवी पर, अभि=अधिष्ठित है।

हि० अ० —ओ पर्जन्य, जोरों से शब्द करते हुये, गरजते हुये (तुम) जब पापी (मेघों) को मारते हो, यह सम्पूर्ण संसार तथा जो कोई पृथिवी पर है प्रसन्न होता है।

Trans.—When, O Parjanya, roaring and thundering (thou) slayest the malignant, this entire world rejoices, and all that is on the earth.

Notes—कनिक्रदत्—See V.83.1. स्तनयन्—See V.83.2. हंसि – √*han* ro kill, pres. 2nd. sing.; accented because preceded by यत्. मोदते—√*mud* to rejoice, mid. pres. 3rd. sing.

अवर्षीः। वर्षम्। उत्। ऊँ इति। सु। गृभाय। अकः। धन्वानि। अतिऽएतवै। ऊँ इति॥ अजीजनः। ओषधीः। भोजनाय। कम्। उत। प्रऽजाभ्यः। अविदः। मनीषाम्॥१०॥

सा० भा०—इयमतिवृष्टिविमोचनी। हे पर्जन्य त्वम् अवर्षीः वृष्टवानसि। वर्षमुदु षू गृभाय उत्कृष्टं सु सुष्ठु गृभाय गृहाण। परिहरेत्यर्थः। धन्वानि निरुदकप्रदेशान् अकः जलवतः कृतवानसि। किमर्थम्। अत्येतवा उ अतिक्रम्य गन्तुम्। ओषधीः अजीजनः उदपादयः। किमर्थम्। भोजनाय धनाय भोगाय वा। कम् इत्ययं 'शिशिरं जीवनाय कम्' इतिवत् पादपूरणः (नि० १. १०)। उत अपि च प्रजाभ्यः सकाशात् मनीषां स्तुतिम् अविदः प्राप्तवानसि॥

शब्दा०—अवर्षीः=बरसा चुके, वर्षम्=वर्षा, सु=पूर्णरूप से, उद्गृभाय =रूक जावो, अकः=किया, धन्वानि=बालूमय स्थान को, अति एतवै=चलने लायक, अजीजनः=उत्पन्न किया, ओषधीः=वनस्पतियों को, भोजनाय= आनन्द के लिये, कम्=पादपूरण के लिये एक निपात, उत=और, प्रजाभ्यः =प्रजाओं से, अविदः=प्राप्त कर चुके, मनीषाम्=स्तुतियों को।

हि० अ०—(ओ पर्जन्य), तुम वर्षा बरसा चुके; (अब) पूर्णरूप से रुक जावो; रेगिस्तान को पार करने योग्य बना चुके; ओषधि को आनन्द के लिये उत्पन्न कर चुके; और प्रजाओं से स्तुति भी प्राप्त कर चुके।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—(O Parjanya), (thou) hast poured down rain, (now) stop (raining) fully ; (thou) hast made the deserts crossable ; (thou) hast produced herbs for (man's) enjoymet ; and (thou) hast found laudation from the people.

Notes.—अवर्षीः —√*vṛṣ* to rain ; 's'-aorist, 2nd. sing. accented because beginning of the Pāda. गृभाय—√*grabh* to seize, pres. 2nd. sing. अकः—√*kṛ* to make, 'root'-aorist, 2nd. sing accented because beginning a new sentence. अत्येतवै —For accent see notes on अन्वेतवै (I.24.8) अजीजनः—√*jan* to generate, 'red.-aorist, 2nd. sing, ; accented because beginning of the Pāda. कम् —Accented कम् as a particle generally occurs at the end of a Pāda and is preceded by datives and gives the sense of 'for the benefit of'; (cf. unaccented कम् I.154.1.). अविदः —√*vid* to find 'a'-aorist, 2nd. sing. उत प्रजाभ्योऽविदो मनीषाम् —Muir renders : 'and thou hast fulfilled the desires of living creatures'.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'सं पूषन्' इति दशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं पौष्णं गायत्रम्। 'सं पूषन्' इत्यनुक्रान्तम्। नष्टधनन्विच्छता पुरुषेणैतज्जप्यम्। सूत्रितं च—'सं पूषन्विदुषेति नष्टमधिजिगमिषन्मूळ्हो वा' (आश्व० गृ० ३. ७. ९) इति।

सम्। पूषन्। विदुषा। नय। यः। अञ्जसा। अनुऽशासति॥ यः। एव। इदम्। इति। ब्रवत्॥१॥

सा० भा०—हे पूषन् पोषक देव विदुषा जानता तेन जनेन संनय अस्मान् संगमय यः विद्वान् अञ्जसा ऋजुमार्गेण अनुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपदिशति। यः च एव एवम् इदं नष्टं भवदीयं धनम् इति ब्रवत् ब्रवीति। नष्टं धनं दर्शयतीत्यर्थः। तेन विदुषेत्यन्वयः॥

शब्दा०—पूषन्=ओ पूषन् देवता, विदुषा=जानकार व्यक्ति से, संनय =संयुक्त करो, मिलाओ, यः=जो, अञ्जसा=सीधे, अनुशासति=बतावे, यः=जो, एव=यहां, इदम्=यह, इति=ऐसा, ब्रवत्=कहे।

हि० अ०—ओ पूषन्, (हमे उस) जानकार (व्यक्ति) के सम्पर्क में ले जावो जो सीधे मार्ग से (नष्ट द्रव्यों की प्राप्ति का उपाय) बतावे; तथा जो यह कहे कि 'यह यहाँ है'।

Trans.—O Pūṣan, associate (us) with a wise (man) who may instruct (us) in simple way; who may speak 'it is here'.

Notes—संनय—√*nī* with सम् to associate, to conjoin, impv. 2nd. sing. अनुशासति—अनु+√*śās* to instruct, pres. subju. 3rd. sing. not unaccented because prceded by यः. ब्रवत्—√*brū* to speak, pres. subju. 3rd. sing.; not unaccented because preceded by यः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्। ऊँ इति। पूष्णा। गमेमहि। यः। गृहान्। अभिऽशासति॥
इमे। एव। इति। च। ब्रवत्॥२॥

सा० भा०—पूष्णा अनुगृहीता वयं सं गमेमहि तेन जनेन संगच्छेमहि यः जनः गृहान् येषु गृहेषु अस्मदीया नष्टाः पशवस्तिष्ठन्ति तान् गृहान् अभिशासति अभिशास्ति आभिमुख्येन बोधयति। यश्च इमे त्वदीया नष्टाः पशवः एव एवं तिष्ठन्ति इति च ब्रवत् ब्रूयात्॥

शब्दा०—पूष्णा=पूषन् के साथ, संगमेमहि=चलें, यः=जो, गृहान्=उन घरों को जहां पर चुराये गये पशु रखे गये हैं, अभिशासति=बतावे, इमे=ये, एव=यहां, इति=ऐसा, ब्रवत्=कहे।

हि० अ०—पूषन् के साथ (हम लोग) चलें जो (खोये पशुओं के रखने की गुप्त) जगह बतावे; तथा जो यह बतावे कि 'वे यहां हैं'।

Trans.—May we go together with Pūṣan who may instruct (the way to) places (where lost things are kept hidden); who may speak, 'these are here'.

Notes—संगमेमहि—√*gam* with सम् to go together, 'a'-aorist injun. 1rst. plu. ब्रवत्—√*brū* to speak, pres. subju. 3rd. sing; accented because preceded by च (चादिषु च—Pāṇ VIII.1.58).

पूष्णः। चक्रम्। न रिष्यति। न। कोशः। अव। पद्यते। नो
इति। अस्य। व्यथते। पविः॥३॥

सा० भा०—पूष्णः पोषकस्य देवस्य चक्रम् आयुधं न रिष्यति न विनश्यति। अस्य चक्रस्य कोशः च न अवपद्यते न हीयते। अस्य पविः धारा च नो नैव व्यथते कुण्ठी भवति। तेन चक्रेण चोरान् हत्वा अस्मदीयं धनं प्रकाशयेति भावः।

शब्दा०—पूष्णः=पूषन् का, चक्रम्=आयुध, न=नहीं, रिष्यति=नष्ट होता, न=नहीं, कोशः=तरकस, अव पद्यते=खाली होता है, नो=नहीं, अस्य=उसका, व्यथते=कुण्ठित होती है, पविः=धार।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—पूषन् का आयुध कभी नष्ट नहीं होता; (उसका) तरकस कभी खाली नहीं होता; उसकी धार कभी कुण्ठित नहीं होती।

Trans.—The weapon of Pūṣan is never injured; the quiver is never vacated; its edge is never blunted.

Notes—चक्रम्—'Weapon' (Sāyaṇa), 'wheel of the chariot' (Griffith, Macdonell). रिष्यति—√*riṣ* to be hurt, pres. 3rd. sing. कोशः—'Quiver' (Sāyaṇa), 'box, interior part of the chariot' (Griffith). अवपद्यते—√*pad* with अव to go down Sāyaṇa takes it to mean 'is never vacated.' नो—(=न+उ); उ, when combines with the final अ or आ (of a particle) in to ओ, it is treated as Pragṛhya vowel; hence, इति is added after it in the Pada-text. व्यथते—√*vyath* to waver, pres. mid. 3rd sing. Sāyaṇa takes it to mean 'is blunted'. पविः—'Edge of the weapon (Sāyaṇa) 'felly' (Griffith, Macdonell).

यः। अस्मै। हविषा। अविधत्। न। तम्। पूषा। अपि। मृष्यते॥ प्रथमः। विन्दते। वसु॥४॥

सा० भा०—यः यजमानः अस्मै पूष्णे हविषा चरुपुरोडाशादिना अविधत् परिचरति तं यजमानं पूषा न अपि मृष्यते। अपिशब्द ईषदर्थे। ईषदपि न हिनस्ति। स च प्रथमः मुख्यः सन् वसु धनं विन्दते लभते॥

शब्दा०—यः=जो, अस्मै=उसके लिये, हविषा=हवि से, अविधत्=पूजा करता है, न=नहीं, तम्=उसको, पूषा=पूषा देवता, अपि=जरा भी मृष्यते=भूलता, प्रथमः=सर्व प्रथम, विन्दते=प्राप्त करता है, वसु=धन।

हि० अ०—जो इसके लिये हवि से पूजा करता है उसको पूषा जरा भी नहीं भूलता; (वह) सर्वप्रथम धन प्राप्त करता है।

Trans.—Who worship him with oblation, Pūṣan does not least forget him; he attains the wealth first.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes.—अविधत् —√*vidh* to worship, impf. 3rd. sing.; not unaccented because preceded by यः. अपि — Verbal preposition; Sāyaṇa takes it in the sense of 'least' (अपि शब्द ईषदर्थे). मृष्यते—√*mṛṣ* to not heed, to do harm (Sāyaṇa), pres. mid. 3rd. sing. विन्दते—√*vid* to find, pres. 3rd. sing.

पूषा । गाः । अनु । एतु । नः । पूषा । रक्षतु । अर्वतः ॥ पूषा । वाजम् । सनोतु । नः ॥५॥

सा० भा०—पूषा पोषको देवः नः अस्मदीयाः गाः अन्वेतु रक्षणार्थमनुगच्छतु । स च पूषा अर्वतः अश्वान् रक्षतु चोरेभ्यः । तथा वाजम् अन्नं च नः अस्मभ्यं पूषा सनोतु प्रयच्छतु ॥

शब्दा०—पूषा=पूषन् देवता, गाः=गायों के, अनु=पीछे, एतु=जावे, पूषा=पूषन् देवता, रक्षतु=रक्षा करे, अर्वतः=अश्वों को, पूषा=पूषन् देवता, वाजम्=धन, सनोतु=प्रदान करे, नः=हमारे लिये ।

हि० अ०—पूषा हमारे पशुओं (को रक्षा के लिये उन) के पीछे जावे; पूषा घोड़ों को (चोरों से) रक्षा करे; पूषा हमारे लिये धन प्रदान करे ।

Trans.—May Pūṣan go after our cattle; may Pūṣan protect our horses; may Pūṣan grant us food.

Notes.—अन्वेतु—√*i* with अनु to go after, impv. 3rd. sing. रक्षतु—√*rakṣ* to protect, impv. 3rd. sing. सनोतु—√*san* to gain, impv. 3rd. sing.

पूषन् । अनु । प्र । गाः । इहि । यजमानस्य । सुन्वतः ॥ अस्माकम् । स्तुवताम् । उत ॥६॥

सा० भा०—हे पूषन् सुन्वतः सोमाभिषवं कुर्वतः यजमानस्य गाः पशून् अनु प्र इहि रक्षणार्थमनुगच्छ । उत अपि च स्तुवतां त्वद्विषयं स्तोत्रं कुर्वताम् अस्माकं गाश्चानुगच्छ ॥

शब्दा०—पूषन्=ओ पूषन्, अनु=पीछे, गाः=गायों के, इहि=जावो,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यजमानस्य=यजमान की, सुन्वतः=सोम पीसनेवाले की, अस्माकम् =हमारी, स्तुवताम्=स्तुति करनेवाले की, उत=और।

हि० अ०—ओ पूषन्, सोम पीसनेवाले यजमान की गायों (की रक्षा के लिये) उनके पीछे जावो; और (तुम्हारी) स्तुति करनेवाले हमलोगों की (गायों के भी पीछे जावो)।

Trans.—O Pūṣan, go after the cows of sacrificer who presses Soma, and of us who praise (thee).

Notes.—अनु इहि–√*i* with अनु to go after, impv. 2nd. sing.

माकिः। नेशत्। माकीम्। रिषत्। माकीम्। सम्। शारि। केवटे॥ अथ। अरिष्टाभिः। आ। गहि॥७॥

सा० भा०—हे पूषन् अस्मदीयं गोधनं माकिर्नेशत् मा नश्यतु। माकिर्माकीम् इत्येतौ प्रतिषेधमात्रे वर्तेते। माकीं रिषत्। मा व्याघ्रादिभिर्हिंस्यताम्। माकीं मा च केवटे कूपे सं शारि संशीर्णं भूत्। कूपपातेनापि हिंसितं मा भवतु। अथ एवं सति अरिष्टाभिः अहिंसिताभिर्गोभिः सह आ गहि सायंकाले आगच्छ॥

शब्दा०—माकिः=कोई नहीं, नेशत्=नष्ट हो, भूले, माकीम्=किसी को भी नहीं, रिषत्=चोट लगे, माकीम्=कोई भी नहीं, संशारि=गिरकर नष्ट हो, केवटे=कूयें में, अथ=अतः, अरिष्टाभिः=बिना कष्ट पहुँचे गायों के साथ, आ गहि=आवो।

हि० अ०—(गायों में से) कोई न भूले, किसी को चोट न लगे; कोई कूयें में (गिरकर) न मर जाय। अतः तुम बिना कष्ट पहुँचे (गायों) के साथ आवो।

Trans.—Let none (of our cows) be lost; let none be harmed; let none be crushed in the well. Thus, come with uninjured (cows).

Notes.—नेशत् –√*naś* to be lost, 'red'-aorist, injun. 3rd. sing. रिषत् –√*riṣ* to be hurt, 'a'-aorist, injun.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

3rd. sing. संशारि—√*śṛ* to crush, pass. aorist, 3rd. sing. आ गहि—√*gam* with आ to come, root-aorist impv. 2nd. sing.

श्रृण्वन्तम् । पूषणम् । वयम् । इर्यम् । अनष्टवेदसम् ॥ ईशानम् । रायः ईमहे ॥८॥

सा० भा०—अस्मत्स्तोत्राणि श्रृण्वन्तम् इर्यं दारिद्र्यस्य प्रेरकम् अनष्टवेदसम् अविनष्टधनम् ईशानं सर्वस्येश्वरमेवंविधं पूषणं देवं वयं रायः धनानि ईमहे याचामहे ॥

शब्दा० - श्रृण्वन्तम्=सुनने वाले, पूषणम्=पूषन् को, वयम्=हम, इर्यम्=दरिद्रता को दूर करनेवाले, अनष्टवेदसम्=कभी नष्ट न होने योग्य धनवाले, ईशानम्=मालिक, रायः=धन के, ईमहे=प्रार्थना करते हैं ।

हि० अ० –(प्रार्थना) सुननेवाले, दरिद्रता को दूर करनेवाले, कभी नष्ट न होने योग्य धनवाले, धन के मालिक पूषा की हम प्रार्थना करते हैं ।

Trans.—We implore Pūṣan who hears (of our speech), who removes the poverty, whose wealth is never lost, who is the master of wealth.

Notes.—श्रृण्वन्तम् –√*śru* to hear, pres. part. acc. sing. इर्यम् –'Remover of poverty' (Sāyaṇa), 'strong' (Griffith), 'watchful' (Macdonell). अनष्टवेदसम् –He whose wealth is never lost ; नञ् compd. accented on the first syllable, ईशानम् –√*īs* to be master, pres. part. acc. sing. ईमहे –√*i* to go, mid. pres. 1rst. plu.

पूषन् । तव । व्रते । वयम् । न । रिष्येम । कदा । चन ॥ स्तोतारः । ते । इह । स्मसि ॥९॥

सा० भा० – हे पूषन् पोषक तव त्वदीये व्रते कर्मणि वर्तमानाः वयं कदाचन कदाचिदपि न रिष्येम हिंसिता न भवेम । तादृशाश्च वयम् इह अस्मिन् कर्मणि ते तव स्तोतारः स्मसि स्मः भवामः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—पूषन्=ओ पूषन्, तव=तुम्हारे, व्रते=कार्य में लगे, वयम्=हमलोग, न=नहीं, रिष्येम=कष्ट पावें, कदाचन=कभी भी, स्तोतारः=स्तुति करनेवाले, ते=तुम्हारे, इह=यहाँ, स्मसि=होवें।

हि० अ०—ओ पूषन्, तुम्हारे कार्य में (लगे हमलोग) कभी भी कष्ट न पावें। यहाँ हम लोग तुम्हारे स्तुति-गायक हों।

Trans.—O Pūṣan, in thy service never we be injured. Here we be singers of thy praise.

Notes.—रिष्येम—√*riṣ* to be hurt, opt. 1rst. plu. स्मसि—√*as* to be, 1rst. plu. ending in सि like मिनीमसि.

परि। पूषा। परस्तात्। हस्तम्। दधातु। दक्षिणम्। पुनः। नः। नष्टम्। आ। अजतु ॥१०॥

सा० भा०—पूषा पोषको देवः परस्तात् परस्मिन् देशे सुसंचारादन्यस्मिन् चोरव्याघ्रादिभिरुषिते देशे गच्छतो गोधनस्य निवारणाय स्वकीयं दक्षिणं हस्तं परि दधातु। परिधानं निवारकं करोतु। नः अस्मदीयं नष्टं च गोधनं पुनः आजतु आगच्छतु। आगमयतु ॥१०॥

शब्दा०—पूषा=पूषा देवता, परस्तात्=दूर से, हस्तम्=हाथ, परि दधातु=चारों तरफ रखे, दक्षिणम्=दाहिना, पुनः=फिर, नः=हमारे पास, नष्टम्=चोरी गये पशु को, आ अजतु=भेजे।

हि० अ०—पूषा अपने दाहिने हाथ को दूर से (हमारे) चारो तरफ रखे। चोरी गये पशु को पुनः मेरे पास भेजे।

Trans.—Let Pūṣan put his right hand around (for our protection) from afar. Let him drive the lost cattle for us again.

Notes.—परि दधातु— √*dhā* to put, impv. 3rd. sing. अजतु— √*aj* to drive, impv. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'धीरा त्वस्य' इत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । तथा चानुक्रान्तम्—'धीराष्टौ वारुणं ह' इति । गतो विनियोगः ॥

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ । रोदसी इति । चित् । उर्वी इति ॥ प्र । नाकम् । ऋष्वम् । नुनुदे । बृहन्तम् । द्विता । नक्षत्रम् । पप्रथत् । च । भूम ॥१॥

सा० भा०—अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु क्षिप्रं धीरा धीराणि धैर्यवन्ति भवन्ति । यः वरुणः उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यावपि वि तस्तम्भ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत् । यश्च बृहन्तं महान्तं नाकम् आदित्यं नक्षत्रं च ऋष्वं दर्शनीयं द्विता द्वैधं प्र नुनुदे प्रेरयति स्म । अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः । भूम भूमिं च यः पप्रथत् अप्रथयत् विस्तारितवान् । तस्यास्य वरुणस्येत्यन्वयः ॥

शब्दा०—धीरा=स्थिर, तु=शीघ्र, अस्य=इस वरुण के, महिना=महानता के कारण, जनूंषि=जन्म, यः=जिसने, वि तस्तम्भ=धारण किया है, रोदसी=आकाश तथा पृथिवी को, चित्=भी, उर्वी=विस्तृत, नाकम्=सूर्य को, ऋष्वम्=ऊँचे, प्र नुनुदे=प्रेरित किया है, बृहन्तम्=महान्, द्विता=दो प्रकार से, नक्षत्रम्=नक्षत्रों को, पप्रथत्=विस्तृत किया है, च=और, भूम=पृथिवी को ।

हि० अ०—इस (वरुण) के जन्म (इसकी) महानता के कारण स्थिर हैं, जिसने विस्तृत आकाश तथा पृथिवी को भी धारण किया है, (जिसने) ऊँचे एवं महान् सूर्य और नक्षत्रों को दो प्रकार से प्रेरित किया है ।

Trans.—The births of him (Varuṇa's) are stabled in greatness ; who propped even the vast heaven and earth ; he urged the lofty and great sun and constellation to motion to (their) two fold (task), and spread the earth.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes.—धीरा—'Stable' (Sāyaṇa), 'permanent' (Wilson), 'wise' (Griffith); Grassmann derives it from √*dhī*, while Geldner from √*dhṛ* to hold. तु—Sāyaṇa renders it as 'क्षिप्रं' and Griffith as 'verily'. जनूंषि—'Births' (Sāyaṇa), 'creatures' (Griffith), 'creation' (Peterson), 'created beings especially gods and men' (Parāñjpe). तस्तम्भ—√*stambh* to prop, pref. 3rd. sing.; not unaccented because preceded by यः. नाकम्—According to Yāska नाकम् means sun as well as sky (नाकः आदित्यो भवति नेता भासाम्। ज्योतिषां प्रणयः। अथ द्यौः, कम् इति सुखनाम। तत् प्रतिषिद्धं प्रतिषिध्येत। न वा अमुं लोकं जग्मुषे किंचनाकम्। न वा अमुं लोकं गतवते किंचन असुखम्—Nir. II. 14) Sāyaṇa takes it here as 'sun', Griffith and Peterson as 'sky'. ऋष्वम्—Lofty (Nigh. III. 3.3). Sāyaṇa renders it as 'दर्शनीयं' Wilson as 'beautiful.' Griffith and Peterson follow Yāska's interpretation. प्र नुनुदे—√*nud* to push, pref. 3rd. sing. Maxmüller takes it to mean 'lighted on high'. बृहन्तम्—Great; pres. part. acc. sing. from √*bṛh* to make big. द्विता—'By itself', 'all alone', 'on both sides i.e. westwards by day and eastwards at night' (Geldner) 'apart' (Maxmüller), 'forsooth', 'verily' (Oldenberg). According to Roth, Grassmann and Bergaigne, it is an emphatic particle. पप्रथत्—√*prath* to spread, pref. subju. 3rd. sing.; not unaccented because regarded as beginning of a new sentence.

उत। स्वया। तन्वा। सम्। वदे। तत्। कदा। नु। अन्तः। वरुणे। भुवानि॥ किम्। मे। हव्यम्। अहृणानः। जुषेत। कदा। मृळीकम्। सुऽमनाः। अभि। ख्यम्॥२॥

सा० भा०—वरुणं शीघ्रं दिदृक्षमाण ऋषिरनया वितर्कयति। उतेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विचिकित्सायाम्। उत किं स्वया तन्वा स्वीयेनात्मीयेन शरीरेण सं वदे सहवदनं करोमि। आहो स्वित् तत् तेन वरुणेन सह संवदे। कदा नु कदा खलु वरुणे देवे अन्तः भुवानि अन्तर्भूतो भवानि। वरुणस्य चित्ते संलग्नो भवानीत्यर्थः। अपि च मे मदीयं हव्यं स्तोत्रं हविर्वा अहृणानः अक्रुध्यन् वरुणः किं केन हेतुना जुषेत सेवेत। सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन् काले मृळीकं सुखयितारं वरुणम् अभि ख्यम् अभिपश्येयम्॥

शब्दा—उत=और, स्वया=अपने, तन्वा=शरीर से संवदे=वार्तालाप करूंगा, तत्=उस देवता के साथ, कदा=कब, नु=निश्चित रूप से, अन्तः =हृदय में, वरुणे=वरुण के, भुवानि=होऊंगा, किम्=क्या, मे=मेरी, हव्यम्=प्रार्थना, अहृणानः=क्रोधरहित होकर, जुषेत=स्वीकार करेगा, कदा=कब, मृळीकम्=दयालु वरुण को, सुमना=सुन्दर मनवाला होकर, अभिख्यम्=देखूँगा।

हि० अ०—क्या मै अपने शरीर से उस (वरुण देवता) के साथ वार्तालाप करूंगा, ? वरुण के हृदय में मै कब होऊंगा ? क्या मेरी प्रार्थना को क्रोध-रहित (होकर वह) स्वीकार करेगा ? सुन्दर मनवाला (होकर) मै दयालु (वरुण) को कब देखूँगा ?

Trans.—Whether I with my own body converse together with that (deity) ? When shall I be in the heart of Varuṇa ? Whether the unangered one would accept my imvocation ? When shall I with good mind see the merciful (Varuṇa) ?

Notes.—उत—Sāyaṇa renders it by 'किम्'; Wilson takes it to mean 'when' and Peterson as 'and'. संवदे—√*vad* with सम् to speak together, pres. 1rst. sing. भुवानि—√*bhū* to be, 'root'-aorist, subju. 1rst. sing. अहृणानः—Pres. part. from √*hṛ* to be angry; नञ compd. accented on the first member. जुषेत—√*juṣ* to enjoy, opt. 3rd. sing. अभिख्यम्—√*khyā* to see 'a'-aorist, injun. 1rst. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि । चिकितुषः । विऽपृच्छम् ॥ समानम् । इत् । मे । कवयः । चित् । आहुः । अयम् । ह । तुभ्यम् । वरुणः । हृणीते ॥३॥

सा० भा०–हे वरुण तदेनः पापं पृच्छे त्वां पृच्छामि । दिदृक्षु । छान्दसः सुलोपः । द्रष्टुमिच्छन्नहम् । येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि पृष्टः संस्तत् पापं कथय । अहं विपृच्छं विविधं प्रष्टुं चिकितुषः विदुषो जनान् उपो एमि उपागाम् । ते कवयश्चित् क्रान्तदर्शिनो जनाश्च मे मह्यं समानमित समानमेवैकरूपमेव आहुः अकथयन् । यदाहुस्तदाह । हे स्तोतः तुभ्यम् अयं ह अयमेव वरुणः हृणीते क्रुध्यतीति । अतः क्रोधं परित्यज्यास्मान् पाशेभ्यो मोचय ॥

शब्दा०—पृच्छे=पूछता हूँ, तत्=उस, एनः=पाप को, वरुण=ओ वरुण, दिदृक्षु=देखने की इच्छा से, उपो=पास, एमि=गया, चिकितुषः=विद्वानों के, विपृच्छम्=विविधरूप से पूछने के लिये, समानम्=एक जैसा, इत्=ही, मे=मुझको, कवयः=बुद्धिमानों ने, चित्=भी, आहुः=कहा, अयम्=यह, ह=निश्चित अर्थ का वाचक एक निपात, तुभ्यम्=तुम पर, वरुणः=वरुण देवता, हृणीते=क्रोध करता है ।

हि० अ०—ओ वरुण, देखने की इच्छा से उस पाप को (मै तुमसे) पूछता हूँ; विविध रूप से पूछने के लिये (मै) विद्वानों के पास गया । बुद्धिमानों ने एक ही (उत्तर) कहा—'यह वरुण ही तुम पर क्रोध करता है' ।

Trans.—Desirous of seeing, O varuṇa, I ask that sin (of mine) ; (I) have gone to wise ones to ask. The wise ones told me the same (answer), 'verily this Varuṇa is angry upon thee'.

Notes—पृच्छे—√*prach* to ask, mid. pres. 1rst sing. दिदृक्षु—√*dṛś* to see, desid. noun used as an adverb. अपो—(=उप+उ); final ओ is Pragṛhya. एमि—√*i* to go, pres. 1rst. sing. चिकितुषः—Acc. plu. perf. part. from √*cit* to know. विपृच्छम्—Acc. infinitive in अम् from √*prach* to ask. आहुः—√*ah* to say, pref. 3rd. plu. हृणीते—√*hṛ* to be angry, pres. mid. 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किम् । आगः । आस । वरुण । ज्येष्ठम् । यत् । स्तोतारम् । जिघांससि । सखायम् ॥ प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः । अव । त्वा । अनेनाः । नमसा । तुरः । इयाम् ॥४॥

सा० भा०—हे वरुण ज्येष्ठम् अधिकं किमाग आस कोऽपराधो मया कृतो बभूव । यत् येन आगसा सखायं मित्रभूतं सन्तं स्तोतारं जिघांससि हन्तुमिच्छसि । हे दूळभ दुर्दभान्यैर्बाधितुमशक्य स्वधावः तेजस्विन् हे वरुण तत् आगः मे मह्यं प्र वोचः प्रब्रूहि । एवं सति तस्य प्रायश्चित्तं कृत्वा अनेनाः अपापः सन्नहं तुरः त्वरमाणः शीघ्रः नमसा नमस्कारेण हविषा वा त्वाम् अव इयाम् उपगच्छेयम् ॥

शब्दा०—किम्=क्या कौन, आगः=पाप, आस=था, वरुण=ओ वरुण, ज्येष्ठम्=बड़ा, यत्=जिसके कारण, स्तोतारम्=स्तुति करनेवाले को, जिघांससि=मारना चाहते हो, सखायम्=मित्र को, तत्=उसको, मे=मुझसे, प्र वोचः=कहो, दूळभ=ओ कभी न सताये जानेवाले, स्वधावः=ओ शक्तिशाली, त्वा=तुम्हारे पास, अनेनाः=पाप रहित होकर, नमसा=प्रार्थना द्वारा, तुरः=शीघ्र, अव इयाम्=पहुँचू ।

हि० अ०—ओ वरुण, कौन वह महान् पाप था, जिससे कि तुम अपनी स्तुति करनेवाले मित्र को मारना चाहते हो; उसको मुझसे कहो, ओ कभी न सताये जानेवाले, शक्तिशाली (वरुण), (जिससे मैं) पाप रहित (होकर) शीघ्र ही प्रार्थना द्वारा तुम्हारे पास पहुँचूँ ।

Trans.—O Varuṇa, what was that, the most heinuous sin, that thou want to kill (thy) worshipper and a friend ; tell me that, O unharmed (and) powerful one, (so that) freed from sin, with salutation may I reach thee quickly.

Notes.—आस —√*as* to be, pref. 3rd. sing. जिघांससि—√*han* to kill, desid. 2nd. sing. ; not unaccented because prceded by यत्. वोचः—√*vac* to speak, 'red'.-aorist, injun. 2nd. sing. दूळभ—(=दुः+दभ्); visarjanīya has disappeared before the voiced dental द् after cere-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

bralizing the latter and lengthening the preceding vowel : दुः दभ ∠ दुज्दभ ∠ दूळभ (cf. class. Sans. दुर्लभ दूलह). स्वधाव —'Resplendant' (Sāyaṇa), 'lord' (Griffith), 'sovereign god' (Peterson). अनेनाः—Freed from sin ; Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pāṇ VI.2.172). इयाम्—√*i* to go, opt. 1rst. sing.

अव॑ । द्रु॒ग्धानि॑ । पित्र्या॑ । सृ॒ज॒ । नः॒ । अव॑ । या । व॒यम् । च॒कृ॒म । त॒नूभिः॑ ॥ अव॑ । रा॒ज॒न् । प॒शु॒ऽतृप॑म् । न । ता॒युम् । सृ॒ज । व॒त्सम् । न । दाम्नः॑ । वसि॑ष्ठम् ॥५॥

सा० भा०—हे वरुण पित्र्या पितृतः प्राप्तानि नः अस्मदीयानि द्रुग्धानि द्रोहान् बन्धनहेतुभूतान् अव सृज विमुञ्च । अस्मत्तो विश्लेषय । वयं च या यानि द्रोहजातानि तनूभिः शरीरैः चकृम कृतवन्तः स्म तानि च अव सृज । हे राजन् राजमान वरुण पशुतृपं न तायुं स्तैन्यप्रायश्चित्तं कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव दाम्नः रजोः वत्सं न वत्समिव च वसिष्ठं मा बन्धकात् पापात् अव सृज विमुञ्च ॥

शब्दा०—द्रुग्धानि=पापों से, पित्र्या=पिता से प्राप्त, अव सृज=मुक्त करो, नः=हमको, अव=(अव सृज) मुक्त करो, या=जो, वयम्=हमने, चकृम=किया है, तनूभिः=शरीर से, राजन्=ओ राजा, पशुतृपम्=पशु को घासादि से तृप्त करनेवाले, न=जिस तरह, तायुम्=चोर को, अवसृज=मुक्त करो, वत्सम्=बछड़े को, न=जिस तरह, दाम्नः=रस्सी से, वसिष्ठम्=वसिष्ठ को,

हि० अ०—पिता द्वारा (प्राप्त) पापों से मुक्त करो; उन (पापों) से जिनको हमने स्वयं अपने शरीर से किया है, मुक्त करो । ओ राजन् जिस प्रकार पशु को (प्रायश्चित के बाद घासादि से) तृप्त करनेवाले चोर को तथा बछड़े को रस्सी से (मुक्त किया जाता है) (उसी प्रकार) वसिष्ठ को (पापों से) मुक्त करो ।

Trans.—Set us free from sins (committed) by our father ; from those that we have committed with our bodies. Release Vasiṣṭha O king, (from the bond)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

like a thief feeding cattle (after remorse), like a calf from the cord.

Notes.—द्रुग्धानि—From √*druh* to hate; 'hatred that causes one to be bound' (Sāyaṇa), 'ill deeds' (Wilson), 'sins' (Griffith) 'unrighteous acts' (Peterson). अव सृज—√*sṛj* with अव to set free, impv. 2nd. sing. चकृम—√*kṛ* to make, pref. 1rst. plu.; not unaccented because preceded by या. पशुतृपम्—'Nourishing the cattle (after remorse)' (Sāyaṇa) 'who feeds the cattle' (Griffith). In the footnote Griffith writes: 'Who has performed penance for his theft and at the completion of the service, offered fodder to the stolen animal'. According to Maxmüller 'who has feasted on stolen cattle.' Peterson translates as 'who steals cattle.'

न । सः । स्वः । दक्षः । वरुण । ध्रुतिः । सा । सुरा । मन्युः । विऽभीदकः । अचित्तिः ॥ अस्ति । ज्यायान् । कनीयसः । उपऽअरे । स्वप्नः । चन । इत् । अनृतस्य । प्रऽयोता ॥६॥

सा० भा०—हे वरुण सः स्वो दक्षः पुरुषस्य स्वभूतं तद्बलं पापप्रवृत्तौ कारणं न भवति । किं तर्हि ध्रुतिः स्थिरा उत्पत्तिसमय एव निर्मिता दैवगतिः कारणम् । 'ध्रु गतिस्थैर्ययोः' इति धातुः सा च ध्रुतिर्वक्ष्यमाणरूपा । सुरा प्रमादकारिणी मन्युः क्रोधश्च गुर्वादिविषयः सन्ननर्थहेतुः । विभीदकः द्युतसाधनोऽक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । अचित्तिः अज्ञानमविवेककारणम् । अत ईदृशी दैवक्लृप्तिरेव पुरुषस्य पापप्रवृत्तौ कारणम् । अपि च कनीयसः अल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तौ उपारे उपागते समीपे नियन्तृत्वेन स्थितः ज्यायान् अधिक ईश्वरः अस्ति । स एव तं पापे प्रवर्तयति । तथा चाम्नातम्—'एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' (कौ० उ० ३.८) इति । एवं च सति स्वप्नश्चन स्वप्नोऽपि अनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति । इत् इति पूरकः । स्वप्ने कृतैरपि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्मभिर्बहूनि पापानि जायन्ते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यन्त इति । अतो ममापराधो दैवागत इति हे वरुण त्वया क्षन्तव्य इति भावः ॥

शब्दा०—न=नहीं, सः=वह, स्वः=अपनी, दक्षः=शक्ति, वरुण=ओ वरुण, ध्रुतिः=दैव, सा=वह, सुरा=शराब, मन्युः=क्रोध, विभीदकः=जुआ के पाशे, अचित्तिः=अज्ञान, अस्ति=है, ज्यायान्=बड़े, कनीयसः=छोटे के, उपारे=पाप कार्य में ले जाने के लिये, स्वप्नः=स्वप्न, चन=भी इत्=पादपूरण के लिये एक निपात, अनृतस्य=बुराइयों का, प्रयोता=नियामक, संयुक्त करनेवाला ।

हि० अ०—ओ वरुण, वह अपनी शक्ति नहीं (बल्कि) दैव, शराब, क्रोध, जुआ, तथा अज्ञान है (जिससे मनुष्य पाप करता है); छोटे के पाप कार्य में बड़े (भी कारण) होते हैं; स्वप्न भी बुराइयों से संयुक्त करनेवाला है ।

Trans.—O Varuṇa, it is not one's own power, (but) fate, wine, wrath, dice and ignorance (that cause man to commit sin). There is senior in leading to astray the younger; even a dream leads to the commitment of unrighteous act.

Notes.—दक्षः—'Insight,' 'understanding', 'intention' (Grassmann), 'power,' will-power', 'character' (Geldner), 'intent' (Macdonell), 'own-will' (Griffith), volitional act (Peterson). ध्रुतिः—'Fate' (Sāyaṇa), 'condition' (Wilson), 'seduction' (Grassmann, Griffith, Macdonell), 'temptation' (Peterson), 'accident,' 'chance' (Geldner). Sāyaṇa derives it from √*dhru* and Grassmann from √*dhvṛ*, *dhurv*, to tempt, to ruin. उपारे—Sāyaṇa renders it as उपागते समीपे. Wilson takes it to mean 'in the proximity,' Griffith as 'near to lead astray'. Peterson derives it from उप+ √*ṛ* to commit guilt or unrighteousness. अस्ति उपारे—'There is a senior in the proximity of the junior' (Wilson), 'the old is near to lead astray the younger' (Griffith), 'there is a

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

mightier one to actuate the lapses of a feebler one (Peterson). चन —Sāyaṇa takes it in the sense of अपि while Griffith and Peterson as a negative particle. प्रयोता —Sāyaṇa derives it from √*yu* to unite and renders it as प्रकर्षेण मिश्रयिता भवति. Griffith and Peterson derives it from √*yu* to separate and translate as 'removeth' and 'banish' respectively.

अरम् । दासः । न । मीळ्हुषे । कराणि । अहम् । देवाय । भूर्णये । अनागाः ॥ अचेतयत् । अचितः । देवः । अर्यः । गृत्सम् । राये । कविऽतरः । जुनाति ॥७॥

सा० भा०—मीळ्हुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणाय अनागाः तत्प्रसादादपापः सन् अहम् अरम् अलं पर्याप्तं कराणि परिचरणं करवाणि । दासो न यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी स च देवः अचितः अजानतोऽस्मान् अचेतयत् चेतयतु प्रज्ञापयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवः राये धनाय धनप्राप्त्यर्थं जुनाति जुनातु प्रेरयतु ॥

शब्दा० अरम्=पर्याप्त रूप में, दासः=नौकर, न=तरह, मीळ्हुषे =कामनाओं को पूर्ण करनेवाले, कराणि=करूँ, अहम्=मै, देवाय=देव की, भूर्णये=जगत् का भरण पोषण करनेवाले, अनागाः=पाप रहित होकर, अचेतयत्=प्रबुद्ध करे, अचितः=अज्ञान से, देवः=देव, अर्यः= सबका स्वामी, गृत्सम्=स्तुति गायक को, राये=धन के लिये, कवितरः =बुद्धिमान, जुनाति=प्रेरित करे ।

हि० अ०—पाप रहित (होकर) कामनाओं को पूर्ण करनेवाले, जगत् का भरण-पोषण करनेवाले, देव की मै पर्याप्त मात्रा में नौकर की तरह सेवा करूँ । (सबका) संरक्षक देव अज्ञान से प्रबुद्ध करे; स्तुतिगायक को वह बुद्धिमान धन के लिये प्रेरित करे ।

Trans.—Freed from sin, may I serve diligently as a servant, the bounteous, th lord of the world. May

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the divine lord awake us from ignorance. May the wiser one lead the singer to riches.

Notes.— मीळ्हुषे—Dat. sing. of मीढ्वांस् from √*mih* to pour; 'showerer of benefits' (Wilson), 'bounteous' (Griffith). कराणि—√*kṛ* to make, root-aorist subju. 1rst. sing. भूर्णये—Dat. sing. of भूर्णि; 'lord of the world' (Sāyaṇa), 'inclined to anger' (Griffith), 'impetuous' (Peterson). अचेतयत्—√*cit* to know, caus. impf. 3rd. sing.; Sāyaṇa renders it as चेतयतु प्रज्ञापयतु. जुनाति—√*jū* to urge on, to speed. pres. 3rd. sing.

अयम् । सु । तुभ्यम् । वरुण । स्वधाऽवः । हृदि । स्तोमः । उप-ऽश्रितः । चित् । अस्तु ॥ शम् । नः । क्षेमे । शम् । ऊँ इति । योगे । नः । अस्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥८॥

सा० भ०—हे स्वधावः अन्नवन् वरुण तुभ्यं त्वदर्थं क्रियमाणः अयम् एतत्सूक्तात्मकं स्तोमः स्तोत्रं हृदि त्वदीये हृदये सु सुष्ठु उपश्रितः उपगतः समवेतः अस्तु । चित् इति पूरकः । अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः । नः अस्मदीये क्षेमे रक्षणे शम् उपद्रवाणां शमनम् अस्तु । योगे च नः अस्मदीये प्रापणे शमु शमनमेवास्तूपद्रवाणाम् । हे वरुणादयो देवाः नः अस्मान् सर्वदा स्वस्तिभिः अविनाशैः पात रक्षत ॥

शब्दा०—अयम्=यह, सु=सुन्दर, तुभ्यम्=तुम्हारे लिये, वरुण=ओ वरुण, स्वधावः=ओ शक्तिशाली, हृदि=हृदय में, स्तोमः=स्तोत्र, उपश्रितः =स्थित, चित्=पदपूरण के लिये प्रयुक्त निपात, अस्तु=हो, शम्= कल्याण, नः=हमारा, क्षेमे=रक्षा में, शम्=कल्याण, उ=निश्चित अर्थ का वाचक एक निपात, योगे=प्राप्ति में, नः=हमारा, अस्तु=हो, यूयम्=तुम लोग, पात=रक्षा करो, स्वस्तिभिः=आशीर्वाद से, सदा=सर्वदा, नः= हमारी ।

हि० अ०—ओ शक्तिशाली, वरुण, तुम्हारे लिये (निर्मित) यह स्तोत्र तुम्हारे हृदय तक पहुँचे । रक्षा में हमारा कल्याण हो, प्राप्ति में हमारा कल्याण हो, । तुम लोग अपने आशीर्वाद से हमारी सर्वदा रक्षा करो ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—O Varuṇa, the powerful, this hymn (fashioned) for thee, may resort in (thy) heart . May the bliss be ours in protection ; may the bliss be ours in acquiring. Protect us ever with your blessings.

Notes—उपाश्रितः—√*śri* to resort, past part. second syllable is lengthened. अस्तु—√*as* to be, impv. 3rd. sing. पात—√*pā* to protect, impv. 2nd. plu.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'संवत्सरम्' इति दशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम्। आद्या त्वनुष्टुप्। मण्डूका देवता। तथा चानुक्रान्तं—'संवत्सरं दश पर्जन्यस्तुतिः संहृष्टान्मण्डकांस्तुष्टावाद्यानुष्टुप्' इति वृष्टिकामेनैतत्सूक्तं जप्यम्॥

संवत्सरम्। शशयानाः। ब्राह्मणाः। व्रतऽचारिणः॥ वाचम्। पर्जन्यऽजिन्विताम्। प्र। मण्डूकाः अवादिषुः॥१॥

सा० भा०—अत्र निरुक्तं—'वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्त स मण्डूकाननुमोदमानान् दृष्ट्वा तुष्टाव' (निरु० ९. ६) इति। 'मण्डूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणा मण्ड एषामोक इति वा मण्डो मदेर्वा मुदेर्वा तेषामेषा भवति' (नि० ९. ५) इति। व्रतचारिणः व्रतं संवत्सरसत्रात्मकं कर्माचरन्तः ब्राह्मणाः। लुप्तोपममेतत्। एवंभूता ब्राह्मणा इव संवत्सरं शरत्प्रभृति आ वर्षर्तोरेकं संवत्सरं शशयानाः शिश्याना वर्षणार्थं तपश्चरन्त इव बिल एव सन्त एते मण्डूकाः पर्जन्यजिन्वितां पर्जन्येन प्रीतां यथा वाचा पर्जन्यः प्रीतो भवति तादृशीं वाचं प्र अवादिषुः प्रवदन्ति॥

शब्दा०—संवत्सरम्=वर्ष भर, शशयानाः=तपस्या करते हुये, ब्राह्मणाः=ब्राह्मणों (की तरह), व्रतचारिणः=व्रत का आरचण करनेवाले, वाचम्=शब्द, पर्जन्यजिन्विताम्=पर्जन्य को प्रिय लगनेवाले, मण्डूकाः=मेढक, प्र अवादिषुः=बोल रहे हैं।

हि० अ०—व्रत का आचरण करनेवाले ब्राह्मणों की तरह वर्ष भर (वर्षा के लिये) तपस्या करते हुये की तरह (बिल में) पड़े हुये मेढक पर्जन्य को प्रिय वचन बोल रहे हैं।

Trans.—The frogs like Brahmins, observant of their vows, practising penance throughout the year, utter aloud praises agreeable to Parjanya.

Notes.—**शशयाना**—√*śī* to lie, pref. part. nom. plu. **ब्राह्मणाः**—It is an example of **लुप्तोपमा**. The word

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

expressing the comparison is dropped. Thus ब्राह्मणाः would mean 'like Brahmins'. पर्जन्यजिन्विताम् - जिन्विताम् is past part. from √*jinv* to quicken ; Tatpuruṣa compd; for accent see इन्द्रेषिते (III.33.2) 'agreeable to Parjanya' (Wilson), 'inspired by Parjanya' (Griffith), 'roused by Parjanya' (Macdonell). अवादिषुः— √*vad* to speak, 'iṣ'-aorist, 3rd. plu.

दिव्याः । आपः । अभि । यत् । एनम् । आयन् । दृतिम् । न । शुष्कम् । स । शयानम् ॥ गवाम् । अह । न । मायुः । वत्सिनीनाम् । मण्डूकानाम् । वग्नुः । अत्र । सम् । एति ॥२॥

सा० भा०—दिव्याः दिवि भवाः आपः दृतिं न दृतिमिव शुष्कं नीरसं सरसी । महत्सरः सरसी । गौरादिलक्षणो ङीष् । सरस्याम् । 'सुपां सुलुक्' इति सप्तम्या लुक् । 'ईदूतौ च सप्तम्यर्थे' इति प्रगृह्यसंज्ञा । महति सरसि निर्जले घर्मकाले शयानं निवसन्तम् एनं मण्डूकगणं यत् यदा आयन् अभिगच्छन्ति तदा अत्र अस्मिन् वर्षणे पर्जन्ये वा सति वत्सिनीनां वत्सयुक्तानां गवां नः मायुः गवां शब्द इव मण्डूकानां वग्नुः शब्दः समेति संगच्छते । यथा वत्सैः संगतासु गोषु महान् घोषो जायते तद्वद्वृष्टे पर्जन्ये महान् कलकलशब्दो जायत इत्यर्थः । अह इति पूरकः ॥

शब्दा०—दिव्याः=आकाश का, आपः=पानी, अभि=ओर, यत्=जब, एनम्=इनके झुण्ड पर, आयन्=आता है, दृतिम्=मसक, न=तरह, शुष्कम्=सूखे, सरसी=सरोवर में, शयानम्=पड़े हुये, गवाम्=गायों की, अह=पदपूरण के लिये प्रयुक्त एक निपात, न=तरह, मायुः=शब्द, वत्सिनीनाम्=बछड़ों वाली, मण्डूकानाम्=मण्डूकों की, वग्नुः=टर्-टर् की आवाज, अत्र=यहाँ, समेति=एक साथ उठती है ।

हि० अ०—सूखे मसक की तरह (बिना पानी के) सरोवर में पड़े हुये मेढकों के समूह पर जब वर्षा का पानी आता है, (उस समय) मेढकों की टर्-टर् की आवाज, बछड़े के साथ गायों की आवाज की तरह, एक साथ उठती है ।

Trans.—When the waters of the sky fall upon the

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

troop of frogs sleeping in the (exhausted) lake like a dry water-skin, then rises together the croaking of the frogs like the bellowing of cows, joined by their calves.

Notes.—आयन् –√*i* to go, impf. 3rd. plu.; not unaccented because preceded by यत्. सरसी—Loc. sing; final ई is Pragṛhya (साप्तमिकौ च पूर्वौ Ṛg. Prāt. I.72; ईदूतौ च सप्तम्यर्थे—Pāṇ I.1.19). शयानम् – √*śī* to lie mid, pres. part. acc. sing. वग्नुः—From √*vac* to speak; roar, sound (especially of animals); here it means the croaking of the frogs. समेति – √*i* with सम् to rise, pres. 3rd. sing.

यत् । ईम् । एनान् । उशतः । अभि । अवर्षीत् । तृष्याऽवतः । प्रावृषि । आऽगतायाम् ॥ अख्खलीकृत्य । पितरम् । न । पुत्रः । अन्यः । अन्यम् । उप । वदन्तम् । एति ॥३॥

सा० भा०—उशतः कामयमानान् तृष्यावतः तृष्णावतः एनान् मण्डूकान् प्रावृषि वर्षतौ आगतायाम् आगते सति यत् यदा अभ्यवर्षीत् पर्जन्यो जलैरभिषिञ्चति । ईम् इति पूरणः । तदानीम् अख्खलीकृत्य । अख्खल इति शब्दानुकरणम् । अख्खलशब्दं कृत्वा पुत्रः पितरं न पितरमिव अन्यः मण्डूकः वदन्तं शब्दयन्तम् अन्यं मण्डूकम् उप एति प्राप्नोति ।

शब्दा० – यत्=जब, ईम्=पूर्ववर्ती शब्द पर जोर देनेवाला एक निपात, एनान्=इनके, उशतः=इच्छा करनेवाले, अभि अवर्षीत्=उपर वर्षा किया, तृष्यावतः=प्यासे, प्रावृषि आगतायाम्=वर्षा ऋतु के आगमन पर, अख्खलीकृत्य=अनुकरणात्मक अस्पष्ट शब्द करके, पितरम्=पिता के पास, न=तरह, पुत्रः=पुत्र, अन्यः=एक, अन्यम्=दूसरे के, वदन्तम्=बोलता हुआ, उप एति=समीप जाता है ।

हि० अ०—वर्षा ऋतु के आगमन पर जब (पर्जन्य ने जल की) इच्छा करनेवाले (तथा) प्यासे इनके उपर वर्षा की, (तब) एक (मेढक) बोलते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हुये दूसरे के पास जाता है जैसे अस्पष्ट अनुकरणात्मक शब्द करके पुत्र पिता के पास (जाता है)।

Trans.—At the advent of rainy season, when Parjanya poured rain upon the longing and thirsty (frogs); (then) one (frog) goes to another croaking, as a son to his father with inarticulate ejaculations.

Notes.—उशतः—√*vaś* to desire, pres. part. व becomes उ by Samprasāraṇa. अवर्षीत्—√*vṛṣ* to rain, 'iṣ'-aorist 3rd. sing.; not unaccented because preceded by यत्. The subject to this verb is not mentioned. Sāyaṇa suplies पर्जन्य as its subject. प्रावृषि—A loc. absolute accompanied by past pass. part. आगतायाम्; it would mean 'at the advent of rainy season'. अख्खलीकृत्या—अख्खल is an onomatopoetic word compounded with कृ in the sense of inarticulate ejaculations. Genund in य has a long vowel, though in the Pada-text it appears with short vowel. Macdonell takes it to mean 'croaking', Griffith as 'cries of pleasure'. वदन्तम्—√*vad* to speak, pres. part. acc. sing.

अन्यः। अन्यम्। अनु। गृभ्णाति। एनोः। अपाम्। प्रऽसर्गे। यत्। अमन्दिषाताम्॥ मण्डूकः। यत्। अभिऽवृष्टः। कनिस्कन्। पृश्निः। सम्ऽपृङ्क्ते। हरितेन। वाचम्॥४॥

सा० भा०—एनोः एनयोर्द्वयोर्मण्डूकयोः अन्यः मण्डूकः अन्यं मण्डूकमनुगम्य गृभ्णाति गृह्णाति। अपाम् उदकानां प्रसर्गे प्रसर्जने वर्षणे सति यत् यदा अमन्दिषातां हृष्टावभूताम्। यत् यदा च अभिवृष्टः पर्जन्येनाभिषिक्तः कनिष्कन्। स्कन्दतेर्यङ्लुगन्तस्य रूपम्। भृशं स्कन्दन्नुत्प्लवं कुर्वन् पृश्निः पृश्निवर्णः मण्डूकः हरितेन हरितवर्णेनान्येन मण्डूकेन वाचं संपृङ्क्ते संयोजयति। उभावप्येकविधं शब्दं कुर्वाते। तदानीमन्योऽयमनु गृभ्णातीत्यन्वयः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—अन्यः=एक, अन्यम्=दूसरे को, अनुगृभ्णाति=स्वागत करता है, अपां प्रसर्गे=वर्षा के होने पर, यत्=जब, अमन्दिषाताम्=प्रसन्न रहते हैं, मण्डूकः=मेढक, यत्=जब, अभिवृष्टः=वर्षा से भीगा हुआ, कनिस्कन्=बार-बार उछलता हुआ, पश्निः=चितकबरा, सम्पृङ्क्ते=संयुक्त करता है, हरितेन=हरे वर्ण के मेढक के साथ, वाचम्=शब्द को।

हि० अ०—दोनों में से प्रत्येक एक दूसरे का स्वागत करता है, वर्षा होने पर जब दोनों प्रसन्न रहते हैं; जब वर्षा से भीगा हुआ चितकबरा मेढक बार-बार उछलता हुआ हरे वर्ण वाले मेढक के साथ अपने शब्द को मिलाता है।

Trans.—Each of these two congratulates the other, when the two rejoice at the pouring of the rain; the speckled frog when moistened (by rain) leaping up repeatedly mingles his voice with (that of) green one.

Notes.—अनुगृभ्णाति—√*grabh* with अनु to receive, to greet, pres. 3rd. sing. अमन्दिषाताम्—√*mand* to exhilarate, mid. 'iṣ'-aorist, 3rd. dual; not unaccented because preceded by यत्. अभिवृष्टः—√*vṛs* to rain, past part.; for accent see निहिताः (I.24.7). कनिष्कन्—√*skand* to leap, inte. part. In the Ṛ.V. the cerebralization of स् regularly takes place when it is immediately preceded by vowels other than अ or आ. Later on this rule was not strictly observed. संपृङ्क्ते—√*pṛc* to mix, mid. 3rd. sing.; not unaccented because preceded by यत्.

यत् । एषाम् । अन्यः । अन्यस्य । वाचम् । शाक्तस्यऽइव । वदति । शिक्षमाणः ॥ सर्वम् । तत् । एषाम् । समृधाऽइव । पर्व । यत् । सुऽवाचः । वदथन । अधि । अप्ऽसु ॥५॥

सा० भा०—हे मण्डूकाः यत् यदा एषां युष्माकं मध्ये अन्यः मण्डूकः अन्यस्य मण्डूकस्य वाचं वदति अनुवदति अनुकरोति शिक्षमाणः शिक्ष्यमाणः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शिष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथानुवदति तद्वत् । यत् यदा च सुवाचः शोभनवाचो यूयं सर्वे अप्सु वृष्टेषूदकेषु अधि उपरि प्लवन्तः वदथन वदत शब्दं कुरुत । तत् तदा एषां युष्माकं सर्वं पर्व परुष्मच्छरीरं समृधेव समृद्धमेवाविकलावयवमेव भवति । इवशब्दोऽवधारणे । घर्मकाले मृद्भावमापन्ना मण्डूकाः पुनर्वर्षणे सत्यविकलाङ्गाः प्रादुर्भवन्तीत्यर्थः ॥

शब्दा० –यत्=जब, एषाम्=तुममें से, अन्यः=एक, अन्यस्य=दूसरे के, वाचम्=शब्द का, शाक्तस्येव=शिक्षक के शब्द की तरह, वदति=अनुकरण करता है, शिक्षमाणः=सीखनेवाला, सर्वम्=सम्पूर्ण, तत्=उस समय, एषाम्=तुम लोगों का समृधेव=बढ़े हुये की तरह, पर्व=शरीर, यत्=जब, सुवाचः=सुन्दर वाणीवाले (तुम लोग), वदथन=बोलते हो, अधि अप्सु=जल के उपर ।

हि० अ०--जब तुममे से एक दूसरे के शब्द का अनुकरण करता है जैसे शिष्य शिक्षक (के शब्द) का; तुम लोगों का सम्पूर्ण शरीर बढ़े हुये की तरह हो जाता है, जब सुन्दरवाणी वाले तुम लोग जल में एक साथ बोलते हो ।

Trans.—When one of you imitates the voice of another as a learner of his teacher ; when loud crying you speak in the waters, then the entire body of yours is as it were developed.

Notes.—पर्व—'Body' (Sāyaṇa), 'section in Vedic recitation' i.e. lesson (Macdonell) वदथन—√*vad* to speak, pres. 2nd. plu. वदथ is extended to वदथन. सर्व तत्··· अप्सु—'when loud crying you converse (leaping) upon the waters, then the entire body is as it were developed' (Wilson), 'your every limb seems to be growing larger as ye converse with eloguence on the waters' (Griffith), 'all that of them is in unison like a lesson that eloquent ye repeat upon the waters' (Macdonell).

गोऽमायुः । एकः । अजऽमायुः । एकः । पृश्निः । एकः । हरितः । एकः । एषाम् ॥ समानम् । नाम । बिभ्रतः । विऽरूपाः । परुऽत्रा । वाचम् । पिपिशुः । वदन्तः ॥६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—एषां मण्डूकानां मध्ये एकः मण्डूकः गोमायुः गोर्मायुरिव मायुः शब्दो यस्य तादृशो भवति। एकः अन्यो मण्डूकः अजमायुः अजस्य मायुरिव मायुर्यस्य तादृशो भवति। एकः पृश्निः पृश्निवर्णः। एकः अपरः हरितः हरितवर्णः। एवं विरूपाः नानारूपा अपि समानम् एकं मण्डूका इति नाम बिभ्रतः धारयन्तः पुरुत्रा बहुषु देशेषु वाचं वदन्तः शब्दं कुर्वन्तः पिपिशुः अवयवीभवन्ति प्रादुर्भवन्ति। 'पिश अवयवे'। पुरुशब्दात् 'देवमनुष्यः' इत्यादिना त्राप्रत्ययः॥

शब्दा०—गोमायुः=गाय की तरह शब्द करनेवाला, एकः=एक, अजमायुः=बकरे की तरह शब्द करनेवाला, एकः=एक, पृश्निः=चितकबरा, एकः=एक, हरितः=हरा रंग का, एकः=एक, एषाम्=इनमें, समानम्=समान, नाम=नाम, बिभ्रतः=धारण करते हुये, विरुपाः=विभिन्न रूपवाले, पुरुत्रा=कई ढंग से, वाचम्=शब्द को, पिपिशुः=सजाते हैं, वदन्तः=बोलते हुये।

हि० अ०—एक गाय की तरह शब्द करनेवाला है, एक बकरे की तरह शब्द करनेवाला है, इनमें एक चितकबरा है, एक हरा है; समान नाम धारण करते हुये (भी) विभिन्न रूपवाले हैं; बोलते हुये, (अपने) शब्द को कई ढंग से सजाते हैं।

Trans.—One has the bellowing of a cow, another has the bleating of a goat, one of them is speckled, another is green ; (though) bearing a common name, they are of varous colours ; croaking (they) adorn thir voices in diverse ways.

Notes.—गोमायुः—One who has the bellowing of a cow ; Bahuvrīhi compd. accented on the first member. अजमायुः—One who has the bleating of a goat ; Bahuvrīhi compd. बिभ्रतः—√*bhṛ* to bear, pres. part. पुरुत्रा—See note I.32.7. पिपिशुः—√*piś* to adorn, perf. 3rd. plu. Sāyaṇa takes it to mean 'spring out'.

ब्राह्मणासः। अतिऽरात्रे। न। सोमे। सरः। न। पूर्णम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभितः । वदन्तः । संवत्सरस्य । तत् । अहरिति । परि । स्थ । यत् । मण्डूकाः । प्रावृषीणम् । बभूव ॥७॥

सा० भा०—रात्रिमतीत्य वर्तत इत्यतिरात्रः । अतिरात्रे न सोमे । यथातिरात्राख्ये सोमयागे ब्राह्मणासः ब्राह्मणा रात्रौ स्तुतशस्त्राणि पर्यायेण शंसन्ति हे मण्डूकाः । द्वितीयो नशब्दः संप्रत्यर्थे । न संप्रति पूर्णं सरः अभितः सर्वतः वदन्तः रात्रौ शब्दं कुर्वाणा यूयं तदहः तद्दिनं परि ष्ठ परितः सर्वतो भवथ । यत् अहः प्रावृषीणं प्रावृषेण्यं प्रावृषि भवं बभूवः तस्मिन्नहनि सर्वतो वर्तमाना भवथेत्यर्थः ।

शब्दा०—ब्राह्मणासः=ब्राह्मणों (की तरह), अतिरात्रे=अतिरात्र नामक सोमयाग में, न=इस समय, सोमे—सोमयागमें, सर=सरोवर में, पूर्णम्=भरे हुये, अभितः=चारों तरफ, वदन्तः=बोलते हुये, संवत्सरस्य—=वर्ष के, तत्=उस, अहः=दिन, परि स्थ=चारों तरफ थे, यत्=जब, मण्डूकाः=ओ मेढकों, प्रावृषीणाम्=वर्षा का, बभूव=था ।

हि० अ०—अतिरात्र नामक सोमयाग में ब्राह्मणों की तरह (जल से) भरे हुये सरोवर के चारों तरफ बोलते हुये वर्ष के उस दिन, ओ मेढकों, तुम लोग चारों तरफ सर्वत्र वर्तमान थे, जिस दिन वर्षा हुई थी ।

Trans.—Like Brahmins at the Atiratra Soma sacrifice, you are now croaking around the replenished lake (throughout the night), for, on that day of the year O frogs, (you) were everywhere about, when it was the day of the setting in of the rains.

Notes.—अतिरात्रे—A part of the Soma sacrifice which lasted a day and the following night. सरः—'Lake' (Sāyaṇa), 'vessel' (Griffith). According to Macdonell it is a hyperbolic expression for a large vessel filled with Soma. न—'Now' (Sāyaṇa), 'like' (Macdonell). पूर्णम्—Past. part. from $\sqrt{pṛ}$ to fill. अहः—Visarjaniya is originally rhotasized; hence, इति is added after it in the Pada-text परि स्थ—$\sqrt{as}$ with परि to be about, pres. 2nd.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

plu. बभूव— √*bhū* to be, pref. 3rd. sing.; not unaccented because preceded by यत्.

ब्राह्मणासः । सोमिनः । वाचम् । अक्रत । ब्रह्म । कृण्वन्तः । परिवत्सरीणम् ॥ अध्वर्यवः । घर्मिणः । सिस्विदानाः । आविः । भवन्ति । गुह्याः । न । के । चित् ॥८॥

सा० भा०—सोमिनः सोमयुक्ताः परिवत्सरीणं सांवत्सरिकं गवामयनिकं ब्रह्म स्तुतशस्त्रात्मकं कृण्वन्तः कुर्वन्तः ब्राह्मणासः । लुप्तोपममेतत् । ब्राह्मणा इव वाचं शब्दम् अक्रत अकृषतेमे मण्डूकाः । अपि च घर्मिणः घर्मेण प्रवर्ग्येण चरन्तः अध्वर्यवः अध्वरस्य नेतार ऋत्विज इव सिष्विदानाः स्विद्यद्गात्राः गुह्याः घर्मकाले बिलेऽभिगूढाः के चित् केचन मण्डूकाः न संप्रति वृष्टौ सत्याम् आविर्भवन्ति जायन्ते ॥

शब्दा०—ब्राह्मणासः=ब्राह्मणों की तरह, सोमिनः=सोम धारण करने वाले, वाचम्=शब्द, अक्रत=करते हैं, ब्रह्म=प्रार्थना, कृण्वन्तः=करते हुये, परिवत्सरीणम्=वर्ष भर, अध्वर्यवः=अध्वर्यु की तरह, घर्मिणः=प्रवर्ग्य याग में लगे, सिस्विदानाः=पसीना चूते हुये, आविर्भवन्ति=प्रकट हो जाते हैं, गुह्याः=छिपे हुये, न=नहीं, केचित्=कोई भी ।

हिं० अ०—(गवामयन में) वर्ष भर प्रार्थना करते हुये, सोमधारण करने-वाले ब्राह्मणों की तरह शब्द करते हैं। प्रवर्ग्य याग में लगे हुये पसीना चूते हुये अध्वर्यु की तरह सभी प्रकट हो जाते हैं, कोई भी छिपा नहीं रहता ।

Trans.—Like Brahmins bearing Soma, making prayers throughout the year, they make the speech like priests performing Pravargya rite, perspiring, they come out, none is hidden.

Notes.—अक्रत— √*kṛ* to make, mid. 'root'-aorist 3rd. plu. कृण्वन्तः— √*kṛ* to make, pres. part. सिस्विदानाः—√*svid* to perspire, pref. part. plu. आविर्भवन्ति—√*bhū* with आविः to appear, pres. 3rd. plu. न—Sāyaṇa takes it to mean 'now' Macdonell and Griffith think

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

it in negative sense. आविर्भवन्ति···केचित्—'But now some of them appear' (Wilson), 'come forth and show themselves, and none are hidden' (Griffith) 'they appear ; none of them are hidden' (Macdonell).

देवऽहितिम् । जुगुपुः । द्वादशस्य । ऋतुम् । नरः । न । प्र । मिनन्ति । एते ॥ संवत्सरे । प्रावृषि । आऽगतायाम् । तप्ताः । घर्माः । अश्नुवते । विऽसर्गम् ॥९॥

सा० भा०—नरः नेतारः एते मण्डूकाः देवहितिं देवैः कृतं विधानम् अस्यर्तोरयं धर्म इत्येवंरूपं जुगुपुः गोपायन्ति । काले काले रक्षन्ति । अत एव द्वादशस्य द्वादशमासात्मकस्य संवत्सरस्य ऋतुं तं तं वसन्तादिकं न प्रमिनन्ति न हिंसन्ति । पर्जन्यस्तुतेरनुमोदनेन तत्तत्काले वृष्टिहेतवो भवन्तीत्यर्थः । संवत्सरे संपूर्णे प्रावृषि वर्षर्तौ आगतायाम् आगते सति घर्माः पूर्वं घर्मकाले वर्तमानाः तप्ताः तापेन पीड़िताः संप्रति विसर्गं विसर्जनं बिलान्मोचनम् अश्नुवते प्राप्नुवन्ति ॥

शब्दा०—देवहितिम्=देवनिर्मित विधानों का, जुगुपुः=पालन करते हैं, द्वादशस्य=बारह महीनेवाले, ऋतुम्=ऋतु का, नरः=नेता, न=नहीं, प्रमिनन्ति=उल्लंघन करते हैं, एते=ये, संवत्सरे=वर्ष में, प्रावृषि आगतायाम्=वर्षा ऋतु के आगमनपर, तप्ताः=तपे हुये, घर्माः=घाम से पीड़ित, अश्नुवते=प्राप्त करते हं, विसर्गम्=मुक्ति ।

हि० अ०—ये नेता देवनिर्मित विधानों का पालन करते हैं; बारहमहीने वाले ऋतु का उल्लंघन नहीं करते । वर्ष में वर्षा ऋतु के आगमन पर, तपे हुये तथा गरमी से पीड़ित (ये मेढ़क) मुक्ति पाते हैं ।

Trans.—These leaders protect the institutes of the gods, (and) do not violate the season of twelve-months . At the advent of rain in the year, the scorched and the heated (frogs) obtain freedom.

Notes.—जुगुपुः—√*gup* to protect, pref. 3rd. plu. मिनन्ति—√*mī* to damage, pres. 3rd. plu. देवहितिम्...एते—'These leaders of rites observe the institutes of the

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

gods and disregard not the (appropriate) season of the twelve months' (Wilson); they keep the twelve months' god-appointed order and never do the men neglect the season' (Griffith); 'they have guarded the divine order of the twelvemonth; these men infringe not the season' (Macdonell). प्रावृषि आगतायाम्—See VII.103.3. अश्नुवते—√*ams* to attain, mid. pres. 3rd. plu.

गोऽमा॑युः । अ॒दा॒त् । अ॒जऽमा॑युः । अ॒दा॒त् । पृश्निः॑ । अ॒दा॒त् । हरि॑तः । नः॒ । वसू॑नि ॥ गवा॑म् । म॒ण्डूका॑ः । दद॑तः । श॒ता॒नि॑ । स॒ह॒स्र॒ऽसा॒वे । प्र । ति॒र॒न्ते॒ । आयुः॑ ॥१०॥

सा० भा०—गोमायुः गोरिव मायुः शब्दो यस्य तादृशो मण्डूकः वसूनि धनानि नः अस्मभ्यम् अदात् ददातु। अजमायुः च अदात् ददातु। हरितः हरितवर्णश्च अदात् ददातु। पृश्निः पृश्निवर्णश्च अदात् ददातु। तथा सहस्रसावे सहस्रसंख्याका ओषधयः सूयन्त उत्पद्यन्त इति वर्षर्तुः सहस्रसावः। तस्मिन् सति सर्वे मण्डूकाः गवां शतानि अपरिमिता गाः ददतः अस्मभ्यं प्रयच्छन्तः आयुः जीवनं प्र तिरन्ते प्रवर्धयन्तु ॥

शब्दा० -गोमायुः=गाय की तरह शब्द करनेवाला, अदात्=देवे, अजमायुः=बकरे की तरह ध्वनि करनेवाला, अदात्=देवे, पृश्निः=चित-कबरा, अदात्=देवे, हरितः=हरा वर्णवाला, नः=हमको, वसूनि=धन, गवाम्=गायें, मण्डूकाः=मेढ़क, ददतः=प्रदान करते हुये, शतानि=सौ, सहस्रसावे=हजारों प्रकार की औषधियों को उत्पन्न करने वाली वर्षा ऋतु में, प्र तिरन्ते=बढ़ावें, आयुः=उम्र।

हि० अ०—गाय की ध्वनिवाला देवे, बकरे की ध्वनिवाला देवे, चित-कबरा रंगवाला देवे, हरा रंगवाला हमें धन (देवे)। हजारों प्रकार की ओषधियों को उत्पन्न करनेवाली (वर्षा ऋतु) में सैकड़ों गायें प्रदान करते हुये मण्डूक हमारी आयु को बढ़ावें।

Trans.—May the cow-toned give, may the goat-toned give, may the speckled one give, may the green

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

one (give) us riches ; May the frogs, in the thousand-fold-producing (season of the rain) bestowing (upon us) hundreds of cows, prolong our life.

Notes.—अदात्—√*dā* to give, root-aorist, 3rd. sing. Sāyaṇa renders it by ददातु. ददतः—√*dā* to give, pres. part. सहस्रसावे—According to Macdonell it refers to a Soma-sacrifice lasting a year with three pressings a day. Sāyaṇa followed by Wilson and Griffith takes it to mean 'in the fertilizing season of rain'. प्रतिरन्ति—√*tṝ* with प्र to extend, pres. mid. 3rd. plu. Sāyaṇa renders it as प्रवर्धयन्तु.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'सोमस्य धारा' इति पञ्चर्चं त्रयोदशं सूक्तं भारद्वाजस्य वसुनाम्न आर्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं—'सोमस्य वसुर्भारद्वाजः' इति । गतो विनियोगः ।

सोमस्य । धारा । पवते । नृचक्षसः । ऋतेन । देवान् । हवते । दिवः । परि ॥ बृहस्पतेः । रवथेन । वि । दिद्युते । समुद्रासः । न । सवनानि । विव्यचुः ॥१॥

सा० भा०—सोमस्य अभिषूयमाणस्य धारा पवते श्चोतते । कीदृशस्य सोमस्य । नृचक्षसः नृणां यजमानानां द्रष्टुः । स च ऋतेन यज्ञेन देवान् सोमभाज इन्द्रादीन् हवते । कुत्र । दिवस्परि द्युलोकस्योपरि वर्तमानान् । बृहस्पतेः मन्त्रपालकस्य स्तोतुः रवथेन शब्देन स्तोत्रेण वि दिद्युते विद्योतते । समुद्रासो न समुद्रा इव पृथिवीं सवनानि यज्ञसंबन्धीनि विव्यचुः व्याप्नुवन्ति ॥

शब्दा०—सोमस्य=सोम की, धारा=धारा, पवते=बहती है, नृचक्षसः =मनुष्य जाति को देखनेवाले, ऋतेन=यज्ञ के द्वारा, देवान्=देवताओं को, हवते=बुलाता है, दिवः=आकाश के, परि=उपर, बृहस्पतेः=बृहस्पति की, रवथेन=गर्जन से, वि दिद्युते=चमकता है, समुद्रासः=नदियां, न= तरह, सवनानि=प्रातरादि सवन, विव्यचुः=व्याप्त कर रहा है ।

हि० अ०—मनुष्य जाति को देखनेवाले सोम की धारा बहती है । यह यज्ञ के द्वारा आकाश के ऊपर (रहनेवाले) देवताओं को बुलाता है । बृहस्पति की गर्जन से यह चमकता है । (प्रातरादि) सवन (पृथिवी को) नदियों की तरह व्याप्त कर रहे हैं ।

Trans.—The stream of Soma, the beholder of mankind, flows forth. By sacrifice it calls the gods (who dwell) above the heaven. It shines forth by the speech of Bṛhaspati. The libations cover (the earth) like rivers.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes.—पवते—√*pū* to flow, pres. mid. 3rd. sing. हवते —√*hū* to call, pres. mid. 3rd. sing. दिवस्परि—Above the sky' (Sāyaṇa), 'from the heaven' (Griffith). बृहस्पतेः—'Of the sacrificer (Sāyaṇa), 'Bṛhaspati' (Griffith), 'Agni' (Ludwig). दिद्युते—√*dyut* to shine, perf. mid. 3rd. sing. विव्यचुः—√*vyac* to extend, impf. without augment, 3rd. plu. न—According to Griffith it is negative particle, while Sāyaṇa takes it as a particle of comparison.

यम् । त्वा । वाजिन् । अघ्न्याः । अभि । अनूषत । अयःऽहतम् । योनिम् । आ । रोहसि । द्युऽमान् ॥ मघोनाम् । आयुः । प्रऽतिरन् । महि । श्रवः । इन्द्राय । सोम । पवसे । वृषा । मदः ॥२॥

सा० भा०—हे वाजिन् अन्नवन् सोम यं त्वा त्वाम् अघ्न्याः अहननीयाः गावः अभ्यनूषत अभिष्टुवन्ति । आशिरार्थं स्थिताः शब्दायन्त इत्यर्थः । स त्वम् अयोहतम् । अय इति हिरण्यनाम । तेन तद्वान् पाणिर्लक्ष्यते । हिरण्मयेन पाणिना हतं संस्कृतं योनिं स्थानं आ रोहसि द्युमान् दीप्तः सन् । 'अभियोनिमयोहतम्' (ऋ० स० ९. १. २) इति ह्युक्तम् । किं च हे सोम मघोनां हविष्मतां यजमानानाम् आयुः आयुष्यं महिः महत् श्रवः अन्नं यशो वा प्रतिरन् वर्धयन् इन्द्राय इन्द्रार्थं पवसे पूयसे । वृषा वर्षको मदः मदकरश्च त्वम् ।

शब्दा०—यम्=जिसको, त्वा=तुम, वाजिन्=ओ अन्न देनेवाले, अघ्न्याः =गायें, अभि अनूषत=स्तुति करती हैं, अयोहतम्=स्वर्णमय हाथ द्वारा निर्मित, योनिम्=स्थान, आ रोहसि=चढ़ते हो, द्युमान्=प्रकाशमान, मघोनाम्=उदार दानियों की, आयुः=उम्र, प्रतिरन्=बढ़ाते हुये, महिः =महान्, श्रवः=यश, इन्द्राय=इन्द्र के लिये, सोम=ओ सोम, पवसे =बहते हो, वृषा=शक्तिशाली, मदः=मदकारक ।

हि० अ०—ओ अन्न देनेवाले, जिसको गायें स्तुती करती हैं, (वह) प्रकाशमान तुम, स्वर्णमय हाथ द्वारा निर्मित स्थान पर चढ़ते हो । उदार दानियों की आयु तथा (उनके) महान् यश को बढ़ाते हुये इन्द्र के लिये शक्तिशाली और मदकारक (पेय) तुम, बहते हो ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

Trans.—O giver of food, thou, whom the kine praise, mountest thy station, bright, shining, fashioned by golden hands. Extending the life and great fame of the liberal givers, O soma, thou the mighty and exhilarating (drink) for Indra, flowest.

Notes.—अनूषत—√*nu* to praise, 'a'-aorist mid. 3rd. plu. ; not unaccented because preceded by यम्. रोहसि—*ruh* to ascend, pres. 2nd. sing. प्रतिरन्—√*tṛ* with प्र to extend, pres. part. पवसे—√*pū* to flow, pres. 2nd. sing.

आ । इन्द्रस्य । कुक्षा । पवते । मदिन्ऽतमः । ऊर्जम् । वसानः । श्रवसे । सुऽमङ्गलः ॥ प्रत्यङ् । सः । विश्वा । भुवना । अभि । पप्रथे । क्रीळन् । हरिः । अत्यः । स्यन्दते । वृषा ॥३॥

सा० भा०—अयं सोमः इन्द्रस्य कुक्षा कुक्षौ आ पवते आसिच्यते । किमर्थम् । श्रवसे तस्यान्नाय यष्टुर्वा अन्नसिद्ध्यर्थम् । सोमो विशेष्यते । मदिन्तमः मादयितृतमः ऊर्जं वसानः बलकरं रसमाच्छादयन् । 'अपो वसानः' (ऋ० स० ९. ७८. १) इति ह्युक्तम् । सुमङ्गलः शोभनमङ्गलप्रदः । स सोमः प्रत्यङ् विश्वा भुवना सर्वाणि भूतजातानि अभि पप्रथे अभिप्रथयति । दिवि उदितः सन् क्रीळन् वेद्यां संक्रीडमानः हरिः हरितवर्णः अत्यः अतनकुशलः वृषा वर्षकः स्यन्दते रसरूपेण ॥

शब्दा०—इन्द्रस्य=इन्द्र के, कुक्षा=पेट में, आ पवते=बहता है, मदिन्तमः=अत्यधिक आनन्दित करनेवाला, ऊर्जम्=शक्ति, वसानः=आवेष्ठित होता हुआ, श्रवसे=अन्न पचने के लिये, सुमङ्गलः=मङ्गलदायी, प्रत्यङ्=ओर, विश्वा=सम्पूर्ण, भुवना=प्राणियों की, सः=वह, अभि पप्रथे=फैलाया है, क्रीळन्=खेलता हुआ, हरिः=हरे वर्णवाला, अत्यः=शीघ्रगामी, स्यन्दते=बह रहा है, वृषा=शक्तिशाली ।

हि० अ०—अत्यधिक आनन्दित करनेवाला, मङ्गलदायी (सोम) शक्ति से आवेष्ठित होता हुआ अन्न पचने के लिये इन्द्र के पेट में बहता है । उसने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्पूर्ण प्राणियों की ओर (अपने को) फैलाया है। (वेदी पर) खेलता हुआ, हरे वर्णवाला, शीघ्रगामी, शक्तिशाली (सोम) बह रहा है।

Trans.—The most exhilarating, the auspicious one flows in the belly of Indra clothing (himself) with vigour, for the digestion of food. He spreads (himself) towards all beings. Sporting (on the altar) the green coloured, the swift-moving, the vigorous flows forth.

Notes.—वसानः—√*vas* to wear, mid. pres. part. nom. sing. श्रवसे—For the digestion of food (Sāyaṇa), 'for fame' (Griffith). सुमङ्गलः–Auspicious one ; Bahuvrīhi compd. accented on the second member (नञ्सुभ्याम्—Pān VI.2.172.). पप्रथे—√*prath* to spread, perf. mid. 3rd. sing. क्रीळन्—√*krīd* to play, pres. part. अत्यः—From √*at* to go. स्यन्दते—√*syand* to flow, pres. 3rd. sing.

तम् । त्वा । देवेभ्यः । मधुमत्ऽतमम् । नरः । सहस्रऽधारम् । दुहते । दश । क्षिपः ॥ नृऽभिः । सोम । प्रऽच्युतः । ग्रावऽभिः । सुतः । विश्वान् । देवान् । आ । पवस्व । सहस्रऽजित् ॥४॥

सा० भा०—हे सोम तं तादृशं त्वा त्वां देवेभ्यः इन्द्राद्यर्थं मधुमत्तमम् अतिशयेन मधुमन्तं सहस्रधारं बहुधारायुक्तं दुहते दुहन्ति। के। नरः। नेतार ऋत्विजः दश क्षिपः तेषां दशसंख्याका अङ्गुलयश्च। हे सोम नृभिः मनुष्यैः प्रच्युतः ग्रावभिः सुतः अभिषुतस्त्वं सहस्रजित् सहस्रसंख्याकधनस्य जेता सन् विश्वान् देवान् आ पवस्व ॥

शब्दा० तम्=उस, त्वा=तुमको, देवेभ्यः=देवताओं के लिये, मधुमत्तमम्=अत्यधिक मधु से पूर्ण, नरः=मनुष्य, सहस्रधारम्=सहस्रधारावाले, दुहते=दुहती हैं, दश=दस, क्षिपः=अङ्गुलियां, नृभिः=मनुष्यों द्वारा, सोम=ओ सोम, प्रच्युतः=लाये गये, ग्रावभिः=पत्थरों द्वारा, सुतः=पीसे गये, विश्वान्=सम्पूर्ण, देवान्=देवताओं के पास, आ पवस्व=बहो, सहस्रजित्=ओ हजारों को जीतनेवाले।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

हि० अ०—उस अत्यधिक मधु से पूर्ण, सहस्रधारावाले तुमको मनुष्य तथा दश अङ्गुलियां देवताओं के लिये दुहती हैं। ओ सोम, मनुष्यों द्वारा लाये गये, पत्थरों से पीसे गये (तुम), ओ हजारों को जीतनेवाले, सम्पूर्ण देवताओं के पास बहो।

Trans.—The men, the ten fingers milk thee as such, the most sweet flavoured, thousand-streamed, for gods. O Soma, driven by men, pressed with stones, O conquerer of thousand, flow forth to all the gods.

Notes.—सहस्रधारम् –Having thousand-fold streams. Bahuvrīhi compd. accented on the first member. दुहते – √*duh* to milk, pres. mid. 3rd. sing. प्रच्युतः – √*cyu* to move, past part. सुतः—Pressed ; √*su* to press, past part. पवस्व— √*pū* to flow, impv. 2nd. sing.

तम् । त्वा । हस्तिनः । मधुऽमन्तम् । अद्रिऽभिः । दुहन्ति । अप्ऽसु । वृषभम् । दश । क्षिपः ॥ इन्द्रम् । सोम । मादयन् । दैव्यम् । जनम् । सिन्धोःऽइव । ऊर्मिः । पवमानः । अर्षसि ॥५॥

सा० भा०—तं तादृशं मधुमन्तं मधुररसं वृषभं कामानां वर्षकं त्वा त्वां हस्तिनः सुहस्तस्य दश क्षिपः अङ्गुलयः अद्रिभिः ग्रावभिः अप्सु दुहन्ति। तादृश हे सोम इन्द्रम् अन्यं दैव्यं जनं देवसम्बन्धिनं संघं मादयन् सिन्धोरूर्मिरिव पवमानः पूयमानः सन् अर्षसि गच्छसि ॥

शब्दा०—तम्=उस, त्वा=तुमको, हस्तिनः=कुशल व्यक्ति की, मधुमन्तम्=अत्यधिक मधु से पूर्ण, अद्रिभिः=पत्थरों से, दुहन्ति=दुहती हैं, अप्सु=पानी में, वृषभम्=शक्तिशाली, दश=दस, क्षिपः=अङ्गुलियां। इन्द्रम्=इन्द्र को, सोम=ओ सोम, मादयन्=आनन्दित करते हुये, दैव्यम्=स्वर्गीय, जनम्=व्यक्तियों को, सिन्धोरिव=नदी की तरह, ऊर्मिः=धारा, पवमानः=छलनी से निकल कर, अर्षसि=बहते हो।

हि० अ०—कुशल व्यक्ति की दश अंगुलियां उस अत्यधिक मधु से पूर्ण, शक्तिशाली तुमको पत्थरों से पानी में दुहती हैं। ओ सोम, इन्द्र को तथा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वर्गीय जनों को आनन्दित करते हुये, छलनी से निकल कर, नदी की धारा की तरह तेजी से बहते हो।

Trans.—The ten fingers of the deft-handed (man) milk thee forth with stones into waters, (thee) the most sweet-flavoured, the mighty. O Soma, exhilarating Indra and the divine people thou rushest forth, when filtered, like the wave of a river.

Notes.—दुहन्ति—√*duh* to milk, pres. 3rd. plu.; not unaccented because it begins the Pāda. मादयन्—√*mad* to exhilarate, caus. pres. part. पवमानः—√*pū* to cleanse, pres. pass. part. अर्षसि—√*ṛs* to rush, pres. 2nd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'प्रावेपाः' इति चतुर्दशर्चं पञ्चमं सूक्तमैलूषस्य कवषस्यार्षं मुजवतः पुत्रस्याक्षाख्यस्य वा। सप्तमी जगती शिष्टास्त्रयोदश त्रिष्टुभः। अत्र द्वादशी अक्षान् स्तौति नवम्याद्या च सप्तमी। अतस्तास्तद्देवत्याः। त्रयोदशी कृषिं स्तौति। अतस्तस्याः सा देवता। एवं पञ्चगताः। शिष्टाभिर्नवभिः कितवोऽक्षाश्च निन्द्यन्ते। अतस्ता अपि तद्देवत्याः। तथा चानुक्रान्तं—'प्रावेपाः षळूना मौजवान्वाक्षोऽक्षकृषिप्रशंसा चाक्षकितवनिन्दा च सप्तमी जगती' इति। गतो विनियोगः।

प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। वर्वृतानाः॥ सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान्॥१॥

सा० भा०—बृहतः महतो विभीतकस्य फलत्वेन संबन्धिनः प्रवातेजाः प्रवणे देशे जाताः ईरिणे आस्फारे वर्वृतानाः प्रवर्तमानाः प्रावेपाः प्रवेपिणः कम्पनशीला अक्षाः मा मां मादयन्ति हर्षयन्ति। किंच जागृविः जयपराजययोर्हर्षशोकाभ्यां कितवानां जागरणस्य कर्ता विभीदकः विभीतकविकारोऽक्षो मह्यं माम् अच्छान् अचच्छदत् अत्यर्थं मादयति। तत्र दृष्टान्तः। सोमस्येव यथा सोमस्य मौजवतस्य। मुजवति पर्वते जातो मौजवतः। तस्य। तत्र ह्युत्तमः सोमो जायते। भक्षः पानं यजमानान् देवांश्च मादयति तद्वदित्यर्थः। तथा च यास्कः—'प्रवेपिणो मा महतो विभीतकस्य फलानि मादयन्ति। प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा। सोमस्येव मौजवतस्य भक्षो मौजवतो मुजवति जातो मुजवान् पर्वतो मुञ्जवान् मुञ्जो विमुच्यत इषीकयेषीकेषतेर्गतिकर्मण इयमपीतरेषीकैतस्मादेव विभीतको विभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत्' (निरु० ९. ८) इति॥

शब्दा०—प्रावेपाः=कम्पनशील, मा=मुझको, बृहतः=बड़े विभीदक वृक्ष से, मादयन्ति=आनन्दित करते हैं, प्रवातेजाः=वायुवाले स्थान में उत्पन्न, इरिणे=पाशे पर, वर्वृताना=बार-बार नाचते हुये, सोमस्येव=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सोम की तरह, भक्षः=खाना, यहाँ पीने से मतलब है, मौजवतस्य=मूजवत से उत्पन्न का, विभीदकः=अक्ष, गोटियां, जागृविः=जागृत करनेवाला, मह्यम्=मुझको, अच्छान्=अत्यन्त आनन्दित करता है।

हि० अ०—कम्पनशील, वायु वाले स्थान में बड़े (विभीदक वृक्ष) से उत्पन्न अक्ष पाशे पर बार-बार नाचते हुये मुझको आनन्दित करते हैं। मूजवत से उत्पन्न सोम के पान की तरह जागृत करनेवाला अक्ष मुझको आनन्दित करता है।

Trans.—The quivering ones, born in windly place of the lofty (Vibhīdaka tree), rolling on dice-board exhilarate me. Like the draught of Soma from Mūjavant, the enlivening Vibhīdaka has gladdened me.

Notes.—प्रावेपाः—From √*vip* to tremble; quivering ones. मादयन्ति—√*mad* to exhilarate, pres. caus. 3rd. plu. प्रवातेजाः—Born in windly place; Tatpuruṣa compd. accented on the second member. वर्वृतानाः—√*vṛt* to turn, inte. pres. part. nom. plu.; अच्छान्—√*chand* to seem, 's'-aorist 3rd. sing. Here Sāyaṇa takes it to mean 'gladden'

न । मा । मिमेथ । न । जिहीळे । एषा । शिवा । सखिऽभ्यः । उत । मह्यम् । आसीत् ॥ अक्षस्य । अहम् । एकऽपरस्य । हेतोः । अनुऽव्रताम् । अप । जायाम् । अरोधम् ॥२॥

सा० भा०—एषा अस्मदीया जाया मा मां कितवं न मिमेथ न च चुक्रोध न जिहीळे न च लज्जितवती। सखिभ्यः अस्मदीयेभ्यः कितवेभ्यः शिवा सुखकरी आसीत् अभूत्। उत अपि च मह्यं शिवासीत्। इत्थम अनुव्रताम् अनुकूलां जायाम् एकपरस्य एकः परः प्रधानं यस्य तस्य अक्षस्य हेतोः कारणात् अहम् अप अरोधं परित्यक्तवानस्मीत्यर्थः॥

शब्दा०—न=नहीं, मा=मुझसे, मिमेथ=झगड़ा किया, न=नहीं, जिहीळे=क्रोध किया, एषा=उसने, शिवा=कल्याणकारी, सखिभ्यः=मित्रों के लिये, उत=और, मह्यम्=मेरे लिये, आसीत्=थी, अक्षस्य=अक्ष का

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकपरस्य=एक मात्र प्रेमी होने के, हेतोः=कारण से, अनुव्रताम्=पतिव्रता, जायाम्=पत्नी को, अप अरोधम्=परित्याग दिया है।

हि० अ०—उसने मुझसे कभी झगड़ा नहीं किया, कभी क्रोध नहीं किया (बल्कि) मित्रों के लिये तथा मेरे लिये कल्याणकारी थी, अक्ष का एक मात्र प्रेमी होने के कारण ही (मैंने अपनी) पतिव्रता स्त्री का परित्याग किया है।

Trans.—She never disputed nor was hostile to me; (rather) she was graceful to friends and to me. For the sake of dice, too lovely for one, I have abandoned a devoted wife.

Notes.—मिमेथ—√*mith* to dispute, pref. 3rd. sing. Macdonell takes it to mean 'scold' and Griffith as 'vex' जिहीळे—√*hīd* to be hostile, mid. perf. 3rd. sing.; Sāyaṇa takes it to mean 'to be ashamed' आसीत्—√*as* to be, impf. 3rd. sing. एकपरस्य—Sāyaṇa takes it to mean 'having one for chief (एकः परः प्रधानं यस्य); Macdonell takes एकपरस्य as a Tatpuruṣa adj. meaning 'exceeding by one'. According to him it alludes to an unlucky throw called 'Kali' in which, when number of dice thrown is divided by four, one remains over, while in the best throw, the 'Kṛta' nothing remains over. अप अरोधम्—√*rudh* with अप to abandon, 'root'-aorist, injun. 1rst. sing. According to Macdonell, जायामरोधम् means 'rejecting the kindly advise of my wife'.

द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विन्दते। मर्डितारम्॥ अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहम्। विन्दामि। कितवस्य। भोगम्॥३॥

सा० भा०—श्वश्रूः जायाया माता गृहगतं कितवं द्वेष्टि निन्दतीत्यर्थः। किंच जाया भार्या अप रुणद्धि निरुणद्धि। अपि च नाथितः याचमानः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कितवो धनं मर्डितारं धनदानेन सुखयितारं न विन्दते न लभते। इत्थं बुद्ध्या विमृशन् अहं जरतः वृद्धस्य वस्न्यस्य। वस्नं मूल्यम्। तदर्हस्य अश्वस्येव कितवस्य भोगं न विन्दामि न लभे॥

शब्दा०—द्वेष्टि=द्वेष करती है, श्वश्रूः=सासु (पत्नी की माता), जाया=पत्नी, अप रुणद्धि=रोकती है, न=नहीं, नाथितः=सहायता चाहता हुआ, विन्दते=पाता है, मर्डितारम्=दया करनेवाले को, अश्वस्येव=घोड़े की तरह, जरतः=वृद्ध हुये, वस्न्यस्य=कीमती, न=नहीं, अहम्=मैं, विन्दामि=पाता हूँ, कितवस्य=जुआड़ी का, भोगम्=लाभ, उपयोगिता।

हि० अ०—सासु द्वेष करती है; पत्नी घर आने से रोकती है; सहायता चाहता हुआ किसी भी दया करनेवाले को नहीं पाता। वृद्ध हो गये कीमती अश्व की तरह जुआड़ी का कोई लाभ नहीं पाता हूँ।

Trans.—Mother-in-law hates ; wife holds aloof; begging he finds none to give him comfort. Like a costly horse grown old, I do not find any profit of a gambler.

Notes.—द्वेष्टि—√*dviṣ* to hate, pres. 3rd. sing. अपरुणद्धि—√*rudh* to obstruct, to turn away, pres. 3rd. sing. नाथितः—√*nāth* to seek aid. past part. 'Begging' (Sāyaṇa) 'the wretched' (Griffith), 'man in distress' (Macdonell); विन्दते—√*vid* to find, pres. mid. 3rd. sing. विन्दामि—√*vid* to find, pres. 1rst. sing.

अन्ये। जायाम्। परि। मृशन्ति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः॥ पिता। माता। भ्रातरः। एनम्। आहुः। न। जानीमः। नयत। बद्धम्। एतम्॥४॥

सा० भा०—यस्य कितवस्य वेदने धने वाजी बलवान् अक्षः देवः अगृधत् अभिकाङ्क्षां करोति तस्य अस्य कितवस्य जायां भार्याम् अन्ये प्रतिकितवाः परि मृशन्ति वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति। किंच पिता जननी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

च भ्रातरः सहोदराश्च एनं कितवम् आहुः वदन्ति। न वयमस्यदीयमेनं जानीमः। रज्ज्वा बद्धमेतं कितवं हे कितवाः यूयं नयत यथेष्टदेशं प्रापयतेति ॥

शब्दा० - अन्ये=दूसरे, जायाम्=पत्नी को, परि मृशन्ति=आलिंगन करते हैं, अस्य=उसकी, यस्य=जिसके, अगृधत्=लालच किये हैं, वेदने =धन के लिये, वाजी=शक्तिशाली, अक्षः=अक्ष, पिता=पिता, माता =माता, भ्रातरः=भाई, एनम्=इसको, आहुः=कहते हैं, न=नहीं, जानीमः=जानते हैं, नयत=ले जावो, बद्धम्=बांध कर, एनम्=इसको।

हि० अ० - दूसरे उसकी स्त्री का आलिंगन करते हैं जिसके धन के लिये शक्तिशाली अक्ष (देवता) लालच किये हैं। पिता, माता तथा भाई सभी उसके विषय में कहते हैं, 'हम इसको नहीं जानते, बांधकर इसे ले जावो।

Trans.—Others embrace the wife of him for whose riches the mighty dice has been coveting. The father, mother, brothers say of him, 'we know him not, take him away bound'.

Notes.—मृशन्ति—√*mṛś* to touch, pres. 3rd. plu. अगृधत्—√*gṛdh* to covet, 'a'-aorist, 3rd. sing.; not unaccented because preceded by यस्य. आहुः—√*ah* to say, perf. 3rd. plu. जानीमः—√*jñā* to know, pres. 1rst plu. नयता—√*nī* to carry, impv. 2nd. plu.; not unaccented because beginning of a new sentence; final syllable is metrically lengthened. बद्धम्—√*badh* to bind, past part. acc. sing.

यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अव। हीये। सखिभ्यः॥ निऽउप्साः। च। बभ्रवः। वाचम्। अक्रत। एमि। इत्। एषाम्। निःऽकृतम्। जारिणीऽइव ॥५॥

सा० भा० - यत् यदा अहम् आदीध्ये ध्यायामि तदानीम् एभिः अक्षैः न दविषाणि न दूषये न परितपामि। यद्वा। न दविषाणि न देविष्यामीत्यर्थः। परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्यः अव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हीये अवहितो भवामि। नाहं प्रथममक्षान् विसृजामीति। किंच बभ्रवः बभ्रुवर्णा अक्षाः न्युप्ताः कितवैरवक्षिप्ताः सन्तः वाचमक्रत शब्दं कुर्वन्ति। तदा संकल्पं परित्यज्य अक्षव्यसनेनाभिभूयमानोऽहम् एषाम् अक्षाणां निष्कृतं स्थानं जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी संकेतस्थानं याति तद्वत् एमीत् गच्छाम्येव ॥

शब्दा०—यत्=जब, आदीध्ये=सोचता हूँ, न=नहीं दविषाणि=जलाउँगा, एभिः=इनके द्वारा, परायद्भ्यः=खेलने के लिये जाते हुये, अव हीये=छोड़ दिया जाता हूँ, सखिभ्यः=मित्रों के सामने, न्युप्ताः=फेंके जाते हैं, च=और, बभ्रवः=भूरे वर्ण के, वाचम्=शब्द, अक्रत=करते हैं, एमि =जाता हूँ, इत्=पूर्ववर्ती शब्द पर जोर देनेवाला निपात, एषाम्=इनके निष्कृतम्=निश्चित स्थान पर, जारिणीव=स्वैरिणी स्त्री की तरह।

हि० अ० जब यह सोचता हूँ कि इन अक्षों से (अपने को) नहीं जलाउँगा,' (खेलने के लिये) जाते हुये मित्रों के द्वारा छोड़ दिया जाता हूँ; (जब) भूरे वर्ण के अक्ष पाशे पर फेंके जाते हुये शब्द करते हैं, (मैं) तुरत उस स्थान पर पहुँच जाता हूँ, जैसे स्वैरिणी स्त्री (अभिसार स्थान पर पहुँच जाती है)।

Trans.—When I think to myself 'I will not burn (myself) with them', I am left behind by my friends as departing (to play). The brown ones, (when) thrown on the dice-board, raise their voice, (then) at once, I go to the place (of dice) as a maiden (to the place of assignation).

Notes.—आ दीध्ये—√*dhī* to think, mid. pres. 1rst sing.; not unaccented because preceded by यत्. दविषाणि—√*du* to burn, 'iṣ'-aorist, subju. 1rst. sing. Macdonell takes it to mean 'go', Griffith as 'play'. एभिः—'With these dice' (Sāyaṇa), 'with these friends' (Macdonell). अव होये—√*hā* to leave behind, pres. pass. 1rst. sing. Sāyaṇa takes it to mean अवहितो भवामि. न्युप्ताः—√*vap* with नि to throw, past part. nom. plu. अक्रत—√*kṛ* to make,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

mid. 'root'-aorist 3rd. plu.; not unaccented because syntactically connected with यत्; final syllable is nasalized to avoid the hiatus at the end of the Pāda. एमि—√*i* to go, pres. 1rst. sing.; not unaccented because it begins a new Pāda. इत्—A particle which lays emphasis on the preceding word; here it gives the sense of 'at once'.

सभाम् । एति । कितवः । पृच्छमानः । जेष्यामि । इति । तन्वा । शूशुजानः ॥ अक्षासः । अस्य । वि । तिरन्ति । कामम् । प्रतिऽदीव्ने । दधतः । आ । कृतानि ॥ ६॥

सा० भा०—तन्वा शरीरेण शूशुजानः शोशुचानो दीप्यमानः कितवः कोऽत्रास्ति धनिकस्तं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसंबन्धिनीम् एति गच्छति । तत्र प्रतिदीव्ने प्रतिदेवित्रे कितवाय कृतानि देवनोपयुक्तानि कर्माणि आ दधतः जयार्थमाभिमुख्येन मर्यादया आ दधतः अस्य कितवस्य कामम् इच्छाम् अक्षासः अक्षाः वि तिरन्ति वर्धयन्ति ॥

शब्दा०—सभाम्=जुआ स्थान पर, एति=पहुँचता है, कितवः=जुआड़ी, पृच्छमानः=पूछता हुआ, जेष्यामि=जीतूंगा इति=ऐसा, तन्वा=शरीर से, शूशुजानः=जलते हुये, अक्षासः=अक्ष, अस्य=उसकी, वि तिरन्ति=विशेष रूप से बढ़ाते हैं, कामम्=इच्छा को, प्रतिदीव्ने=प्रतिपक्षी, अदधतः=रखते हुये, कृतानि=भाग्यशाली अक्षों को ।

हि० अ०—'जीतूंगा' ऐसा पूछता हुआ जुआड़ी जलते शरीर से जुआ स्थान पर पहुँचता है । अक्ष, भाग्यशाली अक्षों को प्रतिपक्षी की ओर करते हुये, उसकी इच्छा को और बढ़ाते हैं ।

Trans.—With burning body the gambler goes to the gambling house asking, 'I will win'. The dice strengthen his longing bestowing the lucky throw on the rival gambler.

Notes.—पृच्छमानः—√*prach* to ask, pres. part. जेष्यामि—√*ji* to conquer, future, 1rst. sing.; not

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

unaccented because beginning of a new sentence. तन्वा ३ शूशुजानः —For accent see Appendix—B under कम्पस्व० Sāyaṇa renders शूशुजानः by शोशुचानः and thus he seems to derive it from √*śuc* to shine, to burn. According to Macdonell, the word most probably expresses either fear' or 'confidence'. वि तिरन्ति—√*tṛ* with वि to strengthen, pres. 3rd. plu. दधतः—√*dhā* to put, pres. part. कृतानि —Macdonell takes it in the specific sense of the 'highest throws'.

अक्षासः । इत् । अङ्कुशिनः । निऽतोदिनः । निऽकृत्वानः । तपनाः । तापयिष्णवः ॥ कुमारऽदेष्णाः । जयतः । पुनःऽहनः । मध्वा । सम्ऽपृक्ताः । कितवस्य । बर्हणा ॥७॥

सा० भा०—अक्षास इत् अक्षा एव अङ्कुशिनः अङ्कुशवन्तः नितोदिनः नितोदितवन्तश्च निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा तपनाः पराजये कितवस्य संतापकाः तापयिष्णवः सर्वस्वहारकत्वेन कुटुम्बस्य संतापनशीलाश्च भवन्ति । किंच जयतः कितवस्य कुमारदेष्णाः धनदानेन धान्यतां लम्भयन्तः कुमाराणां दातारो भवन्ति । अपि च मध्वा मधुना संपृक्ताः प्रतिकितवेन बर्हणा परिवृद्धेन सर्वस्वहरणेन कितवस्य पुनर्हणः पुनर्हन्तारो भवन्ति ॥

शब्दा०—अक्षासः=ये अक्ष, इत्=पूर्ववर्ती शब्द पर जोर देने वाला निपात, अङ्कुशिनः=अङ्कुशवाले, नितोदिनः=काटनेवाले, निष्कृत्वानः =धोखा देनेवाले, तपनाः=तपानेवाले, तापयिष्णवः=संताप देनेवाले, कुमारदेष्णाः=बच्चों की तरह देनेवाले तथा फिर वापस लेनेवाले, जयतः =जीतनेवाले, पुनर्हणः=पुनः हत्या करनेवाले, मध्वा=मधु से, संपृक्ताः= सनी हुई बोली से, कितवस्य=जुआड़ी की, बर्हणा=निश्चित रूप से ।

हि० अ० -निश्चित रूप से ये पाशे अङ्कुशवाले, काटनेवाले, धोखा देनेवाले, तपानेवाले तथा (जुआड़ी के द्वारा धन हारने पर परिवार के लोगों को) संताप देने वाले हैं । बच्चों की तरह धन देकर, मधुयुक्त (वाणी) से निश्चित रूप से (ये अक्ष) जीतनेवाले जुआड़ी की हत्या करनेवाले होते हैं ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—The dice, verily, are hooked, piercing, deceitful, burning and causing to burn. (Dice) by giving gifts like boys, with (speech) anointed with meath, certainly, again become the killer of the winning gambler.

Notes.—कुमारदेष्णाः—Giving gifts and taking them back like children. Griffith takes it to mean 'giving frail gifts'. संपृक्ताः—√*pṛc* to mix, past part. बर्हणा—From √*bṛh* to make big, Sāyaṇa renders it as परिवृद्धेन सर्वस्वहारेण; 'by magic power' (Macdonell) 'certainly' (M.W.D.)

त्रिऽपञ्चाशः । क्रीळति । व्रातः । एषाम् । देवःऽइव । सविता । सत्यऽधर्मा ॥ उग्रस्य । चित् । मन्यवे । न । नमन्ते । राजा । चित् । एभ्यः । नमः । इत् । कृणोति ॥८॥

सा० भा०— एषाम् अक्षाणां त्रिपञ्चाशः त्र्यधिकपञ्चाशत्संख्याकः व्रातः संघः क्रीळति आस्फारे विहरति अक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यन्ति हि । तत्र दृष्टान्तः । सत्यधर्मा सविता सर्वस्य जगतः प्रेरकः सूर्यो देवइव । यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्फारे विहरतीत्यर्थः । किंच उग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधाय एते अक्षाः न नमन्ते न प्रह्वीभवन्ति । न वशे वर्तन्ते । तं नमयन्तीत्यर्थः । राजा चित् जगत ईश्वरोऽपि एभ्यः नम इत् नमस्कारमेव देवनवेलायां कृणोति । नावज्ञां करोतीत्यर्थः ॥

शब्दा०—त्रिपञ्चाशः=तीरपन संख्यावाला, क्रीळति=खेलता है, व्रातः=समूह, देव इव=देवता की तरह, सविता=सवितृ, सत्यधर्मा=सत्यधर्मवाले, उग्रस्य=भयानक के, चित्=भी, मन्यवे=क्रोध के सामने, न=नहीं, नमन्ते=झुकते हैं, राजा=शासक, चित्=भी एभ्यः=इनको नमः=नमस्कार, इत्=पूर्ववर्ती शब्द पर जोर देनेवाला निपात, कृणोति=करता है ।

हि० अ०—इनका तीरपन का समूह पाशे पर विहार करता है जैसे सत्यधर्मवाले सवितृ देव (सर्वत्र अपनी इच्छा से विहार करते हैं) । ये (अक्ष)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भयानक के भी क्रोध के सामने नहीं झुकते; राजा भी इनको नमस्कार करता है।

Trans.—Their troop of fifty-three plays as god Savitar whose laws are true. They do not bow before the wrath of even the terrible one. Even a king makes a salutation to them.

Notes.—त्रिपञ्चाशः—Sāyaṇa takes this number as fify-three. Ludwig suggests, 'three times five' as the meaning here of त्रिपञ्चाशः. According to Macdonell, त्रिपञ्चाशः means 'consisting of three fifties.' क्रीळति—√*krīd* to play, pres. 3rd. sing. सत्यधर्मा—Whose laws are true; Bahuvrīhi compd. ना - A negative particle metrically lengthaned. नमन्ते—√*nam* to bend, pres. mid. 3rd. sing. कृणोति—√*kṛ* to make, pres. 3rd. sing.

नीचा। वर्तन्ते। उपरि। स्फुरन्ति। अहस्तासः। हस्तऽवन्तम्। सहन्ते॥ दिव्याः। अङ्गाराः। इरिणे। निऽउप्ताः। शीताः। सन्तः। हृदयम्। निः। दहन्ति॥९॥

सा० भा० - अपि चैतेऽक्षाः नीचा नीचीनस्थले वर्तन्ते। तथापि उपरि पराजयात् भीतानां द्यूतकराणां कितवानां हृदयस्योपरि स्फुरन्ति। अहस्तासः हस्तरहिता अप्यक्षाः हस्तवन्तं द्यूतकरं कितवं सहन्ते पराजयकरणेनाभिभवन्ति। दिव्याः दिवि भवा अपकृताः अङ्गाराः अङ्गारसदृशा अक्षाः इरिणे इन्धनरहिते आस्फारे न्युप्ताः शीताः शीतस्पर्शाः सन्तः अपि हृदयं कितवानामन्तःकरणं निर्दहन्ति पराजयजनितसंतापेन भस्मीकुर्वन्ति॥

शब्दा०—नीचा=नीचे, वर्तन्ते=जाते हैं, उपरि=ऊपर, स्फुरन्ति=उछलते हैं, अहस्तासः=बिना हाथवाले, हस्तवन्तम्=हाथवाले को, सहन्ते=जीतते हैं, दिव्याः=स्वर्गीय, अङ्गाराः=अङ्गार की तरह ये अक्ष, इरिणे=पाशे पर, न्युप्ताः=फेंके जाने पर, शीताः=ठंडे, सन्तः=होते हुये भी, हृदयम्=चित्त को, निर्दहन्ति=जला डालते हैं।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—(कभी) नीचे जाते हैं, (कभी) उपर उछलते हैं; हाथरहित ये हाथवाले को जीतते है। स्वर्गीय अङ्गार (की तरह ये अक्ष) पाशे पर फेंके जाने पर ठंडा होते हुये भी हृदय को जला डालते हैं।

Trans.—They roll downwards, spring upwards; handless ones conquer him who has hand. The celestial chorcoals, thrown on the dice-board, though cold, burn the heart.

Notes.—वर्तन्ते—√*vṛt* to turn, pres. mid 3rd. plu. नीचा-उपरि, अहस्तासः-हस्तवन्तम्, दिव्याः-इरिणे, शीताः निर्दहन्ति—All are ontethetical expressions. स्फुरन्ति—√*sphur* to jerk, pres. 3rd. plu. अहस्तासः—Those who have no hands; Bahuvrīhi, accented on the second member (नञ्सुभ्याम्—Pāṇ VI.2.172). सहन्ते—√*sah* to conquer, pres. mid. 3rd. plu. सन्तः—√*as* to be, pres. part. nom. plu. दहन्ति—√*dah* to burn, pres. 3rd. plu.

जाया। तप्यते। कितवस्य। हीना। माता। पुत्रस्य। चरतः। क्व। स्वित्॥ ऋणऽवा। बिभ्यत्। धनम्। इच्छमानः। अन्येषाम्। अस्तम्। उप। नक्तम्। एति ॥१०॥

सा० भा०—क्व स्वित् क्वापि चरतः निर्वेदाद्गच्छतः कितवस्य जाया भार्या हीना परित्यक्ता सती तप्यते वियोगजसंतापेन संतप्ता भवति। माता जनन्यपि पुत्रस्य क्वापि चरतः कितवस्य संबन्धाद्धीना तप्यते। पुत्रशोकेन संतप्ता भवति। ऋणावा अक्षपराजयादृणवान् कितवः सर्वतो बिभ्यद्धनं स्तेयजनितम् इच्छमानः कामयमानः अन्येषां ब्राह्मणादीनाम् अस्तं गृहम्। 'अस्तं पस्त्यम्' इति गृहनामसु पाठात्। नक्तं रात्रौ उप एति। चौर्यार्थमुपगच्छति॥

शब्दा०—जाया=पत्नी, तप्यते=दुःखी होती है, कितवस्य=जुआड़ी की, हीना=परित्यक्ता, माता=माता, पुत्रस्य=पुत्र की, चरतः=घूमने वाले, क्वस्वित्=कभी इधर कभी उधर, ऋणवा=कर्ज से लदा हुआ, बिभ्यत्=डरता हुआ, धनम्=धन, इच्छमानः=कामना करता हुआ, अन्येषाम्=दूसरों के, अस्तम्=घर, नक्तम्=रात्रि को, उप एति=पहुँचता है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—(कभी उधर कभी उधर घूमनेवाले) जुआड़ी की परित्यक्ता पत्नी दुःखी रहती है; कभी इधर कभी उधर घूमने वाले (जुआड़ी) की माता भी (दुःखी रहती है)। ऋणी (जुआड़ी) डरता हुआ, धन की कामना करता हुआ रात्रि को (चोरी करने के लिये) दूसरों के घर पहुँचता है।

Trans.—The gambler's wife, abandoned, is grieved; the mother of the son roaming anywhere (is also grieved). The indebted one, fearing, desiring wealth approaches at night the house of others (for theft).

Notes.—तप्यते – √*tap* to burn, pres. pass. 3rd. sing. चरतः – √*car* to move. pres. part. gen. sing. बिभ्यत् – √*bhī* to fear, pres. part. इच्छमानः – √*icch* to desire, pres. part. उप एति—√*i* with उप to approach, 3rd. sing.

स्त्रियम्। दृष्ट्वाय। कितवम्। तताप। अन्येषाम्। जायाम्। सुऽकृतम्। च। योनिम्॥ पूर्वाह्णे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अन्ते। वृषलः। पपाद॥११॥

सा० भा०—कितवं कितवः। विभक्तिव्यत्ययः। अन्येषां स्वव्यक्तिरिक्तानां पुरुषाणां जायां जायाभूतां स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठु कृतं योनिं गृहं च दृष्ट्वाय मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा ततापं तप्यते। पुनः पूर्वाह्णे प्रातःकाले बभ्रून् बभ्रूवर्णान् अश्वान् व्यापकानक्षान् युयुजे युनक्ति। पुनश्च वृषलः वृषलकर्मा सः कितवो रात्रौ अग्नेरन्ते समीपे पपाद शीतार्तः सन् शेते॥

शब्दा०—स्त्रियम्=स्त्री को, दृष्ट्वाय=देखकर, कितवम्=जुआड़ी, तताप=दुःखी होता है, अन्येषाम्=दूसरों की, जायाम्=पत्नी को, सुकृतम्=सुसज्जित, सुनिर्मित, च=और, योनिम्=निवास स्थान को, पूर्वाह्णे=प्रातःकाल, अश्वान्=अक्ष रूपी अश्वों को, युयुजे=जोतता है, हि=निश्चित अर्थ का वाचक एक निपात, बभ्रून्=भूरे वर्ण के, सः=वह, अग्नेः=अग्नि के, अन्ते=समीप, वृषलः=निन्दित कर्म करनेवाला, पपाद=जाता है।

हि० अ०—दूसरों की पत्नी-स्त्री तथा सुसज्जित गृह को देखकर जुआड़ी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुःखी होता है। (लेकिन पुनः) प्रातःकाल भूरे वर्ण के अश्वों (अक्षों) को जोतता है (और पुनः सायंकाल) वह निन्दित कर्म करनेवाला (जुआड़ी शीतार्त होकर) अग्नि के पास जाता है।

Trans.—Having seen the wife-woman and well-adorned house of the others, the gambler is grieved. (Again) in the morning he yokes the brown horses (dice). He, the contemptible, goes (in the evening) near the fire.

Notes— दृष्ट्वाय—√*dṛś* to see, gerund in त्वाय. कितवम्—Use of acc. sing. instead of nom. sing. तताप —√*tap* to heat, perf. 3rd. sing. स्त्रियं जायाम् —Appositional use; a woman who is the wife. अश्वान्—Dice are here metaphorically called horses. युयुजे— √*yuj* to harness, perf. 3rd. sing.; not unaccented because immediately followed by हि. (यद्वितुपरं छन्दसि—Pāṇ VIII. 1.56). वृषलः—'Contemptible man' (Sāyaṇa), 'out-cast' (Griffith), 'beggar' (Macdonell). पपाद— √*pad* to go, perf. 3rd. sing.

यः । वः । सेनाऽनीः । महतः । गणस्य । राजा । व्रातस्य । प्रथमः । बभूव ॥ तस्मै । कृणोमि । न । धना । रुणध्मि । दश । अहम् । प्राचीः । तत् । ऋतम् । वदामि ॥१२॥

सा० भा०—हे अक्षाः वः युष्माकं महतो गणस्य संघस्य यः अक्षः सेनानीः नेता बभूव भवति व्रातस्य च। गणव्रातयोरल्पो भेदः। राजा ईश्वरः प्रथमः मुख्यो बभूव तस्मै अक्षाय कृणोमि अहमञ्जलिं करोमि। अतः परं धना धनानि अक्षार्थमहं न रुणध्मि न संपादयामीत्यर्थः। एतदेव दर्शयति। अहं दश दशसंख्याका अंगुलीः प्राचीः प्राङ्मुखीः करोमि। तत् एतत् अहम् ऋतं सत्यमेव वदामि। नानृतं ब्रवीमीत्यर्थः॥

शब्दा०—यः=जो, वः=तुमलोगों के, सेनानीः=सेनापति, महतः=बड़े, गणस्य=समूह का, राजा=प्रधान, व्रातस्य=समूह का, बभूव=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हुआ है, तस्मै=उसको, कृणोमि=करता हूँ, फैलाता हूँ, न=नहीं, धना=धन, रुणध्मि=छिपाता हूँ, दश=दस अंगुलियों को, अहम्=मै प्राचीः=सामने, तत्=यह, ऋतम्=सही, वदामि=कहता हूँ।

हि० अ०—जो तुमलोगों के बड़े गण का सेनापति है, (जो) गण का प्रथम राजा हुआ है, उसके सामने अपनी दसो अंगुलियां फैलाता हूँ; मै धन नहीं छिपाया हूँ, यह मै सही कहता हूँ

Trans.—Who was the commander of your big host; (who) has become the first king of the host; to him I stretch forth my ten fingers; 'I withhold no money', I speak the turth.

Notes—बभूव—√*bhū* to be, perf. 3rd. sing.; not unaccented because syntactically connected with यः. कृणोमि—√*kṛ* to make, pres. 1rst. sing. रुणध्मि—√*rudh* to obstruct, 1rst. sing. वदामि—√*vad* to speak, pres. 1rst. sing.

अक्षैः। मा। दीव्यः। कृषिम्। इत्। कृषस्व। वित्ते। रमस्व। बहु। मन्यमानः॥ तत्र। गावः। कितव। तत्र। जाया। तत्। मे। वि। चष्टे। सविता। अयम्। अर्यः॥१३॥

सा० भा०—हे कितव बहु मन्यमानः मद्वचने विश्वासं कुर्वंस्त्वम् अक्षैर्मा दीव्यः द्यूतं मा कुरु। कृषिमित् कृषिमेव कृषस्व कुरु। वित्ते कृष्या संपादिते धने रमस्व रतिं कुरु। तत्र कृषौ गावः भवन्ति। तत्र जाया भवति। तत् एव धर्मरहस्यं श्रुतिस्मृतिकर्ता सविता सर्वस्य प्रेरकः अयं दृष्टिगोचरः। अर्यः ईश्वरः वि चष्टे विविधमाख्यातवान्॥

शब्दा०—अक्षैः=अक्षों से, मा=मत, दीव्यः=खेलो, कृषिम्=कृषि कर्म, इत्=ही, कृषस्व=करो, वित्ते=कृषि से प्राप्त धन में, रमस्व=आनन्दित रहो, बहु मन्यमानः=मेरी बातों में विश्वास करते हुये, तत्र=वहां, गावः=गाये हैं, कितव=ओ जुआड़ी, तत्र=वहां, जाया=पत्नी है, तत्=यह, मे=मुझसे, वि चष्टे=कहा है, सविता=सवितृ देव ने, अयम्=यह, अर्यः=श्रेष्ठ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—मेरी बातों में विश्वास करते हुये जुआ मत खेलो, कृषि कर्म ही करो, (उससे प्राप्त) धन में आनन्दित रहो; वहां पर गाये हैं, ओ जुआड़ी, वहां पर तुम्हारी पत्नी है; इसको श्रेष्ठ सवितृ ने स्वयं हमसे कहा है।

Trans.—Having confidence in my advice, do not play with dice; cultivate thy tillage; rejoice in thy property. There are thy kine, O gamber, thy wife; this lord Savitar has himeslf told me.

Notes—दीव्यः—√*div* to play; injun. 2nd. sing कृषस्व—√*kṛṣ* to plough, impv. mid. 2nd. sing. रमस्व—√*ram* to rejoice, impv., mid. 2nd. sing. बहु मन्यमानः—Sāyaṇa renders it by मद्वचने विश्वासं कुर्वन् (having confidence in my advice); Macdonell takes it to mean 'thinking much of it', and Griffith as 'deem that wealth sufficient'. वि चष्टे—√*cakṣ* with वि to reveal, pres. 3rd. sing.

मित्रम् । कृणुध्वम् । खलु । मृळत । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु ॥ नि । वः । नु । मन्युः । विशताम् । अरातिः । अन्यः । बभ्रूणाम् । प्रऽसितौ । नु । अस्तु ॥१४॥

सा० भा०—हे अक्षाः यूयं मित्रं कृणुध्वम् अस्मासु मैत्रीं कुरुत। खलु इति पूरणः। नः अस्मान् मृळत सुखयत च। नः अस्मान् धृष्णु धृष्णुना। तृतीयार्थे प्रथमा। घोरेण असह्येन मा अभि चरत मा गच्छत। किंच वः युष्माकं मन्युः क्रोधः अरातिः अस्माकं शत्रुः नि विशताम् अस्मच्छत्रुषु तिष्ठतु। अन्यः अस्माकं शत्रुः कश्चित् बभ्रूणां बभ्रुवर्णानां युष्माकं प्रसितौ प्रबन्धने नु क्षिप्रम् अस्तु भवतु॥

शब्दा०—मित्रम्=मित्रता, कृणुध्वम्=करो, खलु=पदपूरण के लिये प्रयुक्त एक निपात, मृळत=दया करो, नः=हम पर, मा=मत, नः=हम पर, घोरेण=भयानक, अभिचरत=जादू करो, धृष्णु=शक्ति से, वः=तुम लोगों का, नु=अब, मन्युः=क्रोध निविशताम्=शान्त हो, अरातिः=शत्रु, अन्ये

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

=दूसरे, बभ्रूणाम्=भूरे वर्णवाले के, प्रसितौ=बन्धन में, नु=शीघ्र, अस्तु =होवें।

हि० अ०—(ओ अक्ष), मित्रता करो, तथा हम पर दया करो; भयानक शक्ति से मुझ पर जादू मत करो; तुम लोगों का क्रोध और दुश्मनी अब शान्त हो; भूरे वर्ण वाले के बंधन में दूसरे शत्रु शीघ्र पड़ें।

Trans.—(O dice,) make friendship, and be gracious to us; do not bewitch us with terrific force; let your wrath and malignity come to rest; let another now be under the snare of (yours), the brown-coloured.

Notes—कृणुध्वम्—√*kṛ* to make, impv. mid. 2nd. plu. खलु—An expletive particle. Griffith takes it in the sense of little. मृळता—√*mṛd* to be gracious, impv. 2nd. plu.; not unaccented because the conjunctive particle च has been dropped (चादिलोपेविभाषा—Pāṇ. VIII. 1.63); final syllable is metrically lengthened. घोरेण—'Unbearable' (Sāyaṇa) ,'terrific' (Griffith), 'magic power' (Macdonell). अभिचरत—In the language of the Veda prepositions also appear after the verb; √*car* with अभि to bewitch (Macdonell), to go (Sāyaṇa), impv. 2nd. plu. निविशताम्—√*viś* with नि to rest, impv. 3rd. dual. प्रसितौ—Loc. sing of प्रसित, past part. from √*si* to bind.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'बृहस्पते' इत्येकादशर्चं तृतीयं सूक्तम् आङ्गिरसस्य बृहस्पतेरार्षम् । नवमी जगती शिष्टा दश त्रिष्टुभः । अनेन सूक्तेनर्षिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान् । अतस्तद्देवत्यमिदम् । उक्तं हि बृहद्देवतायां—'सुज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते । तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः' (बृहद्दे० ७. १०९) इति । अनुक्रान्तं च—'बृहस्पते बृहस्पतिर्ज्ञानं तुष्टाव नवमी जगती' इति । सूक्त विनियोगो गतः । देवसुवां हविःषु बृहस्पतिर्वाचस्पतिरित्यस्य प्रथमानुवाक्या । सूत्रितं च—'बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखिभिर्वाविदद्भिः' (आश्व० श्रौ० ४. ११) इति ॥

बृहस्पते । प्रथमम् । वाचः । अग्रम् । यत् । प्र । ऐरत । नामऽधेयम् । दधानाः ॥ यत् । एषाम् । श्रेष्ठम् । यत् । अरिप्रम् । आसीत् । प्रेणा । तत् । एषाम् । निऽहितम् । गुहा । आविः ॥१॥

सा० भा०—बृहस्पतिरनेन सूक्तेन विदितवेदार्थान् बालान् दृष्ट्वा स्मयमानः स्वात्मानं संबोध्याह । हे बृहस्पते अन्तरात्मन् प्रथमम् उत्पत्त्यनन्तरमितरवागुच्चारणात्प्रागेव नामधेयं नाम दधानां पदार्थेषु निदधाना बालाः यत् प्रैरत प्रेरितवन्तः तत् वाचोऽग्रं भवति । यत्तत तातेत्यादिकं वाक्यं पूर्वमभिधाय पश्चादन्या वाचो वदिष्यन्ति खलु तस्माद्वाचोऽग्रम् । अस्यां दशायामवस्थितान् बालान् पश्य । तथेदानीम् एषां श्रेष्ठं प्रशस्यतमं यत् यच्च अरिप्रं पापरहितं वेदार्थज्ञानम् आसीत् एषां तज्ज्ञानं गुहा गुहायां निहितं गोप्यं तत् प्रेणा । मकारलोपश्छान्दसः । प्रेम्णाविर्भवति । वेदाभ्यासकाले सरस्वती स्वार्थमेभ्यः प्रकाशयतीत्यर्थः । एवं विस्मये 'बृहस्पते प्रथमं वाचो अग्रम्' (ऐ० आ० १. ३.६) इत्यादिकमारण्यकमनुसंधेयम् ।)

शब्दा०—बृहस्पते=ओ बृहस्पति, प्रथमम्=प्रथम, वाचः=वाणी से अग्रम्=पहिले, यत्=जो, प्र ऐरत्=कहा, नामधेयम्=नामकरण, दधानाः=करते हुये, यत्=जो, एषाम्=उनका, श्रेष्ठम्=महान्, यत्=जो, अरिप्रम्=पापरहित, आसीत्=था, प्रेणा=प्रेम से, तत्=वह, एषाम्=उनका, निहितम्=छिपा हुआ, गुहा=रहस्य में, आविः=प्रकट हुआ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ बृहस्पति, वाणी से पहिले (वस्तुओं का) नामकरण करते हुये मनुष्यों ने जो कुछ कहा वह (वाणी का) प्रथम रूप था, उनका (ज्ञान) जो श्रेष्ठ तथा जो पापरहित था, रहस्य में छिपा हुआ था। उनका वह (ज्ञान) तुम्हारे प्रेम द्वारा प्रकट हुआ।

Trans.—O Bṛhaspati, prior to speech, which (men) sent out, giving the names (to objects), was the earliest (form of speech). Their (knowledge) that was excellent, that was sinless, (was) hidden in secret, and it was disclosed through (thy affection).

Notes—प्र ऐरत —√*īr* with प्र to send forth, to utter, impf. mid. 3rd. plu.; not unaccented because preceded by यत्. दधानाः —√*dhā* to put, pres. part. आसीत्—√*as* to be, impf. 3rd. sing.; not unaccented because preceded by यत्. प्रेणा—For प्रेम्णा, medial म् being dropped. आविः—Sāyaṇa supplies भवति and explains as वेदाभ्यासकाले सरस्वती स्वार्थमेभ्यः प्रकाशयतीत्यर्थः.

सक्तुम्ऽइव । तितउना । पुनन्तः । यत्र । धीराः । मनसा । वाचम् । अक्रत ॥ अत्र । सखायः । सख्यानि । जानते । भद्रा । एषाम् । लक्ष्मीः । निऽहिता । अधि । वाचि ॥२॥

सा० भा०—तितउना । परिपूयतेऽनेनेति । यद्वा । तता विस्तृता भृष्टयवा अत्रेति तितउः । 'तनोतेर्डउः सन्वच्च' (उ० सू० ५.२२) इति डउप्रत्ययः । सन्वद्भावादित्वम् । उक्तनिर्वचनेन सूर्पेण सक्तुमिव यथा कश्चित्सक्तुं दुर्धावं पुनाति तद्वत् प्रकृतितः प्रत्ययतश्च शब्दानुत्पुनन्तः धीराः धीमन्तो विद्वांसः यत्र यस्मिन् काले विद्वत्संघे वा मनसा प्रज्ञायुक्तेन वाचमक्रत अकृषन्त कुर्वन्ति । करोतेर्लुङि रूपम् । अत्र तत्र काले सखायः समानख्यानाः शास्त्रादिविषय-ज्ञानास्ते सख्यानि तेषु भवानि ज्ञानानि जानते जानन्ति । यद्वा । सखायो वाचा बद्धसख्यास्ते तस्यास्तस्या वाचः सख्यानि जानन्ति । वाक्ययुक्तान-भ्युदयाँल्लभन्त इत्यर्थः । तस्मात् एषां वाचि भद्रा कल्याणी निहिता लक्ष्मीः भवति । अधिः सप्तम्यर्थद्योतकः । अर्थज्ञानं वाचि पश्याम इत्यर्थः । 'तितउ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमात्रतुन्नमिति वा सक्तुमिव तितउना' (निरु० ४.१०) इत्यादि निरुक्तमनुसंधेयम् ॥

शब्दा०—सक्तुमिव=सत्तू की तरह, तितउना=चलनी से: पुनन्तः=प्रकृति प्रत्ययानुसार शुद्ध करते हुये, यत्र=जहां, धीराः=बुद्धिमान, मनसा=मन से, वाचम्=शब्द को, अक्रत=करते हैं अर्थात् बोलते हैं, अत्र=यहां सखायः=समान ज्ञानवाले, सख्यानि=समान शास्त्रीय ज्ञान को, जानते=जानते हैं, भद्रा=कल्याणकारी, एषाम्=इनकी, लक्ष्मीः=अर्थ देवी, निहिता=स्थित रहती है,अधि वाचि=वाणी में ।

हि० अ०—जहां विद्वान् चलनी से सत्तू की तरह हृदय से शब्द को (प्रकृति प्रत्यय के अनुसार) शुद्ध करते हुये बोलते हैं। यहां पर समान ज्ञानवाले एक दूसरे के (शास्त्रीय) ज्ञान को जानते हैं। उनकी वाणी में कल्याणकारी अर्थ देवी स्थित रहती है।

Trans.—Where the wise ones utter the speech with mind, purifying (according to stem or root and the termination) like parched-corn-flour with a cribble. Here men of equal knowledge know the equal knowledge of one another. In their speech the auspicious goddess of wealth (i.e. the knowledge of meaning) is hidden.

Notes—सक्तुमिव—Like parched-corn flour. Yāska derives it form √*sac* to accompany or from √*kas* by metathesis (सक्तुः सचतेः । दुर्धावो भवति । कसतेर्वा स्याद्विपरीतस्य—Nir. IV. 10). तितउना—Instr. sing. of तितउ (cribble). Sāyaṇa takes it to mean winnowing basket. Yāska variously derives this word तितउ परिपवनं भवति । ततवत् वा । तुन्नवत् वा । तिलमात्रतुन्नमिति वा—Nir. IV. 10). Ṛg. Prāt. quotes this word as an instance of hiatus. पुनन्तः—√*pū* to cleanse, pres. part. nom. plu. Sāyaṇa construes it with वाचम् as its object, but Griffith with सक्तुम्. अक्रत—√*kṛ* to make, root-aorist, mid. 3rd. plu. सखायः—'Men of equal knowledge' (Sāyaṇa),

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

friends (Griffith). जानते—√*jñā* to know, pres. mid. 3rd. plu. लक्ष्मीः—Goddess of wealth; here metaphorically means 'knowledge of meaning'. Griffith takes it to mean 'sign'. निहिता—See I. 24.1. वाचि—In the speech; loc. sing. of वाक्.

यज्ञेन । वाचः । पदऽवीयम् । आयन् । ताम् । अनु । अविन्दन् । ऋषिषु । प्रऽविष्टाम् ॥ ताम् । आऽभृत्य । वि । अदधुः । पुरुऽत्रा । ताम् । सप्त । रेभाः । अभि । सम् । नवन्ते ॥३॥

सा० भा०—विदितार्था धीराः पदवीयम् । वेतेः 'अचो यत्' । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः । पदेन यातव्यः पन्थाः पदवीयः । तं वाचः मार्गं यज्ञेन आयन् प्राप्तवन्तः । ऋषिषु अतीन्द्रियार्थदर्शिषु प्रविष्टां तां वाचम् अविन्दन् अलभन्त । अनन्तरं तां वाचम् आभृत्य आहृत्य पुरुत्रा बहुषु देशेषु व्यदधुः व्यकार्षुः । सर्वान् मनुष्यानध्यापयामासुरित्यर्थः । एतादृशीं वाचं रेभाः शब्दायमानाः पक्षिणः पक्षिरूपाणि गायत्र्यादीनि सप्त छन्दांसि अभि सं नवन्ते अभितः संगच्छन्ते ॥

शब्दा० —यज्ञेन=यज्ञ द्वारा, वाचः=वाणी के, पदवीयम्=मार्ग का, आयन्=अनुसरण किया, ताम्=उसको, अन्वविन्दन्=पाये, ऋषिषु=ऋषियों में, प्रविष्टाम्=प्रवेश किया हुआ, ताम्=उसको, आभृत्य=लाकर, व्यदधुः=अभिव्यक्त किया, पुरुत्रा=कई स्थानों पर, ताम्=उसको, सप्त=सात, रेभाः=शब्द करनेवाले पक्षी, अर्थात् गायत्र्यादि छन्द, अभिसंनवन्ते=चारों तरफ से स्तुति करते हैं ।

हि० अ० —बुद्धिमानों ने यज्ञ द्वारा वाणी के मार्ग का पीछा किया, उसको ऋषियों में प्रवेश किया हुआ पाया; उसको लाकर कई स्थानों पर उसे अभिव्यक्त किया । सात शब्द करनेवाले पक्षी (गायत्र्यादि छन्द) एक साथ चारों तरफ से उसकी स्तुति करते हैं ।

Trans.—They followed the path of speech with sacrifice, and found it entered within the seers. Having brought it, they revealed it at many places. The seven metres praise it together.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—पदवीयम्—'Path' (Sāyaṇa) 'trace' (Griffith). आयन्—√*i* to go, impf. 3rd. plu. अविन्दन्—√*vid* to find, impf. 3rd. plu. प्रविष्टाम्—√*viṣ* to enter, past part. आभृत्य—√*bhṛ* with आ to bring, gerund in त्य. वि अदधुः—√*dhā* with वि to reveal, impf. 3rd. plu. पुरुत्रा—See I. 32.7. सप्तरेभाः—Sāyaṇa takes it to mean seven noisy birds referring to the seven metres, the gāyatrī etc. Griffith thinks it to mean seven singers. संनवन्ते—√*nu* with सम् to praise together, mid. pres. 3rd. plu.

उत । त्वः । पश्यन् । न । ददर्श । वाचम् । उत । त्वः । शृण्वन् । न । शृणोति । एनाम् ॥ उतो इति । त्वस्मै । तन्वम् । वि । सस्रे । जायाऽइव । पत्ये । उशती । सुऽवासाः ॥४॥

सा० भा०—त्वशब्द एकवाची । एकः । उतशब्दोऽप्यर्थे । पश्यन् अपि मनसा पर्यालोचयन्नपि वाचं न ददर्श दर्शनफलाभावान्न पश्यति । त्वः एकः शृण्वन् अपि एनां वाचं न शृणोति श्रवणफलाभावात् । इत्यनेनार्धेन अविद्वानभिहितः । तृतीयपादेन विदितवेदार्थमाह । त्वस्मै एकस्मै अपि तन्वम् आत्मीयं शरीरं विसस्रे स्वयं वाग्विविधं गमयति । आत्मानं विवृणुते प्रकाशयतीत्यर्थः । तत्र दृष्टान्तः । जायेव यथा उशती संभोगं कामयमाना सुवासाः शोभनवसाना जाया पत्ये भर्त्रे ऋतुकाले संभोगार्थं स्वयमात्मानं विवृणुते । तद्वदेनां पश्यति शृणोति चेति विदितवेदार्थस्य प्रशंसा । 'अप्येकः पश्यन्न पश्यति वाचम्' (निरु० १. १९) इत्यादि निरुक्तमत्र द्रष्टव्यम् ॥

शब्दा० उत=भी, त्वः=एक, पश्यन्=देखता हुआ, न=नहीं, ददर्श=देखता है, वाचम्=वाणी को, उत=भी, त्वः=एक, शृण्वन्=सुनता हुआ, न=नहीं, शृणोति=सुनता है, एनाम्=इसको, उतो=भी, त्वस्मै=एक के लिये, तन्वम्=शरीर को, विसस्रे=खोल देती है, जायेव=पत्नी की तरह, पत्ये=पति के लिये, उशती=इच्छा करती हुई, सुवासाः=सुन्दर वस्त्रवाली ।

हि० अ०—एक वाणी को देखता हुआ भी नहीं देखता; एक सुनता हुआ भी इसे नहीं सुनता । एक के लिये (वाणी) अपने शरीर को खोल देती है जिस प्रकार सुन्दर वस्त्रवाली इच्छा करती हुई पत्नी पति के लिये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—One even seeing the speech sees not; one even hearing it hears not. (But) to another it reveals its body as does a well-dressed longing wife to her husband.

Notes—पश्यन् — √*paś* to see, pres. part. ददर्श— √*dṛś* to see, perf. 3rd. sing. शृण्वन् — √*śru* to hear, pres. part. शृणोति— √*śru* to hear, pres. 3rd. sing. उतो (=उत+उ) ; final ओ is Pragṛhya ; hence, इति after it in the Pada-text. त्वस्मै—Dat. sing of त्व. विसस्रे— √*sṛ* with वि to reveal, to spread, perf. mid. 3rd. sing. उशती— √*vaś* to desire, pres. part. ; उ is the Samprasāraṇa of व.

उत । त्वम् । सख्ये । स्थिरऽपीतम् । आहुः । न । एनम् । हिन्वन्ति । अपि । वाजिनेषु ॥ अधेन्वा । चरति । मायया । एषः । वाचम् । शुश्रुऽवान् । अफलाम् । अपुष्पाम् ॥५॥

सा० भा० – त्वम् उत एकमपि सख्ये विदुषां संसदि । या सत्कथा सा सखिकर्मत्वात्सख्यमित्युच्यते । सा च वाचा क्रियते । अतो वाक्संबन्धाद्वाक्सख्ये स्थिरपीतम् । मधु यस्य हृदये स्थिरं भवति । यद्वा स्थिरपीतं स्थिरप्राप्तिम् । आहुः । यद्वा । तस्मिञ्ज्ञातार्थमाहुः । लोके यथा ज्ञातार्थं पुरुषं पीतार्थमिति वदन्ति । किंच एनं विज्ञातार्थं पुरुषं वाजिनेषु । वाक् इना ईश्वरा येषां ते वाजिना अर्था वाच आयत्ताः खलु । वाग्ज्ञेयेष्वर्थेषु न अपि हिन्वन्ति । अपिशब्दोऽन्वर्थे । केचिदपि नानुगच्छन्ति । अयमेवातिशयेन विद्वानित्यर्थः । यद्वा वाजिनेषु सारभूतेषु निरूपणीयेष्वर्थेष्वेनं न हिन्वन्ति न बहिः कुर्वन्ति । एनं पुरस्कृत्यैव सर्वं वेदार्थं विचारयन्तीत्यर्थः । इत्यर्थज्ञः प्रशस्तः । अनन्तरमुत्तरार्धेन केवलपाठको निन्द्यते । एष अविज्ञातार्थः पुरुषः अधेन्वा धेनुत्ववर्जितया कामानामदोग्ध्र्या देवमनुष्यस्थानेषु वाक्प्रतिरूपया मायया चरति । किं कुर्वन् । अफलामपुष्पाम् । वाचोऽर्थः पुष्पफलम् । अर्थवर्जिताम् । यद्वा । वाचोऽर्थो याज्ञदैवते । यज्ञे भवं ज्ञानं याज्ञं देवतासु भवं ज्ञानं दैवतम् । तद्वर्जितां कर्मादिविषयज्ञानवर्जितां वाचं शुश्रुवान् । केवलं पाठमात्रेणैव श्रुतवान् स चरति । यथा वन्ध्या पीना गौः किं द्रोणमात्रं क्षीरं दोग्धीति मायामुत्पादयन्ती

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चरति यथा वन्ध्यो वृक्षोऽकाले पल्लवादियुक्तः सन् पुष्यति फलतीति भ्रान्तिमुत्पादयंस्तिष्ठति तथा पाठं प्रब्रुवाणः चरतीत्यर्थः। 'अप्येकं वाक्सख्ये स्थिरपीतम्' (निरु० १. २०) इत्यादि निरुक्तमत्रानुसंधेयम् ॥

शब्दा०—उत=भी, त्वम्=एक को, सख्ये=विद्वानों की सभा में, स्थिरपीतम्=अर्थ का पूर्ण ज्ञानी, आहुः=कहा जाता है, न=नहीं, एनम्=इसको, हिन्वन्ति=दबा सकते हैं, अपि=भी, वाजिनेषु=वाग्युद्ध में, अधेन्वा=दूध न देनेवाली गाय, चरति=घूमता है, मायया=भ्रममात्र के साथ, एषः=यह, वाचम्=वाणी को, शुश्रुवान्=सुनता हुआ, अफलाम्=फल रहित, अपुष्पाम्=पुष्प रहित।

हि० अ०—एक को विद्वानों की सभा में अर्थ का पूर्णज्ञानी कहा जाता है; शास्त्रार्थ में कोई इसको दबा नहीं सकता। दूसरा (अर्थ को न जाननेवाला) फल तथा फूल से रहित वाणी को सुनता हुआ दूध न देनेवाली गाय की तरह वाणी के प्रतिरूप (भ्रममात्र) के साथ घूमता है।

Trans.—(They) call one as he has fully imbibed (the meaning) in the society of the scholars. None can impel him in discussions. He, (who does not know the meaning), wanders with illusion (of speech) like a sterile cow (which is simply an illusion of a cow), hearing the speech, the fruitless and the flowerless.

Notes—सख्ये—'In the society of scholars '(Sāyaṇa), 'in the friendship' (Griffith). Yāska takes it to mean 'in the friendship of speech or of the gods'. स्थिरपीतम्—Yāska followed by Sāyaṇa renders स्थिरपीतम् by विज्ञातार्थम् 'one who has fully imbibed the meaning of the Ṛks'. Durgā commenting on Nirukta takes स्थिर and पीतम् separately. According to him स्थिर means 'one in whom the knowledge acquired by him remains permanent and पीतम् means 'one who has grasped completely the meaning of speech'. Griffith takes it to mean 'leggard'; Bahuvrīhi compd. accented on the first member. आहुः—√*ah* to say, perf. 3rd. plu.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हिन्वन्ति—√*hi* to impel; pres. 3rd. plu. Sāyaṇa gives the altrenative meaning—अनुगच्छन्ति or बहिः कुर्वन्ति; Griffith takes it to mean 'urge'. वाजिनेषु—Yāska followed by Sāyaṇa renders वाजिनेषु by बलवत्सु वाग्ज्ञेयषु 'in difficult passages that can be understood by वाक् alone'. Sāyana in alternative renders it as सारभूतेषु निरूपणीयेष्वर्थेषु 'in interpreting difficult Ṛks'. Griffith takes it to mean 'deeds of valour'. अधेन्वा—Inst. sing of अधेनु; नञ् compd. धेनु means a cow; अधेनु means one that is not a cow; sterile cow is really speaking not a cow; it is simply an illusion of a cow. The speech of a man who does not know its meaning is compared with a cow yielding no milk. मायया—The speech without meaning is an illusion of thd speech. Yāska renders मायया by प्रतिरूपया. शुश्रुवान्—√*śru* to hear, perf. part.

यः । तित्याज । सचिऽविदम् । सखायम् । न । तस्य । वाचि । अपि । भागः । अस्ति ॥ यत् । ईम् । शृणोति । अलकम् । शृणोति । नहि । प्रऽवेद । सुऽकृतस्य । पन्थाम् ॥६॥

सा० भा०—सचिविदम् । सचिशब्दः सखिवाची । सखिविदम् । योऽध्येता स वेदस्य सखा संप्रदायोच्छेदनिवारकत्वेन वेदं प्रत्युपकारित्वात् । तादृशमुपकारिणमध्येतारं वेत्तीति सचिवित् । तमभिज्ञं सखायम् अध्येतॄणां पुरुषाणां स्वार्थबोधनेनोपकारित्वात्सखिभूतं वेदं यः पुमान् तित्याज तत्याज परार्थविनियोगेन परित्यजति । त्यजतेर्लिटि, 'अपस्पृधेथामानृचुः' इत्यादिना निपातितः । तस्य पुरुषस्य वाचि सर्वस्यां लौकिक्यां शास्त्रीयायां वाच्यपि भागः भजनीयः कश्चिदर्थः न अस्ति । ईम् अयं पुरुषः यत् वेदव्यतिरिक्तं शृणोति तत् अलकम् अलीकं व्यर्थमेव शृणोति । हि यस्मात्कारणात् सुकृतस्य पन्थां पन्थानं न प्रवेद श्रद्धाराहित्यादनुष्ठानमार्गं न जानाति । तस्मात्तदीयश्रवणमपि निष्फलमित्यर्थः । द्वितीयचतुर्थपादयोरभिप्राय आरण्यके दर्शितः 'न तस्यानूक्ते भागोऽस्ति' (ऐ० आ० ३. २. ४) इत्यादिना । तथा 'तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता' (तै० आ० २.१५.५) इत्यध्वर्युभिश्च ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा० – यः=जिसने, तित्याज=छोड़ दिया है, सचिविदम्=अपने को अध्येताओं का मित्र समझनेवाले वेद को, सखायम्=मित्र को, न=नहीं, तस्य=उसकी, वाचि=वाणी में, अपि=जरा भी, भागः=सत्य का अंश, अस्ति=है, यत्=जो कुछ, ईम्=वह पुरुष, शृणोति=सुनता है, अलकम्=व्यर्थ, श्रृणोति=सुनता है, नहि=क्योंकि नहीं, प्रवेद=जानता है, सुकृतस्य=सत्य के, पन्थाम्=मार्ग को।

हि० अ० – जिसने सखाभूत वेदों को छोड़ दिया है, उसकी वाणी में (सत्य का) अंश कुछ भी नहीं है। जो कुछ वह सुनता है, व्यर्थ सुनता है क्योंकि सत्य का मार्ग उसे मालूम नहीं।

Trans.—The man who abandons the friendly Vedic learning, not even a part (of truth) is in his speech. whatever he hears, hears in vain, because he does not know the path of righteous deeds.

Notes—तित्याज—√*tyaj* to abandon, perf. 3rd. sing.; not unaccented because prededed by यः. सचिविदम्—'Vedas that know themselves as the friends' (Sāyaṇa), 'he who knows the truth of friendship' (Griffith). शृणोति—√*śru* to hear, not unaccented because preceded by यत्. प्रवेद—√*vid* to know, perf. 3rd. sing. ; not unaccented because preceded by हि.

अक्षण्ऽवन्तः। कर्णऽवन्तः। सखायः। मनःऽजवेषु। असमाः। बभूवुः॥ आदघ्नासः। उपऽकक्षासः। ऊँ इति। त्वे। ह्रदाःऽइव। स्नात्वाः। ऊँ इति। त्वे। ददृश्रे॥७॥

सा० भा० – अक्षण्वन्तः अक्षिमन्तः। 'छन्दस्यपि दृश्यन्ते' इत्यक्षिशब्दादनङ्। 'अनो नुट्' इति नुट्। अनेन दृश्यते सर्वमित्यक्षि। यद्वा। तैजसत्वात् अन्येभ्योऽङ्गेभ्यो व्यक्ततरम्। तथा च श्रूयते—'तस्मादेते व्यक्ततरे इव' इति। तादृशाक्षियुक्ताः कर्णवन्तः। कर्णो निकृत्तद्वारः। गर्भावस्थायामेव केनापि निर्मितबिल इत्यर्थः। यद्वा शरीरस्य शिरसो वोर्ध्वं गते उच्चैः स्थिते। कर्णविलक्षणाकाशवन्तः। तथा चाम्नायते 'ऋच्छन्ती इव खे उदगन्ताम्' इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृशाः सखायः। समानं ख्यानं ज्ञानं येषामिति सखायः। तेषु वाक्येषु बाह्येष्विन्द्रियेषु समानज्ञाना इत्यर्थः। ते मनोजवेषु। मनसा गम्यन्ते ज्ञायन्त इति मनोजवाः प्रज्ञाद्याः। तेषु असमाः अतुल्याः बभूवुः भवन्ति। तेष मध्ये केचित् आदघ्नासः। आस्यशब्दस्य पृषोदरादित्वादाकारादेशः। आस्यदघ्नाः आस्यप्रमाणोदका ह्रदा इवेति मध्यमप्रज्ञानाह। अथ त्वे एके। सर्वनामत्वाज्जसः शीभावः। उपकक्षासः। कक्षसमीपप्रमाणोदका ह्रदा इव। अल्पोदका इत्यर्थः। अनेनाल्पप्रज्ञानाह। तथा त्वे एके स्नात्वाः। स्नातेः कृत्यार्थे त्वन्प्रत्ययः (पा० सू० ३. ४. १४)। स च 'अर्हे कृत्यतृचश्च' (पा० सू० ३. ३. १६९) इत्यर्हार्थे च भवति। स्नानार्हा अक्षोभ्योदकाः ह्रदाइव ददृश्रे दृश्यन्ते। अनेन महाप्रज्ञानाह। उः पूरणः। 'अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेः' (निरु० १. ९) इत्यादिकं निरुक्तमत्र द्रष्टव्यम्॥

शब्दा० – अक्षण्वन्तः=आंखवाले, कर्णवन्तः=कानवाले, सखायः =समान ज्ञानवाले, मनोजवेषु=प्रज्ञा अर्थात् आन्तरिक ज्ञान में, असमाः= असमान, बभूवुः=होते हैं, आदघ्नासः=मुंह तक पानीवाला, उपकक्षासः =कांख तक पानीवाला, उ=निश्चित अर्थ का वाचक निपात, त्वे=कुछ, ह्रदाइव=सरोवरों की तरह, स्नात्वाः=स्नान करने योग्य, उ=निश्चित अर्थ का वाचक निपात, त्वे=कुछ, ददृश्रे=दिखाई पड़ते हैं।

हि० अ०—समान ज्ञानवाले, (समान रूप से) आंख तथा कानवाले (भी) हैं, किन्तु प्रज्ञा (आन्तरिक ज्ञान) में असमान होते हैं। कुछ उस सरोवर की तरह दिखाई पड़ते हैं जो मुख तक पानीवाला है, (कुछ) कांख तक पानीवाला है तथा कुछ स्नान करने योग्य पानीवाला है।

Trans.—The men of equal knowledge equally have eyes and ears, (yet they) are unequals in their intellectual attainments. Some look like tanks (the water of which) reaching the mouth, (some) reaching the arm-pit and some others fit to bathe in.

Notes—**अक्षण्वन्तः**—Endowed with eyes. Ṛgveda has both the words **अक्षन्** and **अक्षि**, while post-Vedic Sanskrit has **अक्षि** only. **मनोजवेषु**—In respect of the onward speed of their mind i.e. the poetic imagination; 'in

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

wisdom i.e. inner knowledge' (Sāyaṇa), 'in the quickness of their spirit' (Griffith). बभूवुः—√*bhū* to be, 3rd. plu. आदघ्नासः—Reaching up to the mouth ; Yāska followed by Sāyaṇa renders it by आस्यदघ्ना and derives आस्य from √*as* to throw and दघ्नं from √*dagh* to flow or √*das* to lay waste (आस्यम् अस्यतेः आस्यन्दते एनत् अन्नम् इति वा । दघ्नं दघ्यतेः स्रवतिकर्मणः ।दस्यतेर्वा स्यात् । विदस्ततरं भवति Nir. I. 9). Rājavāḍe conjectures that if घ्न is a part of आदघ्न like परावतघ्न, असुरघ्न वृत्रघ्न etc., then आद would refer to a part of the body which may be the knee or the waist or something lower than कक्ष ; if आ is a prefix like उप in उपकक्षास, then दघ्न must mean knee or waist. Thus according to him आदघ्न means 'reaching upto the knee or the waist', आसस् being the nom. plu. termination. उपकक्षासः—'Reaching up to the arm-pit' (Yāska), 'reaching upto the belly' (Rajāvāḍe). स्नात्वाः—Yāska followed by Sāyaṇa renders it by स्नानार्हा 'fit to bathe in' ; त्व in स्नात्वा is like तव्य in classical Sanskrit. ददृश्रे—√*dṛś* to see, perf. mid. 3rd. plu.

हृदा । तष्टेषु । मनसः । जवेषु । यत् । ब्राह्मणाः । सम्ऽयजन्ते । सखायः ॥ अत्र । अह । त्वम् । वि । जहुः । वेद्याभिः । ओहऽब्रह्माणः । वि । चरन्ति । ऊँ इति । त्वे ॥८॥

सा० भा०—सखायः समानख्यानाः ब्राह्मणाः हृदा बुद्धिमतां हृदयेन तष्टेषु निश्चितेषु परिकल्पितेषु मनसो जवेषु गन्तव्येषु वेदार्थेषु गुणदोषनिरूपणाः यत् यदा संयजन्ते संगच्छन्ते । यजिरत्र संगतिकरणवाची । अत्र अस्मिन् ब्राह्मणसंघे त्वम् अविज्ञातार्थमेकं पुरुषं वेद्याभिः वेदितव्याभिः विद्याभिः प्रवृत्तिभिर्वा वि जहुः विशेषेण परित्यजन्ति । अह इति विनिश्चये । ओहब्रह्माणः । ऊह्यमानं ब्रह्म विद्याश्रुतिमतिबुद्धिलक्षणं येषां ते तथोक्ताः । तादृशास्त एके विद्वांसः वि चरन्ति यथाकामं वेदार्थेषु विनिश्चयार्थं प्रवर्तन्ते । उः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रसिद्धौ । 'हृदा तष्टेषु मनसां प्रजवेषु' (निरु० १३. १३) इत्यादिकं निरुक्तं द्रष्टव्यम् ॥

शब्दा०—हृदा=हृदय से, अन्तःकरण से, तष्टेषु=निर्मित, मनसः जवेषु=बौद्धिक चिन्तन में, ब्राह्मणाः=ऋत्विज ब्राह्मण, संयजन्ते=एक साथ चलते हैं, सखायः=समान ज्ञानवाले, अत्र=इस विद्वानों के समूह में, अह =निश्चित रूप से, त्वम्=एक को अर्थात् अज्ञानी को, वि जहुः=छोड़ देते हैं, वेद्याभिः=अपने ज्ञान के कारण, ओहब्रह्माणः=शास्त्रीय ज्ञान के लक्षणों से ब्राह्मण समझे जानेवाले, वि चरन्ति=विचरण करते हैं, उ=निश्चित अर्थ का वाचक निपात, त्वे=कुछ ।

हि० अ०—हृदय से उद्भूत मन की गति में, जब समान ज्ञानवाले ब्राह्मण एक साथ चलते है, वे एक (अज्ञानी) को अपने ज्ञान के कारण, बहुत पीछे छोड़ देते हैं । (शास्त्रीय ज्ञान के लक्षणों से) ब्राह्मण समझे जाने वाले कुछ (ज्ञानी) (अपनी इच्छानुकूल वेदार्थ ज्ञान में) विचरण करते हैं ।

Trans.—In the speed of mind, fashioned by the heart, when the Brahamins of equal knowledge go together they leave one far behind by virtue of thier learning ; and some who are thought to be Brahmins (by the sign of their learning) wander (at their disposal).

Notes—**तष्टेषु**—'In ascertaining' (Sāyaṇa), 'fashioned' (Griffith). **मनसः जवेषु**—Sāyaṇa takes it to mean 'in going through the exposition of Vedas' and Griffith as 'with mental impulse'. **संयजन्ते**—√*yaj* with **सम्** to go together, pres. 3rd. plu. ; not unaccented because preceded by **यत्**. **वि जहुः**—√*hā* to leave; mid. perf. 3rd. plu. **ओहब्रह्माणः**—'Those who are thought to be Brahmins by the sign of their learning' (Sāyaṇa), 'who count as Brahmins' (Griffith). Bahuvrīhi compd., accented on the first member. **वि चरन्ति**—√*car* to move, pres. 3rd. plu.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इमे । ये । न । अर्वाक् । न । परः । चरन्ति । न । ब्राह्मणासः । न । सुतेऽकरासः ॥ ते । एते । वाचम् । अभिऽपद्य । पापया । सिरीः । तन्त्रम् । तन्वते । अप्रऽजज्ञयः ॥९॥

सा० भा०—अनया वेदार्थानभिज्ञा निन्द्यन्ते । इमे ये अविद्वांसः अर्वाक् अर्वाचीनमधोभाविन्यस्मिल्लोके ब्राह्मणैः सह न चरन्ति ये परः परस्तात् देवैः सह न चरन्ति ते ब्राह्मणासः ब्राह्मणाः वेदार्थतत्पराः न भवन्ति । तथा सुतेकरासः । सोमं सुतमभिषुतं कुर्वन्तीति सुतेकरा ऋत्विजः । तेऽपि न भवन्ति । अप्रजज्ञयः । जानातेः 'आदृगमहनः' इति किप्रत्ययः । अविद्वांसः त एते मनुष्याः वाचं लौकिकीम् अभिपद्य प्राप्य तया पापया पापकारिण्या वाचा युक्तास्ते सिरीः 'छन्दसीवनिपौ' इतीप्रत्ययः । 'सुपां सुलुक्' इति जसः सुः । सीरिणो भूत्वा तन्त्रं कृषिलक्षणं तन्वते विस्तारयन्ति । कुर्वन्तीत्यर्थः । सर्वथा वेदार्थो ज्ञेय इत्यभिप्रायः ॥

शब्दा०—इमे=ये अविद्वान्, ये=जो, न=नहीं, अर्वाक्=इस लोक में, परः=उस लोक में, चरन्ति=विचरण करते है, न=नहीं, ब्राह्मणासः=ब्राह्मण, न=नहीं, सुतेकरासः=सोम पीसनेवाले ऋत्विज, ते=वे, एते=ये लोग, वाचम्=वाणी को, अभिपद्य=पास पहुँचकर, पाकर, पापया=पापपूर्ण ढंग से, सिरीः=बुनकर स्त्रियां, तन्त्रम्=तागे को, तन्वते=फैलाते हैं, अप्रजज्ञयः=अज्ञानी ।

हि० अ०—ये (अज्ञानी) जो न तो इस लोक में (ब्राह्मणों के साथ चलते हैं, न तो उस लोक में (देवताओं के साथ); (जो) न तो ब्राह्मण है, न सोम पीसनेवाले (ऋत्विज) ही; ये अज्ञानी पाप पूर्ण ढंग से (लौकिक) वाणी को पाकर उसे फैलाते हैं, जैसे बुनकर औरते तागे को (फैलाती है) ।

Trans.—Those who walk neither (with Brahmins) in this lower world, nor (with the gods) in the upper world ; (who are) neither Brahmins nor the pressers of Soma ; these ignorant having attained the (worldly) speech in sinful (fasion) stretch it as female weavers their thread.

Notes—अर्वाक्—'In the lower world' (Sāyaṇa), 'back'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(Griffith). परः —'In the upper world' (Sāyaṇa), 'forward' (Griffith) चरन्ति—√*car* to move; not unaccented because preceded by ये. सुतेकरासः—Sacrificing priests who press Soma; Bahuvrīhi compd. accented on the first member. अभिपद्य—√*pad* with अभि to attain; gerund in य. सिरीः—Sāyaṇa renders it by सीरिणो भूत्वा; but he does not give the literal meaning of सिरीः. Aufrect takes it to mean 'female weavers' and Griffith as spinsters. तन्त्रम्—'Sign of farming' (Sāyaṇa), 'thread' (Griffith). अप्रजज्ञयः—Derived from √*jñā* to know; नञ् compd. accented on the first syllable.

सर्वे । नन्दन्ति । यशसा । आऽगतेन । सभाऽसहेन । सख्या । सखायः ॥ किल्बिषऽस्पृत् । पितुऽसनिः । हि । एषाम् । अरम् । हितः । भवति । वाजिनाय ॥१०॥

सा० भा०—सखायः समानख्यानाः समानज्ञानाः सर्वे सभ्या मनुष्याः सभासहेन सभा सोढुं शक्नुवता सख्या ऋत्विजां सखिभूतेन यज्ञं प्रति आगतेन यशसा यशस्विना सोमेन हेतुना नन्दन्ति हृष्टा भवन्ति । स हि स एव सोमः एषां जनानां किल्बिषस्पृत् । यः स्वस्मादन्यः पुरुषः श्रेष्ठतामश्नुते स किल्बिषं भवति बाध्यत्वेन । यथा पापं सदाचारैः बाधितव्यं भवति तद्वत् । पापरूपस्य शत्रोर्बाधकः । यद्वा । यज्ञे साध्वनुप्रवचनाकरणेन यत्किल्बिषमेषां जायते तद्यो बाधते स किल्बिषस्पृत् । तथा त्वं पितुषणिः । पितुरित्यन्ननाम दक्षिणा वा । तमनेन सोमेन सनोति यजमानः संभजत इति तादृशः । तेषामन्नदक्षिणा-दातेत्यर्थः । किंच हितः पात्रेषु निहितः सोमः वाजिनाय । इन्द्रियं वीर्यं वाजिनम् । तेषां वीर्याय तत्कर्तुम् अरम् अलं पर्याप्तः समर्थो भवति । 'सर्वे नन्दन्ति यशसागतेनेत्यन्वाह यशो वै सोमो राजा' इत्यादिकम् 'इन्द्रियं वै वीर्यं वाजिनमाजरसं हास्मै वाजिनं नापच्छिद्यते' इत्यन्तं ब्राह्मणमत्रानुसंधेयम् (ऐ० ब्रा० १. १३) ॥

शब्दा०—सर्वे=सभी, नन्दन्ति=प्रसन्न होते हैं, यशसा=यशस्वी सोम के कारण, आगतेन=आगमन से, सभासहेन=सभा को जीतने की शक्तिवाले, सख्या=मित्र के रूप में, सखायः=समान ज्ञानवाले,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किल्बिषस्पृत्=पापों को दूर करनेवाला, पितुसनिः=भोजन प्रदान करनेवाला, हि=निश्चित अर्थ की वाचक एक निपात, एषाम्=इनके, अरम्=पर्याप्त, हितः=पीसकर पात्र में रखा हुआ, भवति=होता है, वाजिनाय=पराक्रम-युक्त कार्य के लिये।

हि० अ०—(ऋत्विजों के) मित्र के रूप में सभा को जीतने की शक्ति वाले विख्यात सोम के आने के साथ सभी समान ज्ञानवाले प्रसन्न हो जाते हैं। (सोम) इनके पापों को दूर करनेवाला है, भोजन प्रदान करनेवाला है। (पात्र में पीसकर) रखा हुआ (यह) पराक्रमयुक्त कार्य के लिये समर्थ है।

Trans.—All the men of equal knowledge rejoice with renowned (Soma) that has come as a friend, having the capacity of conquering in assembly. He is the remover of sin, provider of food. Placed in pot it is fit for vigorous deed.

Notes—नन्दन्ति — √*nand* to rejoice, pres. 3rd. plu. यशसा—'With renowned Soma' (Sāyaṇa), 'in triumph' (Griffith). सभासहेन—With the capacity of conquering the assembly; Tatpuruṣa compd. accented on the second member. पितुसनिः—Provider of food; पितु means food and सनि is derived from √*san* to gain. हितः—'Placed in the pot' (Sāyaṇa), 'prepared' (Griffith). भवति—√*bhū* to be; not unaccented because preceded by हि.

ऋचाम्। त्वः। पोषम्। आस्ते। पुपुष्वान्। गायत्रम्। त्वः। गायति। शक्वरीषु॥ ब्रह्मा। त्वः। वदति। जातऽविद्याम्। यज्ञस्य। मात्राम्। वि। मिमीते। ऊँ इति। त्वः॥११॥

सा० भा०—अनया होत्राद्यृत्विक्कर्मणां विनियोगमाचष्टे। त्वः एको होता ऋचां पोषं यथाविधि कर्मणि प्रयोगं पुपुष्वान्। एको धातुरनुवादार्थः। बह्वीर्ऋचः पुष्यन् शंसन् आस्ते। त्वः एक उद्गाता शक्वरीषु। शक्वर्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋचः। आभिर्ऋग्भिर्वृत्रं हन्तुमिन्द्र समर्थोऽभूदिति शक्वर्यः। तासु गायत्रं साम गायति। त्वः एकः ब्रह्मा च जातविद्यां जाते जाते कर्तव्ये प्रायश्चित्तादौ वेदयित्रीं वाचं वदति। ब्रह्मा हि सर्वं वेदितुं योग्यो भवति खलु। 'चादिलोपे विभाषा' इति न निघातः। त्वः एकोऽध्वर्युश्च यज्ञस्य मात्रां यज्ञो यथा मीयतेऽभिषवग्रहणादिकया क्रियया तां मात्रा यज्ञशरीरं वि मिमीते अत्यर्थं निर्मिमीते। 'ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी' (निरु० १. ८) इत्यादिनिरुक्तानुसारेणार्थोऽभ्यधायि। एवं बृहस्पतिर्विदितवेदार्थं तुष्टाव॥

शब्दा०—ऋचाम्=ऋचा को, त्वः=एक अर्थात होता नामक ऋत्विज, पोषम्=समृद्धि में, आस्ते=लगा रहता है, पुपुष्वान्=यज्ञ में देवतानुसार ऋचाओं का संग्रह करना तथा उसे दोहराना यही ऋचाओं की समृद्धि कही जाती है। होता नामक ऋत्विज का मुख्य रूप से यही काम होता है। गायत्रम्=गाने योग्य ऋचाओं को जिन्हे सामन् कहते हैं, त्वः=एक उद्गाता नामक ऋत्विज, गायति=गाता है, शक्वरीषु=शक्वरी छन्द में, ब्रह्मा=ब्रह्मा नामक ऋत्विज, त्वः=एक, वदति=बोलता है, जातविद्याम्=प्रत्येक उलझनपूर्ण अवसर पर अपना निर्णय, यज्ञस्य=यज्ञ के, मात्राम्=स्वरूप को, वि मिमीते=विशेष रूप से निष्पादन करता है।

हि० अ०—एक (अर्थात होता नामक ऋत्विज) ऋग्वेद की ऋचाओं को समृद्ध करने में लगा रहता है; एक (अर्थात् उद्गाता नामक ऋत्विज) शक्वरी छन्दों में गायत्र नाम के साम को गाता है। एक ब्रह्मा (नाम का ऋत्विज) प्रत्येक उलझनपूर्ण अवसरों पर अपना निर्णय बोलता है; एक (अर्थात् अध्वर्य नामक ऋत्विज) यज्ञ के स्वरूप का विशेष रूप से निष्पादन करता है।

Trans.—One (i.e. the Hotṛ priest) is engaged in augmenting the Ṛks. One (i.e. the Udgātṛ priest) sings the Gāyatra song in Śakvarī metre. One the Brahman priest speaks his solution on every perplexing occasion. One (i.e. the Adhvaryu priest) measures out the body of the sacrifice (i.e. performs all the acts of the sacrifice).

Notes—आस्ते— √*ās* to sit, pres. 3rd. mid. sing. पुपुष्वान्— √*puṣ* to prosper, perf. part. nom. sing.;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

here पुपुष्वान् means augmenting the Ṛks which is the duty of the invoking priest. The repetition of the Ṛks is their augmentation. गायति—√*gā* to sing, pres. 3rd. sing. शक्वरीषु—In the *Ś*akvarī metre that consists of six lines. ब्रह्मा—An omniscient priest. He is the master of all lores. Durgā takes ब्रह्मन् to mean the three Vedas. Rājavāḍe in Nirukta follows the interpretation of Durgā. Sāyaṇa takes ब्रह्मा to mean the omniscient priest. वदति—√*vad* to speak; not unaccented because the cojunctive च has been dropped (चादि लोपे विभाषा—Pāṇ. VIII 1.63). जातविद्याम् —'Solution on every perplexing occasion' (Yāska); Sāyana and Durgā take it to mean 'the speech prescribing expiations for all errors of omission and commission that happen in sacrifices'. According to Griffith, जातविद्याम् means 'the knowledge of beings'. मात्राम्—'Body' (Sāyaṇa), 'rules' (Griffith), 'acts' (Rājavāḍe). विमिमीते — √*mā* to measure, mid. pres. 3rd. sing. Rājavāḍe takes it to mean 'perferm'.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र 'देवानाम्' इति नवर्चमनुवाकापेक्षया चतुर्थं सूक्तमानुष्टुभं देवदेवत्यम् । लोकनाम्नः पुत्रो बृहस्पतिराङ्गिरस एव वा बृहस्पतिर्ऋषिः । अथवा दक्षस्य दुहितादितिर्ऋषिः । तथा चानुक्रान्तं —'देवानां नव लौक्यो वा बृहस्पतिर्दाक्षायण्यदितिर्वा दैवमानुष्टुभम्' इति । गतः सूक्तविनियोगः ।

देवानाम् । नु । वयम् । जाना । प्र । वोचाम । विपन्यया । उक्थेषु । शस्यमानेषु । यः । पश्यात् । उत्ऽतरे । युगे ॥१॥

सा० भा० — अदितिर्दाक्षायण्यनेन सूक्तेन स्वयं यथादित्यानजनयत्तद्ब्रवीति । बृहस्पत्यृषिपक्षे स ऋषिरदितेः सकाशादादित्योत्पत्तिप्रकारमाह । वयं देवानाम् आदित्यानां जाना जन्मानि प्र वोचाम प्रकथयाम । विपन्यया विस्पष्टया वाचा । वयमिति वोचामेति चोभयत्र पूजार्थं बहुवचनम् । अथैकवदाह । यः देवानां गणः पूर्वे युग उत्पन्नोऽपि उक्थेषु शस्यमानेषु यागे शस्त्रेष्वनुष्ठीयमानेषु उत्तरे युगे वर्तमानं स्तुवन्तं स्तोतारं पश्यात् पश्यति । अनेकेष्वपि युगेषु गतेषु कर्मसु स्तूयमानो वर्तत इत्यर्थः ॥

शब्दा०—देवानाम्=देवताओं के, नु=अब, वयम्=हमलोग, जाना =जन्मों को, प्र वोचाम्=कहें, विपन्यया=स्पष्ट वाणी में, उक्थेषु= उक्थ्य नामक साम के, शस्यमानेषु=गाने पर, यः=जो, पश्यात्=देखे, उत्तरे युगे=आगे आनेवाले समय में ।

हि० अ०—अब हम लोग स्पष्टवाणी में देवताओं के जन्मों को कहें, जो (देवताओं का समूह) भविष्य में उक्थ्य साम के गाने पर यजमान को देख सके ।

Trans.—Now let us proclaim the births of the gods with clear speech ; that (the host of gods) may see (the worshipper) when hymns are being chanted (to them) in future age.

Notes—वोचाम —√*vac* to speak, red.-aorist, subju. 1rst. plu. विपन्यया—With clear voice' (Sāyaṇa), 'with

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

tuneful skill' (Griffith), 'in picturesque style' (Peterson) ; instr. sing of विपन्य. पश्यात्—√*paś* to see, pres. sujbu. 3rd. sing.

ब्रह्मणः । पतिः । एता । सम् । कर्मारःऽइव । अधमत् ॥ देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत ॥२॥

सा० भा०—ब्रह्मणः अन्नस्य पतिः अदितिः एता एतानि देवानां जन्मानि कर्मारइव स यथा भस्त्रयाग्निमुपधमति प्रज्वलनार्थमेवं सम् अधमत् उदपादयदित्यर्थः । देवानां पूर्व्येयुगे । आदिसृष्टावित्यर्थः । तेषामुपादानकारणात् असतः नामरूपवर्जितत्वेनासत्समानाद् ब्रह्मणः सकाशात् सत् नामरूपविशिष्टं देवादिकम् अजायत प्रादुरभूत् । 'असद्वा इदमग्र आसीत्ततो वै सदजायत' (तै० उ० २. ७) इति हि श्रुतिः । न सदात्मकस्य प्रपञ्चस्यासत्कारणत्वं युक्तमिति वाच्यं, छन्दोगैः 'कथमसतः सज्जायेत' इति असत्कारणत्वमाक्षिप्य 'सत्त्वेव सोम्येदमग्र आसीत्' (छा० उ० ६. २. २) इत्यवधारितत्वात् । तर्ह्यसत्कारणप्रतिपादकवाक्यानां का गतिरिति चेत् तेषामव्याकृतत्वाभिप्रायत्वात् 'तद्धेदं तर्ह्यव्याकृतमासीत्' (श० ब्रा० १४. ४. २. १५) इति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशात्कथं देवाद्युत्पत्तिः । 'वायोरग्निः' (तै० आ० ८.१) इत्यादिवत् । अधिष्ठानसकाशादुत्पत्तेः । यद्वा देवानां कारणभूतं सत् असतो ब्रह्मणः सकाशादुत्पन्नमिति योजनादुक्तन्यायोऽस्मिन्पक्षेऽपि समान एव ॥

शब्दा०—ब्रह्मणस्पतिः=प्रार्थनाओं के स्वामी ने, एता=देवताओं के जन्मों को, कर्मारइव=लोहार की तरह, समधमत्=बढ़ाया, देवानाम्=देवताओं की, पूर्व्ये युगे=आदि सृष्टि के समय, असतः=असत् अर्थात् नाम रूप वर्जित तत्व से, सत्=नामरूपात्मक जगत्, अजायत=उत्पन्न हुआ ।

हि० अ०—ब्रह्मणस्पति ने इन (देवों के जन्म) को लोहार की तरह बढाया । देवताओं की आदि सृष्टि में असत् (नाम रूप वर्जित तत्त्व) से सत् (नाम रूपात्मक जगत्) की उत्पत्ति हुई ।

Trans.—Brahmaṇaspati like a blacksmith has produced all these (births of gods). In the primordial age of the gods existence sprang out of non-existence.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—ब्रह्मणस्पतिः—Sāyaṇa takes it to mean Aditi. ब्रह्मन् is food and Aditi is master of food. Griffith and Peterson take Brahmaṇaspati no other than the well-known Brahmaṇaspati, the lord of prayers. एताः—Sāyaṇa followed by Peterson takes it to mean 'birth or generations of gods ; Ludwig and Griffith take it to refer भुवनानि understood. सम् अधमत् — √*dhmā* with सम् to produce, impf. 3rd. sing. अजायत—√*jā* to be born, mid. impf. 3rd. sing.

देवानाम् । युगे । प्रथमे । असतः । सत् । अजायत ॥ तत् । आशाः । अनु । अजायन्त । तत् । उत्तानऽपदः । परि ॥३॥

सा० भा० – पूर्वार्धमुक्तम् । तत् अनु आशाः दिशः अजायन्त तत् परि तदन्वित्यर्थः । उत्तानपदः । उत्तानमूर्ध्वतानं पद्यन्त इत्युत्तानपदो वृक्षाः । ते अजायन्त प्रादुरभवन् ॥

शब्दा०—देवानाम्=देवताओं की, युगे=सृष्टि के समय में, प्रथमे=आदि, असतः=नामरूपवर्जित तत्व से, सत्=नामरूपात्मक जगत्,अजायत =उत्पन्न हुआ, तत्=इसके, आशाः=दिशायें, अनु=पश्चात्, अजायन्त= उत्पन्न हुईं, तत्=इसके उत्तानपदः=वृक्ष, परि=पश्चात् ।

हि० अ० –देवताओं की आदि सृष्टि में असत् से सत् उत्पन्न हुआ; इसके बाद दिशायें उत्पन्न हुईं; इसके बाद वृक्ष (उत्पन्न हुये) ।

Trans.—In the primordial age of the gods existence sprang out of non-existence ; thereafter sprang out the quarters ; thereafter the trees.

Notes—तत्—According to Oldenberg तत् in the 3rd and 4th Pāda refers to सत्. Peterson following Oldenberg renders 3rd Pāda as 'it (existence) was born after the quarters', while Griffith supported by Sāyaṇa renders as 'thereafter were the regions born'.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Peterson takes तत् in the 4th Pāda as a mere rhetorical repetition. According to Griffith तत् in the 4th Pāda means 'earth', though in translation he renders तत् by 'this', उत्तानपदः—'Trees' (Sāyaṇa), 'productive power' (Griffith); Grassmann takes it as an epithet of Aditi 'whose legs have opened (in child-birth). Peterson takes उत्तानपद् the same as असत्. Oldenberg, Girffith and Peterson take उत्तानपद as abl. of उत्तानपद् though in meaning they differ from each other. परि—Sāyaṇa takes परि in the sense of अनु and construes it with तत् meaning 'thereafter'. Peterson takes परि to mean 'from' and construes with उत्तानपदः.

भूः । जज्ञे । उत्तानऽपदः । भुवः । आशाः । अजायन्त ॥ अदितेः । दक्षः । अजायत । दक्षात् । ऊँ इति । अदितिः । परि ॥४॥

सा० भा० – भूः उत्तानपदः वृक्षात् जज्ञे । तथा भुवः सकाशात् आशाः अजायन्त । तथा अदितेः दक्ष अजायत उत्पन्नः । दक्षादु दक्षादपि अदितिः परि अजायत । न स्वोत्पन्नं कार्यं स्वस्यैव कारणमपि भवतीति विप्रतिषिद्धमिति वाच्यम् । यास्काचार्य इदमेव वाक्यमुदाहृत्य विरोधमाशङ्क्य पर्यहरत् । तथा हि—'अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च । तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरजन्मानौ स्यातामितरेतरप्रकृती' (निरु० ११. २३) इति ॥

शब्दा० – भूः=पृथिवी, जज्ञे=उत्पन्न हुई, उत्तानपदः=वृक्ष से, भुवः=पृथिवी से, आशाः=दिशायें, अजायन्त=उत्पन्न हुईं, अदितेः=अदिति से, दक्ष=दक्ष प्रजापति, अजायत=उत्पन्न हुये, दक्षात्=दक्ष से, उ=निश्चित अर्थ का वाचक एक निपात, अदितिः=देवमाता अदिति, परि=बाद ।

हि० अ०—वृक्ष से पृथिवी उत्पन्न हुई; पृथिवी से दिशायें उत्पन्न हुईं । अदिति से दक्ष उत्पन्न हुये तथा दक्ष से अदिति (उत्पन्न हुई) ।

Trans.—The earth sprang out of the tree, the quarters were born from the earth. Dakṣa was born of Aditi and Aditi from Dakṣa.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—जज्ञे—√*jan* to generate, perf. mid. 3rd. sing. दक्षः—One of the seven sons of Aditi. Bergaigne takes him as a deification of 'intelligence' and Max-müller as the deification of 'potentiality'. अदितिः—Deification of 'infinite space' (Bergaigne), deification of 'infinity' (Maxmüller). vide notes on अदितये (I. 24.1). अदिते·····परि—Yāska's reply to this contradictory statement is that 'they may have had the same origin; or according to the nature of the gods they may have been born from each other, they may have derived their substance from one another (Nir. XI.23).

अदितिः । हि । अजनिष्ट । दक्ष । या । दुहिता । तव ॥ ताम् । देवाः । अनु । अजायन्त । भद्राः । अमृतऽबन्धवः ॥५॥

सा० भा०—हे दक्ष तव या परि दुहिता अभूत् सा अदितिः अजनिष्ट हि पुत्रानादित्यान् । तदेवाह । तां देवा अन्वजायन्त भद्राः स्तुत्या भजनीयाः अमृतबन्धवः अमरणबन्धनाः ॥

शब्दा० —अदितिः=अदिति ने, हि=निश्चित अर्थ का वाचक निपात, अजनिष्ट=उत्पन्न किया, दक्ष=ओ दक्ष, या=जो, दुहिता=पुत्री, तव=तुम्हारी, ताम्=उसके, देवाः=देवता, अनु=पश्चात् अजायन्त=उत्पन्न हुये, भद्राः=कल्याणकारी, अमृतबन्धवः=अमृत है बन्धु जिनका ऐसे देवता ।

हि० अ० —ओ दक्ष, वास्तव में अदिति ने, जो तुम्हारी पुत्री थी, (आदित्यों को) उत्पन्न किया; उस (अदिति) के बाद ही अमृत है बन्धु जिनका ऐसे कल्याकारी देवता उत्पन्न हुये ।

Trans.—O Dakṣa, Aditi, indeed, who is your daughter, produced (the Ādityas). After her the auspicious gods, the brother of immortality, were born.

Notes—अजनिष्ट—√*jan* to generate, 'iṣ'-aorist, mid. 3rd. sing.; not unaccented because preceded by हि.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत् । देवाः । अदः । सलिले । सुऽसंरब्धाः । अतिष्ठत ॥ अत्र । वः । नृत्यताम्ऽइव । तीव्रः । रेणुः । अप । आयत ॥६॥

सा० भा० – अनयोत्तरेण चादित्याः स्तूयन्ते । यत् यदा हे देवाः अदः अमुष्मिन् सलिले यूयं सुसंरब्धाः सुष्ठु लब्धात्मानः अतिष्ठत स्थितवन्तः । 'आपो वा इदं सर्वम्' (तै० आ० १०. २२) 'अप एव ससर्जादौ' (मनु० १. ८) इति श्रुतिस्मृती । अत्र अस्मिन् सलिले नृत्यतामिव वः युष्माकं संबन्धी तीव्रः दुःसहः रेणुः अंशभूत एकः अपायत अपागच्छत् । दिवं प्रति गत इति सूर्याभिप्रायम् । 'परामार्ताण्डमास्यत्' इति वक्ष्यति ॥

शब्दा० – यत्=जब, देवाः=ओ देवताओं, अदः=इस, सलिले=जल में, सुसंरब्धाः=एक साथ मिलकर, अतिष्ठत=खड़े थे, अत्र=यहाँ, वः=तुममें से, नृत्यतामिव=मानो नाचते हुये से, तीव्रः=गर्म, रेणुः=कण, अप आयत=ऊपर उठा ।

हि० अ०—ओ देवताओं, जब (तुम लोग) एक साथ मिलकर यहाँ जल में खड़े थे, मानो नाचते हुये तुम में से एक धूल का गर्म कण ऊपर उठा ।

Trans.—O Gods, when you stood close-clasping in the water, from you, as it were dancing, a hot particle of dust arose up.

Notes—अदः—'In this' (Sāyaṇa , 'here' (Peterson) सलिले—'In the water' (Sāyaṇa), 'an unsteady (mass)' (Peterson). सुसंरब्धाः—Sāyaṇa renders it as 'सुष्ठु लब्धात्मानः', Griffith as 'close-clasping' and Peterson as 'well-supported'. अतिष्ठत—√*sthā* to stand, impf. 2nd. sing.; not unaccented because preceded by यत्.

यत् । देवाः । यतयः । यथा । भुवनानि । अपिन्वत ॥ अत्र । समुद्रे । आ । गूळ्हम् । आ । सूर्यम् । अजभर्तन ॥७॥

सा० भा०—यत् यदा हे देवाः यतयो यथा । वृष्ट्या नियमयन्तीति वा वर्षणेन यातयन्तीति वा यतयो मेघाः । ते यथोदकैः भुवनानि लोकं पूरयन्ति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्वत्स्वतेजोभिः अपिन्वत पूरितवन्तः। अत्र समुद्रे अप्सु आ गूळ्हं निगूळ्हं सूर्यं प्रातरुदयाय आ अजभर्तन आहृतवन्तः ॥

शब्दा०—यत्=जब, देवाः=ओ देवताओं, यतयः=मेघ, यथा=तरह, भुवनानि=लोकों को, अपिन्वत=भर दिया, अत्र=यहाँ, समुद्रे=समुद्र में, गूळ्हम्=छिपे हुये, सूर्यम्=सूर्य को, आ अजभर्तन=बाहर लाये।

हि० अ०—ओ देवताओं, मेघों की तरह जब (तुम लोगों ने) लोकों को भर दिया, उस समय समुद्र में छिपे हुये सूर्य को (तुम लोग) लाये।

Trans.—O gods, like clouds, when you fattened all the beings, then you brought out the sun (who was) hidden in the ocean.

Notes—यतयः—Clouds (Sāyaṇa), cowhards (Peterson), devotees (Griffith). अपिन्वत—√*pinv* to fatten, impf. 2nd. plu.; not unaccented because preceded by यत्. गूळ्हम्—See I. 116.11. अजभर्तन.—√*bhṛ* to bear, plu. perf. 2nd. plu.

अष्टौ। पुत्रासः। अदितेः। ये। जाताः। तन्वः। परि॥ देवान्। उप। प्र। ऐत्। सप्तऽभिः। परा। मार्ताण्डम्। आस्यत् ॥८॥

सा० भा०—अष्टौ पुत्रासः पुत्रा मित्रादयः अदितेः भवन्ति ये अदितेः तन्वस्परि शरीरात् जाताः उत्पन्नाः। अदितेरष्टौ पुत्रा अध्वर्युब्राह्मणे परिगणिताः। तथा हि—'ताननुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्च' (तै० आ० १. १३. ३) इति। तथा तत्रैव प्रदेशान्तरेऽदितिं प्रस्तुत्याम्नातं—'तस्या उच्छेषणमददुस्तत्प्राश्नात् सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपचत्' इत्यादिनाष्टानामादित्यानामुत्पत्तिर्वर्णिता (तै० स० ६. ५. ६. १)। सादितिः सप्तभिः पुत्रैः देवानुप प्रैत् उपागच्छत्। अष्टमं पुत्रं मार्ताण्डं सूर्यं परा आस्यत् उपरि प्राक्षिपदित्यर्थः ॥

शब्दा०—अष्टौ=आठ, पुत्रासः=पुत्र, अदितेः=अदिति के, ये=जो, जाताः=उत्पन्न हुये, तन्वस्परि=शरीर से, देवान्=देवों के, उप=पास, प्र ऐत्=चली गई, सप्तभिः=सात पुत्रों के साथ, परा=ऊपर, मार्ताण्डम्=सूर्य को, आस्यत्=छोड़ दिया।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—अदिति के आठ पुत्र है जो उसके शरीर से उत्पन्न हुये; सात के साथ वह देवताओं के यहाँ चली गई; (आठवें पुत्र) सूर्य को अलग छोड़ दिया।

Trans.—Eight are the sons of Aditi who were born from her body. With seven (she) went to meet the gods, and (the eighth) the sun (she) threw away.

Notes—अष्टौ पुत्रासः—Eight sons of Aditi, viz., Mitra, Varuṇa, Dhātar, Aryaman, Aṁśa, Bhaga, Vivasvān and Āditya. जातः—√*jā* to be born, past part. तन्वः—from the body, abl. sing. of तनु. ऐत्—√*i* to go, impf. 3rd. sing. आस्यत्—√*as* to throw, impf. 3rd. sing.

सप्तऽभिः । पुत्रैः । अदितिः । उप । प्र । ऐत् । पूर्व्यम् । युगम् ॥ प्रऽजायै । मृत्यवे । त्वत् । पुनः । मार्ताण्डम् । आ । अभरत् ॥९॥

सा० भा०—पूर्वमन्त्रोक्त एवार्थः पुनरत्रोच्यते। सप्तभिः मार्ताण्डव्यतिरिक्तैर्मित्रादिभिः अदितिः पूर्व्यं पुराणं युगम् उप प्रैत् उपगता। अथ प्रजायै प्राणिनामुत्पत्तये मृत्यवे तेषां मरणाय मार्ताण्डं मृतात् व्यृद्धादण्डाज्जातं मार्ताण्डनामानं सूर्यं पुनः आभरत् आहरत्। द्युलोकेऽधारयत्। प्राणिमरणजननादीनां सूर्योदयास्तमयायत्तता स्फुटा। 'तस्यै व्यृद्धमाण्डमजायत' (तै० सं० ६.५.६.१) इत्यादि ब्राह्मणम्॥

शब्दा०—सप्तभिः=सात, पुत्रैः=पुत्रों के साथ, अदितिः=अदिति, उप=पास, प्र ऐत्=चली गई, पूर्व्यम् युगम्=आदि युग को, प्रजायै=उत्पत्ति के लिये, मृत्यवे=मृत्यु के लिये, त्वत्=पुनः=फिर, मार्ताण्डम्=सूर्य को, आ अभरत्=लाई।

हि० अ०—अपने सात पुत्रों के साथ अदिति प्रारम्भिक युग को चली गई। (प्राणियों की) उत्पत्ति के लिये तथा (उनके) विनाश के लिये पुनः सूर्य को लाई।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—With her seven sons, Aditi went to meet the primordial age. (She) brought thitherward the sun to generate (the beings) and to destroy (them) again.

Notes—प्रजायै—For creation of the beings; dat. sing of जा. अभरत्—√*bhṛ* to bear, impf. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'त्वया मन्यो' इति सप्तर्चं षोडशं सूक्तम् आदितस्तिस्रस्त्रिष्टुभस्ततश्चतस्रो जगत्यः। पूर्ववदृषिदेवते। तथा चानुक्रान्तं—'त्वया मन्यो चतुर्जगत्यन्तम्' इति। अजिरनाम्न्येकाह इदं सूक्तं मरुत्वतीयशस्त्रे निविद्धानम्। सूत्रं पूर्वसूक्त एवोदाहृतम्। विनुत्यभिभूतिषु व्रजेष्वेकाहेष्वेते सूक्ते मरुत्वतीयनिष्केवल्ययोः शस्ये। सूत्रितं च 'विनुत्यभिभूत्योरिषुवज्रयोश्च मन्युसूक्ते' (आश्व० श्रौ० ९.८) इति।

त्वया। मन्यो इति। सऽरथम्। आऽरुजन्तः। हर्षमाणासः। धृषिताः। मरुत्वः॥ तिग्मऽइषवः। आयुधा। सम्ऽशिशानाः। अभि। प्र। यन्तु। नरः। अग्निऽरूपाः॥१॥

सा० भा०—हे मन्यो हे मरुत्वः त्वया सरथं समानमेकमेव रथमारुह्येति शेषः। आरुजन्तः गच्छन्तः हर्षमाणासः हृष्टाः धृषिता धृष्टाः तिग्मेषवः तीक्ष्णबाणाः आयुधा आयुधानि संशिशानाः सम्यग्निश्यन्तः नरः युद्धस्य नेतार इन्द्रादयो देवास्त्वदनुचरा वा अग्निरूपाः अग्निवत्तीक्ष्णदाहादिकर्माणो यद्वा संनद्धा कवचिनः अभि प्र यन्तु युद्धे सहायार्थम्। अत्र 'त्वया मन्यो सरथमारुह्य रुजन्तः' (निरु० १०.३०) इत्यादि निरुक्तमनुसंधेयम्॥

शब्दा०—त्वया=तुम्हारे साथ, मन्यो=ओ मन्यु, सरथम्=एक रथ पर, आरुजन्तः=तेजी से जाते हुये, हर्षमाणासः=उत्साही, धृषिताः=बहादुर, मरुत्वः=ओ मरुतों से युक्त, तिग्मेषवः=तीक्ष्ण बाणवाले, आयुधा=शस्त्रों को, संशिशानाः=तीक्ष्ण करते हुये, अभि प्र यन्तु=प्रयाण करें, नरः=मनुष्य, अग्निरूपाः=अग्नि के समान भयानक।

हि० अ०—ओ मरुतों से युक्त मन्यु, तुम्हारे साथ एक ही रथ पर तेजी से जाते हुये उत्साही, बहादुर, मनुष्य जिनके बाण तीक्ष्ण हैं, जो अग्नि के समान (भयानक) हैं, अपने अस्त्रों को तीक्ष्ण करते हुये (युद्ध में) प्रयाण करें।

Trans.—O wrath, accompanied by Maruts, bursting forth with thee on the same chariot, the exulting, impetuous men, terrible like flames of fire, having

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

sharp pointed arrows, sharpening their weapons well, may march on (to the battle).

Notes—मन्यो—Voc. of मन्यु –wrath; final ओ in vocative is Pragṛhya in the Pada-text; hence इति (ओकार आमन्त्रितजः प्रगृह्य—Rg. Prāt. I. 68). आरुजन्तः—√*ruj* to break, pres. part; Sāyaṇa renders it by 'गच्छन्तः'. हर्षमाणासः–Pres. mid. part. from √*hṛṣ* to exult, nom. plu. terminating in आसस्. धृषिताः—√*dhṛṣ* to dare, past part. nom. plu. तिग्मेषवः—Those whose arrows are pointed.; Bahuvrīhi compd. accented on the first member. संशिशानाः—√*śā* to sharpen, (III conju.) pres. part. nom. plu. अभि प्र यन्तु—√*i* with अभि+प्र. to go towards, impv. 3rd plu. अग्निरूपाः—Those who have terrible forms like the flames of fire; Bahuvrīhi compd. Yāska followed by Sāyaṇa renders it as 'अग्निकर्माणः। संनद्धाः कवचिनः इति वा (Nir. X. 30).

अग्निःऽइव । मन्यो इति । त्विषितः । सहस्व । सेनाऽनीः । नः । सहुरे । हूतः । एधि ॥ हत्वाय । शत्रून् । वि । भजस्व । वेदः । ओजः । मिमानः । वि । मृधः । नुदस्व ॥२॥

सा० भा०—हे मन्यो अग्निरिव त्विषितः ज्वलितः सहस्व अभिभव शत्रून्। हे सहुरे सहनशील सेनानीः एधि भव नः अस्माकम् संग्रामे हूतः सन्। किंच हत्वाय हत्वा शत्रून्वि भजस्व प्रयच्छास्माकं वेदः धनं शत्रुसंबन्धि। किंच ओजो मिमानः अस्माकं बलं कुर्वन् मृधः शत्रून् वि नुदस्व घातयेत्यर्थः॥

शब्दा०—अग्निरिव=अग्नि की तरह मन्यो=ओ मन्यु, त्विषितः=तेजस्वी, सहस्व=जीतो, सेनानीः=सेनापति, नः=हमलोगों के, सहुरे=ओ विजेता, हूतः=बुलाये जाने पर, एधि=होवो, हत्वाय=मारकर, वि भजस्व=बांटो, वेद=धन को, ओजः=पराक्रम को, मिमानः=तौलते हुए, मृधः=शत्रुओं को, वि नुदस्व=दूर भागो।

हि० अ०—ओ मन्यु, अग्नि की तरह, तेजस्वी (तुम) (शत्रुओं को)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जीतो; ओ विजेता, बुलाने पर हमारे सेनापति बनो। शत्रुओं को मारकर उनके धन को (हमलोगों में) बाँटो। (हमारे) पराक्रम को तौलते हुये शत्रुओं को भगाओ।

Trans.—O wrath, flashing like fire conquer the enemies ; o conqueror, (when) invoked, be our commander. Having slain the enemies distribute the booty (among us) ; measuring (our) strength push away the hinderer.

Notes—त्विषितः—√*tviṣ* to be stirred, past part. सहस्व—√*sah* to conquer, mid. impv. 2nd. sing. सहुरे—Voc. of सहुरि (conqueror) from √*sah* to conquer, with the suffix उरिण्. हूतः—√*hū* to call, past part. एधि—√*as* to be, impv. 2nd. sing. हत्वाय—√*han* to kill, gerund in त्वाय विभजस्व—√*bhaj* with वि to distribute, impv. mid. 2nd. sing. मिमानः—√*mā* to measure, (III. conju.), pres. part. नुदस्व—√*nud* to push, impv. mid. 2nd. sing.

सहस्व। मन्यो इति। अभिऽमातिम्। अस्मे इति। रुजन्। मृणन्। प्रमृणन्। प्र। इहि। शत्रून्॥ उग्रम्। ते। पाजः। ननु। आ। रुरुध्रे। वशी। वशम्। नयसे। एकऽज। त्वम्॥३॥

सा० भा०—हे मन्यो अस्मे अस्माकम् अभिमातिम् अभिगन्तारं शत्रुं सहस्व अभिभव। रुजन् हिंसन् मृणन् प्रमृणन् प्रकर्षेण हिंसन् यथा पुनर्न जीवेत्तथा कुर्वंस्त्वं शत्रून् प्रति प्रेहि। ते तव पाजः बलम् उग्रम् उद्गूर्णं के ननु आ रुरुध्रे आरुन्धन्ति। न तथा संभवति हे एकज त्वम् असहायः वशी त्वं वशं नयसे प्रापयसि शत्रुम्॥

शब्दा०—सहस्व=जीतो, मन्यो=ओ मन्यु, अभिमातिम्=शत्रु को, अस्मे=हमारे, रुजन्=तोड़ते हुये, मृणन्=कुचलते हुये, प्रमृणन्=प्रकृष्ट रूप से नष्ट करते हुये, प्र इहि=बढो, शत्रून्=शत्रुओं की ओर, उग्रम्=भयानक, ते=तुम्हारे, पाजः=शक्ति को, ननु=संभव नहीं, आ रुरुध्रे=

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रोकेंगे, वशी=वश में करनेवाले, वशम्=वश म, नयसे=लाते हो, एकज ओ अकेले उत्पन्न, त्वम्=तुम ।

हि० अ०—ओ मन्यु, मेरे शत्रु को जीतो; तोड़ते हुए, कुचलते हुये, तथा अत्यन्त रूप से नष्ट करते हुये शत्रुओं की ओर बढ़ो । (वे) तुम्हारी भयानक शक्ति को रोकेंगे (यह) संभव नहीं । ओ अकेले, वश में करनेवाले तुम (शत्रुओं को) अपने वश में लाते हो ।

Trans.—O wrath, overcome our assailant ; go to the enemies breaking, slaying and crushing them down, They can hinder thy terrible might, is not possible. O sole-born, thou, the controller, bring the enemies under thy control.

Notes – अस्मे —Final ए in अस्मे is Pragṛhya ; hence, इति is added after it in the Pada-text. रुजन्—√*ruj* to break. pres. part. मृणन्—√*mṛṇ* to crush, pres. part. प्रमृणन्—The repetition of मृणन् with the prefix प्र is for emphasis. इहि—√*i* to go, impv. 2nd. sing. रुरुध्रे—√*rudh* to hinder, perf. 3rd. plu. नयसे—√*ni* to lead. pres. 2nd. sing.

एकः । बहूनाम् । असि । मन्यो इति । ईळितः । विशंम्ऽविशम् । युधये । सम् । शिशाधि ॥ अकृत्तऽरुक् । त्वया । युजा । वयम् । द्युऽमन्तम् । घोषम् । विऽजयाय । कृण्महे ॥४॥

सा० भा०—हे मन्यो ईळितः स्तुतस्त्वम् एकः एव असहाय एव बहूनां शत्रूणाम् असि भवसि पर्याप्तो हन्तुम् । अतः विशंविशं तां तामस्मद्विरोधिनीं प्रजां युधये युद्धाय सं शिशाधि सम्यक् तीक्ष्णीकुरु । किंच हे अकृत्तरुक् अच्छिन्नदीप्ते त्वया युजा सहायेन वयं द्युमन्तं दीप्तिमन्तं घोषं सिंहनादवन्तं विजयाय विशिष्टजयार्थं कृण्महे कुर्मः ॥

शब्दा०—एकः=अकेले, बहूनाम्=अनेक शत्रुओं के, असि=हो, मन्यो =ओ मन्यु, ईळितः=पूजने पर, विशंविशम्=प्रत्येक निवास स्थान को,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युधये=युद्ध के लिये, संशिशाधि=तेज करो, अकृत्तरुक्=ओ अच्छिन्न प्रकाशवाले, त्वया=तुम्हारी, युजा=सहायता से, वयम्=हमलोग, द्युमन्तम्=शानदार, घोषम्=सिंहनाद, विजयाय=विजय के लिये, कृण्महे=करते हैं।

हि० अ०--ओ मन्यु, पूजने पर (तुम) अकेले ही अनेक (शत्रुओं) के (मारने में पर्याप्त) हो; हमारी प्रत्येक बस्ती को युद्ध के लिये तेज करो। ओ अच्छिन्न प्रकाशवाले, तुम्हारी सहायता से विजय के लिये हम शानदार सिंहनाद करते हैं।

Trans.—O wrath, being worshipped thou art alone (sufficient overwhelmer) of many; sharpen our each clan to fight. O of perfect splendour, with thy aid, we make glorious trumpet for victory.

Notes—ईळितः–√*īd* to praise, past part. विशंविशम्–Each clan; Iterative compd. accented on the first member. युधये—Dative infinitive in ए from √*yudh* to fight. संशिशाधि—√*śā* to sharpen, (III. conju.) impv. 2nd. sing. अकृत्तरुक् अकृत्त from √*kṛt* to cut, past part. 'that which is not broken'. रुक् is derived from √*ruc* to shine; thus अकृत्तरुक् means 'one not of broken splendour i.e. of perfect splendour; voc. sing. Bahuvrīhi compd. accented on the first member. कृण्महे–√*kṛ* to make, pres. 1rst. plu.

विजेषऽकृत् । इन्द्रःऽइव । अनवऽब्रवः । अस्माकम् । मन्यो इति । अधिऽपाः । भव । इह ॥ प्रियम् । ते । नाम । सहुरे । गृणीमसि । विद्म । तम् । उत्सम् । यतः । आऽबभूथ ॥५॥

सा० भा०—हे मन्यो इन्द्रइव विजेषकृत् विजयकर्ता। तथा अनवब्रवः अनिन्दितवचनः। 'अनवब्रवोऽनवक्षिप्तवचनः' (निरु० ६. २९) इति यास्कः। ईदृशस्त्वम् अस्माकम् अधिपाः अधिकं पाता रक्षिता भव इह अस्मिन्यज्ञे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हे सहुरे शत्रूणां सहनशील ते प्रियं नाम स्तोत्रं गृणीमसि गृणीमः स्तुमः। यतः नाम्नः स्तोत्रात् त्वम् आबभूथ आभवसि प्रवृद्धो भवसि तमुत्सं बलस्योद्गमयितारं विद्म जानीमः॥

शब्दा०—विजेषकृत्=विजय देनेवाले, इन्द्र इव=इन्द्र की तरह, अनवत्रवः=अनिन्दित वचन बोलनेवाले, अस्माकम्=हमलोगों के, मन्यो =ओ मन्यु, अधिपाः=रक्षक, भव=बनो, इह=यहाँ, प्रियम्=प्रिय, ते= तुम्हारे, नाम=नाम, सहुरे=ओ विजेता, गृणीमसि=स्तुति करते हैं, विद्म=जानते हैं, तम्=उस, उत्सम्=स्रोत को, यतः=जहाँ से, आबभूथ =आये हो।

हि० अ० - ओ मन्यु, इन्द्र की तरह विजय देनेवाले, अनिन्दित वचन बोलने वाले (तुम) यहाँ हम लोगों के रक्षक बनो। ओ विजेता, तुम्हारे प्रिय नाम की हम स्तुति करते हैं, (हम) उस स्रोत को जानते हैं जहाँ से (तुम) उत्पन्न हुये हो।

Trans.—O wrath, thou the giver of victory like Indra, of unreviled speech, be our protector. O conqueror, we sing thy dear name and we know the spring whence thou hast come.

Notes—अनवत्रवः—Sāyaṇa supported by Yāska renders it as 'speaker of unreviled speech; Griffith takes it to mean 'unyielding'; Bahuvrīhi compd. accented on the second member. सहुरे—See X. 84.2. गृणीमसि—√*gṛ* to sing, pres. 1rst. plu. आबभूथ—√*bhū* to be, perf. 2nd. sing.; not unaccented because preceded by यत्. विद्म—√*vid* to know, pres. 1rst. plu.; not unaccented because it begins the Pāda.

आऽभूत्या। सहऽजाः। वज्र। सायक। सहः। बिभर्षि। अभिऽभूते। उत्ऽतरम्॥ क्रत्वा। नः। मन्यो इति। सह। मेदी। एधि। महाऽधनस्य। पुरुऽहूत। समऽसृजि॥६॥

सा० भा०—हे वज्र वज्रवत्सारभूत हे सायक शत्रूणामन्तकर अभिभूते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शत्रूणामभिभावुक मन्यो आभूत्या। आभूतिरभिभवः। तेन सहजाः सहैवोत्पन्नस्त्वं उत्तरम् उत्कृष्टतरं सहः बलं बिभर्षि धारयसि। हे मन्यो क्रत्वा कर्मणा सह नः अस्माकं मेद्येधि स्निग्धो भव। कुत्रेति तदुच्यते। महाधनस्य संग्रामनामैतत्। संग्रामस्य संसृजि सर्गे। हे पुरुहूत बहुभिराहूतेति मन्युसंबोधनम्॥

शब्दा०—आभूत्या=शत्रु को पराजित करनेवाली शक्ति के, सहजा=साथ उत्पन्न, वज्र=ओ वज्र, सायक=ओ बाण, सहः=शक्ति को, बिभर्षि=धारण करते हो, अभिभूते=ओ शत्रु को पराजित करनेवाले, उत्तरम्=श्रेष्ठ, क्रत्वा=कार्य से, नः=हम लोगों के लिये, मन्यो=ओ मन्यु, सह=साथ, मेदी=उदार, एधि=बनो, महाधनस्य=युद्ध के, पुरुहूत=ओ बहुतों के द्वारा बुलाये जानेवाले, संसृजि=प्रारम्भ होने पर।

हि० अ०—(शत्रु को) पराजित करनेवाली शक्ति के साथ उत्पन्न, ओ वज्र, ओ बाण, ओ अभिभूत करनेवाले, तुम श्रेष्ठ शक्ति को धारण करते हो; ओ मन्यु, ओ बहुतों के द्वारा बुलाये जानेवाले, युद्ध के प्रारम्भ होने पर अपने कार्य से (हमलोगों के लिये) उदार बनो।

Trans.—Twin-born with conquering power, O thunderbolt, O arrow, O subduer, thou bearest higher power. O wrath, be graceful unto us with thy action at the start of battle, O invoked by many.

Notes—बिभर्षि—√*bhṛ* to bear, pres. 2nd. sing. एधि—See X. 84.2. महाधनस्य—Of the mighty battle; Karmadhāraya compd. accented on the second member. पुरुहूत—Invoked by many ; √*hū* to call, past part. voc. sing. संसृजि—√*sṛj* to emit ; loc. absolute.

सम्ऽसृष्टम्। धनम्। उभयम्। सम्ऽआकृतम्। अस्मभ्यम्। दत्ताम्। वरुणः। च। मन्युः॥ भियम्। दधानाः। हृदयेषु। शत्रवः। पराऽजितासः। अप। नि। लयन्ताम्॥७॥

सा० भा०—संसृष्टम् अविभागमापन्नम् उभयम् उभयविधं धनं समाकृतं सम्यगानीतम् अस्मभ्यं दत्ताम्। कः। वरुणश्च देवः मन्युः च। भियं भयं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हृदयेषु दधानाः शत्रवः अस्मद्विरोधिनः पराजितासः पराजिताः अप नि लयन्तां अपनिलीना भवन्तु ॥

शब्दा० – संसृष्टम्=अच्छी प्रकार से प्राप्त, धनम्=धन, उभयम्=दोनों प्रकार से, समाकृतम्=अच्छी प्रकार से संचित किया हुआ, अस्मभ्यम्=हमलोगों के लिये, दत्ताम्=देवें, वरुणः=वरुण देवता, च=और, मन्युः मन्यु देवता, भियम्=भय, दधानाः=धारण करते हुये, हृदयेषु=हृदय में, शत्रवः=शत्रु, पराजितासः=हारे हुये, नि लयन्ताम्=दूर हट जाँय।

हि० अ० – वरुण तथा मन्यु अच्छी प्रकार से उत्पन्न तथा अच्छी प्रकार से संचित किया हुआ दोनो प्रकार का धन हमें देवें। हृदय में भय धारण करते हुये शत्रु पराजित होकर दूर हट जाँय।

Trans.—Let varuṇa and wrath give us two-fold wealth, well-gathered and well-accumulated. Let (our) enemies, with fear in their hearts, slink away, vanquished.

Notes—संसृष्टम् – √*sṛj* with सम् to gather, past part. acc. sing. समाकृतम् – √*kṛ* with सम्+आ to accumulate, past part. acc. sing.; for accent see निहिताः (I. 24.7). दत्ताम् – √*dā* to give, impv. 3rd. dual. दधानाः—√*dhā* to put, pres. part. nom. plu. पराजितासः—जितासः is past part. from √*ji* to conquer, nom. plu. terminating in आसस्. नि लयन्ताम् – √*lī* with नि to slink away, impv. mid. 3rd. plu.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'सहस्रशीर्षा' इति षोडशर्चं षष्ठं सूक्तम् । नारायणो नार्मषिरन्त्या त्रिष्टुप् शिष्टा अनुष्टुभः । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः 'पुरुषान्न परं किंचित्' (क० उ० ३. ११) इत्यादिश्रुतिषु प्रसिद्धः स देवता तथा चानुक्रान्तं— 'सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति । गतो विनियोगः ॥

स॒हस्र॑ऽशीर्षा । पुरु॑षः । स॒हस्र॒ऽअ॒क्षः । स॒हस्र॑ऽपात् ॥ सः । भूमि॑म् । वि॒श्वतः॑ । वृ॒त्वा । अति॑ । अ॒ति॒ष्ठ॒त् । द॒श॒ऽअ॒ङ्गु॒लम् ॥१॥

सा० भा० - सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोऽयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षित्वं सहस्रपादत्वं च । सः पुरुषः भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतः वृत्वा परिवेष्ट्य दशाङ्गुलं दशाङ्गुलपरिमितं देशम् अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥

शब्दा०—सहस्रशीर्षा=हजारों सिरवाला, पुरुषः=परम पुरुष, सहस्राक्षः=हजारों नेत्रवाला, सहस्रपात्=हजारों पैरवाला, सः=वह, भूमिम्=पृथिवी को, विश्वतः=चारों तरफ से, वृत्वा=व्याप्त करके, अति =अधिक, अतिष्ठत्=स्थित है, दशाङ्गुलम्=दश अङ्गुल परिमाण में ।

हि० अ० - पूर्णपुरुष हजारों सिरवाला, हजारों नेत्रवाला तथा हजारो पैरवाला है । वह पृथिवी को चारों तरफ से व्याप्त करके दश अङ्गुल (परिमाण में) बचा रहता है ।

Trans.—The Perfect Being has thousands of heads, thousands of eyes and thousands of feet. Having pervaded the whole earth he remains ten fingers in surplus (i.e. he is endless).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—सहस्रशीर्षा—The word thousand indicates the innumerability of the limbs of the Puruṣa; Bahubrīhi compd. accented on the first member. सहस्राक्षः—Bahuvrihi compd. irregularly accented on the second member. वृत्वा—√*vṛ* to cover, gerund in त्वा. अतिष्ठत्—√*sthā* to stand, impf. 3rd. sing.

पुरुषः । एव । इदम् । सर्वम् । यत् । भूतम् । यत् । च । भव्यम् ॥
उत । अमृतऽत्वस्य । ईशानः । यत् । अन्नेन । अतिऽरोहति ॥२॥

सा० भा०—यत् इदं वर्तमानं जगत् तत् सर्वं पुरुष एव । यत् च भूतम् अतीतं जगत् यच्च भव्यं भविष्यज्जगत् तदपि पुरुष एव । यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः । उत अपि च अमृतत्वस्य देवत्वस्य अयम् ईशानः स्वामी । यत् यस्मात्कारणात् अन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेन अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः ॥

शब्दा०—पुरुषः=परम पुरुष, एव=ही, इदम्=यह, सर्वम्=सम्पूर्ण, यत=जो, भूतम्=हो गया है, यत=जो, च=और, भव्यम्=होनेवाला है, उत=और, अमृतत्वस्य=अमरत्व का, ईशानः=स्वामी, यत्=जो, अन्नेन=अन्न से, अतिरोहति=समृद्ध होता है ।

हि० अ०—यह सब, जो हो गया है तथा जो होगा, पुरुष ही है । और वह अमरत्व का स्वामी है तथा जो अन्न से समृद्ध होता है (उनका भी) ।

Trans.—All present, past and future (objects of this universe) are the Perfect Being. And (He) is the Lord of immortality and all that grows and develops with food.

Notes—भूतम्—√*bhū* to be, past part. भव्यम्—√*bhū* to be, gerundive in य. ईशानः—√*īś* to be master, pres. part. mid. अतिरोहति—√*ruh* to ascend, pres. 3rd. sing.; not unaccented because preceded by यत्. उत···अतिरोहति—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

This hemistich has variously been interpreted by the scholars : 'he is the lord or distributer of immortality because he becomes the visible world in order that living beings may obtain the fruits of their actions and gain mokṣa or final liberation from their bonds' (Sayaṇa) ; 'he is also the lord of immortality ; for he mounts beyond (his own condition) for the food (of living beings)—(Wilson) ; 'he is that which grows by nourishment, and he is the distributer of immortality' (Colebrooke); 'he is also the lord of immortality since by food he expands (Muir); 'since he stretches for above what exists by food (Ludwig) ; 'ruling over immortality, he was all that grows by food' (Peterson).

एतावान् । अस्य । महिमा । अतः । ज्यायान् । च । पुरुषः ॥
पादः । अस्य । विश्वा । भूतानि । त्रिऽपात् । अस्य । अमृतम् ।
दिवि ॥३॥

सा० भा०—अतीतानागतवर्तमानरूपं जगद्यावदस्ति एतावान् सर्वोऽपि अस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः । न तु तस्य वास्तवस्वरूपम् । वास्तवस्तु पुरुषः अतः महिम्नोऽपि ज्यायान् अतिशयेनाधिकः । एतच्चोभयं स्पष्टीक्रियते । अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः चतुर्थोंऽशः । अस्य पुरुषस्य अवशिष्टं त्रिपात् स्वरूपम् अमृतं विनाशरहितं सत् दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः । यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै० आ० ८.१; तै० उ० २.१) इत्यम्नातस्य पर ब्रह्मण इयत्ताभावात् पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः ॥

शब्दा० —एतावान्=इतनी, अस्य=उसकी, महिमा=ऐश्वर्य, अतः=उससे भी, ज्यायान्=बढ़कर, च=और, पुरुषः=परम पुरुष, पादः=एक चौथाई अंश, अस्य=उसका, विश्वा=सम्पूर्ण, भूतानि=प्राणी, त्रिपात्=तीन चतुर्थांश, अस्य=उसका, अमृतम्=अमर लोक, दिवि=आकाश में ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० - इतनी उसकी महिमा है; और उससे भी बड़ा पुरुष है। उसके एक चतुर्थांश में सम्पूर्ण लोक है; इसके तीन चतुर्थांश जो अमर लोक है, आकाश में है।

Trans.—Such is his greatness, and the Perfect Being is greater than this. All the beings are his one fourth ; his three-fourth, which is immortal, is in the heaven.

Notes—एतावान्—In the earlier hymns of the Ṛ.V. final न् preceded by आ and followed by a vowel is dropped, the preceding vowel being nasalized. But in the later hymns this practice is irregular. एतावानस्य, being regular post-Vedic sandhi, indicates the lateness of the hymn. पूरुषः—The first syllable is lengthened.

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति ॥ ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इति । अभि ॥४॥

सा० भा० - योऽयं त्रिपात् पुरुषः संसाररहितो ब्रह्मस्वरूपः सोऽयम् ऊर्ध्वं उदैत् अस्माद्ज्ञानकार्यात्संसाराद्बहिर्भूतोऽव्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान्। तस्य अस्य सोऽयं पादः लेशः सोऽयम् इह मायायां पुनः अभवत् सृष्टिसंहाराभ्यां पुनः पुनरागच्छति। अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं - विष्टभ्यामहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ० गी० १०. ४२) इति। ततः मायायामागत्यानन्तरं विष्वङ् देवमनुष्यतिर्यगादिरूपेण विविधः सन् व्यक्रामत् व्याप्तवान्। किं कृत्वा। साशनानशने अभिलक्ष्य। साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् अनशनं तद्रहितमचेतनं गिरिनद्यादिकम्। तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः॥

शब्दा० - त्रिपात्=तीन चतुर्थांश के साथ, ऊर्ध्वः=ऊपर, उत्=ऊपर, ऐत्=चला गया, पुरुषः=परम पुरुष, पादः=एक चतुर्थांश, अस्य=उसका,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इह=यहां, अभवत्=रह गया, पुनः=फिर, ततः=इससे, विष्वङ्=चारों तरफ, वि अक्रामत्=फैलाया, साशनानशने=खानेवाले तथा न खानेवाले अर्थात् जीव तथा निर्जीव, अभि=तरफ ।

हि० अ०—तीन-चतुर्थांश के साथ पुरुष ऊपर चला गया; फिर भी एक-चतुर्थांश यहीं पर रह गया । इससे वह अपने को जीव तथा निर्जीव सभी रूपों में चारों तरफ फैलाया ।

Trans.—With three fourth the Perfect Being rose upwards ; one-fourth of Him again remained here ; thence he spread on all sides, over what eats and what eats not.

Notes—उदैत्—√*i* with उत् to rise, impf. 3rd. sing. अभवत्—√*bhū* to be, impf. 3rd. sing. पुनः—Final visarjaniya is rhotacized one ; hence, इति in the Pada-text. ततः—'After coming into sphere of illusion' (Sāyaṇa), 'thence' (Griffith, Macdonell). विष्वङ्—'Assuming various forms of gods, men, birds etc.' (Sāyaṇa) 'all sides' (Peterson, Griffith) 'in all directions' (Macdonell). व्यक्रामत्—√*kram* to stride, impf. 3rd. sing. साशनानशने—What eats and what eats not i.e. animate and inanimate. This compd. represents the latest stage of Dvandvas in the Ṛ.V. the first member losing its accent and the last syllable of the final member rceiving the उदात्त irrespective of its original accent. Dvandva compds. are not analysed in the Pada-text. Final ए is Pragṛhya ; hence, इति in the Pada-text.

तस्मा॑त् । वि॒ऽराट् । अ॒जा॒यत॒ । वि॒ऽराजः॑ । अधि॑ । पुरु॑षः ॥ सः । जा॒तः । अति॑ । अ॒रि॒च्य॒त॒ । प॒श्चात् । भूमि॑म् । अथो॒ इति॑ । पु॒रः ॥५॥

सा० भा०—विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । तस्मात् आदिपुरुषात् विराट् ब्रह्माण्डदेहः अजायत उत्पन्न । विविधानि राजन्ते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वस्तून्यत्रेति विराट्। विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत। सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्म जीवोऽभवत्। एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति—'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव' (नृ० ता २. १. ९) इति। स जातः विराट् पुरुषः अत्यरिच्यत अतिरिक्तोऽभूत्। विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत्। पश्चात् देवादिजीवभावादूर्ध्वं भूमिं ससर्जेति शेषः। अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज। पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि॥

शब्दा०—तस्मात्=उस चतुर्थांश से, विराट्=परम पुरुष से उत्पन्न प्रथम तत्व, अजायत=उत्पन्न हुआ, विराजः=विराट् नामक प्रथम तत्व से, अधि=बाद में, पुरुषः=जीवात्मा के रूप में पुरुष, सः=वह, जातः=उत्पन्न होते ही, अति अरिच्यत=(देव मनुष्य आदि रूप में विराट से) अलग कर लिया, पश्चात्=इसके बाद, भूमिम्=पृथिवी, अथो=इसके बाद, पुरः=जीवात्मा के लिए शरीर।

हि० अ०—उस (चतुर्थांश) से विराट् उत्पन्न हुआ; विराट् से (जीवात्मा के रूप में) पुरुष (उत्पन्न हुआ) उत्पन्न होते ही उसने (अपने को देव मनुष्य आदि रूप में विराट् से) अलग कर दिया। इसके बाद पृथिवी को (उत्पन्न किया); इसके बाद (जीवात्मा के लिए) शरीर (का निर्माण किया)।

Trans.—From him *Virāṭ* was born; from *Virāṭ* the Puruṣa (in the form of *Jīvātmā*). As soon as he was born, (he) separated himself (from *Virāṭ* in the forms of gods, men, lower animals etc.), then (he created) the earth and then the body.

Notes—विराट्—The first creation of the Perfect Being. He was the intermediate between the primordial Puruṣa and the created Puruṣa. According to Muir विराट् may refer to the female counterpart of the Perfect Being as Aditi of Dakṣa. अजायत—√*jā* to be

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

born, impf. mid. 3rd. sing. अरिच्यत—√*ric* to leave, pass. impf. 3rd. sing. अथो—(=अथ+उ); final ओ is Pragṛhya. पुरः—'Body' '(Sāyaṇa)' 'before' (Peterson, Macdonell), 'eastward' (Griffith). स····पुरः—This line has variously been interpreted : 'as soon as he was born he separated himself in the forms of gods, men, lower aminal etc. from *Virāṭ* , then he (created) earth, and then the body' (Sāyaṇa), 'when born he stretched beyond the earth'. behind and before' (Peterson Macdonell), 'as soon as he was born he spread eastward and westeward over the earth' (Griffith).

यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ॥ वसन्तः । अस्य । आसीत् । आज्यम् । ग्रीष्मः । इध्मः । शरत् । हविः ॥६॥

सा० भा०—यत् यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवाः उत्तरसृष्टि सिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासंभवात् पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण पुरुषाख्येन हविषा मानसं यज्ञं अतन्वत अन्वतिष्ठन् तदानीम् अस्य यज्ञस्य वसन्तः वसन्तर्तुरेव आज्यम् आसीत् अभूत् । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं ग्रीष्म इध्मः आसीत् । तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः । तथा शरद्धविः आसीत् । तामेवपुरोडाशादिहविष्ट्वेन संकल्पितवन्त इत्यर्थः । पूर्वं पुरुषस्य हविः सामान्यरूपत्वेन संकल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ॥

शब्दा०—यत्=जब, पुरुषेण=पुरुष रूप, हविषा=हवि से, देवाः=देवताओं ने, यज्ञम्=यज्ञ को, अतन्वत=सम्पन्न किया, वसन्तः=वसन्त ऋतु, अस्य=उसका, आसीत्=था, आज्यम्=घी, ग्रीष्मः=ग्रीष्म ऋतु, इध्मः=इन्धन, शरत्=शरद् ऋतु, हविः=हवि ।

हि० अ० – देवताओं ने जब पुरुष रूपी हवि से यज्ञ किया, (उस समय) वसन्त इस (यज्ञ) का घी था, ग्रीष्म इसका इन्धन था शरत् इसका हवि था ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—When gods performed a sacrifice with the Perfect Being as its oblation, the spring was its ghee, the summer its fuel and the autumn its oblation.

Notes—यज्ञम्—According to Sāyaṇa the sacrifice performed by gods with the Perfect Being as its oblation, spring as its ghee, summer as its fuel, autumn as its oblation, was a mental one. अतन्वत—√*tan* to stretch, impf. mid. 3rd. plu.; unaccented because preceded by यत्. आसीत्–√*as* to be impf. 3rd. sing.

तम् । यज्ञम् । बर्हिषि । प्र । औक्षन् । पुरुषम् । जातम् । अग्रतः ॥
तेन । देवाः । अयजन्त । साध्याः । ऋषयः । च । ये ॥७॥

सा० भा०—यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रौक्षितवन्तः । कीदृशमित्यत्राह । अग्रतः सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तम् 'तस्माद्विराळजायत विराजो अधि पूरुषः' इति । तेन पुरुषरूपेण पशुना देवा अयजन्त । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह । साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः ऋषयः मन्त्रद्रष्टारः च ये सन्ति । ते सर्वेऽप्ययजन्तेत्यर्थः ॥

शब्दा०—तम्=उस, यज्ञम्=बलि दिये जानेवाले को, बर्हिषि=दूर्वा पर, प्र औक्षन्=जल से अभिषेक कराया, पुरुषम्=पुरुष को, जातम्=उत्पन्न, अग्रतः=सर्व प्रथम, तेन=उससे, देवाः=देवताओं ने, अयजन्त=यज्ञ किया, साध्याः=प्रजापति आदि सृष्टि कर्ताओ ने, ऋषयः=ऋषियों ने च=और, ये=जो ।

हि० अ०—उस सबसे पहले उत्पन्न बलि दिये जानेवाले पुरुष (पशु) को देवताओं ने पवित्र दूर्वा पर (रखकर) प्रौक्षण किया। उस (पुरुष पशु) से देवताओं ने, प्रजापति आदि सृष्टिकर्ताओं ने, तथा जो ऋषि थे उन्होंने यज्ञ किया ।

Trans.—They besprinkled the first-born Puruṣa, as to be sacrified, on the sacred grass. Therewith the gods, the Ssādhyas and the seers that are, all sacrificed.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—यज्ञम्—√*yaj* to sarifice, gerundive in य. अयजन्त —√*yaj* to sacrifice, impf. 3rd. mid. plu. साध्याः— 'A class of sacrificial beings probably ancient divine sacrificers' (Griffith) ; 'divine beings including Prajāpati etc. who are capable of creation' (Sāyaṇa). Macdonell thinks it to be in apposition to देवाः.

तस्मा॑त् । य॒ज्ञात् । स॒र्वऽहु॑तः । सम्ऽभृ॑तम् । पृ॒ष॒त्ऽआ॒ज्यम् ॥
प॒शून् । तान् । च॒क्रे॒ । वा॒य॒व्या॑न् । आ॒र॒ण्यान् । ग्रा॒म्याः । च॒ ।
ये ॥८॥

सा० भा०—सर्वहुतः । सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात् तस्मात् पूर्वोक्तात् मानसात् यज्ञात् पृषदाज्यं दधिमिश्रमाज्यं संभृतं संपादितम् । दधि चाज्यम् चेत्येवमादिभोग्यजातं सर्वं संपादितमित्यर्थः । तथा वायव्यान् वायुदेवताकाँल्लोकप्रसिद्धान् आरण्यान् पशून् चक्रे उत्पादितवान् । आरण्या हरिणादयः । तथा ये च ग्राम्याः गवाश्वादयः तानपि चक्रे । पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते— 'वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षाः । अन्तरिक्ष देवत्याः खलु वै पशवः । वायव एवैनान्परिददाति' (तै० ब्रा० ३. २. १-३) इति ॥

शब्दा०—तस्मात्=उस, यज्ञात्=यज्ञ से, सर्वहुतः=उस यज्ञ से जिसमें सर्वरूपात्मक पुरुष का हवन हुआ था, संभृतम्=इकट्ठा किया गया, पृषदाज्यम्=दधिमिश्रित घृत, पशून्=पशुओं को, तान्=उन,चक्रे=उत्पन्न किया, वायव्यान्=आकाश में रहनेवाले, आरण्यान्=जंगल में रहनेवाले, ग्राम्याः=ग्रामों में रहनेवाले, च=और, ये=जो थे ।

हि० अ०—उस यज्ञ से जिसमें सर्वरूपात्मक पुरुष का हवन हुआ था, दधिमिश्रित घृत इकट्ठा किया गया । (उससे एकत्रित दधिमिश्रित घृत से उस पुरुष ने) आकाश में रहने वाले, जंगल में रहने वाले तथा गावों में रहने वाले जो पशु थे उनको उत्पन्न किया ।

Trans.—From that *Sarvahut* sacrifice the butter mixed with curd was gathered up. He (or It) created

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

these creatures of the air, of the forest, and those of the village.

Notes—सर्वहुतः—'From the sacrifice in which ommiformed Puruṣa was sacrificed '(Sāyaṇa) ,'fully made' (Peterson), 'great' (Griffith), 'completely offered' (Macdonell). संभृतम्—√*bhṛ* with सम् to gather, past part. ; here it is used as a finite verb ; for accent see निहिताः (I. 24.7). पृषदाज्यम्—'Ghee mixed with curd' (Sāyaṇa), 'the mixture of cruds and butter' (Wilson), 'the dripping fat' '(Griffith) 'clotted butter' (Macdonell); Karmadhāraya compd. accented on the final syllable of the second member. चक्रे—√*kṛ* to make, perf. mid. 3rd. sing. वायव्यान्—Final न् is not dropped because it is at the end of the Pāda.

तस्मा॑त् । य॒ज्ञात् । स॒र्व॒ऽहुतः॑ । ऋचः॑ । सामा॑नि । ज॒ज्ञि॒रे ॥
छन्दां॑सि । ज॒ज्ञि॒रे । तस्मा॑त् । यजुः॑ । तस्मा॑त् । अ॒जा॒य॒त ॥९॥

सा० भा०—सर्वहुतः तस्मात् पूर्वोक्तात् यज्ञात् ऋचः सामानि च जज्ञिरे उत्पन्नाः । तस्मात् यज्ञात् छन्दांसि गायत्र्यादीनि जज्ञिरे । तस्मात् यज्ञात् यजुः अपि अजायत ॥

शब्दा०—तस्मात्=उस, यज्ञात्=यज्ञ से, सर्वहुतः=उस यज्ञ से जिसमें सर्वरूपात्मक पुरुष का हवन हुआ था, ऋचः=ऋचायें, सामानि=सामन्, जज्ञिरे=उत्पन्न हुये, तस्मात्=उससे, यजुः=यजुष्, तस्मात्=उससे, अजायत=उत्पन्न हुये ।

हि० अ०—उस सर्वहुत् यज्ञ से ऋचायें तथा साम उत्पन्न हुये; उससे (गायत्र्यादि) छन्द उत्पन्न हुये; उससे यजुष् उत्पन्न हुआ ।

Trans.—From that *Sarvahut* sacrifice were born the *Ṛks* and the *Sāmans* ; from that were born the metres ; from that were born the ritualistic formula.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—जज्ञिरे—√*jan* to generate, mid. perf. 3rd. plu. छन्दांसि—'Metres, Gāyatrī etc.(Sāyaṇa); Muir understands छन्दांसि to refer the Atharvaveda. Peterson adheres to this view. अजायत—√*jā* to be born, impf. mid. 3rd. sing.

तस्मा॑त् । अश्वाः॑ । अजायन्त । ये । के । च । उभयाद॑तः ॥
गावः॑ । ह । जज्ञिरे । तस्मा॑त् । तस्मा॑त् । जाताः । अजावयः॑ ॥१०॥

सा० भा०—तस्मात् पूर्वोक्ताद्यज्ञात् अश्वा अजायन्त उत्पन्नाः । तथा ये के च अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च उभयादतः ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त । तथा तस्मात् यज्ञात् गावः च जज्ञिरे । किंच तस्मात् जज्ञात् अजावयः च जाताः ॥

शब्दा०—तस्मात्=उस सर्वहुत् यज्ञ से, अश्वाः=घोड़े, अजायन्त=उत्पन्न हुये, ये=जो, के=कोई, च=और, उभयादतः=दोनों तरफ दांत वाले, गावः=गायें, ह=निश्चित अर्थ का वाचक निपात, जज्ञिरे=उत्पन्न हुईं, तस्मात्=उससे, जाताः=उत्पन्न हुईं, अजावयः=बकरियाँ तथा भेंड़ें ।

हि० अ०—उस (सर्वहुत् यज्ञ) से अश्व उत्पन्न हुये तथा वे सभी जो दोनों तरफ दांतवाले हैं । उससे गायें उत्पन्न हुईं; उससे बकरियां तथा भेड़ें (पैदा हुईं) ।

Trans.—From that, horses were born, and all those that have two rows of teeth ; from that, cows were born ; form that, goats and sheep were born.

Notes—उभयादतः—Those who have two rows of teeth ; Bahuvrīhi compd. accented on the first member. अजावयः—Goats and sheep ; plural Dvandva compd. not analysed in the Pada-test.

यत् । पुरु॑षम् । वि । अद॑धुः । कति॑धा । वि । अकल्पयन् ॥
मुख॑म् । किम् । अस्य । कौ । बाहू इति॑ । कौ । ऊरू इति॑ ।
पादौ॑ । उच्येते इति॑ ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवाः यत् यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवन्तः तदानीं कतिधा कतिभिः प्रकारैः व्यकल्पयन् विवधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किम् आसीत्। कौ बाहू अभूताम् का ऊरू। कौ च पादावुच्येते। प्रथमं सामान्यरूपः प्रश्नः पश्चात् मुखं किमित्यादिना विशेषविषयाः प्रश्नाः।

शब्दा०—यत्=जब, पुरुषम्=परम पुरुष को, वि अदधुः=विभक्त किया, कतिधा=कितने भागों में, वि अकल्पयन्=विभाजन किया, मुखम्=मुख, किम्=क्या था, अस्य=उसका, कौ=कौन, बाहू=दो भुजायें थी, कौ=कौन, ऊरू=दोनों जंघायें, पादौ=दोनों पैर, उच्येते=कहे जाते हैं।

हिं० अ०—जब (देवताओं ने) पुरुष को विभक्त किया (उस समय उसके) कितने भाग किये? उसका मुख क्या था? (उसकी) दोनों भुजायें क्या थी? (उसकी) दोनो जंघायें क्या थी? (उसके) दोनों पैर क्या कहे जाते हैं?

Trans.—When they divided the Perfect Being, into how many parts did they make? What was his mouth? What the two arms? What the two thighs and what are said his two feet?

Notes—व्यदधुः—√*dhā* to put. impf. 3rd. plu.; not unaccented because preceded by यत्. अकल्पयन्—√*klp* to make, impf. 3rd. plu. उच्येते—√*vac* to speak, pres. 3rd. dual; final ए as dual is Pragṛhya; hence, इति in the Pada-text,

ब्राह्मणः। अस्य। मुखम्। आसीत्। बाहू इति। राजन्यः। कृतः॥ ऊरू इति। तत्। अस्य। यत्। वैश्यः। पत्ऽभ्याम्। शूद्रः। अजायत॥१२॥

सा० भा०—इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति। अस्य प्रजापतेः ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषः मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिमान पुरुषः सः बाहू कृतः बाहुत्वेन निष्पादितः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बाहुभ्यामुत्पादित इत्यर्थः। तत् तदानीम् अस्य प्रजापतेः यत् यौ ऊरू तद्रूपः वैश्यः संपन्नः। ऊरूभ्यामुत्पन्न इत्यर्थः। तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्व-जातिमान् पुरुषः अजायत। इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुः संहितायां सप्तमकाण्डे 'स मुखतस्त्रिवृतं निरमिमीत' (तै० सं० ७.१.१.४) इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये॥

शब्दा०—ब्राह्मण=ब्राह्मण, अस्य=उसका, मुखम्=मुख, आसीत्=था, बाहू=दोनों भुजाओं से, राजन्यः=क्षत्रिय, कृतः=बना, ऊरू=दोनों जंघायें, तत्=उनसे, उसकी यत्=जो थीं, वैश्यः=वैश्य, पद्भ्याम्=दोनों पैरों से, शुद्रः=शुद्र अजायत=उत्पन्न हुआ।

हि० अ०—ब्राह्मण उसका मुख था, दोनों भुजाओं से क्षत्रिय हुआ; उसकी जो जंघायें थी उनसे वैश्य हुआ; (उसके) दोनों पैरों से शूद्र उत्पन्न हुआ।

Trans.—Brāhmaṇa was his mouth ; Kṣatriya was made of his two arms ; then his two thighs became Vaiśya ; from feet Śudra was born.

Notes—कृतः—√*kṛ* to make, past part. used as a finite verb. 'The Brāhmṇa is called the mouth of Puruṣa as having the special privilege, as a priest, of addressing the gods in prayer. The arms of Puruṣa became the Rājanya, the prince and soldier who wields the sword and spear. His thighs, the strongest parts of his body, became the agriculturist and tradesman, the chief support of society ; and his feet, the emblems of vigour and activity, became the Śūdra or labouring man on whose toil and industry all ultimately rests. This is the only Passage in the Ṛgveda, which enumerates the four castes. (Griffith on X. 90.12. f.n.).

च॒न्द्रमाः॑। मन॑सः। जा॒तः। चक्षोः॑। सूर्यः॑। अ॒जा॒य॒त॒॥ मुखा॑त्। इन्द्रः॑। च॒। अ॒ग्निः। च॒। प्रा॒णात्। वा॒युः। अ॒जा॒य॒त॒॥१३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह। प्रजापतेः मनसः सकाशात् चन्द्रमाः जातः। चक्षोः च चक्षुषः सूर्यः अपि अजायत। अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ। अस्य प्राणाद्वायुरजायत॥

शब्दा०—चन्द्रमाः=चन्द्रमा, मनसः=मन से, जातः=उत्पन्न हुआ, चक्षोः=आँख से, सूर्यः=सूर्य, अजायत=उत्पन्न हुआ, मुखात्=मुख से, इन्द्रः=इन्द्र, च=और, अग्निः=अग्नि, च=और, प्राणात्=प्राण से, वायुः=हवा, अजायत=उत्पन्न हुआ।

हि० अ०—(उस पुरुष के) मन से चन्द्रमा उत्पन्न हुआ; (उसकी) आँख से सूर्य उत्पन्न हुआ। (उसके) मुख से इन्द्र और अग्नि (उत्पन्न हुये); (उसकी) श्वांस से वायु उत्पन्न हुआ।

Trans.—The moon was born from (his) mind; from (his) eye the sun was born. From (his) mouth Indra and Agni (where born); from (his) breath wind was born.

नाभ्याः। आसीत्। अन्तरिक्षम्। शीर्ष्णः। द्यौः। सम्। अवर्तत॥ पत्ऽभ्याम्। भूमिः। दिशः। श्रोत्रात्। तथा। लोकान्। अकल्पयन्॥१४॥

सा० भा०—यथा चन्द्रादीन् प्रजापतेर्मनः प्रभृतिभ्योऽकल्पयन् तथा अन्तरिक्षादीन् लोकान् प्रजापतेः नाभ्यादिभ्यो देवाः अकल्पयन् उत्पादितवन्तः। एतदेव दर्शयति। नाभ्याः प्रजापतेर्नाभेः अन्तरिक्षमासीत्। शीर्ष्णः शिरसः द्यौ समवर्तत उत्पन्ना। अस्य पद्भ्यां पादाभ्यां भूमिः उत्पन्ना। अस्य श्रोत्रात् दिशः उत्पन्नाः॥

शब्दा०—नाभ्याः=नाभी से, आसीत्=उत्पन्न हुआ था, अन्तरिक्षम्=अन्तरिक्षलोक, शीर्ष्णः=शिर से, द्यौः=द्युलोक, समवर्तत=उत्पन्न हुआ, पद्भ्याम्=दोनों पैरों से, भूमिः=पृथिवी, दिशः=दिशायें, श्रोत्रात्=कान से, तथा=इसी प्रकार, लोकान्=लोकों की, अकल्पयन्=सृष्टि की।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० – (उसकी) नाभी से अन्तरिक्ष (उत्पन्न हुआ) था; शिर से आकाश उत्पन्न हुआ; दोनों पैरों से पृथिवी, कान से दिशायें। इसी प्रकार ससी लोकों की सृष्टि (देवताओं ने) की।

Trans.—From (his) navel was (produced) the middle region ; from (his) head was evolved the sky. from (his) two feet the earth ; the quarters from (his) ear. Thus they made the worlds.

Notes—समवर्तत—√*vṛt* with सम् to produce, impf. mid. 3rd. sing. अकल्पयन् –√*klp* to make, impf. 3rd. plu.

स॒प्त । अ॒स्य॒ । आ॒स॒न् । प॒रि॒ऽधयः॑ । त्रिः । स॒प्त । स॒म्ऽइधः॑ । कृ॒ताः ॥ दे॒वाः । यत् । य॒ज्ञम् । त॒न्वा॒नाः । अब॑ध्नन् । पुरु॑षम् । प॒शुम् ॥१५॥

सा० भा० – अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि सप्त छन्दांसि परिधयः आसन्। ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः। अत एवाम्नायते – 'न पुरस्तात्परि दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्ति' (तै० स० २. ६. ६. ३) इति। तत एव आदित्यसहिताः सप्त परिधयोऽत्र सप्त छन्दोरूपाः। तथा समिधः त्रिः सप्त त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः कृताः। 'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः' (तै० स० ५. १. १०. ३) इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः। यत् यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपाः यज्ञं तन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः पशुम् अबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः। एतदेवाभिप्रेत्य पूर्वत्र 'यत्पुरुषेण हविषा' इत्युक्तम्॥

शब्दा०—सप्त=सात, अस्य=उसकी, आसन्=थी, परिधयः=परिधियाँ, त्रिः सप्त=इक्कीस, समिधः=समिधायें, कृताः=बनाई गईं थीं, देवाः=देवताओं ने, यत्=जिस समय, यज्ञम्=यज्ञ, तन्वानाः=सम्पन्न करते हुये, अबध्नन्=बांधा था, पुरुषम्=परम पुरुष को, पशुम्=पशु के रूप में।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—उसकी सात परिधियां थीं; इक्कीस समिधायें बनाई गई थीं, जिस समय यज्ञ करते हुये देवताओं ने पुरुष पशु को बाँधा था।

Trans.—Seven were his enclosing (sticks); twenty one were made (his) fuel ; when the gods, performing the sacrifice, bound the Perfect Being as a victim.

Notes—सप्तपरिधयः—According to Sāyaṇa seven fencing sticks here refer to seven metres, Gāyatrī etc. Mahidhara understands the seven fencing sticks as seven oceans. Macdonell takes the seven number as a sacred one. According to him there are only three green sticks put around the sacrificial fire to fence it in. कृताः—√*kṛ* to make, past part. used as finite verb. तन्वानाः—√*tan* to stetch, pres. part. nom. plu. अबध्नन् – √*badh* to bind, impf. 3rd. plu.; not unaccented became it beigns the Pāda.

य॒ज्ञेन॑। य॒ज्ञम्। अ॒य॒ज॒न्त॒। दे॒वाः। तानि॑। धर्मा॑णि। प्र॒थ॒मानि॑। आ॒स॒न्॥ ते। ह॒। नाक॑म्। म॒हि॒मानः॑। स॒च॒न्त॒। यत्र॑। पूर्वे॑। सा॒ध्याः। सन्ति॑। दे॒वाः॥१६॥

सा० भा० – पूर्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् अयजन्त पूजितवन्तः। तस्मात् पूजनात् तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यानि आसन्। एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः। अथोपासनतत्फलानुवादक भागार्थः संगृह्यते। यत्र यस्मिन् विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातना विराडुपास्तिसाधकाः देवाः सन्ति तिष्ठन्ति तत् नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानः तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति॥

शब्दा—यज्ञेन=यज्ञ से, यज्ञम्=यज्ञ पुरुष का अयजन्त=पूजन किया, देवाः=देवताओं ने, तानि=वे ही, धर्माणि=धर्म, प्रथमानि=सर्व

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथम, आसन्=थे, ते=उनलोगों ने, ह=निश्चित अर्थ का वाचक एक निपात, नाकम्=स्वर्ग, महिमानः=पूजनेवाले, सचन्त=प्राप्त किये, यत्र =जहां पर पूर्वे=पुराने, साध्याः=प्रजापति आदि सृष्टि कर्ताओं का वर्ग, सन्ति=वास करते हैं, देवाः=देवता ।

हि० अ०—यज्ञ से देवताओं ने यज्ञ पुरुष का पूजन किया; वे ही सर्व प्रथम धर्म थे। वे पूजनेवाले स्वर्ग को प्राप्त किये जहाँ पर सृष्टि करने में समर्थ प्रजापति आदि पुराने देवताओं का वर्ग तथा देवगण वास करते हैं।

Trans.—With the sacrifice gods sacrificed the victim. These were the first ordinances. Those mighty ones attained the heaven where the ancient Sādhyas and gods are dwelling.

Notes—यज्ञम्—See X. 90.7. अयजन्त—See X.90.7. आसन्—√*as* to be impf. 3rd. plu. सचन्त—√*sac* to accompany, imfpf. 3rd. plu. not augmented.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'किमिच्छन्ती' इत्येकादशर्चं नवमं सूक्तं त्रैष्टुभम् ऐन्द्रपुरोहितस्य बृहस्पतेर्गोषु वलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पति-प्रेरितेनेन्द्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं नदीमुत्तीर्य वलपुरं प्राप्य गुप्तस्थाने नीतस्ता गा ददर्श। अथ तस्मिन्नन्तरे पणय इदं वृतान्तमवगच्छन्त एनां मित्रीकर्तुं संवादमकुर्वन्। तत्र प्रथमातृतीयाद्या अयुजोऽन्त्यावर्जिताः पणीनां वाक्यानि। अत्र त ऋषयः सरमा देवता। द्वितीया-चतुर्थ्याद्या युज एकादशी च षट् सरमाया वाक्यानि। अतस्तासु र्षिः पणयो देवता। तथा चानुक्रान्तं —'किमिच्छन्ती पणिभिरसुरैर्निगूळ्हा गा अन्वेष्टुं सरमां देवशुनिमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुः सा तान्युग्मान्त्याभिरनि-च्छन्ती प्रत्याचष्टे इति। गतो विनियोगः॥

किम्। इच्छन्ती। सरमा। प्र। इदम्। आनट्। दूरे। हि। अध्वा। जगुरिः। पराचैः॥ का। अस्मेऽहितिः। का। परिऽत-क्म्या। आसीत्। कथम्। रसायाः। अतरः। पयांसि॥१॥

सा० भा० – अनयागच्छन्तीं सरमां दृष्ट्वा पणयो वदन्ति। सरमा शरणशीलैतन्नामिका देवशुनी किमिच्छन्ती किं प्रार्थयमाना सती इदं अस्मदीयं स्थानं प्र आनट् प्राप्नोत्। आङ्पूर्वो नशि व्याप्तिकर्मा। तस्य लुङि 'मन्त्रे घस' इत्यादिना च्लेर्लुक्। छन्दस्यपि दृश्यत इत्याडागमः। पराचैः पराञ्चि पराङ्मुखान्यावृत्ति वर्जितानि यानि गमनानि तैः जगुरिः उद्गूर्णः। महता प्रयत्नेनापि गन्तुं न शक्यत इत्यर्थः। 'गृ निगरणे'। 'आदृगमहन' इत्यादिना किन्प्रत्ययः। 'बहुलं छन्दसि' (पा० सू० ७. १. १०३) इत्युत्वम्। तादृशो-ऽयम् अध्वा दूरे हि विप्रकृष्टः खलु। यद्वा। पराचैः पराञ्चनैर्जगुरिरत्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति। दूरेऽयमध्वा यदृच्छया गन्तुं न शक्यते। अतो वयमेतां पृच्छामः। हे सरमे का कीदृशी अस्मेहितिः। कोऽस्मास्वर्थहितिः। कोऽस्मासु त्वदपेक्षितार्थो निहितः। यद्वा। अस्मासु कोऽर्थो गतः दधातेर्हिनोतेर्वा क्तिनो रूपम्। आगच्छन्त्यास्तव का कीदृशी परितक्म्या रात्रिः आसीत्। यद्वा। तकतिर्गत्यर्थः। परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत्। कथं च रसायाः शब्दायमानाया अन्तरिक्षनद्या योजनशतविस्ती

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्णायाः पयांसि उदकानि अतरः तीर्णवत्यसि । एतद्वद । 'अत्र किमिच्छन्ती सरमेदं प्रानट्' (निरु० ११.२५) इत्यादिकं निरुक्तं द्रष्टव्यम् ॥

शब्दा० किम्=क्या, इच्छन्ती=इच्छा करती हुई, सरमा=सरमा नाम की देवशुनी जिसे इन्द्र ने दूती बनाकर पणियों के पास भेजा था, इदम्=यहाँ, प्र आनट्=आई है, दूरे=दूर, हि=क्योंकि, अध्वा=मार्ग, जगुरि=उभड़ा हुआ, पराचैः=गमनागमन से रहित, का=कौन सा, अस्मेहिति=हममें तुम्हारा अभिप्रेत अर्थ निहित है, का=कैसी, परितक्म्या=यात्रा, आसीत्=थी, कथम्=किस प्रकार, रसायाः=रसा नामक नदी के, अतरः=पार किया, पयांसि=जल को ।

हि० अ० – क्या इच्छा करती हुई सरमा इस स्थान पर पहुंची है; क्योंकि मार्ग बहुत दूर, उभड़ा हुआ तथा गमनागमन से रहित था । हममें तुम्हारा कौन सा अभिप्रेत अर्थ निहित है ? तुम्हारी यात्रा कैसी थी ? रसा के जल को तुमने कैसे पार किया ?

Trans.—Desiring what Saramā has attained this place, for the path is far away, protuberant, devoid of going; what (your desired) is placed in us? How was the journey? How did you cross the waters of the Rasā.

Notes.—इच्छन्ती –√*icch* to desire, pres. part. fem. nom. sing. आनट् –√*naś* to attain, root-aorist, 3rd. sing. जगुरिः—Sāyaṇa derives it from √*gṛ* to swallow with the Suffix किन्, while Yāska followed by Grassmann from √*gā* or √*gam* to go. Oldenberg derives it from √*jṛ* or *jur* to waste away, protuberant i.e. 'not fit to travel on' (Sāyaṇa), 'losing itself or causing one to be lost or ingulfed' (Geldner), 'wearying', 'exhausting' (Oldenberg), 'engulfing' (Peterson). पराचैः—Instr. plu. of पराच. Sāyaṇa derives it from अञ्च with परा. का अस्मेहिति –हिति is derived from √*dhā* to put or √*hi* to impel, with the suffix क्तिन्; 'what (your desired) is placed in us' (Sāyaṇa), 'what charges hast thou for

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

us' (Griffith). 'what is the message (placed) for us' (Peterson). परितक्म्या —See परितक्म्यायाम् (I. 116.15). रसायाः —According to Sāyaṇa it is a river of middle region, hundred yojana wide. Griffith takes it to refer here a mythical stream that flows around the atmosphere and the earth. Some suggest it to be a river of Panjab, probably an affluent of Indus.

इन्द्रस्य । दूतीः । इषिता । चरामि । महः । इच्छन्ती । पणयः । निऽधीन् । वः ॥ अतिऽस्कदः । भियसा । तत् । नः । आवत् । तथा । रसायाः । अतरम् । पयांसि ॥२॥

सा० भा०—अनया तान् सरमा प्रत्युवाच । हे पणयः एतन्नामका असुराः इन्द्रस्य दूतीः । 'सुपां सुलुक्' इति प्रथमैकवचनस्य सुश्छान्दसः । अहम् इषिता तेनैव प्रेषिता सती चरामि । युष्मदीयं स्थानमागच्छामि । किमर्थम् । वः युष्मदीयान् युष्मदीये पर्वतेऽधिष्ठापितान् महः महतः निधीन् बृहस्पतेर्गोनिधीन् इच्छन्ती कामयमाना सती चरामि । किंच अतिष्कदः । 'स्कन्दिर्गतिशोषणयोः' । भावे क्विप् । अतिष्कन्दनादतिक्रमणाज्जातेन भियसा भयेन तत् नदीजलं नः । पूजायां बहुवचनम् । माम् आवत् अरक्षत् । तथा तेन प्रकारेण रसायाः नद्याः पयांसि उदकानि अतरं तीर्णवत्यस्मि ॥

शब्दा० - इन्द्रस्य=इन्द्र की, दूतीः=संदेशवाहिका के रूप में, इषिता =भेजी गई, चरामि=विचरण कर रही हूँ, महः=महान्, इच्छन्ती=इच्छा करती हुई, पणयः=ओ पणि, निधीन्=खजाने को, वः=तुम्हारे, अतिष्कदः =कूदकर पार कर जाने के, भियसा=डर से, तत्=उस रसा के, जल ने, नः =हमारी, आवत्=रक्षा की, तथा=इस प्रकार, रसायाः=रसा के अतरम् =पार किया, पयांसि=जल को ।

हि० अ० - इन्द्र की दूती, उसके द्वारा भेजी गई मैं, ओ पणि, तुम लोगों के महान् धन की इच्छा करती हुई घूम रही हूं । (मेरे) कूदने के भय से उस (रसा के जल) ने मेरी सहायता की; इस प्रकार रसा के जल को मैंने पार किया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—As a messenger of Indra send by him, I wander, O Panis, seeking your great treasure. Through the fear of (my) overleaping, that (the water of Rasā) helped me ; thus, I crossed the waters of the Rasā.

Notes.—इषिता—√*iṣ* to send, past part. fem. चरामि—√*car* to move, pres. 1rst. sing. अतिष्कदः—Abl. infinitive in अस् from √*skand* to leap, governed by the preposition अति; it should be construed with भियसा. Sāyaṇa renders it by 'अतिष्कन्दनादतिक्रमणाज्जातेन भियसा भयेन' (through the fear of overleaping) ; Peterson and Geldner adopt this interpretation. Grassmann followed by Oldenberg renders it by 'as I stood afraid of the leap' ; Griffith translates as 'from the fear of crossing'. तत्—Sāyaṇa takes it for नदीजलं while Geldner as an adverb of time supplying रसा understood as the subject. Peterson takes तत् 'that' to be the subject and according to him, it is a parenthetical conjunction. Griffith takes it to mean 'this'. आवत्—√*av* to protect, impf. 3rd. sing. अतरम्—√*tṛ* to cross, impf. 1rst sing.

कीदृङ् । इन्द्रः । सरमे । का । दृशीका । यस्य । इदम् । दूतीः । असरः । पराकात् ॥ आ । च । गच्छात् । मित्रम् । एन । दधाम । अर्थ । गवाम् । गोऽपतिः । नः । भवाति ॥३॥

सा० भा०—तेषां वाक्यम् । हे सरमे तव स्वामी इन्द्रः कीदृक् । कियत्पराक्रमवान् । का दृशीका । तस्य कीदृशी दृष्टिः । दृष्टिरूपा सेना कियती । यस्य दूतीः दूती त्वम् इदम् अस्मदीयं स्थानं पराकात् अतिदूरात् असरः आगमः । इति तामुक्त्वा इदानीं ते परस्परमाहुः । एषा सरमा आ गच्छात् च आगच्छतु च । गमेर्लेट्यागमः । स्वामी भवाति भवतु । न ह्येकस्या गोः किंतु बहूनां गवां स्वामी भवतु । वृत्त्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—कीदृङ्=कैसा, इन्द्रः=इन्द्र, सरमे=ओ सरमा, का=कैसी, दृशीका=दृष्टि, यस्य=जिसकी, इदम्=यहां, दूतीः=दूती, असरः=आई हो, पराकात्=बहुत दूर से, च=अगर, आगच्छात्=आवे, मित्रम्=मित्र, एन=उसको, दधाम=बनावेंगे, अथ=तब, गवाम्=गायों का, गोपतिः =गायों का स्वामी, नः=हमारी, भवाति=होगा।

हि० अ०—ओ सरमा इन्द्र कैसा है? उसकी दृष्टि कैसी है, जिसकी दूती (तुम) दूर से यहाँ आई हो? अगर वह आवे, हम उसे मित्र बनावेंगे; तब वह हमारी गायों का संरक्षक होगा।

Trans.—O Saramā what like is Indra, what-like his look, whose envoy (you) have come here from afar? If he comes, we shall make him friend; then he will be the lord of our kine.

Notes.—दृशीका—Look; Sāyaṇa takes it to secondarily mean 'army'. Thus according to him, का दृशीका means 'how-much-armied'. Griffith takes it to mean 'what is his aspect'. असरः—√*sṛ* to flow, 'a'-aorist, 2nd. sing. च—Peterson takes it in the sense of चेत्. गच्छात्—√*gam* t go, subju. 3rd. sing.; not unaccented because preceded by च in the sense of चेत्. (निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्—Pāṇ VIII.1.30). एन—Geldner takes it in the sense of अनेन; according to oldenberg एन means 'through him'; Griffith takes it to mean 'him' as the secondary object of दधाम, the primary object being मित्रम्. Grassmann followed by Peterson renders it here by 'then' the correlative of च. दधाम—√*dhā* to put, Subju. 1rst. plu. गोपतिः—Tapuruṣa compd. generally accents the second member, but when the second member is the word पति, it accents the first member (पत्यावैश्वर्ये—Pāṇ. VI. 2.18) भवाति—√*bhū* to be, subju. 3rd. sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न । अहम् । तम् । वेद । दभ्यम् । दभत् । सः । यस्य । इदम् । दूतीः । असरम् । पराकात् ॥ न । तम् । गूहन्ति । स्रवतः । गभीराः । हताः । इन्द्रेण । पणयः । शयध्वे ॥४॥

सा० भा०—सरमा वदति । हे पणयः तम् इन्द्रं दभ्यं हन्तव्यमिति न वेद न जानामि । दभेः अचो यत् । कथम् । सः इन्द्रः दभत् सर्वान् जनान् दभति हिनस्त्येव । दभेर्लेटिरूपम् वाक्यभेदादनिघातः । यस्य दूतीः दूती अहम् इदं युष्मदीयं स्थानं पराकात् अतिदूराद्देशात् असरं प्राप्ताभूवम् । इन्द्रो हिंसितव्यो न भवतीत्यत्र युक्तिमाह । स्रवतः । स्रवणं स्रवः । तमाचरन्ति । आचारार्थे क्विप् । तुगागमः । जसिरूपम् । स्रवणशीलाः गभीराः गम्भीराः नद्यः तम् इन्द्रं न गूहन्ति न संवृण्वन्ति । नाच्छादयन्ति । किंत्वाविष्कुर्वन्ति । वयं यस्य महिम्ना समुद्रं प्रतिसरामः । तस्मादहिंस्य इत्येनं प्रकटीकुर्वन्ति । 'गुहू संवरणे' । भौवादिकः । तस्माद्धे पणयः यूयम् इन्द्रेण तादृशपराक्रमेण हताः सन्तः शयध्वे । 'शीङ् स्वप्ने' । 'बहुलं छन्दसि' इति शपो लुगभाव ॥

शब्दा०—न=नहीं, अहम्=मै, तम्=उसको, वेद=जानती हूँ, दभ्यम्=कष्ट पहुँचाया जानेवाला, दभत्=कष्ट पहुँचाता है, सः=वह, यस्य=जिसकी, इदम्=यहाँ, दूतीः=दूती, असरम्=आई हूँ, पराकात्=बहुत दूर से, न=नहीं, तम्=उसको, गूहन्ति=छिपा सकती हैं, स्रवतः=बहती हुई, गभीराः=गहरी जलवाली नदियाँ, हताः=मारा जाकर, इन्द्रेण=इन्द्र के द्वारा, पणयः=ओ पणि, शयध्वे=पड़ जावोगे ।

हि० अ०—मै उसको कष्ट पहुँचाया जानेवाला नहीं समझती, वह कष्ट देता है, जिसकी दूती मै बहुत दूर से यहाँ आई हूँ । बहती हुई गहरी जल वाली नदियाँ उसको छिपा नहीं सकती; इन्द्र द्वारा मारा जाकर तुम लोग, ओ पणि, (पृथिवी पर) पड़ जावोगे ।

Trans.—I know him not to be harmed, (but) he harms (others), whose envoy I have come here from afar. The deep rivers flowing cannot conceal him ; killed by Indra (you will) lie (on the ground), O Paṇis.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—वेद— √*vid* to know, perf. 1rst. sing. दभ्यम्— √*dabha* to harm, with the suffix यत्. दभत्— √*dabh* to harm, injun. 3rd. sing.; not unaccented because it begins a new sentence. गूहन्ति— √*guh* to hide, pres. 3rd. plu. स्रवतः—From √*sṛ* to flow, with the suffix क्विप्. हताः— √*han* to kill, past part. plu. शयध्वे— √*śī* to lie, (I. conju.) pres. mid. 2nd. plu.

इमाः । गावः । सरमे । याः । ऐच्छः । परि । दिवः । अन्तान् । सुऽभगे । पतन्ती ॥ कः । ते । एनाः । अव । सृजात् । अयुध्वी । उत । अस्माकम् । आयुधा । सन्ति । तिग्मा ॥५॥

सा० भा०—क्रुद्धाः पणयः प्रत्यूचुः । हे सुभगे शोभनसौभाग्यवति हे सरमे दिवः द्युलोकस्य अन्तान् पर्यन्तान् परि पतन्ती कुत्र गावस्तिष्ठन्तीति परितो गच्छन्ती त्वम् इमाः परिदृश्यमानाः याः गावः । सुब्व्यत्ययः । गाः ऐच्छः कामयसे ताः एनाः गाः ते त्वदीयः कः अयुध्वी अयुद्ध्वा अव सृजात् । अस्मात् पर्वतादवसृजेत् । विनिर्गमयेत् । सृजेर्लेटि रूपम् । अयुध्वी । युधेः क्त्वाप्रत्यये 'स्नात्व्यादयश्च' इति निपातितः । नञ्समासत्वाल्ल्यबादेशाभावः । नञः प्रकृतिस्वरत्वम् । उत अपि च अस्माकं तिग्मा तीक्ष्णानि आयुधा आयुधानि सन्ति । तस्मादस्माभिर्युद्धमकृत्वा को वा गा आहरति ॥

शब्दा०—इमाः=इन, गावः=गायों को, सरमे=ओ सरमा, याः=जिनकी, ऐच्छः=इच्छा की है, दिवः=आकाश के, अन्तान्=छोर तक, सुभगे=ओ कल्याणकारी, परिपतन्ती=चारों तरफ घूमती हुई, कः=कौन, ते=तुममें, एनाः=इनको, अवसृजात्=मुक्त कर सकता है, अयुध्वी=बिना युद्ध किये, उत=और, अस्माकम्=हमारे, आयुधा=शस्त्र, सन्ति=हैं, तिग्मा=तीक्ष्ण ।

हि० अ०—ओ सरमा, आकाश की छोर तक चारों तरफ घूमती हुई इन गायों को, जिनकी तुमने इच्छा की है, ओ कल्याणकारी, बिना युद्ध किये तुममें कौन मुक्त कर सकता है ? और हमारे शस्त्र भी तीक्ष्ण हैं ।

Trans.—O Saramā, these kine, wandering about

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

to the extremities of heaven, which you have desired, O auspicious one, who will make them free without fighting ? And our weapons are sharpened.

Notes—ऐच्छः— √*icch* to desire, impf. 2nd. sing. ; not unaccented because preceded by याः. अवसृजात् —√*srj* with अव to set free, subju. 3rd. sing. अयुध्वी— √*yudh* to fight gerund in त्वी, old form of त्वा; नञ्, compd. accented on the first member.

असेन्या । वः । पणयः । वचांसि । अनिषव्याः । तन्वः । सन्तु । पापीः ॥ अधृष्टः । वः । एतवै । अस्तु । पन्थाः । बृहस्पतिः । वः । उभया । न । मृळात् ॥६॥

सा० भा०—सा तान्निराह । हे पणयः वः युष्माकं वचांसि पूर्वोक्तानि वचनानि असेन्या असेन्यानि । सेनार्हाणि न भवन्ति । सेनाशब्दात् तदर्हतीत्यर्थे 'छन्दसि च' इति यत्प्रत्ययः । नञा समासः । 'ययतोश्चातदर्थे' (पा० सू० ६. २. १५६) इत्युत्तरपदान्तोदात्तत्वम् । तथा तन्वः युष्मदीयानि शरीराणि अनिषव्याः इष्वर्हाणि न सन्तु पराक्रमराहित्येन । पूर्ववत् प्रत्ययः । 'ओर्गुणः' (पा० सू० ६. ४. १४६) इति गुणः । स्वरश्च तादृक् । यतः पापीः पापयुक्तानि खलु । 'छन्दसीवनिपौ' इतीप्रत्ययः । जसः सु । किंच वः युष्मदीयः पन्थाः मार्गः एतवै गन्तुम् अधृष्टः असमर्थः अस्तु । 'इण् गतौ' इत्यस्य तुमर्थे तवैप्रत्ययः । 'तवै चान्तश्च युगपत्' (पा० सू० ६. २. ५१) इति धातोः प्रत्ययस्य च युगपदुदात्तत्वम् । तत्र हेतुमाह । वः युष्मदीयान् उभया उभयविधान् पूर्वोक्तांस्तन्वो देहान् बृहस्पतिः इन्द्रप्रेरितः न मृळात् न सुखयेत् । किंतु बाधेत । 'मृड सुखने' । लेट्यागमः ॥

शब्दा०—असेन्या=शस्त्र के आघात से सुरक्षित, वः=तुम्हारे, पणयः=ओ पणि, वचांसि=वचन, अनिषव्याः=बाणों के निशान से सुरक्षित, तन्वः=शरीर, सन्तु=हो सकते हैं, पापीः=पापाचरण करनेवाले, अधृष्टः=अगम्य, वः=तुम्हारे पास, एतवै=जाने के लिये, अस्तु=हो सकता है, पन्थाः=मार्ग, बृहस्पतिः=बृहस्पति देवता, वः=तुम लोगों पर उभया=दोनों प्रकार से, न=नहीं, मृळात्=दया करेंगे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—ओ पणि, तुम्हारे वचन शस्त्र के आघात से सुरक्षित, तथा पापी शरीर बाणों के निशान से बचनेवाले हो सकते हैं; तुम्हारे पास पहुँचने के लिये मार्ग अगम्य हो सकता है; किन्तु किसी (भी) प्रकार से बृहस्पति दया नहीं करेंगे।

Trans.—O Pains, your speeches (may be) not to be wounded, your sinful bodies (may be) not to be killed with arrows; the path may be invincible to reach you; but in neither way Bṛhaspati will show you mercy.

Notes—असेन्या—A तद्धित word derived from सेना with the suffix यत्; नञ् compd. generally accents the first member but it also accents the second member when the second member is a तद्धित word, negating the quality (ययतोश्चातदर्थे—Pāṇ VI. 2.156). 'Proof against darts' (Oldenberg), 'ready with weapons' (Grassmann), 'unsoldierly or not inimical' (Geldner), 'immune from (the blows of) weapons' (Peterson), 'weak for wounding' (Griffith). अनिषव्याः—Not to be killed with arows; grammatical construction is the same as असेन्या. सन्तु—√*as* to be, impv. 3rd. plu. अधृष्टः—√*dhṛṣ* to dare, past part. नञ् compd. accented on the first member; 'invincible, 'unmastered '(Griffith) unmolested (Peterson). एतवै—Dative infinitive in तवै from √*i* to go; the infinitive in तवै accents the root and the suffix (अन्तश्च तवै युगयत्—Pāṇ. VI. 1.200).

अयम् । निऽधिः । सरमे । अद्रिऽबुध्नः । गोभिः । अश्वेभिः । वसुऽभिः । निऽऋष्टः ॥ रक्षन्ति । तम् । पणयः । ये । सुऽगोपाः । रेकु । पदम् । अलकम् । आ । जगन्थ ॥७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—ते पुनराहुः। हे सरमे अयं निधिः अस्मदीयः कोशः अद्रिबुध्नः। 'बन्ध बन्धने'। 'बन्धेर्ब्रधिबुधी च' (उ० सू० ३. ५) इति नप्रत्ययो बुध इत्यादेशः अद्रिबन्धको यस्य तादृशः। तथा आहृतैः गोभिरश्वेभिः अश्वैश्च वसुभिः आत्मीयैर्धनैश्च न्यृष्टः नितरां प्राप्तो भवति। 'ऋषी गतौ'। क्तप्रत्यये 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुगोपाः 'गुपू रक्षणे'। आयप्रत्ययान्तात् क्विपि अतोलोपयलोपौ। सुष्ठु गोपायितारः ये पणयः तेऽसुराः तं निधिं रक्षन्ति पालयन्ति। रेकु। 'रेकृ शङ्कायाम्' औणादिक उप्रत्ययः। शङ्कितं गोभिः शब्दायमानं पदम् अस्माभिः पालितं स्थानम् अलकं व्यर्थमेव आ जगन्थ आगतवत्यसि। गमेर्लिटि रूपम्॥

शब्दा०—अयम्=यह, निधिः=खजाना, सरमे=ओ सरमा, अद्रिबुध्नः=पर्वतों से ढका हुआ है, गोभिः=गायों से, अश्वेभिः=अश्वों से, वसुभिः=संपदाओं से, न्यृष्टः=भरा हुआ है, रक्षन्ति=रक्षा करते हैं, तम्=उसको, पणयः=पणि, ये=जो, सुगोपाः=कुशल रक्षक, रेकु=रिक्त, पदम्=स्थान पर, अलकम्=व्यर्थ में, आ जगन्थ=आई हो।

हि० अ०—ओ सरमा, यह खजाना पर्वतों से ढका हुआ है, गायों, अश्वों तथा संपदाओं से भरा हुआ है। पणि जो कुशल रक्षक है, इसकी रक्षा करते हैं; तुम व्यर्थ में इस खाली स्थान पर आई हो।

Trans.—O Sarama, this treasure is paved with the rock and is fully rushed with cows, horses and riches. Paṇis who are excellent protectors guard it; you have come to an empty place in vain.

Notes—अद्रिबुध्नः—Sāyaṇa derives बुध्नः from √*bandh* to bind and takes अद्रिबुध्नः to mean 'bound with the rock'. Griffith takes it to mean 'paved with the rock' and Peterson as 'founded on the rock'. Bahuvrīhi compd. accented on the first member. न्यृष्टः—√*ṛṣ* to rush, past part. रक्षन्ति—√*rakṣ* to guard, pres. 3rd. plu. रेकु—Sāyaṇa derives it from √*rek* to suspect, to doubt, with the suffix उ; MWD. derives it from √*ric* to leave. रेकु पदम् is a Sanskrit idiom to express empty

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

or fruitless place. अलकम् —In vain : the root is √*al* to avoid. आजगन्थ—√*gam* to go, perf. 2nd. sing.

आ । इह । गमन् । ऋषयः । सोमऽशिताः । अयास्यः । अङ्गिरसः । नवऽग्वाः ॥ ते । एतम् । ऊर्वम् । वि । भजन्त । गोनाम् । अथ । एतत् । वचः । पणयः । वमन् । इत् ॥८॥

सा० भा०—सरमा पुनः प्रत्युवाच । हे पणयः सोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः । 'शिञ् निशाने' । कर्मणि क्तप्रत्ययः । 'तृतीयाकर्मणि इति पूर्वपदप्रकृतिस्वरत्वम् । तादृशाः नवग्वाः नवगतयः । यद्वा । अङ्गिरसां सत्रमासीनानां मध्ये केचन नवसु माः सूदितिष्ठन् ते नवग्वाः । अनेन दशग्वा अप्युपलक्ष्यन्ते । उभयविधास्ते अङ्गिरसः ऋषयः तेषां प्रथमः अयास्यः एतन्नामा च त एते इह युष्मदीये स्थाने आ गमन् आगच्छेयुः । गमेः 'छन्दसि लुङ्लङ्लिट्' इति सार्वकालिको लुङ् । लृदित्वाच्च्लेरङ् । आगत्य च ते गोनाम् । 'गोः पादान्ते' इति छन्दसि नुडागमः । गवाम् ऊर्वं तं समूहं वि भजन्त विभागं कुर्युः । अत्रापि पूर्ववत् सार्वकालिको लुङ् । अथ अनन्तरं पणयः यूयम् एतद्वचः पूर्वं यत् व्यर्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदा वमन्नित् वमन्तः परित्यजन्तः एव भवथ । 'वमु उद्गिरणे' । शतरि 'सुपां सुलुक्' इति जसो लुक् । नुमागमः । संयोगान्तस्य लोपः । यद्वा । लङि रूपम् । स्वरश्छान्दसः ।

शब्दा०—इह=यहाँ, आ गमन्=आयेंगे, ऋषयः=ऋषि, सोमशिताः =सोमपान से उत्तेजित, अयास्यः=अयास्य नामक ऋषि, अङ्गिरसः= अङ्गिरस नामक ऋषि, नवग्वाः=नवग्वा नाम के ऋषि, ते=वे, एतम्=इस, ऊर्वम्=बाड़े को, वि भजन्त=बांट लेंगे, अथ=तब, एतत्=इन, वचः= वचनों को, पणयः=पणियों को, वमन्=उगलना पड़ेगा, इत्=निश्चित अर्थ का वाचक निपात ।

हि० अ०—सोमपान से उत्तेजिति अयास्य, अङ्गिरस, तथा नवग्वा आदि ऋषि यहाँ आयेंगे । वे गायों के इस बाड़े को बांट लेंगे । तब पणियों को अपने इन वचनों को उगलना पड़ेगा ।

Trans.—Here would come the Soma-sharpened seers viz. Ayāsya, Aṅgirases, Navagvā etc. They

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

would divide this stall of kine. Then Paṇis would have to vomit these words.

Notes—गमन् —√*gam* to go, 'a'-aorist. injun. 3rd. plu. सोमशिता—शिता is past part. from√*śā* to sharpen. Sāyaṇa derives it from √*śī* to aim at; Tatpuruṣa compd. accented on the first member (see इन्द्रेषिते III. 33.2) विभजन्त —√*bhaj* with वि to divide, injun. mid. 3rd. plu. गोनाम् —Gen. plu. of गो is गवाम्, but when it occurs at the end of a Pāda it is written as गोनाम् (गोः पादान्ते–Pāṇ. VII. I.57). वमन् √*vam* to vomit, injun. 3rd. plu.; not unaccented because followed by the emphatic particle इत्.

एव । च । त्वम् । सरमे । आऽजगन्थ । प्रऽबाधिता । सहसा । दैव्येन ॥ स्वसारम् । त्वा । कृणवै । मा । पुनः । गाः । अप । ते । गवाम् । सुऽभगे । भजाम ॥९॥

सा० भा० -तयैवमुक्ते सति पणयः प्रणयवाक्यमाहुः । हे सरमे त्वं दैव्येन देव संबन्धिना सहसा बलेन प्रबाधिता यथा तथा बलपुरं प्राप्य तत्र स्थिता गा दृष्ट्वा पुनरागच्छेति तेन प्रपीडिता त्वम् एवं चेत् आजगन्थ आगतवत्यसि । चशब्दश्चेदर्थे । 'निपातैर्यद्यदिहन्त' इति तिङो निघाताभावः । गमेर्लिटि थलि रूपम् 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः । 'तिङि चोदात्तवति' इति गतेर्निघातः लित्स्वरः । तर्हि त्वा त्वां स्वसारं भगिनीं कृणवै करवै । समूहापेक्षयैकवचनम् । त्वं तु पुनः मा गाः । इन्द्रादीन् मा गच्छ । अपि तर्हि हे सुभगे सरमे ते त्वदीयानां गवां समूहं पर्वतादपगमय्य भजाम । त्वं च वयं च विभजाम विभागं करवामेत्यर्थः ।

शब्दा० —एव=इस प्रकार, च=अगर, त्वम्=तुम, सरमे=ओ सरमा, आजगन्थ=आई हो, प्रबाधिता=पीड़ित की गई, सहसा=शक्ति से, दैव्येन=देवताओं की, स्वसारम्=बहन, त्वा=तुमको, कृणवै=बनाते हैं, मा=मत, पुनः=फिर, गाः=जावो, ते=तुमको, गवाम्=गायों का, सुभगे =ओ कल्याणकारी, अव भजाम=अलग हिस्सा देंगे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—इस प्रकार, ओ सरमा, अगर तुम देवताओं की शक्ति से पीड़ित की गई आई हो, हम तुम्हे बहन बनाते हैं, फिर मत जावो। हम, ओ कल्याण कारी, तुम्हे गायों का अलग हिस्सा देंगे।

Trans.—Thus, O Saramā, if you have come pressed by the power of gods, we make you our sister, do not go back; O auspicious one, we give you a separate share of the kine.

Notes—च—It is used in the sense of चेत्. आजगन्थ—See X. 108.7 : not unaccented because preceded by च in the sense of चेत् (see accent on गच्छात् X.108.3). प्रबाधिता—√*bādh* to oppress, past. part. fem. sing.; for accent see निहिताः (I. 24.7). कृणवै—√*kṛ* to make, pres. 1rst. sing. (in the sense of collective.) गाः—√*gā* to go, root-aorist, injun. 2nd. sing. भजाम—√*bhaj* to divide, subju. 1rst. plu.

न। अहम्। वेद। भ्रातृऽत्वम्। नो इति। स्वसृऽत्वम्। इन्द्रः। विदुः। अङ्गिरसः। च। घोराः॥ गोऽकामाः। मे। अच्छदयन्। यत्। आयम्। अप। अतः। इत। पणयः। वरीयः॥१०॥

सा० भा०—सा तान् प्रत्याचष्टे। हे पणयः अहं भ्रातृत्वं न वेद न जानामि। तथा स्वसृत्वं च नो वेद नैव जानामि। के जानन्ति तानाह। इन्द्रः घोराः शत्रूणां भयंकराः अङ्गिरसश्च विदुः जानन्ति। किंच अस्मात् स्थानादहं यत् यदा आयम् इन्द्रादीन् प्राप्नवम्। 'अय पय गतौ'। लङ् रूपम्। तदा मे मदीयाः गोकामाः युष्माभिरपहृता गाः कामयमाना इन्द्रादयः अच्छदयन्। युष्मदीयं स्थानमाच्छादयन्ति। 'छद अपवारणे'। अतः कारणाद् हे पणयः वरीयः उरुतरं गवां वृन्दं परित्यज्य अप इत अन्यत्स्थानं प्रति गच्छत। यद्वा। वरीयः प्रभूतमतिदूरं देशं गच्छत। इत। 'इण गतौ'। लोटि रूपम्। वरीयः उरुशब्दादीयसुनि 'प्रियस्थिर' इत्यादिना वरादेशः॥

शब्दा०—न=नहीं, अहम्=मै, वेद=जानती हूँ, भ्रातृत्वम्=भाईपना, न=न तो, स्वसृत्वम्=बहनपना, इन्द्रः=इन्द्र, विदुः=जानते हैं अङ्गि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसः=अङ्गिरस, च=और, घोराः=भंयकर, गोकामाः=गायों की इच्छा करनेवाले, मे=मुझको, अच्छदयन्=मालूम पड़े, यत्=जब, आयम्=आई, अप=अलग, अतः=इसलिये, इत=चले जावो, पणयः=ओ पणि, वरीयः=किसी विस्तृत स्थान पर।

हि० अ०—मैं न तो भाईपना जानती हूँ न बहनपना; इन्द्र तथा भयानक अङ्गिरस इसको जानते हैं। जब मैं आई वे गायों की इच्छा करनेवाले मालूम पड़े। अतः ओ पणि, (इसकी अपेक्षा) किसी विस्तृत स्थान पर चले जावो।

Trans.—I know neither brotherhood nor sisterhood. Indra and terrible Aṅgirases know it. They seemed me cow-longing, when I departed. Therefore, O Panis, go away to a wider place (than this.).

Notes—वेद—See X. 108.4. विदुः—√*vid* to know, perf. 3rd. plu. अच्छदयन् –√*chad* to seem, caus. impf. 3rd. plu. आयम् –√*i* to go, impf. 1rst. sing.; not unaccented because preceded by यत्. अतः—Sāyaṇa followed by Griffith takes it to mean 'therefore' but Peterson as 'than this'. इत—√*i* to go, impv. 2nd. plu. वरीयः—Comparative degree of उरु wide.

दूरम् । इत । पणयः । वरीयः । उत् । गावः । यन्तु । मिनतीः । ऋतेन ॥ बृहस्पतिः । याः । अविन्दत् । निऽगूळ्हाः । सोमः । ग्रावाणः । ऋषयः । च । विप्राः ॥११॥

सा० भा०—हे पणयः यूयं वरीयः उरुतरं दूरं दूरदेशम् इत गच्छत। युष्माभिरपहृताः गावः ऋतेन सत्येन मिनतीः मिनत्यो द्वारस्य पिधायकं पर्वतं हिंसत्यो विदारयन्त्यः उत् यन्तु तस्मादुद्गच्छन्तु। यद्वा। मिनतीः। व्यत्ययेन कर्मणि शतृ। मीयमाना युष्माभिर्बाध्यमानास्ता गावः सुव्यत्ययः। गा ऋतेन स्तुतिभिर्गन्तव्येनेन्द्रेण सहायेन बृहस्पत्यादय उद्यन्तु पर्वतादुद्गमयन्तु। निगूढाः नितरां स्थापिताः याः गाः बृहस्पति अविन्दत् लप्स्यते तथा सोमः तदभिषवकारिणः ग्रावाणः च विप्राः मेधाविनः ऋषयः अङ्गिरसः च लप्स्यन्ते। 'विद्लृ लाभे'। तौदादिकः तस्मात् 'छन्दसि लुङ्लङ्लिटः' इति भविष्यदर्थे लङ्। 'शे मुचादीनाम्' इति नुमागमः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—दूरम्=दूर, इत=चले जावो, पणयः=ओ पणि, वरीयः=विस्तृत स्थान पर, गावः=गायें, उत् यन्तु=बाहर निकलें, मिनती=चट्टानों को तोड़ती हुई, ऋतेन=सत्य नियम के अनुकूल, बृहस्पतिः=बृहस्पति ने, याः=जिनको, अविन्दत्=ढूढ़ निकाला है, निगूळ्हाः=छिपी हुई, सोमः=सोम ने, ग्रावाणः=पत्थरों ने, ऋषयः=ऋषियों ने, च=और, विप्राः=बुद्धिमान ।

हि० अ०—ओ पणि, (इसकी अपेक्षा) किसी विस्तृत स्थान पर चले जावो । छिपी हुई गायें, जिनको बृहस्पति ने पता लगाया है, (जिनको) सोम ने, पत्थरों ने, तथा बुद्धिमान ऋषियों ने (पता लगाया है) (चट्टानों के आवरण को) तोड़ती हुई, सत्य नियम के अनुकूल बाहर निकलें ।

Trans.—O Panis, go to a wider place. Let the hidden cows, which Bṛhaspati has found, and Soma, stones, and the inspired seers (have found) emerge out, breaking (the paving rocks), according to the holy law.

Notes—यन्तु.–√*i* to go, impv. 3rd. plu. मिनतीः—√*mī* to damage, pres. part. nom. plu. This word has variously been interpreted. Grassmann renders it as 'changing place'; Geldner followed by Peterson as 'escaping'; Oldenberg proposes to read मिमती–lowing.; Griffith in his translation adopts this sense. अविन्दत्—√*vid* to find. impv. 3rd. sing.; not unaccented because preceded by याः. निगूळ्हाः—√*guh* to hide, past part.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'हिरण्यगर्भः' इति दशर्चं नवमं सूक्तं प्रजापतिपुत्रस्य हिरण्यगर्भाख्यस्यार्षं त्रैष्टुभम्। कशब्दाभिधेयः प्रजापतिर्देवता। तथा चानुक्रान्तम्—'हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायम्' इति। गतः सूक्तविनियोगः। प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्ततस्तिस्रो याज्याः। सूत्रितं च—हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्याः' (आश्व० श्रौ० ३.८) इति वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भ इत्येषा याज्या। सूत्रितं च—'कया नश्चित्र आ भुवद्धिरण्यगर्भः समवर्तताग्र इति प्रतिप्रस्थाता वाजिने तृतीयः' (आश्व० श्रौ० २.१७) इति ॥

हिरण्यऽगर्भः। सम्। अवर्तत। अग्रे। भूतस्य। जातः। पतिः। एकः। आसीत्॥ सः। दाधार। पृथिवीम्। द्याम्। उत। इमाम्। कस्मै। देवाय। हविषा। विधेम॥१॥

सा० भा०—हिरण्यगर्भः हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः। तथा च तैत्तिरीयकं—'प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय' (तै० सं० ५. ५. १. २) इति। यद्वा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते। अग्रे प्रपञ्चोत्पत्तेः प्राक् समवर्तत। मायाध्यक्षात् सिसृक्षोः परमात्मनः समजायत। यद्यपि परमात्मैव हिरण्यगर्भः तथापि तदुपाधिभूतानां वियदादीनां ब्रह्मण उत्पत्तेस्तदुपहितोऽप्युत्पन्न इत्युच्यते। स च जातः जातमात्र एव एकः अद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः पतिः ईश्वरः आसीत्। न केवलं पतिरासीदेव अपि तर्हि सः हिरण्यगर्भः पृथिवीं विस्तीर्णां द्यां दिवम् उत अपि च इमाम् अस्माभिर्दृश्यमानां पुरोवर्तीनीमिमां भूमिम्। यद्वा पृथिवीत्यन्तरिक्षनाम। अन्तरिक्षं दिवं भूमिं च दाधार धारयति। 'छन्दसि लुङ्लङ्लिटः' इति सार्वकालिको लिट्। तुजादित्वादभ्यासदीर्घः। कस्मै अत्र किंशब्दोऽनिर्ज्ञातस्वरूपत्वात् प्रजापतौ वर्तते। यद्वा सृष्ट्यर्थं कामयत इति कः। कमेर्डप्रत्ययः। यद्वा। कं सुखम्। तद्रूपत्वात् क इत्युच्यते। अथवा इन्द्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदायाहं कः कीदृशः स्यामित्युक्तवान्। स इन्द्रः प्रत्यूचे यदीदं ब्रवीष्यहं कः स्यामिति तदेव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वं भवेति । अतः कारणात् क इति प्रजापतिराख्यायते । 'इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत्' (ऐ० ब्रा० ३. २१) इत्यादिकं ब्राह्मणमत्रानुसंधेयम् । यदासौ किंशब्दस्तदा सर्वनामत्वात् स्मैभावः सिद्धः । यदा तु यौगिकस्तदा व्यत्ययेनेति द्रष्टव्यम् । 'सावेकाचः' इति प्राप्तस्य 'न गोश्वन्सावविवर्णः' इति प्रतिषेधः । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी । कं प्रजापतिं देवाय देवं दानादिगुणयुक्तम् हविषा प्राजापत्यस्य पशोर्वपारूपेणैककपालात्मकेन पुरोडाशेन वा विधेम वयमृत्विजः परिचरेम । विधतिः परिचरणकर्मा ॥

शब्दा०—हिरण्यगर्भः=प्रजापति, समवर्तत=उत्पन्न हुआ, अग्रे=जन्म से ही, भूतस्य=प्राणियों का, जातः=उत्पन्न, पतिः=स्वामी, एकः=एक, आसीत्=था, सः=उसने, दाधार=धारण किया, पृथिवीम्=पृथिवी को, द्याम्=आकाश, उत=और, इमाम्=इन सबको, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ०—हिरण्यगर्भ सबसे प्रथम उत्पन्न हुआ; वह जन्म से ही उत्पन्न प्राणियों का अकेला स्वामी था । उसने पृथिवी, आकाश तथा इन सबको धारण किया । किस देवता का हम हवि से पूजन करें ?

Trans.—Hiraṇyagarbha was produced in the beginning; he was the born sole lord of all beings. He held the earth, the sky and all these. What god should we worship with oblation ?

Notes—हिरण्यगर्भः—According to the traditional view Hiraṇyagarbha is Prajāpati. Some take him to be sun-god: 'as the great power of the universe ,from which all other powers and existences, divine and earthly are derived, a conception which is the nearest approach to the later mystical conception of Brahmā the creator of the world'—wallis. समवर्तत—See X.90.14. दाधार—√*dhṛ* to hold, perf. 3rd. sing.; the reduplicated syllable in दाधार is regularly lengthened. कस्मै—This word has been interpreted variously: Sāyaṇa following the tradition takes the word '*ka*' for Prajāpati. Scholars, generally, interpret it taking as dative sing.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

of the pronominal stem किम्. Now the difficulty is if the word '*ka*' is for Prajāpati it would certainly be a noun and accordingly it would be inflected like words terminating in अ. Thus the dative sing. of 'ka' would be काय like देवाय. Sāyana's reply to this is that '*ka*' is conventional word for Prajapati; but it is irregularly inflected like pronoun. विधेम—√*vidh* to worship, opt. 1rst. plu.

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषम् । यस्य । देवाः ॥ यस्य । छाया । अमृतम् । यस्य । मृत्युः । कस्मै । देवाय । हविषा । विधेम ॥२॥

सा० भा० – यः प्रजापतिः आत्मदाः आत्मनां दाता । आत्मानो हि सर्वे तस्मात् परमात्मन उत्पद्यन्ते । यथाग्नेः सकाशाद्विस्फुलिङ्गा जायन्ते तद्वत् । यद्वा आत्मनां शोधयिता । 'दैप् शोधने' । 'आतो मनिन्' इति विच् । बलदाः बलस्य च दाता शोधयिता वा । यस्य च प्रशिषं प्रकृष्टं शासनमाज्ञां विश्वे सर्वे प्राणिनः उपासते प्रार्थयन्ते सेवन्ते वा । 'शासु अनुशिष्टौ' । 'शास इत्' (पा० सू० ६. ४. ३४) इत्युपधाया इत्वम् । 'शासिवसिघसीनां च' इति षत्वम् । कृदुत्तरपदकृतिस्वरत्वम् । आसेरनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । 'तिङि चोदात्तवति' इति गतिरनुदात्ता तथा देवाः अपि यस्य प्रशासनमुपासते । अपि च अमृतम् अमृतत्वम् । भावप्रधानो निर्देशः । यद्वा । अमृतम् । मरणं नास्त्यस्मिन्नित्यमृतं सुधा । बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । तदपि यस्य प्रजापतेः छाया छायेव वर्ति भवति । मृत्युः यमश्च प्राणापहारी छायेव भवति । तस्मै कस्मै देवाय इत्यादि समानं पूर्वेण हविषा पुरोडाशात्मनेति तु विशेषः ॥

शब्दा० – यः=जो, आत्मदाः=प्राण देनेवाला, बलदाः=बल देनेवाला, यस्य=जिसकी, विश्वे=सम्पूर्ण, उपासते=मानते हैं, प्रशिषम्=आज्ञा, यस्य=जिसकी, देवाः=देवता, यस्य=जिसकी, छाया=प्रतिविम्ब, अमृतम्=अमृत, यस्य=जिसकी, मृत्युः=मृत्यु, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ०—जो प्राण देनेवाला है, बल देनेवाला है, जिसकी आज्ञा सभी मानते हैं, जिसकी (आज्ञा) देवता (भी मानते हैं) जिसकी छाया अमृत है, जिसकी (छाया) मृत्यु (है)। किस देवता का हम हवि से पूजन करें ?

Trans.—Who is the giver of vital breath, giver of strength ; whose commandment all obey, whose, even the gods ; whose shadow is immortality, whose, the death. What god should we worship with oblation ?

Notes—उपासते—√*ās* with उप to worship, to obey, pres. 3rd. plu. ; not unaccented because preceded by यस्य. प्रशिषम्—Derived from √*śās* to preach ; the first syllable of the root has been changed in to इ (शास इत्—Pāṇ, VI. 4.34) and dental स् into cerebral ष् (शासिवसिघसीनां च—Pāṇ. VII.3.60).

यः । प्राणतः । निऽमिषतः । महित्वा । एकः । इत् । राजा । जगतः । बभूव ॥ यः । ईशे । अस्य । द्विऽपदः । चतुःऽपदः । कस्मै । देवाय । हविषा । विधेम ॥३॥

सा० भा०—यः हिरण्यगर्भः प्राणतः प्रश्वसतः । 'अन प्राणने' आदादिकः । 'शतुरनुमः' इति विभक्ते दात्तत्वम् । निमिषतः अक्षिपक्ष्मचलनं कुर्वतः । अत्रापि पूर्ववद्विभक्तिरुदात्ता । जगतः जङ्गमस्य प्राणिजातस्य महित्वा महत्त्वेन । 'सुप्रां सुलुक्' इति तृतीयाया आकारः । माहात्म्येन एक इत् अद्वितीय एव सन् राजा बभूव ईश्वरो भवति । भवतेर्णलि लिति' (पा० सू० ६. १. १९३) इति प्रत्ययात्पूर्वस्योदात्तत्वम् । अस्य परिदृश्यमानस्य द्विपदः पादद्वययुक्तस्य मनुष्यादेः चतुष्पदः गवाश्वादेश्च यः प्रजापतिः ईशे ईष्टे । 'ईश ऐश्वर्ये' । आदादिकोऽनुदात्तेत् । 'लोपस्त आत्मनेपदेषु' इति तलोपः । अनुदात्तेत्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । अस्य । 'ऊडिदम्' इतीदमो विभक्तिरुदात्ता । द्वौ पादौ यस्य स द्विपात् । 'संख्यासुपूर्वस्य' (पा० सू० ५. ४. १४०) इति पादस्यान्त्यलोपः समासान्तः । भसंज्ञायां 'पादः पत्' (पा० सू० ६. ४. १३०) इति पद्भावः 'द्वित्रीभ्यां पाद्दन्' (पा० सू० ६. २. १९७) इत्येकदेशविकृतस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नन्यत्वादुत्तरपदान्तोदात्तत्वम् । स्वरवर्जमेषैव चतुष्पद इत्यत्रापि प्रक्रिया । 'बहुव्रीहौ प्रकृत्या' इति पूर्वपदप्रकृतिस्वरः । पूर्वपदस्य 'नृः संख्यायाः' (फि०सू० २. ५) इत्याद्युदात्तत्वम् । 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्जनीयस्य षत्वम् । ईदृशो यः प्रजापतिस्तस्मै कस्मै इत्यादि सुबोधं हविषा हृदयाद्यात्मनेत्ययमत्र विशेषः ॥

शब्दा०—यः=जो, प्राणतः=श्वांस लेनेवाले, निमिषतः=पलक मारनेवाले, महित्वा=महिमा से, एकः=अकेले, इत्=ही, राजा=शासक, जगतः=जंगमों का, बभूव=हुआ है, यः=जो, ईशे=शासन करता है, अस्य=इस, द्विपदः=दो पैरवाले का, चतुष्पदः=चार पैरवाले का, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ०—जो अपनी महानता से श्वाँस लेनेवाले तथा पलक मारनेवाले जंगमों का अकेला राजा हुआ है; जो इस दो पैरवाले तथा चार पैरवाले का शासन करता है । किस देवता का हमलोग हवि से पूजन करें ?

Trans.—Who through his grandeur, became the sole king of all the moving world that breathes and winks ; who masters over these bipeds and quadrupeds. What god should we worship with oblation ?

Notes—प्राणत :—√*an* with प्र to breathe, pres. part. gen. sing. निमिषतः—√*miṣ* with नि to wink, pres. part. gen. sing. ; words with the suffix शतृ terminating in अन् accent the termination (शतुरनुमो नद्यजादी—Pāṇ. VI. 1.173). बभूव—√*bhū* to be, perf. 3rd. sing. ; not unaccented because syntactically connected with यः. ईशे—√*īś* to be master, pres. 3rd. sing. ; त् has been dropped in the mid. (लोपस्त आत्मनेपदेषु—Pāṇ. VII. 1.41) ; not unaccented because preceded by यः. अस्य–Not unaccented because its substantive द्विपदः immediately follows in the same Pāda. (ऊडिदम्-Pāṇ VI. 1.171). द्विपदः—The word पाद as the second member of the compd. loses its final syllable when preceded by any numerals or सु as the first member (संख्यासुपूर्वस्य—Pāṇ. V.4.140), and

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

again पाद् becomes पत् (पादः पत् —Pāṇ. VI. 4. 130) ; in the Bahuvrīhi compd. when the word पात् occurs as the second member, and numerals, two, three etc. as the first member, the second member is accented (द्वित्रिभ्यां पाद्दन्मूर्धसुबहुव्रीहौ —Pāṇ. VI. 2. 197). चतुष्पदः— Grammatical construction is the same as द्विपदः; but it is accented on the first member according to the original nature of Bahuvrīhi.

यस्य॑ । इ॒मे । हि॒मऽव॑न्तः । म॒हि॒ऽत्वा । यस्य॑ । स॒मु॒द्रम् । र॒सया॑ । स॒ह । आ॒हुः ॥ यस्य॑ । इ॒माः । प्र॒ऽदिशः॑ । यस्य॑ । बा॒हू इति॑ । कस्मै॑ । दे॒वाय॑ । ह॒विषा॑ । विधेम ॥४॥

सा० भा०—हिमा अस्मिन् सन्तीति हिमवान् । तेन बहुवचनान्तेन सर्वे पर्वता लक्ष्यन्ते । यथा छत्रिणो गच्छन्तीति । हिमवन्तः हिमवदुपलक्षिताः इमे दृश्यमानाः सर्वे पर्वताः यस्य प्रजापतेः महित्वा महत्त्वं माहात्म्यमैश्वर्यमिति आहुः । तेन सृष्टत्वात्तद्रूपेणावस्थानाद्वा । तथा रसया । रसो जलम् । तद्वती रसा नदी । अर्शआदित्वादच् । जातावेकवचनम् रसाभिर्नदीभिः सह समुद्रम् । पूर्ववदेकवचनम् । सर्वान् समुद्रान् यस्य महाभाग्यमिति आहुः कथयन्ति सृष्ट्यभिज्ञाः । यस्य च इमाः प्रदिशः प्राच्यारम्भा आग्नेयाद्याः कोणदिश ईशितव्याः । तथा बाहू । वचनव्यत्ययः । बाहवो भुजाः । भुजवत्प्राधान्ययुक्ताः प्रदिशश्च यस्य स्वभूताः । तस्मै कस्मै इत्यादि समानं पूर्वेण ॥

शब्दा०—यस्य=जिसकी, इमे=ये, हिमवन्तः=पर्वत, महित्वा=महिमा, यस्य=जिसकी, समुद्रम्=समुद्र को, रसया=रसा के, सह=साथ, आहुः=कहते हैं, यस्य=जिसकी, इमाः=ये, प्रदिशः=दिशायें, यस्य=जिसकी, बाहू=भुजायें, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ०—जिसकी महिमा ये पर्वत, जिसकी (महिमा) रसा सहित समुद्र (ऐसा वे) कहते हैं; जिसकी ये दिशायें, जिसकी भुजायें (उप दिशाय) हैं । किस देवता का हमलोग हवि से पूजन करें ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Whose grandeur the snowy mountains, whose the aceans with the Rasā (they) say; whose these quarters, whose the arms (mid-quarters). What god should we worship with oblation ?

Notes—आहुः—√*ah* to say. perf. 3rd. plu.

येन । द्यौः । उग्रा । पृथिवी । च । दृळ्हा । येन । स्व ऽ रिति स्वः । स्तभितम् । येन । नाकः ॥ यः । अन्तरिक्षे । रजसः । विऽमानः । कस्मै । देवाय । हविषा । विधेम ॥५॥

सा० भा०—येन प्रजापतिना द्यौः अन्तरिक्षम् उग्रा उद्गूर्णं विशेषा गहनरूपं वा । पृथिवी भूमिः च दृळ्हा येन स्थिरीकृता । स्वः स्वर्गश्च येन स्तभितं स्तब्धं कृतम् । यथाधो न पतति तथोपरि अवस्थापितमित्यर्थः । 'ग्रसितस्कभितस्तभित' इति निपात्यते । तथा नाकः आदित्यश्च येन अन्तरिक्षे स्तभितः । यः च अन्तरिक्षे रजसः उदकस्य विमानः निर्माता । तस्मै कस्मै इत्यादि गतम् ॥

शब्दा०—येन=जिससे, द्यौः=आकाश, उग्रा=शक्तिशाली, पृथिवी =पृथिवी, च=और, दृळ्हा=स्थिर, येन=जिससे, स्वः=प्रकाशलोक, स्तभितम्=स्थिर रुका है, येन=जिसके द्वारा, नाकः=सूर्य, यः=जो, अन्तरिक्षे=अन्तरिक्ष में, रजसः=लोकों को, विमानः=नाप रहा है, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ०—जिसके द्वारा द्युलोक शक्तिशाली है, तथा पृथिवी स्थिर है; जिसके द्वारा प्रकाशलोक स्थिर रुका है, तथा जिसके द्वारा सूर्य (रुका है); जो अन्तरिक्ष में लोकों को नाप रहा है । किस देवता का हमलोग हवि से पूजन करें ?

Trans.—By whom the sky is strong and earth is fixed fast; by whom the region of light is propped, by whom the sun; who in the mid-air is measuring the regions. What god should we worship with oblation ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—स्वः—See Appendix-'B' under rules of rendering Saṁhitā-text into Pada-text (5. ii n). स्तभितम्—√*stabh* to prop, past part. रजसः—'Water' (Sāyaṇa), 'regions' (Griffith). विमानः—√*mā* to measure, root-aorist part.

यम् । क्रन्दसी इति । अवसा । तस्तभाने इति । अभि । ऐक्षेताम् । मनसा । रेजमाने इति ॥ यत्र । अधि । सूरः । उत्ऽइतः । विऽभाति । कस्मै । देवाय । हविषा । विधेम ॥६॥

सा० भा०—क्रन्दितवान् रोदितवाननयोः प्रजापतिरिति क्रन्दसी द्यावापृथिव्यौ । श्रूयते हि—'यदरोदीत्तदनयो रोदस्त्वम्' (तै० ब्रा० २.२.९.४) इति । ते अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं तस्तभाने प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्या अभ्यैक्षेताम् आवयोर्महत्त्वमनेन इत्यभ्यपश्येताम् । 'ईक्ष दर्शने' । लङि अडादित्वादाद्युदात्तः । कीदृश्यौ द्यावापृथिव्यौ । रेजमाने राजमाने दीप्यमाने । आकारस्य व्यत्ययेनैत्वम् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वा । लिटः कानच् । 'फणां च सप्तानाम्' (पा०सू० ६.४.१२५) इत्येत्वाभ्यासलोपौ । 'छन्दस्युभयथा' इति सार्वधातुकत्वाच्छप् । अत एव 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । यत्राधि यस्मिन्नाधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्तः सन् विभाति प्रकाशते । उत्पूर्वादितेः कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् तस्मै कस्मै इत्यादि सुज्ञानम् ॥

शब्दा०—यम्=जिसको, क्रन्दसी=आकाश तथा पृथिवी, अवसा=रक्षा के लिये, तस्तभाने=स्थिर किये गये, अभि ऐक्षेताम्=देखते हैं, मनसा=मन से, रेजमाने=चमकते हुये, यत्र=जहां, अधि=पर, सूरः=सूर्य, उदितः=निकला हुआ, विभाति=चमकता है, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ०—(प्राणियों की) रक्षा के लिये स्थिर किये गये आकाश तथा पृथिवी चमकते हुये, मन से जिसको देखते हैं; जहां पर उदय हुआ सूर्य चमकता है । किस देवता का हमलोग हवि से पूजन करें ?

Trans.—Whom heaven and earth, propped

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(with a view) to protect (the beings), shining, look with their mind; whereupon the risen sun shines. What god should we worship with oblation ?

Notes—तस्तभाने—√*stabh* to prop. perf. part. nom. dual; final ए is Pragṛhya. अभ्यैक्षेताम्—√*īkṣ* to see impf. 3rd. dual; not unaccented because syntactically connected with यम्. रेजमाने—√*rej* to tremble, pres. part. nom. dual; final ए is Pragṛhya. Sāyaṇa takes रेजमाने as राजमाने. According to him, आ in राज irregularly has become ए and is accented He also conjectures that originally it should be रराजमाने the reduplicated syllable being dropped (फणां च सप्तानाम्—Pāṇ. VI. 4. 125). Then dropping of reduplicated syllable is indicated by changing आ into ए which being indication of redupicated syllable is accented (अभ्यस्तानामादिः—Pāṇ. VI. 1.189). उदितः—√*i* with उत् to rise, past part. विभाति—√*bhā* to shine, pres. 3rd. sing.; not unaccented because preceded by यत्र.

आपः । ह । यत् । बृहतीः । विश्वम् । आयन् । गर्भम् । दधानाः । जनयन्तीः । अग्निम् ॥ ततः । देवानाम् । सम् । अवर्तत । असुः । एकः । कस्मै । देवाय । हविषा । विधेम ॥७॥

सा० भा० बृहतीः बृहत्यो महत्यः । जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । 'बृहन्महतोरुपसंख्यानम् इति ङीप उदात्तत्वम् । अग्निम् । उपलक्षणमेतत् । अग्न्युपलक्षितं सर्वं वियदादिभूतजातं जनयन्तीः जनयन्त्यः तदर्थं गर्भं हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्यः आपो ह आप एव विश्वमायन् सर्वं जगत् व्याप्नुवन् यत् यस्मात् ततः तस्माद्धेतोः देवानां देवादीनां सर्वेषां प्राणिनाम् असुः प्राणभूतः एकः प्रजापतिः समवर्तत समजायत । यद्वा । यत् यं गर्भं दधाना आपो विश्वात्मनावस्थिताः ततो गर्भभूतात्प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत । अथवा । यत् । लिङ्ग-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वचनयोर्व्यत्ययः । उक्तलक्षणा या आपो विश्वमावृत्य स्थिताः ततस्ताभ्योऽद्भ्यः सकाशादेकोऽद्वितीयोऽसुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम । तस्मै कस्मै इत्यादि गतम् ॥

शब्दा० – आपः=जल ने, ह=निश्चित अर्थ का वाचक निपात, यत्=जिस, बृहतीः=महान्, विश्वम्=सम्पूर्ण लोक को, आयम्=व्याप्त किया था, गर्भम्=गर्भ, दधानाः=धारण करते हुये, जनयन्तीः=उत्पन्न करते हुये, अग्निम्=अग्नि को, ततः=उसी से, देवानाम्=देवताओं का, समवर्तत=उत्पन्न हुआ, असुः=प्राण, एकः=एकमात्र, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें ।

हि० अ० – गर्भ धारण करते हुये तथा अग्नि (आदि महाभूतों) को उत्पन्न करते हुये जिस महान् जल ने सम्पूर्ण लोक को व्याप्त किया था, उसी से देवताओं का एकमात्र प्राण (रूप वायु) उत्पन्न हुआ । किस देवता का हमलोग हवि से पूजन करें ?

Trans.—Great waters, which swept over the world bearing the germ and creating the fire (etc.) ; therefrom the sole breath of the gods was produced. What god should we worship with oblation ?

Notes—बृहतीः—√*bṛh* to make big, pres. part. आयन् –√*i* to go impf. 3rd. plu. ; not unaccented because preceded by यत्. दधानाः—√*dhā* to put, pres. part. जनयन्तीः –√*jan* to generate, pres. part. caus. समवर्तत —See X. 90.14.

यः । चित् । आपः । महिना । परिऽअपश्यत् । दक्षम् । दधानाः । जनयन्तीः । यज्ञम् ॥ यः । देवेषु । अधि । देवः । एकः । आसीत् । कस्मै । देवाय । हविषा । विधेम ॥८॥

सा० भा०—यज्ञं यज्ञोपलक्षितं विकारजातं जनयन्तीः उत्पादयन्तीः तदर्थं दक्षं प्रपञ्चात्मना वर्धिष्णुं प्रजापतिमात्मनि दधानाः धारयित्रीः । दधातेर्हेतौ शानच् । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । ईदृशी आपः । व्यत्ययेन प्रथमा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपः प्रलयकालीना महिना महिम्ना । छान्दसो मलोपः । स्वमाहात्म्येन यश्चित् यश्च प्रजापतिः पर्यपश्यत् परितो दृष्टवान् यः च देवेष्वधि देवेषु मध्ये देवः तेषामपीश्वरः सन् एकः अद्वितीयः आसीत् भवति । अस्तेश्छान्दसो लङ् । 'अस्तिसिचोऽपृक्ते' (पा० सू० ७. ३. ९६) इतीडागमः । तस्मै कस्मै इत्यादि गतम् ॥

शब्दा०—यः=जिसने, चित्=और, आपः=जल को, महिना=महिमा से, परि अपश्यत्=चारों तरफ से देखा, दक्षम्=जनयित्री शक्ति को धारण करनेवाले, जनयन्तीः=उत्पन्न करनेवाले, यज्ञम्=यज्ञ को, यः=जो, देवेषु=देवताओं के, अधि=ऊपर, देवः=देव, एकः=अकेला, आसीत्=था, कस्मै=किस, देवाय=देवता का हविषा=हवि से, विधेम=पूजन करें।

हि० अ०—जिसने अपनी महिमा से जनयित्री शक्ति को धारण करनेवाले, यज्ञ को उत्पन्न करनेवाले जलों को देखा; जो देवताओं के ऊपर एक देव था। किस देवता का हमलोग हवि से पूजन करें ?

Trans.—Who with his greateness saw over the waters bearing the productive force, producing the sacrifice; who was the sole God over all gods. What god should we worship with oblation ?

Notes—आपः—Irregular use of nom. plu. for acc. plu. अपः. पर्यपश्यत्—√*paś* to see, impf. 3rd. sing.; not unaccented because preceded by यः; preposition is compounded and is unaccented.

मा । नः । हिंसीत् । जनिता । यः । पृथिव्याः । यः । वा । दिवम् । सत्यऽधर्मा । जजान ॥ यः । च । अपः । चन्द्राः । बृहतीः । जजान । कस्मै । देवाय । हविषा । विधेम ॥९॥

सा० भा०—स प्रजापतिः नः अस्मान् मा हिंसीत् मा बाधताम् । यः पृथिव्याः भूमेः जनिता जनयिता स्रष्टा । 'जनिता मन्त्रे' इति णिलोपो निपात्यते । 'उदात्तयणो हल्पूर्वात्' इति पृथिवीशब्दाद्विभक्तेरुदात्तत्वम् । यो वा यश्च सत्यधर्मा सत्यमवितथं धर्म जगतो धारणं यस्य स तादृशः प्रजापतिः दिवम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तरिक्षोपलक्षितान् सर्वान् लोकान् जजान जनयामास। जनी प्रादुर्भावे'। णिचि वृद्धौ 'जनीजृष्क्नसुरञ्जः' इति मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वत्वम्। ततो लिटि 'असन्त्रे' (पा० सू० ३. १. ३५) इति निषेधादाम्प्रत्ययाभावे तिपो णलि वृद्धौ 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। यश्च बृहतीः महतीः चन्द्रा आह्लादिनीः अपः उदकानि जजान जनयामास। 'ऊडिदम्' इत्यादिना अप्शब्दादुत्तरस्य शस उदात्तत्वम्। तस्मै कस्मै इत्यादि गतम्॥

शब्दा० – मा=मत, नः=हमलोगों को, हिंसीत्=कष्ट दे, जनिता=उत्पन्न करनेवाला, यः=जो, पृथिव्याः=पृथिवी को, यः=जो, वा=और दिवम्=आकाश को, सत्यधर्मा=सत्य नियमवाले, जजान=उत्पन्न किया, यः=जिसने, च=और, अपः=जलको, चन्द्राः=आह्लादकारी, बृहती=महान्, जजान=उत्पन्न किया, कस्मै=किस, देवाय=देवता का, हविषा=हवि से, विधेम=पूजन करें।

हि० अ० –जो पृथिवी को उत्पन्न करनेवाला है, जो सत्य नियमवाला है, जिसने आकाश को उत्पन्न किया, जिसने आह्लादकारी महान् जल को उत्पन्न किया, वह हमें कष्ट न दे। किस देवता का हमलोग हवि से पूजन कर ?

Trans.—May he not injure us, who is the begetter of the earth, he whose laws are true, who generated the heaven, and who generated the great and beautiful waters. What god should we worship with oblation ?

Notes—हिंसीत्—√*hiṁs* to injure, 'iṣ'-aorist injun. 3rd. sing. जनिता—√*jan* to generate, with the suffix तृच् सत्यधर्मा—Whose laws are true ; Bahuvrīhi compd. accented on the first member. जजान—√*jan* to generate, perf. 3rd. sing.; not unaccented because preceded by यः.

प्रजापते। न। त्वत्। एतानि। अन्यः। विश्वा। जातानि। परि। ता। बभूव॥ यत्ऽकामाः। ते। जुहुमः। तत्। नः। अस्तु। वयम्। स्याम। पतयः। रयीणाम्॥१०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सा० भा०—इळादधाख्य इष्टचयने प्राजापत्यस्य हविषः 'प्रजापते इत्येषानुवाक्या। सूत्रितं च—प्राजापत्य इळादधः प्रजापते न त्वदेतान्यन्यः' (आश्व० श्रौ० २.१४) इति। केशनखकीकीटादिभिः दुष्टानि हवींष्यनयैवाप्सुप्रक्षिपेत्। सूत्रितं च—'अपोऽभ्यवहरेयुः प्रजापते न त्वदेतान्यन्यः' (आश्व० श्रौ० ३. १०) इति। चौलादिकर्मस्वप्येषा होमार्था। सूत्रितं च—तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च' (आश्व० गृ० १. ४. ४) इति।

हे प्रजापते त्वत् त्वत्तोऽन्यः कश्चित् एतानि इदानीम् वर्तमानानि विश्वा विश्वानि सर्वाणि। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। जातानि प्रथम विकारभाञ्जि ता तानि सर्वाणि भूतजातानि न परि बभूव न परिगृह्णाति। न व्याप्नोति। त्वमेवैतानि परिगृह्य स्रष्टुं शक्नोषीति भावः। परिपूर्वो भवतिः परिग्रहार्थः। वयं च यत्कामाः यत्फलं कामयमानाः ते तुभ्यं जुहुमः हवींषि प्रयच्छामः तत् फलं नः अस्माकम् अस्तु भवतु तथा वयं च रयीणां धनानां पतयः ईश्वराः स्याम भवेम। 'नामन्यतरस्याम्' इति नाम उदात्तत्वम्।

शब्दा०—प्रजापते=ओ प्रजापति, न=नहीं, त्वत्=तुमसे, एतानि=ये, अन्य=भिन्न विश्वा=सम्पूर्ण, जातानि=प्राणी, परि=चारों तरफ से व्याप्त करने वाले, ता=वे, बभूव=हो सकते, यत्कामाः=जिस इच्छा से, ते=तुमको जुहुमः=स्तुति करते हैं, तत्=वह कामना, नः=हमारी, अस्तु=पूर्ण हावे, वयम्=हमलोग, स्याम=होवें, पतयः=स्वामी, रयीणाम्=धन के।

हिं० अ०—ओ प्रजापति, तुमसे भिन्न ये जितने उत्पन्न जीव हैं वे तुमको चारों तरफ से व्याप्त नहीं कर सकते; जिस कामना से हम तुम्हें हवि प्रदान करते हैं वह हमारी इच्छा पूरी हो। हम धन के स्वामी बनें।

Trans.—O Prajāpati all these created beings, beside thee, cannot surround thee. May that be of ours seeking which we offer thee. May we be the lord of riches.

Notes—यत्कामाः --Desirous of which ; this type of compd. is called Syntactical compd. It is of the nature of Bahuvrīhi and is accented on the first member.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जुहुमः–√*hu* to sacrifice, pres. 1rst. plu. ; not unaccented because preceded by यत्. The first line has been interpreted variously : 'Prajāpati, thou only comprehendest all these created things, and none. beside thee' (Griffith), 'lord of every creature, thou rulest over all, and there is none beside thee' (Peterson).

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकादशऽनुवाके त्रयोविंशतिसंख्याकानि सूक्तानि । तत्र 'नासदासीत्' इति सप्तर्चं प्रथमं सूक्तं त्रैष्टुभम् । परमेष्ठी नाम प्रजापतिर्ऋषिः । वियदादि-भावानां सृष्टिस्थितिप्रलयादीनामत्र प्रतिपाद्यत्वात् तेषां कर्ता परमात्मा देवता । तथा चानुक्रान्तं—'नासत्सप्त प्रजापतिः परमेष्ठी भाववृत्तं तु' इति । गतो विनियोगः ॥

न । असत् । आसीत् । नो इति । सत् । आसीत् । तदानीम् । न । आसीत् । रजः । नो इति । विऽओम । परः । यत् ॥ किम् । आ । अवरीवरिति । कुह । कस्य । शर्मन् । अम्भः । किम् । आसीत् । गहनम् । गभीरम् ॥१॥

सा० भा०—'तपसस्तन्महिनाजायतैकम्' इत्यादिनाग्रे सृष्टिः प्रतिपाद-यिष्यते । अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूप्यते । तदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तत् असत् शशविषाणवन्निरुपाख्यं न आसीत् । न हि तादृशात् कारणादस्य सतो जगत उत्पत्तिः संभवति । तथा नो सत् नैव सदात्मवत् सत्त्वेन निर्वाच्यम् आसीत् । यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि संभवति । कुतस्तयोः तादात्म्यमिति उभयविलक्षणम-निर्वाच्यमेवासीदित्यर्थः । ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः । तर्ह्यात्म-नोऽप्यनिर्वाच्यत्वप्रसङ्गः अथोच्येत । न । आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्मायाया एवात्र सत्त्वं निषिध्यत इति । एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि तस्याः पारमार्थिकसत्त्वाभावात् । अथ व्यावहारिकसतां पृथिव्यादीनां भावानां विद्यमानत्वात् कथं नो सदिति निषेधः । तत्राह । नासीद्रज इत्यादि । 'लोका रजांस्युच्यन्ते' (निरु० ४.१९) इति यास्कः । अत्र च सामान्यापेक्षमेकवचनम् । व्योम्नो वक्ष्यमाणत्वात्तस्याध-स्तनाः पातालादयः पृथिव्यन्ता नासन्नित्यर्थः । तथा व्योम अन्तरिक्षं तदपि नो नैवासीत् । पर इति सकारान्तं परस्तादित्यर्थे वर्तते । परशब्दाच्छान्दसोऽ-स्तातेरर्थेऽसिप्रत्ययः । परः व्योम्नः परस्तादुपरिदेशे द्युलोकप्रभृतिसत्यलोकान्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत् अस्ति तदपि नासीदित्यर्थः। अनेन चतुर्दशभुवनगर्भं ब्रह्माण्डं स्वरूपेण निषिद्धं भवति। अथ तदावरकत्वेन पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चाक्षेपमुखेन क्रमेण निषेधयति किमावरीवरिति। किम् आवरणीयं तत्त्वमावरकभूतजातम् आवरीवः। अत्यन्तमावृणुयात्। आवार्याभावात् तदावरकमपि नासीदित्यर्थः। वृणोतेर्यङ्लुगन्ताच्छान्दसे लङि तिपि रूपमेतत्। यद्वा। किमिति प्रथमैव। किं तत्त्वमावरकमावृणुयात्। अन्नियमाणवत्तदपि स्वरूपेण नासीदित्यर्थः। आवृण्वत् तत्तत्त्वं कुह कुत्र देशेऽवस्थायावृणोति। आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः। किंशब्दात् सप्तम्यर्थे हप्रत्ययः। 'कु तिहोः' (पा० सू० ७. २. १०४) इति प्रकृतेः क्वादेशः। कस्य शर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि सुखदुःखसाक्षात्कारलक्षणे भोगे निमित्तभूते सति तदावरकं तत्त्वमावृणुयात्। जीवानामुपभोगार्था हि सृष्टिः। तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात् प्रलीना इति कस्य कश्चिदपि भोक्ता न संभवतीत्यावरणस्य निमित्ताभावादपि तन्न घटत इत्यर्थः। एतेन भोग्यप्रपञ्चवत् भोक्तृप्रपञ्चोऽपि तदानीं नासीदित्युक्तं भवति। किंशब्दादुत्तरस्य ङशः 'सावेकाचः' इति प्राप्तस्योदात्तत्वस्य 'न गोश्वन्साववर्ण' इति प्रतिषेधः। 'सुपां सुलुक्' इति शर्मणः सप्तम्या लुक्। यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतमप्सत्त्वमपि निराकृतं तथापि 'आपो वा इदमग्रे सलिलमासीत्' (तै० सं० ७. १. ५. १) इति श्रुत्या कश्चिदपां सद्भावमाशङ्कते। तं प्रत्याचष्टे अम्भः किमासीत् इति। गहनं दुष्प्रवेशं गभीरं दुरवस्थानमत्यगाधम् ईदृशम् अम्भः किमासीत्। तदपि नैवासीदित्यर्थः। श्रुतिस्त्ववान्तरप्रलयविषया ॥१॥

शब्दा०—न=नही, असत्=नामरूपादि रहित अवस्था, आसीत्=थी, नो=नहीं, सत्=नामरूपात्मक अवस्था, आसीत्=थी, तदानीम्=उस समय, न=नहीं, आसीत्=था, रजः=लोक, नो=नहीं, व्योम=आकाश, परः=उपर, यत्=जो है, किम्=कौन, आ अवरीवः=आवृत किया था, कुह=कहां, कस्य=किसकी, शर्मन्=सुरक्षा में, अम्भः=जल, किम्=क्या, प्रश्न वाचक शब्द, आसीत्=था, गहनम्=अपार, गभीरम्=गहरा।

हि० अ०—उस समय न नामरूपादि रहित अवस्था थी, न नामरूपात्मक अवस्था ही थी; न (कोई) लोक था, न आकाश ही था, जो उपर है। कौन आवृत किया था? कहाँ, किसकी सुरक्षा में? क्या अपार गम्भीर जल था?

Trans.—There was neither the non-existent nor was

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the existent then ; there was neither the region nor the sky that is above. What did cover it ? Where, in whose protection ? Was there water, unfathomable, deep ?

Notes—नो—See VI. 54.3. अवरीवः—√*vṛ* to cover, inte. impf. 3rd. sing. ; final visarjanīya is originally rhotacized ; hence, इति is added after it in the Pada-text. कुह—Formed from किम् with the suffix ह in the locative sense (कु तिहो—Pāṇ. VII.2.104) शर्मन्—The regular loc. sing form of शर्मन् would be शर्मणि, but in the Vedic language the suffix ङि. is dropped (सुपां सुलुक्—Pāṇ. VII. 1.39).

न । मृत्युः । आसीत् । अमृतम् । न । तर्हि । न । रात्र्याः । अह्नः । आसीत् । प्रऽकेतः ॥ आनीत् । अवातम् । स्वधया । तत् । एकम् । तस्मात् । ह । अन्यत् । न । परः । किम् । चन । आस ॥२॥

सा० भा०—ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह न मृत्युरासीत् इति । ननु यदि स नासीत् तर्हि तदभावकृतम् अमृतम् अमरणं प्राणिनावस्थानं तदानीमपि स्यात् तत्राह । अमृतं न तर्हि इति । तर्हि तस्मिन् प्रतिहारसमये । अयं भावः । सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निष्प्रयोजनमिदं जगदिति परमेश्वरस्य मनसि संजिहीर्षा जायते । तथैव स मृत्युः सर्वं जगत् संहरत इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्यादिति । एतदेवाभिप्रेत्य कठैराम्नायते—'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः' (क० उ० २. २५) इति । नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह न रात्र्या इति । रात्र्याः अह्नः च प्रकेतः प्रज्ञानं न आसीत् । तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात् । एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः । कथं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः । उपचारादिति ब्रूमः । यथेदानीं तननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुरित्यवच्छेदकत्वसाम्येनाकालेऽपि कालवाची

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्ययः । यदवादिष्म ब्रह्मणः परमार्थसत्त्वमग्रे वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति । तत् सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वम् आनीत् प्राणितवत् । नन्वेवं प्राणनकर्तुर्जीवभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात् न विवक्षितस्य निरुपाधिकस्य ब्रह्मणः । 'अप्राणो ह्यमनाः शुद्धः' इति तस्य प्राणसंबन्धाभावात् तत्राह आनीदवातमिति । अयमाशयः । आनीदित्यत्रधात्वर्थक्रिया तत्कर्ता तस्य च भूतकाल संबन्ध इति त्रयोऽर्थाः प्रतीयन्ते । तत्र समुदायो न विधीयते यथाग्नयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात् । किं तर्ह्यनेन कर्तृत्वमनूद्य भूतकालसत्तालक्षणो गुणो विधीयते दध्ना जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम् । तत्राप्यनेन कर्तृत्वविशिष्टस्य न पूर्वकालसत्ता विधीयते तन्निषेधानुपपत्तिप्रसङ्गात् अतोऽनेन कर्तृत्वेन इदानींतनेनोपलक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोष इति । नन्वीदृशस्य ब्रह्मणो मायया सह संबन्धासंभवात् सांख्याभिमता स्वतन्त्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं नो सदिति निषेधः । तत्राह स्वधया इति । स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया । तया तद्ब्रह्मैकमविभागापन्नमासीत् । 'सहयुक्तेऽप्रधाने' (पा० सू० २. ३. १९) इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति 'वृद्धो यूना' (पा० सू० १. २. ६५) इति निपातनाल्लिङ्गात् । अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातन्त्र्यं निवार्यते । यद्यपि असङ्गस्य ब्रह्मणस्तया सह संबन्धो न संभवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव संबन्धोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य । एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम् । ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वात् ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तम् आनीदवातमिति । ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं नो सदासीदिति सत्त्वप्रतिषेधः । मैवम् अयुक्तिदृष्ट्यैक्यावभासेऽपि युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितम् । ननु दृग्दृश्याविति द्वावेव पदार्थौ आनीदवातं स्वधयेति तौ चेदङ्गीक्रियेते तत्किमपरमवशिष्यते यत् नासीद्रजः इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति । तस्माद्ध तस्मात् खलु पूर्वोक्तान्मायासहितात् ब्रह्मणः अन्यत् किं चन किमपि वस्तु भूतभौतिकात्मकं जगत् न आस न बभूव । 'छन्दस्युभयथा' इति लिटः सार्वधातुकत्वादस्तेर्भूभावाभावः । ननु तदानीमन्यस्य सत्त्वनिषेधो न शङ्क्यः । असत्त्वे चाप्रसक्तत्वान्न निषेधोपयोग इत्यत आह पर इति । परः परस्तात् सृष्टेरूर्ध्वं वर्तमानमिदं जगत् तदानीं न बभूवेत्यर्थः । अन्यथा उक्तरीत्या क्वचिदपि निषेधो न स्यादिति भावः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—न=नहीं, मृत्युः=मृत्यु, आसीत्=थी, अमृतम्=अमृतत्व, न=नहीं, तर्हि=तब, रात्र्याः=रात्री का, अह्नः=दिन का, आसीत्=था, प्रकेतः=चिह्न या भेदात्मक ज्ञान, आनीत्=सांस ले रहा था, अवातम्=बिना वायु का, स्वधया=इच्छा शक्ति से, तत्=वह, एकम्=एक, तस्मात्=उससे, अन्यत्=अलग, न=नहीं, परः=पहिले, किम्=कुछ, चन=भी, आस=था।

हि० अ० - तब मृत्यु नहीं थी, अमृतत्व भी नहीं था। रात्री तथा दिन का भेदात्मक ज्ञान भी नहीं था। एक वायु के बिना (भी) अपनी इच्छा शक्ति से श्वांस ले रहा था। उसको छोड़कर अलग पहले कुछ भी नहीं था।

Trans.—There was neither death, nor immortality. There was not the distinct knowledge of night and day. That one breathed without wind by its will power. Other than that there was nothing beyond.

Notes—आनीत् — √*an* to breathe, impf. 3rd. sing. स्वधया—By will power; Sāyaṇa takes it to mean 'illusion' (māyā). आस—√*as* to be, perf. 3rd. sing.

तमः । आसीत् । तमसा । गूळ्हम् । अग्रे । अप्रऽकेतम् । सलिलम् । सर्वम् । आः । इदम् ॥ तुच्छ्येन । आभु । अपिऽहितम् । यत् । आसीत् । तपसः । तत् । महिना । अजायत । एकम् ॥३॥

सा० भा०—ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म। जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्य अवश्यंभावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियाया प्रागपि तद्विद्यत इत्युच्यते। कथं तस्य जन्म। अत आह तमसा गूळ्हमग्रे इति। अग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् तमसा गूळ्हम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत्। आत्मतत्त्वस्यावरकत्वान्मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति। आच्छादकात् तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्यमुत्पद्यते इत्यसद्वादिनोऽसत्कार्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ननु कारणे तमसि तज्जगदात्मकं कार्यं विद्यते चेत् कथं 'नासीद्रज इत्यादि-निषेधः । तत्राह तम आसीत् इति । तमो भावरूपज्ञानं मूलकारणम् । तद्रूपता तदात्मनाम् । यतः सर्वं जगत् प्राक् तम आसीदतो निषिध्यत इत्यर्थः । नन्वावर-कत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म । कथं तयोः कर्मकर्त्रोस्तादात्म्यम् । तत्राह अप्रकेतमिति । अप्रकेतम् अप्रज्ञायमानम् । अयमर्थः । यद्यपि जगतस्त-मसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनम् । अतएव मनुना स्मर्यते 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः' (मनु० १. ५) इति । कुतो वा न प्रज्ञायते तत्राह । सलिलम् । 'षल गतौ' । औणादिक इलच् । इदं दृश्यमानं सर्वं जगत् सलिलं कारणेन संगत-मविभागापन्नम् आः आसीत् । अस्तेर्लङि तिपि 'बहुलं छन्दसि' इतीडभावे 'हल्ङ्याब्भ्यः' इति तिलोपे 'तिप्यनस्तेः' (पा० सू० ८. २. ७३) इति पर्युदासा-द्दकाराभावः । यद्वा सलिलमिति लुप्तोपमम् । सलिलमिव । यथा क्षीरेणावि-भागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगन्न शक्यविज्ञानमित्यर्थः । ननु विविधविचित्ररूपभूयसः प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवा-भिभवः । तथा तमोऽपि क्षीरवद्बलवदित्येवोच्यते । तर्हि दुर्बलस्य जगतः सर्ग-समयेऽपि नोद्भवसंभव इत्यत आह तुच्छ्येन इति । आ समन्ताद्भवतीति आभु तुच्छ्येन । छान्दसो यकारोपजनः । तुच्छेन तुच्छकल्पनेन सदसद्विलक्षणेन भावरूपाज्ञानेन अपिहितं छादितम् आसीत् । दधातेः कर्मणि निष्ठा । दधातेर्हि । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । एकम् एकीभूतं कारणेन तमसाविभा-गतां प्राप्तमपि तत्कार्यजातं तपसः स्रष्टव्यपर्यालोचनरूपस्य महिना माहात्म्येन अजायत उत्पन्नम् । तपसः स्रष्टव्यपर्यालोचनरूपत्वं चान्यत्राम्नायते 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः (मु० उ० १. १. ९) इति ॥३॥

शब्दा० —तमः=अन्धकार, आसीत्=था, तमसा=अन्धकार से, गूळ्-हम्=ढका हुआ, अग्रे=सृष्टि के पहिले, अप्रकेतम्=चिन्ह रहित या भेदात्मक ज्ञान रहित, सलिलम्=जल, सर्वम्=सम्पूर्ण, आः=था; इदम्=यह जगत्, तुच्छ्येन=भाव रूप अज्ञान से, आभु=सर्वव्यापी, अपिहितम्=आवृत, यत् =जो, आसीत्=स्थित था, तपसः=तपस्या की, तत्=वह, महिना=महिमा से, अजायत=उत्पन्न हुआ, एकम्=एक ।

हि० अ० - महान् अन्धकार से ढका हुआ सर्वप्रथम अन्धकार था । इस सम्पूर्ण (विश्व का कारणभूत) जल से भिन्न कोई चिन्ह नहीं था । (वह) जो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थित था, सर्वव्यापी भावरूप अज्ञान से आवृत था। अपनी तपस्या की महिमा से वह एक उत्पन्न हुआ।

Trans.—The darkness was concealed with darkness in the beginning. All this (world) was indistinguiable water. That which existed, was covered with all pervading void ; through the power of austerity that one was born.

Notes—गूळ्हम् – √*guh* to conceal, past part. (see अपगूळ्हम् I. 116.11). आः—√*as* to be, impf. 3rd. sing. तुच्छ्येन—Insertion of य is an instance of varṇopajana. आभु—'Pervading'-(Sāyaṇa) 'existed' (Griffith) 'coming into being' (Macdnonell) 'empty' 'void' (MWD.). अपिहितम्—See I. 32.11. तपसः—Austerity i.e. contemplation of things that were to be created (Sāyaṇa) 'warmth (Griffith), 'heat' (Macdonell). अजायत—See X. 90.5.

कामः । तत् । अग्रे । सम् । अवर्तत । अधि । मनसः । रेतः । प्रथमम् । यत् । आसीत् ॥ सतः । बन्धुम् । असति । निः । अविन्दन् । हृदि । प्रतिऽइष्य । कवयः । मनीषा ॥४॥

सा० भा०—ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव किंनिबन्धनमित्यत आह कामस्तदग्र इति। अग्रे अस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि कामः समवर्तत सम्यगजायत। सिसृक्षा जातेत्यर्थः। ईश्वरस्य सिसृक्षा वा किं हेतु केत्यत आह मनस इति। मनसः अन्तःकरणस्य संबन्धि वासनाशेषेण मायायां विलीनेऽन्तःकरणे समवेतम्। सामान्यापेक्षमेकवचनम्। सर्वप्राण्यन्तःकरणेषु समवेतमित्यर्थः। एतेनात्मनो गुणाधारत्वं प्रत्याख्यातम्। तादृशं रेतः भाविनः प्रपञ्चस्य बीजभूतं प्रथमम् अतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं कर्म यत् यतः कारणात् सृष्टिसमये आसीत् अभवत्। भूष्णु वर्धिष्ण्वजायत परिपक्वं सत् फलोन्मुखमासीदित्यर्थः। तत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षा अजायतेत्यर्थः। तस्यां च जातायां स्रष्टव्यं पर्यालोच्य ततः सर्वं जगत् सृजति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा चाम्नायते 'सोऽकामयत बहुः स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच' (तै० आ० ८.६) इति श्रुतिः। आत्मनेत्थमवगमितेऽर्थे विद्वदनुभवमप्यनुग्राहकत्वेन प्रमाणयति सत इति। सतः सत्त्वेन इदानीमनुभूयमानस्य सर्वस्य जगतः बन्धुं बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं कवयः क्रान्तदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनः हृदि हृदये निरुद्धया मनीषा मनीषया बुद्ध्या। 'सुपां सुलुक्' इति तृतीयाया लुक्। प्रतीष्य विचार्य। 'अन्येषामपि' इति सांहितिको दीर्घः। असति सद्विलक्षणेऽव्याकृते कारणे निरविन्दन् निष्कृष्यालभन्त। विविच्याजानन्नित्यर्थः॥

शब्दा०—कामः=इच्छा, तत्=उसमें, अग्रे=सर्वप्रथम, समवर्तत=उत्पन्न हुआ, अधिमनसः=मन का, रेतः=विकार, प्रथमम्=प्रथम, यत्=जो, आसीत्=था, सतः=नामरूपात्मक जगत् का, बन्धुम्=बन्धन, सम्बन्ध, असति=नाम रूप रहित तत्व में, निरविन्दन्=पाया, हृदि=अन्तःकरण में, प्रतीष्य=विचार कर, कवयः=बुद्धिमानों ने, मनीषा=प्रज्ञा से।

हि० अ०—काम, जो मन का प्रथम विकार था, उसमें सर्वप्रथम उत्पन्न हुआ। बुद्धिमानों ने हृदय में प्रज्ञा से विचार कर नामरूपात्मक जगत् का कारण नाम रूप रहित तत्व में ही पाया।

Trans.—Desire, that was the first seed of the mind came upon that in the beginning. The sages, having searched in their heart with wisdom, found out the bond of existent in the non-existent.

Notes—समवर्तत—See X. 90.14. आसीत्—√*as* to be impf. 3rd. sing.; not unaccented because prededed by यत्. असति—Loc. sing. of असत्. नञ् compd. accented on the first member. अविन्दन्—See X.71.3. प्रतीष्या—√*iṣ* with प्रति to search, gerund in य; final syllable is lengthened.

तिरश्चीनः। विऽततः। रश्मिः। एषाम्। अधः। स्वित्। आसी३त्। उपरि। स्वित्। आसी३त्॥ रेतःऽधाः। आसन्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महिमानः । आसन् । स्वधा । अवस्तात् । प्रऽयतिः । परस्तात् ॥५॥

सा० भा० – एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि । अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते । येयं नासदासीदित्यविद्या प्रतिपादिता यश्च कामस्तदग्रे इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्म एषाम् अविद्याकामकर्मणां वियदादिभूतजातानि सृजतां रश्मिः रश्मिसदृशो यथा सूर्यरश्मिः उदयानन्तरं निमेषमात्रेण युगपत् सर्वं जगत् व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गः विततः विस्तृतः आसीत् । स्विदासीत् इति वक्ष्यमाणमत्रापि संबध्यते । 'विचार्यमाणानाम्' (पा० सू० ८.२.९७) इति प्लुतः । तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः स्वित् इति वितर्के । स कार्यवर्गः प्रथमतः किं तिरश्चीनः तिर्यगवस्थितो मध्ये स्थित आसीत् किंवा अधः अधस्तात् आसीत् । आहोस्वित् उपरि उपरिष्टात् किमासीत् । 'उपरि स्विदासीदिति च' (पा० सू० ८.२.१०२) इत्यनुदात्तः प्लुतः । 'आत्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निः' (तै० आ० ८.१) इत्यादिकया पञ्चमीश्रुत्या तत उद्गातारं ततो होतारमितिवत् क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत् सर्गस्य शीघ्रव्यापनेन तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते । एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्न इत्यर्थः । एतदेव विभजते । सृष्टेषु कार्येषु मध्ये केचिद्भावाः रेतोधाः रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवाः आसन् अन्ये भावाः महिमानः । स्वार्थिक इमनिच् । महान्तो विदयादयो भोग्याः आसन् । एवं मायासहितः परमेश्वरः सर्वं जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः । अयमेवार्थस्तैत्तिरीयके 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै० आ० ८.६) इत्यारभ्य प्रतिपाद्यते । तत्र च भोक्तृभोग्ययोर्मध्ये स्वधा । अन्ननामैतत् । भोग्यप्रपञ्चः अवस्तात् अवरो निकृष्ट आसीत् । प्रयतिः प्रयतिता भोक्ता परस्तात् पर उत्कृष्ट आसीत् । भोग्यप्रपञ्चं भोक्तृप्रपञ्चस्य शेषभूतं कृतवानित्यर्थः । 'विभाषा परावराभ्याम्' (पा० सू० ५.३.२९) इति प्रथमार्थे अस्तातिः । 'अस्ताति च' (पा० सू० ५.३.४०) इत्यवरशब्दस्यावादेशः । अवस्तादिति संहितायाम् ईषाअक्षादित्वात् प्रकृतिभावः ॥

शब्दा०—तिरश्चीनः=तिरछा जानेवाला अर्थात् मध्य में, विततः=फैला हुआ था, रश्मिः=किरणों की तरह, एषाम्=उनका, अधः=नीचे,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वित्=शायद, आसीत्=था, उपरि=उपर, स्वित्=शायद, आसीत्=था, रेतोधाः=सृष्टिः का बीज धारण करनेवाले, आसन्=थे, महिमानः=आकाशादि महाभूत, आसन्=थे, स्वधा=भोग्य पदार्थ, अवस्तात्=नीचे, प्रयति=भोक्ता तत्व, परस्तात्=ऊपर।

हि० अ० – उनका (कार्य जाल जो) किरणों की तरह शीघ्र फैला हुआ था, क्या वह मध्य में था ? अथवा क्या वह नीचे था ? अथवा क्या वह उपर था ? (सृष्टि का) बीज धारण करनेवाले थे, (आकाशादि) महाभूत थे; नीचे भोग्य था, ऊपर भोक्ता।

Trans.—Their (web of effects which) was extended like the ray of the sun, was it across ? or was it below ? or was it above ? There were impregnators, there were great forces ; food was below, and consumers (were) above.

Notes—तिरश्चीनः—Derived from तिरस्+√*añc*. विततः—√*tan* to stretch, past part. रश्मिः—This word has been interpreted variously. Sāyaṇa takes it to mean 'ray of the sun metaphorically the five great elements'. Macdonell takes it to mean 'cord' with which the sages in thought measured out distance betwen the existent and non-existent or between what was above and below. According to Griffith, रश्मि is a line drawn by the ancient seers to make a division between the upper world and the lower, and to bring duality out of unity. एषाम्—Of the effects (*kārya*) of *Avidyā* (Sāyaṇa), 'of the seers' (Griffith, Macdonell). स्वित्—A particle expressing doubt. आसी३त्.—√*as* to be, impf. 3rd. sing.; not unaccented because it is the first verb in two antithetical clauses. The final syllable of the verbs expressing doubt in for and against is prolated (विचार्यमाणानाम्. Pāṇ. VIII. 2. 97). आसीत् in both the sentences अधः स्विदासी३त् and उपरि स्विदासी३त् is prolated and in the latter prolated

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

syllable is anudātta (उपरि स्विदासीदिति च—Pāṇ. VIII. 2. 102), but in the अधः स्विदासी३त् the prolated syllable is udātta. आसन् —√*as* to be, impf. 3rd. plu. अवस्तात्— Below ; the word अवर becomes अवः or अवस्तात् if followed by the suffix असि (अस्तातिच—Pāṇ. V. 3.40). प्रयतिः— 'Offering', 'intention, 'will' (MWD.) 'enjoyer (Sāyaṇa) 'energy' (Griffith) 'impulse' (Macdonell). परस्तात्— Above ; grammatical construction is the same as अवस्तात्.

कः । अ॒द्धा । वेद॒ । कः । इ॒ह । प्र । वो॒च॒त् । कुत॑ः । आऽजा॑ता । कुत॑ः । इ॒यम् । वि॒ऽसृ॑ष्टिः ॥ अ॒र्वाक् । दे॒वाः । अ॒स्य । वि॒ऽसर्ज॑नेन । अथ॑ । कः । वेद॒ । यत॑ः । आ॒ऽब॒भूव॑ ॥६॥

सा० भा०—एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता । 'एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद' (श० ब्रा० १. ४. २. १३) इतिवत् । अथेदानीं सा सृष्टिर्दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह को अद्धेति । कः पुरुषः अद्धा पारमार्थ्येन वेद जानाति । कः वा इह अस्मिँल्लोके प्र वोचत प्रब्रूयात् । इयं दृश्यमाना विसृष्टिः विविधा भूतभौतिक भोक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः कुतः कस्मादुपादानकारणात् । कुतः कस्माच्च निमित्तकारणात् आजाता समन्ताज्जाता प्रादुर्भूता । एतदुभयं सम्यक् को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः । ननु देवाः अजायन्तः । सर्वज्ञास्ते ज्ञास्यन्ति वक्तुं च शक्नुवन्तीत्यत आह अर्वागिति । देवाः च अस्य जगतो विसर्जनेन वियदादिभूतोत्पत्त्यनन्तरं विविधं यद्भौतिकं सर्जनं सृष्टिस्तेन अर्वाक् अर्वाचीनाः कृताः । भूतसृष्टेः पश्चाज्जाता इत्यर्थः । तथाविधास्ते कथं स्वोत्पत्ते पूर्वकालीनां सृष्टिं जानीयुः । अजानन्तो वा कथं प्रब्रूयुः । उक्तं दुर्विज्ञानत्वं निगमयति । अथ एवं सति देवा अपि न जानन्ति किल । तद्व्यतिरिक्तः कः नाम मनुष्यादिः वेद तज्जगत्कारणं जानाति यतः कारणात् कृत्स्नं जगत् आबभूव अजायत ॥

शब्दा०—कः=कौन, अद्धा=सही रूप में, वेद=जानता है, कः= कौन, इह=यहां, प्र वोचत्=कहेगा, कुतः=कहाँ से, आजाता=उत्पन्न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हुई है, कुतः=कहाँ से इयम्=यह, विसृष्टिः=विविध प्रकार की सृष्टि, अर्वाक्=अर्वाचीन, देवाः=देवता, अस्य=इस, विसर्जनेन=विविधरूपा सृष्टि से, अथ=तब, कः=कौन, वेद=जानता है, यतः=जहाँ से, आबभूव =उत्पन्न हुई है।

हि० अ०—कौन सही रूप में जानता है? कौन यहां कहेगा कि यह कहाँ से उत्पन्न हुई है? यह विविध प्रकार की सृष्टि कहाँ से? देवता इस सृष्टि की अपेक्षा अर्वाचीन हैं। तब यह कौन जानंता है जहाँ से यह (सृष्टि) उत्पन्न हुई है?

Trans.—Who knows truly? Who shall here proclaim whence it is born? Whence it's vivid creation? Gods are later by the creation of this universe. Then who knows whence it has come in to being?

Notes—वेद—√*vid* to know, perf. 3rd. sing. वोचत्—√*vac* to speak, red.-aorist, injun. 3rd. sing. आबभूव—√*bhū* to be, perf. 3rd. sing.; not unaccented because preceded by यतः

इयम्। विऽसृष्टिः। यतः। आऽबभूव। यदि। वा। दधे। यदि। वा। न॥ यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्। सः। अङ्ग। वेद। यदि। वा। न। वेद॥७॥

सा० भा०—उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानं एवं सृष्टं तज्जगत् दुर्धरमपीत्याह इयमिति। यतः उपादानभूतात् परमात्मनः इयं विसृष्टिः विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिः आबभूव आजाता सोऽपि किल यदि वा दधे धारयति यदि वा न धारयति। एवं च को नाम अन्यो धर्तुं शक्नुयात्। यदि धारयेदीश्वर एव धारयेनान्य इत्यर्थः। एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्रह्मण उपादानकारणत्वमुक्तंभवति। तथा च पारमर्षं सूत्रं—'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (वे० सू० १. ४. २३) इति। यद्वा। अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्दुर्ज्ञानत्वमेव द्रढयति। को वेदेत्यनुवर्तते। इयं विविधा सृष्टिः यत आबभूव आसमन्तादजायेति को वेद। न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोऽपि। नास्त्येव जगतो जन्म न कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्त्यपि। यतः। 'जनिकर्तुः प्रकृतिः' (पा० सू० १. ४. ३०) इत्यपादान-संज्ञायां पञ्चम्यास्तसिल्। यस्मात् परमात्मन उपादानभूतादाबभूव तं परमात्मानं को वेद। न कोऽपि। प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रान्ताः। तथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्त भूतोऽपि सन् यदि वा दधे विदधे इदं जगत् ससर्ज यदि वा न ससर्ज। असंदिग्धे संदिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। स एव विदधे। तं को वेद। अजानन्तोऽपि बहवो जडात् प्रधानादकर्तृकमेवेदं जगत् स्वयमजायतेति विपरीतं प्रतिपन्ना विदधतो विधानमजानन्तोऽपि। स एव उपादानभूत इत्यपि को वेद। न कोऽपि। उपादानादन्यः तटस्थ एवेश्वरो विदधे इति हि बहवः प्रतिपन्नाः। देवा अपि यन्न जानन्ति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः। यद्येवं जगत्सृष्टिरत्यन्तदुरवबोधा न तर्हि सा प्रमाणपद्धतिमध्यास्त इत्याशङ्क्य तत्सद्भाव ईश्वरमेव प्रमाणयति यो अस्येति। अस्य भूत भौतिकात्मकस्य जगतः यः अध्यक्षः ईश्वरः परमे उत्कृष्टे सत्यभूते व्योमन् व्योमन्याकाशे आकासवन्निर्मले स्वप्रकाशे। यद्वा। अवतेस्तर्पणार्थात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'नेड्वशि कृति' इतीट्प्रतिषेधः। 'ज्वरत्वर' इत्यादिना वकारोपधयोः ऊट्। सप्तम्या लुक्। 'न ङिसंबुद्ध्योः' इति नलोपप्रतिषेधः। व्योमनि विशेषेण तृप्ते। निरतिशयानन्दस्वरूपे इत्यर्थः। अवतिर्गत्यर्थः। व्योमनि विशेषेण गते व्याप्ते। देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः। अथवा। अवतिर्ज्ञानार्थः। व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि। ईदृशे स्वात्मनि प्रतिष्ठितः। श्रूयते हि सनत्कुमारनारदयोः संवादे—'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' (छा० उ० ७. २४. १) इति। ईदृशो यः परमेश्वरः सो अङ्गः। अङ्गेति प्रसिद्धौ। सोऽपि नाम वेद जानाति। यदि वा न वेद न जानाति। को नाम अन्यो जानीयात्। सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः ॥७॥

शब्दा०—इयम्=यह, विसृष्टिः=विविधरूपा सृष्टि, यतः=जहाँ से, आबभूव=उत्पन्न हुई है, यदि=अगर, वा=अथवा, दधे=धारण किया था, यदि=अगर, वा=अथवा, न=नहीं, यः=जो, अस्य=इसका, अध्यक्षः=नियामक, परमे=ऊँचे, व्योमन्=आकाश में, सः=वह, अङ्ग=निश्चित अर्थ का वाचक निपात, वेद=जानता है, यदि=अगर, वा=अथवा न=नहीं, वेद=जानता है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० –यह विविध रूपों वाली सृष्टि जहाँ से आई है (इसको वह) या तो धारण किया था या अगर नहीं (तो कौन धारण किया था ?)। जो इसका ईश्वर है, वह सर्वोच्च स्वर्ग में है, वही निश्चित रूप से इसे जानता है; यदि वह नहीं जानता (तो कौन जानता है ?)

Trans.—Whence this vivid creation has come into being; either he held it or if he did not (then who held it ?). He who is the lord of this (creation) is in the highest heaven; certainly he knows it; or if he does not know (then who knows ?).

Notes—आबभूव—see X. 129.6. दधे—√*dhā* to put perf. mid. 3rd. sing.; not unaccented because it is the first verb of the two antithetical clauses each beginning with यदि वा (निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्—Pan. VIII. 1.30). व्योमन् –Loc. sing. of व्योमन् like शर्मन् (X. 129.1). Sāyaṇa derives व्योमन् from √*av* to delight, with the suffix मनिन्. वेद –√*vid* to know, perf. 3rd. sing., first वेद is unaccented, second is not because it is preceded by यदि. The third Pāda is variously interpreted. Sāyaṇa renders it by 'अस्य भूतभौतिकात्मकस्य जगतः यः अध्यक्षः ईश्वरः परमे उत्कृष्टे सत्यभूते व्योमन् व्योमन्याकाशे आकाशवन्निर्मले स्वप्रकाशे;' Griffith translates : 'whose eye controls this world in the highest heaven; according to Macdonell, 'he who in the highest heaven is its surveyor'; Arrowsmith following Kaegi renders it : 'who from the highest heaven rules, the all seing lord'.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'श्रद्धया' इति पञ्चर्चं त्रयोविंशं सूक्तमानुष्टुभं श्रद्धादेवत्यम् । कामगोत्रजा श्रद्धा नार्माषिका । तथा चानुक्रम्यते—'श्रद्धया श्रद्धा कामायनी श्राद्धमानुष्टुभं तु' इति । लैङ्गिको विनियोगः ॥

श्रद्धया । अग्निः । सम् । इध्यते । श्रद्धया । हूयते । हविः ॥
श्रद्धाम् । भगस्य । मूर्धनि । वचसा । आ । वेदयामसि ॥१॥

सा० भा०—पुरुषगतोऽभिलाषविशेषः श्रद्धा । तया श्रद्धया अग्निः गार्हपत्यादिः समिध्यते संदीप्यते । यदा हि पुरुषे श्रद्धाग्निगोचर आदरातिशयो जायते तदैष पुरुषोऽग्नीन् प्रज्वालयति नान्यदा । श्रद्धया एव हविः पुरोडाशादिहविश्च हूयते । आहवनीये प्रक्षिप्यते । यद्वा । अस्य सूक्तस्य द्रष्ट्रया श्रद्धाख्ययाग्निः समिध्यते । श्रद्धाम् उक्तलक्षणायाः श्रद्धाया अभिमानिदेवतां भगस्य भजनीयस्य धनस्य मूर्धनि प्रधानभूते स्थानेऽवस्थितां वचसा वचनेन स्तोत्रेण आ वेदयामसि अभितः प्रख्यापयामः । इदन्तो मसिः ॥

शब्दा०—श्रद्धया=श्रद्धा से, अग्निः=अग्नि, समिध्यते=प्रज्ज्वलित किया जाता है, श्रद्धया=श्रद्धा से, हूयते=प्रदान किया जाता है, हविः=हवन का पदार्थ, श्रद्धाम्=श्रद्धा की, भगस्य=भाग्य की, मूर्धनि=शिर पर अर्थात् प्रधान, वचसा=स्तुति से, आ वेदयामसि=हम प्रार्थना करते हैं ।

हि० अ०—श्रद्धा से अग्नि प्रज्ज्वलित किया जाता है; श्रद्धा से हवि प्रदान किया जाता है; श्रद्धा (जो) भाग्य की प्रधान है, उसकी हम स्तुति द्वारा प्रार्थना करते हैं ।

Trans.—By faith fire is kindled; through faith oblation is offered; we celebrate with praise faith upon the head of happiness.

Notes – समिध्यते –√*idh* to kindle, pres. pass. 3rd. sing. हूयते—√*hu* to sacrifice, pres. pass. 3rd. sing. आ वेदयामसि – √*vid* with आ to celebrate, pres. 1st. plu.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रियम् । श्रद्धे । ददतः । प्रियम् । श्रद्धे । दिदासतः ॥ प्रियम् । भोजेषु । यज्वऽसु । इदम् । मे । उदितम् । कृधि ॥२॥

सा० भा०—हे श्रद्धे ददतः चरुपुरोडाशादीनि प्रयच्छतो यजमानस्य प्रियम् अभीष्टफलं कुरु । दिदासतः दातुमिच्छतश्च हे श्रद्धे प्रियं कुरु । मे मम संबन्धिषु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु कृतयज्ञेषु जनेषु च इदम् उदितम् उक्तं प्रियं कृधि कुरु ॥

शब्दा०—प्रियम्=अभीष्ट, श्रद्धे=ओ श्रद्धा, ददतः=देनेवाला का, प्रियम्=अभीष्ट, श्रद्धे=ओ श्रद्धा, दिदासतः=देने की इच्छा करनेवाले का, प्रियम्=अभीष्ट, भोजेषु=उदार, यज्वसु=यजमानों का, इदम्=इस, मे=मेरे, उदितम्=कथन के अभीष्ट को, कृधि=पूरा करो ।

हि० अ०—ओ श्रद्धा, देनेवाले का अभीष्ट पूरा करो; ओ श्रद्धा, देने की इच्छा करनेवाले का अभीष्ट पूरा करो; उदार यजमानों का अभीष्ट पूरा करो; मेरे उस कथन के अभीष्ट को पूरा करो ।

Trans.—O faith, (do) good of the offerer, O faith, (do) good of him who desires to give; (do) good of the liberal sacrificers; fulfil my this desire.

Notes—ददतः — $\sqrt{dā}$ to give, pres. part. gen. sing. of ददत्. दिदासतः — $\sqrt{dā}$ to give, desid. pres. part. gen. sing. of दिदासत्. उदितम् — $\sqrt{i}$ with उत् to speak, to rise, past. part. कृधि— $\sqrt{kṛ}$ to make, root-aorist, impv. 2nd. sing.

यथा । देवाः । असुरेषु । श्रद्धाम् । उग्रेषु । चक्रिरे ॥ एवम् । भोजेषु । यज्वऽसु । अस्माकम् । उदितम् । कृधि ॥३॥

सा० भा०—देवाः इन्द्रादयः असुरेषु उद्गूर्णबलेषु यथा श्रद्धां चक्रिरे अवश्यमिमे हन्तव्या इत्यादरातिशयं कृतवन्तः एवं श्रद्धावत्सु भोजेषु भोक्तृषु भोगार्थिषु यज्वसु यष्टृषु अस्माकम् अस्मत्संबन्धिषु तेषु उदितं तैरुक्तं प्रार्थितं फलजातं कृधि कुरु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शब्दा०—यथा=जिस प्रकार, देवाः=देवता, असुरेषु=असुरों में, श्रद्धाम्=श्रद्धा को, उग्रेषु=प्रचण्ड बलवाले, चक्रिरे=किया था, एवम्=उसी प्रकार, भोजेषु=उदार, यज्वसु=यजमानों में, अस्माकम्=हमारे, उदितम्=कथन के अभीष्ट को, कृधि=पूर्ण करो।

हि० अ०—जिस प्रकार देवताओं ने भयानक असुरों में श्रद्धा किया था, उसी प्रकार तुम उदार यजमानों में श्रद्धा करो; हमलोगों के इस कथन के अभीष्ट को पूरा करो।

Trans.—As the gods had faith in the terrible demons, so do thou in liberal sacrificers; fulfil our this desire.

Notes—असुरेषु—'The ancient Āryan gods, Dyaus, Varuṇa and some others' (Griffith) 'demons' (Sāyaṇa) चक्रिरे—√*kṛ* to make, perf. mid. 3rd. plu.; not unaccented because preceded by यथा.

श्रद्धाम् । देवाः । यजमानाः । वायुऽगोपाः । उप । आसते ॥
श्रद्धाम् । हृदय्यया । आऽकूत्या । श्रद्धया । विन्दते । वसु ॥४॥

सा० भा०—देवा यजमानाः मनुष्याश्च वायुगोपाः वायुर्गोपा रक्षिता येषां ते तादृशाः सन्तः श्रद्धां देवीम् उपासते प्रार्थयन्ते। हृदय्यया। हृदये भवा हृदय्या। तथाविधया आकूत्या संकल्परूपया क्रियया श्रद्धाम् एव परिचरन्ति सर्वे जनाः। कुत इत्यत आह। यतः कारणात् श्रद्धया हेतुभूतया वसु धनं विन्दते लभते श्रद्धावाञ्जनः। तत इत्यर्थः॥

शब्दा०—श्रद्धाम्=श्रद्धा को, देवाः=देवता, यजमानाः=यजमान, वायुगोपाः=वायु से रक्षित, उपासते=उपासना करते हैं, श्रद्धाम्=श्रद्धा को, हृदय्यया=हार्दिक, आकूत्या=संकल्प से, श्रद्धया=श्रद्धा से, विन्दते=प्राप्त करता है, वसु=सम्पत्ति।

हि० अ०—वायु से रक्षित सभी देवता तथा यजमान अपने हार्दिक संकल्प से केवल श्रद्धा की ही उपासना करते हैं। श्रद्धा से ही मनुष्य सम्पत्ति प्राप्त करता है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Gods, sacrificers, all protected by Vāyu worship faith and the faith only by their heart-felt intention. By faith (one) obtains wealth.

Notes—वायुगोपाः—Whose protector is Vāyu ; Bahuvrīhi compd. accented on the first member. उपासते—√*ās* with उप to worship (Sāyaṇa), to draw near (Griffith), pres. 3rd. plu. आकूत्या—Instr. sing. of आकूति (from √*ku* to make sound) ; intention, will. विन्दते—√*vid* to find, mid. 3rd. sing. Griffith supplies विन्दते also to the third Pāda and renders as : 'man winneth faith by yearnings of the heart. Sāyaṇa renders first, second and third Pāda together and according to him, the repetition of श्रद्धा in the 3rd. Pāda is to lay emphasis.

श्रद्धाम् । प्रातः । हवामहे । श्रद्धाम् । मध्यंदिनम् । परि ॥ श्रद्धाम् । सूर्यस्य । निऽम्रुचि । श्रद्धे । श्रत् । धापय । इह । नः ॥५॥

सा० भा०—श्रद्धां देवीं प्रातः पूर्वाह्णे हवामहे । तथा मध्यंदिनं परि । लक्षणे परेः कर्मप्रवचनीयत्वम् । मध्यंदिनं परिलक्ष्य । मध्यंदिन इत्यर्थः । मध्याह्नेऽपि तां श्रद्धाम् आह्वयामहे । सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य निम्रुचि अस्तमयवेलायां सायंसमयेऽपि तामेव श्रद्धाम् आह्वयामहे । ईदृग्रूपे हे श्रद्धे नः अस्मान् इह लोके कर्मणि वा श्रद्धापय श्रद्धावतः कुरु ॥

शब्दा०—श्रद्धाम्=श्रद्धा को, प्रातः=प्रातः काल, हवामहे=पुकारते हैं, श्रद्धाम्=श्रद्धा को, मध्यंदिनम्=दोपहर को, परि=यह कर्मप्रवचनीय है, श्रद्धाम्=श्रद्धा को, सूर्यस्य=सूर्य के, निम्रुचि=अस्त होने पर, श्रद्धे=ओ श्रद्धा, श्रत्=श्रद्धा से, धापय=युक्त करो, इह=यहाँ, नः=हमलोगों को ।

हि० अ०—हम लोग प्रातःकाल श्रद्धा को पुकारते हैं, दोपहर में श्रद्धा को (पुकारते हैं), सूर्यास्त होने पर श्रद्धा को (पुकारते हैं) । ओ श्रद्धा, यहाँ पर हमलोगों को श्रद्धावान् बनावो ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—We invoke faith in the morning, faith in the midday, faith at the setting of the sun. O faith, endow us with faith here.

Notes—**हवामहे**— √*hū* to call, pres. mid. 1st. plu. **निम्रुचि**—At the setting ; loc. sing. of **निम्रुक्. धापय**— √*dhā* to suck, caus. impv. 2nd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'संसम्' इति चतुर्ऋचं चत्वारिंशं सूक्तं संवननस्यार्षम्। 'समानो मन्त्रः' इति तृतीया त्रिष्टुप् शिष्टास्तिस्रोऽनुष्टुभः। प्रथमाया अग्निर्देवता। शिष्टानां संज्ञानम्। अनुक्रम्यते च—'संसं चतुष्कं संवननः संज्ञानमाद्याग्नेयी तृतीया त्रिष्टुप्' इति। 'आनुष्टुभं तु' इति पूर्वमुक्तत्वादवशिष्टानामनुष्टुप्त्वम्। सूक्तविनियोगो लैङ्गिकः॥

सम्ऽसम्। इत्। युवसे। वृषन्। अग्ने। विश्वानि। अर्यः। आ॥
इळः। पदे। सम्। इध्यसे। सः। नः। वसूनि। आ। भर॥१॥

सा० भा०—हे वृषन् कामानां वर्षितः अग्ने अर्यः ईश्वरस्त्वम् 'अर्यः स्वामिवैश्ययोः' (पा० सू० ३. १. १०३) इति यत्प्रत्ययान्तो निपातितः। 'अर्यः स्वाम्याख्यायाम्' (फि० सू० १. १८) इत्यन्तोदात्तत्वम्। स त्वं विश्वानि सर्वाणि भूतजातानि संसम्। 'प्रसमुपोदः पादपूरणे' (पा० सू० ८. १. ६) इति समो द्विर्वचनम्। इच्छब्दोऽवधारणे। आ समन्तात् सं युवसे मिश्रयसि। देवेषु मध्ये त्वमेव सर्वाणि भूतजातानि वैश्वानरात्मना व्याप्नोषि। नान्य इत्यर्थः। किंच इळः इडायाः पृथिव्याः पदे स्थाने उत्तरवेदिलक्षणे। 'एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः' (ऐ० ब्रा० १. २८) इति ब्राह्मणम्। तत्र त्वं समिध्यसे ऋत्विग्भिः संदीप्यसे। सः तादृशस्त्वं नः अस्माकं वसूनि धनानि आ भर आहर॥

शब्दा० संसम्=सम् उपसर्ग की आवृत्ति की गई है, इत्=एक निपात, संयुवसे=मिलाते हो, वृषन्=ओ इच्छाओं को पूरा करनेवाले, अग्ने=ओ अग्नि, विश्वानि=सबको, अर्यः=स्वामी, आ=पदपूरण के लिये प्रयुक्त निपात, इळस्पदे=वेदि पर, समिध्यसे=प्रज्ज्वलित किये जाते हो, सः=वह (तुम) नः=हमलोगों के लिये, वसूनि=सम्पत्ति, आभर=लावो।

हि० अ०—ओ इच्छाओं को पूरा करनेवाले अग्नि, स्वामी (के रूप में तुम) सबको चारों तरफ से मिलाते हो। तुम वेदि पर प्रज्ज्वलित किये जाते हो; ऐसे तुम हमलोगों के लिये सम्पत्ति लावो।

Trans.—O Agni, the fulfiller of desires, as a lord (thou) unitest all on all sides. Thou art kindled at

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the alter of earth. Thou as such bring opulence on all sides.

Notes—संसम् –Iterative compd.; Sāyaṇa takes it as an expletive particle. युवसे—√*yu* to unite, pres. mid. 2nd. sing. अर्यः—Lord (Sāyaṇa), friends (Griffith). इळस्पदे—'At the place of earth' (Sāyaṇa), 'in libations' place' (Griffith). समिध्यसे—√*idh* to kindle, pres. pass. 2nd. sing. आ भर—√*bhṛ* with आ to bring, pres. impv. 2nd. sing.

सम् । गच्छध्वम् । सम् । वदध्वम् । सम् । वः । मनांसि । जानताम् ॥ देवाः । भागम् । यथा । पूर्वे । समऽजानानाः । उपऽआसते ॥२॥

सा० भा०—हे स्तोतारः यूयं सं गच्छध्वम् । संगताः संभूता भवत । 'समो गम्यृच्छि' इत्यादिना गमेरात्मनेपदम् । तथा सं वदध्वं सह वदत । परस्परं विरोधं परित्यज्यैकविधमेव वाक्यं ब्रूतेति यावत् । 'व्यक्तवाचां समुच्चारणे' (पा० सू० १. ३. ४८) इति वदेरात्मनेपदम् । वः युष्माकं मनांसि सं जानताम् । समानमेकरूपमेवार्थमवगच्छन्तु । 'संप्रतिभ्यामनाध्याने' (पा० सू० १. ३. ४६) इति जानातेरात्मनेपदम् । यथा पूर्वे पुरातनाः देवाः संजानानाः ऐकमत्यं प्राप्ता हविर्भागम् उपासते यथास्वं स्वीकुर्वन्ति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुतेति शेषः ।

शब्दा०—संगच्छध्वम्=एक साथ जावो, संवदध्वम्=एक साथ बोलो, वः=तुमलोगों का, मनांसि=मन, संजानताम्=एक मतवाला हो, देवाः=देवता, भागम्=हिस्सा, यथा=जिस प्रकार, पूर्वे=पुराने, संजानानाः=एकमत होकर, उपासते=स्वीकार करते हैं ।

हि० अ०—एक साथ जावो, एक साथ बोलो, तुम्हारा मन एक मत होवे; जिस प्रकार पुराने देवता एक मत होकर यज्ञ भाग स्वीकार करते हैं ।

Trans.—Go together, speak together, let your minds be of one accord ; as the ancient gods with one accord accept their sacrificial share.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—संगच्छध्वम्—√*gam* with सम् to go together, pres. mid. impv. 2nd. plu. संवदध्वम्—√*vad* with सम् to speak together, pres. mid. impv. 2nd. plu. सं जानताम्—√*jñā* with सम् to be of one accord, pres. mid. impv. 3rd. plu. संजानानाः—√*jñā* with सम् to be of one accord, pres. part. nom. plu. उपासते—√*ās* with उप to accept, pres. mid. 3rd. plu. ; not unaccented because preceded by यथा.

समानः । मन्त्रः । समऽइतिः । समानी । समानम् । मनः । सह । चित्तम् । एषाम् ॥ समानम् । मन्त्रम् । अभि । मन्त्रये । वः । समानेन । वः । हविषा । जुहोमि ॥३॥

सा० भा० पूर्वोऽर्धर्चः परोक्षकृतः उत्तरः प्रत्यक्षकृतः । एषाम् एकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतॄणां वा मन्त्रः स्तुतिः शस्त्राद्यात्मका गुप्तभाषणं वा समानः एकविधोऽस्तु । तथा समितिः प्राप्तिरपि समानी एकरूपास्तु । 'केवलमामक' इत्यादिना समानशब्दात् ङीप् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । तथा मनः मननसाधनमन्तःकरणं चैषां समानम् एकविधमप्यस्तु । चित्तं विचारणं ज्ञानं तथा सह सहितं परस्परस्यैकार्थेनैकीभूतमस्तु । अहं च वः युष्माकं समानम् एकविधं मन्त्रम् अभि मन्त्रये । ऐकविध्याय संस्करोमि । तथा वः युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिना अहं जुहोमि । 'तृतीया च होश्छन्दसि' (पा० सू० २. ३. ३) इति कर्मणि कारके तृतीया । वषट्कारेण हविः प्रक्षेपयामीत्यर्थः ॥

शब्दा० - समानः=समान, मन्त्रः=स्तुति, समिति=प्राप्ति, समानी=समान, समानम्=समान, मनः=मन, सह=संयुक्त, चित्तम्=अन्तःकरण एषाम्=इनका, समानम्=समान, मन्त्रम्=स्तुति को, अभि मन्त्रये=संबोधित करता हूँ, वः=तुम लोगों के, समानेन=समान, वः=तुम लोगों के, हविषा=हवि से, जुहोमि=हवन करता हूँ ।

हि० अ०—इनकी स्तुति समान हो, प्राप्ति भी समान हो, मन समान हो, चित्त संयुक्त हो । तुम लोगों की समान स्तुति को मै संबोधित करता हूँ; तुम लोगों के समान हवि से मै हवन करता हूँ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Trans.—Let their hymn be the same, their gain be the same, their mind be the same, their heart be united. I address your same hymn, I offer with your same oblation.

Notes—मन्त्रः—'Hymn' (Sāyaṇa), 'place' (Griffith). समिति—(√*i* with सम् to go together), Sāyaṇa takes it to mean 'gain' and Griffith as 'assembly'. अभिमन्त्रये—√*mantra* with अभि to consecrete, to address, pres. mid. 1rst., sing. जुहोमि—√*hu* to sacrifice, pres. 1rst. sing.

समानी । वः । आऽकूतिः । समाना । हृदयानि । वः ॥ समानम् । अस्तु । वः । मनः । यथा । वः । सुऽसह । असति ॥४॥

सा० भा०—हे ऋत्विग्यजमानाः वः युष्माकम् आकूतिः संकल्पोऽध्यवसायः समानी एकविधोऽस्तु । तथा वः युष्माकं हृदयानि समाना समानान्येकविधानि सन्तु । तथा वः युष्माकं मनः अन्तःकरणम् । प्रत्येकापेक्षयैकवचनम् । तदपि समानमस्तु । यथा वः युष्माकम् सुसह शोभनं साहित्यम् असति भवति [तथा समानमस्त्वित्यन्वयः । अस्तेर्लटि 'बहुलं छन्दसि' इति शपो लुगभावः ॥

शब्दा०—समानी=समान, वः=तुम लोगों का, आकूतिः=संकल्प, समाना=समान, हृदयानि=अन्तःकरण. वः=तुम लोगों का, समानम्=समान, अस्तु=हो, वः=तुम लोगों का, मनः=मन, यथा=जिस प्रकार, वः=तुम लोगों का सुसह=सुन्दर साथ, असति=हो ।

हि० अ०—तुम्हारा संकल्प समान हो, तुम्हारा अन्तःकरण समान हो, तुम्हारा मन समान हो, जिससे तुम्हारा सुन्दर साथ हो सके ।

Trans.—Be your intention the same, your hearts the same, your mind the same, that it may be a good-company for you.

Notes—आकूतिः—See note X.151.4. असति—√*as* to be, pres. subju. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'कृष्णाजिनाद्या समिदाधानात् कृत्वा ब्रह्मन्निति जपत्युत्सर्गकाल एके' (का० २०. ४. ११)। कृष्णाजिनदीक्षात आरभ्योखायां त्रयोदशसमिदाधानान्तं कृत्वाध्वर्युरेव ब्रह्मन्निति जपति उत्सर्गेरुपतिष्ठत इत्युत्सर्गोपस्थानकाले एके आ ब्रह्मन्निति जपमिच्छन्ति। यद्वाश्वस्योत्सर्गकाले विभूर्मात्रेति जपानन्तरमित्यर्थः। लिङ्गोक्तदेवता उत्कृतिः।

आ। ब्रह्मन्। ब्राह्मणः। ब्रह्मवर्चसीतिब्रह्म। वर्चसी। जायताम्। आ। राष्ट्रे। राजन्यः। शूरः। इषव्यः। अतिव्याधीत्यति। व्याधी। महारथऽइतिमहा। रथः। जायताम्। दोग्ध्री। धेनुः। वोढा। अनड्वान्। आशुः। सप्तिः। पुरन्धिरितिपुरम्। धिः। योषा। जिष्णुः। रथेष्ठाऽइतिरथे। स्थाः। सभेयः। युवा। आ। अस्य। यजमानस्य। वीरः। जायताम्। निकामेनिकामऽइतिनिकामे। निकामे। नः। पर्जन्यः। वर्षतु। फलवत्यइतिफल। वत्यः। नः। ओषधयः। पच्यन्ताम्। योगक्षेमइतियोग। क्षेमः। नः। कल्पताम् ॥२२॥

म०भा०--हे ब्रह्मन् राष्ट्रे अस्मद्देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः आजायताम् उत्पद्यताम्। राजन्यः क्षत्रियश्चेदृश आजायताम्। कीदृशः। शूरः पराक्रमी। 'शूर विक्रान्तौ' शूरयति शूरः इषव्यः इषुभिर्विध्यतीति इषव्यः। यद्वा इषौ कुशलः इषव्यः। अतिव्याधी अत्यन्तं विध्यतीत्यतिव्याधी शत्रुभेदनशीलः। महारथः एकः सहस्रं यजति स महारथः। दोग्ध्री दुग्धपूरयित्री धेनुः आजायताम् राष्ट्रे इति सर्वत्र संबन्धः। अनड्वान् वृषभो वोढा वहनशीलो जायताम्। सप्तिः अश्वः आशुः शीघ्रङ्गामी जायताम्। योषा स्त्री पुरन्धिः पुरं शरीरं सर्वगुणसंपन्नं दधाति पुरन्धिः। रथे तिष्ठतीति रथेष्ठाः क्विप् सप्तम्या अलुक्। रथे स्थितो युयुत्सुर्नरो जिष्णुः जयनशीलो जायताम्। युवा आ अस्येति पदच्छेदः। अस्य यजमानस्य युवा समर्थः सभेयः सभायां योग्यो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वीरः पुत्रो जायताम्। सभायां साधुः सभेयः 'ढच्छन्दसि' (पा० सू० ४. ४. १०६) इति सभाशब्दात्तत्र साधुरित्यर्थे ढप्रत्ययः। तस्य ण्यादेशः। किंच नो अस्माकं राष्ट्रे पर्जन्यो निकामे निकामे नितरां कामनायां सत्यां वर्षतु। अभ्यासो वीप्सार्थः। नोऽस्माकमोषधयः यवाद्याः फलवत्यः फलयुक्ताः पच्यन्तां स्वयमेव पक्वा भवन्तु। नो अस्माकं योगक्षेमः कल्पताम् योगेन युक्तः क्षेप्तो योगक्षेमः स क्लृप्तो भवतु। अलब्धलाभो योगः लब्धस्य परिपालनं क्षेमः॥

शब्दा०—ब्रह्मन्=ओ ब्रह्मा, ब्राह्मणः=ब्राह्मण ब्रह्मवर्चसी=पवित्र ज्ञानवाला तेजस्वी, आ जायताम्=उत्पन्न हो, राष्ट्रे=हमारे राष्ट्र में, राजन्य=क्षत्रिय शूरः=पराक्रमी, इषव्यः=वाण चलाने में कुशल, अतिव्याधी=शत्रु का अत्यन्त भेदन करनेवाला, महारथः=महान योद्धा, आ जायताम्=उत्पन्न हो, दोग्ध्री=प्रचुर दूध देनेवाली, धेनुः=गाय, वोढ़ा=भार ढोनेवाला, अनड्वान्=बैल, आशुः=शीघ्रगामी, सप्तिः=अश्व, पुरन्धिः=सर्वगुणसम्पन्न, योषा=स्त्री, जिष्णुः=जीतनेवाला, रथेष्ठाः=रथ में बैठनेवाले, सभेयः=सभा में जाने योग्य, युवा=युवक, अस्य=इस, यजमानस्य=यजमान को, वीरः=बहादुर पुत्र, आ जायताम्=उत्पन्न हो, निकामेनिकामे=इच्छानुकूल, नः=हमारी, पर्जन्यः=मेघ, वर्षतु=बरसे, फलवत्यः=फल से युक्त, नः=हमारे, ओषधयः=पौधे, पच्यन्ताम्=पकें, योगक्षेमः=अप्राप्त वस्तु की प्राप्ति तथा प्राप्त वस्तु की रक्षा, नः=हमारे, कल्पताम्=सम्भव हो।

हिं० अ०—ओ ब्रह्मन्, हमारे राष्ट्र में पवित्र ज्ञानसम्पन्न तेजस्वी ब्राह्मण उत्पन्न हो; पराक्रमी, बाण चलाने में कुशल, शत्रु का अत्यन्त भेदन करनेवाले, महान् योद्धा क्षत्रिय उत्पन्न हो; अधिक दूध देनेवाली गाय, भार ढोने में समर्थ शक्तिशाली बैल, शीघ्रगामी अश्व, सर्वगुणसम्पन्न स्त्री, रथ में बैठनेवाले तथा (शत्रु को) जीतनेवाले (बहादुर उत्पन्न हों); इस यजमान को सभा में जाने योग्य युवक वीर पुत्र उत्पन्न हो; पर्जन्य हमारी इच्छानुकूल वर्षा करे; हमारे पौधे फल से युक्त होकर स्वयं पकें; हमें अप्राप्त वस्तु की प्राप्ति तथा प्राप्त वस्तु की रक्षा सम्भव हो।

Trans.—O Brahman, let there be born in our nation the Brahmin, preeminent in sacred knowledge; let there be born kṣatriya, valiant, skilled in archery, exceedingly piercing, great fighter; (let there be born)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the cow, yielding abundant milk; the ox, good at carrying; the horse, swift-going; the woman, endowed with all good qualities; victorious (man) sitting on the chariot; let there be born youthful and heroic sons, fit for attending the assembly, to this sacrficer. May Parjanya rain as much as we desire; may our fruit-bearing plants ripen; may acquisition and preservation be possible for us.

Notes—The Adhvaryu priest addresses the Brahman priest that the king may secure the blessings which he hopes by performing the sacrifice. Such blessings form the content of Bharatavākyas in the post Vedic dramatic literature. ब्रह्मन्—One of the four priests; voc. sing; accented though it does not begin the Pāda (cf. Ṛ.V. X. 71.11). ब्रह्मवर्चसी—Preeminent in holiness or sacred knowledge. Both Uvaṭa and Mahidhara take it to mean 'the studious and performer of the sacrifice.' The author of the Pada-text of the yajurveda adds इति after every compd. word and repeates the word after इति and treats the second member as a separate Pada. जायताम्—√*jā* to be born, mid. impv. 3rd. sing. अतिव्याधी—One who pierces the foes exceedingly; governing compd. निकामेनिकामे—According to our desire; Iterative compd. accented on the first member. वर्षतु—√*vṛs* to rain, impv. 3rd. sing. पच्यन्ताम्—√*pac* to ripen, mid. impv. 3rd. plu. योगक्षेम—Acquisition and preservation; Dvandva compd. accented on the final syllable of the second member. कल्पताम्—√*kḷp* to be adapted, mid. impv. 3rd. sing.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरुषमन्त्रा उक्ताः। अथ सर्वमेधमन्त्रा उच्यन्ते प्रवायुमच्छेत्यस्मात्प्राक (३३. ५५)। स्वयंभुब्रह्मदृष्टा आत्मदेवत्याः सप्तमेऽहनि आप्तोर्यामसंज्ञिके सर्वहोमे विनियुक्ताः 'आप्तोर्यामः सप्तममहर्भवति' इत्युपक्रम्य सर्वं जुहोति सर्वस्यास्यै सर्वस्यावरुद्धचै' (१३।७।१।९) इति श्रुतेः। द्वे अनुष्टुभौ। विज्ञानात्मा परेणात्मना विशिष्टोऽग्न्यादिष्वोतप्रोतत्वेनोपास्योऽभिधीयते।

तत्। एव। अग्निः। तत्। आदित्यः। तत्। वायुः। तत्। ॐऽइत्यूँ। चन्द्रमाः॥ तत्। एव। शुक्रम्। तत्। ब्रह्म। ताः। आपः। सः। प्रजापतिरितिप्रजा। पतिः॥१॥

म० भा० – अग्निः तदेव कारणं ब्रह्मैव आदित्यस्तद् एव वायुस्तद् एव चन्द्रमाः तत् तदेव। उ एवार्थे। शुक्रं शुक्लं तत् प्रसिद्धम्। ब्रह्म त्रयीलक्षणं तत् ब्रह्मैव। ताः प्रसिद्धाः आपः जलानि स प्रसिद्धः प्रजापतिरपि तदेव ब्रह्म॥

शब्दा०—तत्=वह, एव=ही, अग्निः=अग्नि, तत्=वही, आदित्यः=सूर्य, तत्=वही, वायुः=हवा, तत्=वही, उ=निश्चित अर्थ का वाचक, निपात, चन्द्रमाः=चन्द्रमा, तत्=वह, एव=ही, शुक्रम्=तेज, तत्=वही, ब्रह्म=प्रार्थना, ताः=य, आपः=जल, सः=वह, प्रजापतिः=प्रजापति।

हि० अ०—वही अग्नि है; वही आदित्य है; वही वायु है; वही चन्द्रमा है; वही तेज है; वही प्रार्थना है; वही जल है; वही प्रजापति है।

Trans.—That, indeed, is Agni; that, (indeed), is Ādityа; that, the wind; that, indeed, the moon. That, indeed, is lustre; that the prayer, these waters; he is Prajāpati.

Notes—**तत्**—That Supreme self, i.e. Paramātman. **उ**—It is lengthened and nasalized before **इति** in the Pada-text like that of the Ṛ.V. But unlike the latter its lengthened and nasalized form is repeated after **इति**.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वे । निमेषाऽइति नि । मेषाः । जज्ञिरे । विद्युतऽइति वि । द्युतः । पुरुषात् । अधि ॥ न । एनम् । ऊर्ध्वम् । न । तिर्यञ्चम् । न । मध्ये । परि । जग्रभत् ॥२॥

म० भा० – सर्वे निमेषाः त्रुटिकाष्ठाघट्यादयः कालविशेषाः पुरुषात् अधि पुरुषसकाशात् जज्ञिरे । कीदृशात्पुरुषात् । विद्युतः विशेषेण द्योतते विद्युत् तस्मात् । किंच कश्चिदपि एनं पुरुषम् ऊर्ध्वम् उपरिभागे न परिजग्रभत् परिगृह्णाति । एवं तिर्यञ्चं चतुर्दिक्षु न परिजग्रभत् मध्ये मध्यदेशेऽपि न गृह्णाति । न ह्यसौ प्रत्यक्षादीनां विषय इत्यर्थः । स एष 'नेति नेत्यात्माऽगृह्यो न हि गृह्यते' इति श्रुतेः । जग्रभत् । ग्रहेः शतरि जुहोत्यादित्वेन रूपम् ॥२॥

शब्दा० सर्वे=सम्पूर्ण, निमेषाः=समय के परिमाण, जज्ञिरे=उत्पन्न हुये हैं, विद्युतः=प्रकाशमान, पुरुषात्=परमात्मा के, अधि=पास से, न =नहीं एनम्=इसको, ऊर्ध्वम्=ऊपर, तिर्यञ्चम्=तीरछे, न=नहीं, मध्ये =बीच में, परि जग्रभत्=समझ सकता ।

हि० अ० समय के सम्पूर्ण परिमाण प्रकाशमान परमात्मा से उत्पन्न हुये हैं । उसको उपर, तीरछे या बीच में कोई नहीं समझ सकता ।

Trans.—All the measures of time have been born from illustrious Paramātman. None can comprehend him above, across or in the middle.

Notes—जज्ञिरे –√*jan* to generate, perf. mid. 3rd. plu. परिजग्रभत् –√*grabh* to seize, perf. 3rd. sing.

न । तस्य । प्रतिमेतिप्रति । मा । अस्ति । यस्य । नाम । महत् । यशः ॥ हिरण्यगर्भऽइति हिरण्य । गर्भः । इति । एषः । मामेतिमा । मा । हिंसीत् । इति । एषा । यस्मात् । न । जातः । इति । एषः ॥३॥

म० भा० – द्विपदा गायत्री । तस्य पुरुषस्य प्रतिमा प्रतिमानमुपमानं किञ्चिद्वस्तु नास्ति । अत एव नाम प्रसिद्धं महत् यशः यस्यास्ति । सर्वातिरिक्तयशा इत्यर्थः । हिरण्यगर्भ इत्येषोऽनुवाकश्चतुर्ऋचः हिरण्यगर्भः यः प्राणतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्येमे य आत्मदा इति (२५.१०-१३)। मा मा हिंसीज्जनितेत्येका एषा (१२. १०२)। यस्मान्न जातः इन्द्रश्चः सम्राडिति (८. ३६-३७) – द्व्यृचोऽनुवाकः। एताः प्रतीकचोदिताः पूर्वं पठितत्वादादिमात्रेणोक्ता ब्रह्मयज्ञे जपे च सर्वा अध्येयाः। एवं सर्वत्र।

शब्दा०—न=नहीं, तस्य=उसका, प्रतिमा=प्रतिमान अर्थात् बराबरी का, अस्ति=है, यस्य=जिसका, नाम=विख्यात है, महत्=महान्, यशः=कीर्ति, हिरण्यगर्भः=यजुर्वेद के पच्चीसवें अध्याय के दसवें मन्त्र से लेकर तेरहवें मन्त्र तक का प्रतीक है, इन मन्त्रों में परमात्मा की शक्ति का वर्णन है, इति=ऐसा, एषः=यह अनुवाक, मा मा हिंसीत्=यजुर्वेद बारहवें अध्याय के १०२ वां मन्त्र का प्रतीक है। इति=ऐसी, एषा=यह ऋचा, यस्मान्न जातः=यजुर्वेद के आठवें अध्याय के छत्तीसवें सैंत्तीसवें इन दो मन्त्र वाले अनुवाक का प्रतीक है, इति=ऐसा, एषः=यह अनुवाक।

हि० अ०—उस परमात्मा का कोई प्रतिमान नहीं है, जिसकी महान् कीर्ति 'सर्व प्रथम हिरण्यगर्भ उत्पन्न हुआ'····आदि, 'वे मुझको कष्ट न पहुंचावें' ···आदि, 'उनको छोड़कर कोई दूसरा उत्पन्न नहीं है'···आदि - मन्त्रों से प्रसिद्ध है।

Trans.—Nothing is the counterpart of him whose great glory is well known by the verses—'in the beginning arose Hiraṇyagarbha', etc ; 'let him not harm me' etc. ; 'than whom there is no other born' etc.

Notes—'हिरण्यगर्भ····' 'मा मा हिंसीत्·····' and 'यस्मान्न जात·····' are the verses of the Yajurveda proclaiming the glory of the Supreme self.

एषः। ह। देवः। प्रदिशऽइतिप्र। दिशः। अनु। सर्वाः। पूर्वः। ह। जातः। सः। ॐऽइत्यूँ। गर्भे। अन्तरित्यन्तः॥ सः। एव। जातः। सः। जनिष्यमाणः। प्रत्यङ्। जनाः। तिष्ठति। सर्वतोमुखऽइतिसर्वतः। मुखः॥४॥

म० भा० - चतस्रस्त्रिष्टुभः। ह प्रसिद्धम्। एषो ह देव सर्वाः प्रदिश अनुतिष्ठति व्याप्य स्थितः। हे जनाः ह प्रसिद्धमेष पूर्वः प्रथमो जात उत्पन्नः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गर्भे अन्तः गर्भमध्ये स उ स एव तिष्ठति । जातोऽपि स एव जनिष्यमाणः उत्पत्स्यमानोऽपि स एव । प्रत्यङ् प्रतिपदार्थमञ्चति प्रत्यङ् । सर्वतोमुखः सर्वतोमुखाद्यवयवा यस्य । अचिन्त्यशक्तिरित्यर्थः ॥

शब्दा० - एषः=यह, ह=निश्चित अर्थ का वाचक निपात, देवः=देव, प्रदिशः=दिशाओं को, सर्वाः=सभी, पूर्वः=सर्व प्रथम, ह=निश्चित अर्थ का वाचक निपात, जातः=उत्पन्न हुआ था, सः=वह, उ=निश्चित अर्थ का वाचक निपात, गर्भे=गर्भ में, अन्तः=अन्दर, सः=वह, एव=ही, जातः=उत्पन्न हुआ है, सः=वही, जनिष्यमाणः=उत्पन्न होनेवाला, प्रत्यङ्=प्रत्येक पदार्थ में स्थित रहनेवाला, जनाः=ओ मनुष्यों, तिष्ठति =स्थित रहता है, सर्वतोमुखः=सभी तरफ अवयववाला अर्थात् अचिन्त्य शक्तिवाला ।

हि० अ० निश्चित ही यह देव सभी दिशाओं को व्याप्त कर स्थित है; वही सर्व प्रथम गर्भ में उत्पन्न हुआ था । वही उत्पन्न हुआ है; वही उत्पन्न होनेवाला है । ओ मनुष्यों, अचिन्त्य शक्तिवाला परमात्मा प्रत्येक पदार्थ में स्थित है ।

Trans.—This God, indeed, pervades all the quarters; He, indeed, was born aforetime in the womb. He indeed, is born and to be born here. O men, He who is of uncomprehensible power, goes everywhere.

Notes—अन्तः—Final visarjanīya is rhotacized one; hence, इति is added after it in the Pada-text. जनिष्यमाण—√*jan* to generate, fut. pass. part. प्रत्यङ्—Derived from प्रति+√*añc* to go to. जनाः—Voc. accented, though not coming in the beginning of a Pāda. Griffith takes it as nom. and renders as 'children.' सर्वतोमुखः—Ominipresent; Uvaṭa and Mahidhara take it to mean 'one who is of uncomprehensible power'.; Bahuvrīhi compd. accented on the second member.

यस्मा॑त् । ज॒ातम् । न । पु॒रा । किम् । च॒न । एव॑ । यः । आ॒ऽब॒भूवेत्या॑ । ब॒भूव॑ । भुव॑नानि । विश्वा॑ ॥ प्र॒जाप॑ति॒रिति॑प्र॒जा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पतिः । प्रजयेति प्र । जया । संरराणऽइति सम् । रराणः । त्रीणि । ज्योतींषि । सचते । सः । षोडशी ॥५॥

म० भा०—यस्मात् पुरा किंचन किमपि न जातमेव । यश्च विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि आबभूव समन्ताद्भावयामास । अन्तर्भूतो ण्यर्थः । स षोडशी षोडशावयवलिङ्गशरीरी प्रजापतिः प्रजया संरराणः रममाणः त्रीणि ज्योतींषि रवीन्द्वग्निरूपाणि सचते सेवते ॥

शब्दा०—यस्मात्=जिसके, जातम्=उत्पन्न, न=नहीं, पुरा=पहले, किञ्चन=कोई भी वस्तु, एव=ही, यः=जो, आबभूव=कल्पना किया, भुवनानि=लोकों की, विश्वा=सम्पूर्ण, प्रजापतिः=प्रजापति, प्रजया=प्रजा के साथ, संरराणः=आनन्दित होता हुआ, त्रीणि=तीन, ज्योतींषि=प्रकाश को, सचते=धारण करता है, षोडशी=सोलह अवयववाला ।

हि० अ०—जिसके पहले कोई उत्पन्न वस्तु नहीं थी, जिसने सम्पूर्ण जीवों की कल्पना की, वह सोलह अवयववाला प्रजापति प्रजा के साथ आनन्दित होता हुआ तीनों प्रकाश को धारण करता है ।

Trans.—Before whom nothing was born, who imagined all the creatures, that sixteen-limbed Prajāpati rejoicing with offerspring accompanies the three lustres.

Notes—आबभूव—$\sqrt{bhū}$ to be, perf. 3rd. sing.; not unaccented because preceded by यः. संरराणः—$\sqrt{rā}$ to give, perf. part. Mahidhara takes it to mean 'rejoicing'. त्रीणि ज्योतींषि—Three lustres viz., sun, moon, fire.

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनारभ्याधीतोऽध्यायः आपितृमेधात् आदित्ययाज्ञवल्क्यदृष्टा मन्त्राः पाठे विनियुक्ताः। षड्ऋचस्त्रिष्टुभो मनोदेवत्याः शिवसंकल्पदृष्टाः।

यत्। जाग्रतः। दूरम्। उदैतीत्युत्। एति। दैवम्। तत्। ॐऽइत्यूँ। सुप्तस्य। तथा। एव। एति॥ दूरङ्गममिति दूरम्। गमम्। ज्योतिषाम्। ज्योतिः। एकम्। तत्। मे। मनः। शिवसङ्कल्पमिति शिव। सङ्कल्पम्। अस्तु॥१॥

म० भा०—ऋषिर्वदति। तन्मे मनः शिवसंकल्पमस्तु शिवः कल्याणकारी धर्मविषयः संकल्पो यस्य तत् तादृशं भवतु। मन्मनसि सदा धर्म एव भवतु न कदाचित्पापमित्यर्थः। तत्किम्। यत् मनो जाग्रतः पुरुषस्य दूरमुदैति उद्गच्छति चक्षुराद्यपेक्षया मनो दूरगामीत्यर्थः। यच्च दैवं दीव्यति प्रकाशते देवो विज्ञानात्मा तत्र भवं दैवमात्मग्राहकमित्यर्थः। मनसैवाद्रष्टव्यमेतदप्रमयं ध्रुवम्' इति श्रुतेः। तत् उ। यदः स्थाने तच्छब्दः उकारश्चार्थः। यच्च मनः सुप्तस्य पुंसः तथैव इति यथा गतं तथैव पुनरागच्छति स्वापकाले सुषुप्तावस्थायां पुनरागच्छति। यच्च दूरंगमं दूरात् गच्छतीति दूरंगमम् खश्प्रत्ययः। अतीतानागतवर्तमानविप्रकृष्टव्यवहितपदार्थानां ग्राहकमित्यर्थः। यच्च मनो ज्योतिषां प्रकाशकानां श्रोत्रादीन्द्रियाणामेकमेव ज्योतिः प्रकाशकं प्रवर्तकमित्यर्थः। प्रवर्तितान्येव श्रोत्रादीन्द्रियाणि स्वविषये प्रवर्तन्ते। आत्मा मनसा संयुज्यते मनः इन्द्रयेणेन्द्रियमर्थेनेति न्यायोक्तेर्मनः संबन्धमन्तरा तेषामप्रवृत्तेः। तादृशं मे मनः शान्तसंकल्पमस्तु॥

शब्दा०—यत्=जो मन, जाग्रतः=जागते हुए मनुष्य का, दूरम्=दूर उदैति=जाता है, दैवम्=आत्मदर्शन करने वाला, तत्=जो, उ=और, सुप्तस्य=सोये हुए मनुष्य का, तथा=उसी प्रकार, एव=ही, एति=लौट आता है, दूरंगमम्=दूर जानेवाला अर्थात् अतीत, अनागत, वर्तमान सब पदार्थों को जाननेवाला, ज्योतिषाम्=श्रोत्रादि ज्ञानेन्द्रियों का, ज्योतिः=प्रकाश, एकम्=एकमात्र, तत्=वह, मे=मेरा, मनः=मन, शिवसंकल्पम्=मंगलकारक संकल्पवाला, अस्तु=होवे।

हि० अ०—जो मन पुरुष की जाग्रत अवस्था में (नेत्र आदि अन्य ज्ञानेन्द्रियों

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

की अपेक्षा) अधिक दूर जाता है, जो एक मात्र आत्मा का दर्शन करने वाला है, जो पुरुष की सुषुप्ति अवस्था में उसी प्रकार लौट आता है जिस प्रकार जाग्रत अवस्था में दूर जाता है, और जो सब बाह्य इन्द्रियों का एकमात्र प्रकाशक है वह मेरा मन, शुभ संकल्पवाला हो।

Trans.—May that mind of mine which goes farther off (than other sense organs like eye etc.) when one is sleeping, which alone is the perceiver of the soul, which comes back in the same way in which it goes away when one is sleeping, and which is the sole light of all external organs, be of auspicious resolution.

Notes—उदैति—उत्+आ+$\sqrt{i}$ to go, pres. 3rd. sing. तत्—It is used in the sense of यत्.

येन। कर्माणि। अपसः। मनीषिणः। यज्ञे। कृण्वन्ति। विदथेषु। धीराः॥ यत्। अपूर्वम्। यक्षम्। अन्तरित्यन्तः। प्रजानामिति प्र। जानाम्। तत्। मे। मनः। शिवसङ्कल्पमिति शिव। सङ्कल्पम्। अस्तु॥२॥

म० भा०—मनीषिणः मेधाविनः यज्ञे येन मनसा सता कर्माणि कृण्वन्ति कुर्वन्ति 'कृ करणे' स्वादिः। मनः स्वास्थ्यंविना कर्माप्रवृत्ते। केषु सत्सु। विदथेषु ज्ञानेषु सत्सु विद्यन्ते ज्ञायन्ते तानि विदथानि तेषु। वेत्तेरौणादिकोऽथप्रत्ययः प्रत्ययोदात्तत्वेन मध्योदात्तं पदम् 'प्रत्ययः परश्च आद्युदात्तश्च' (पा०सू० ३. १. १-३) इति पाणिन्युक्तेः यज्ञसंबन्धिनां हविरादिपदार्थानां ज्ञानेषु सत्स्वित्यर्थः। कीदृशा मनीषिणः। अपसः अप इति कर्मनाम (निघ० २. १. १) अपो विद्यते येषां ते अपस्विनः कर्मवन्तः 'अस्मायामेधास्रजो विनिः' (पा०सू० ५. २. १२१) इति विन्प्रत्ययः 'विन्मतोर्लुक्' इतीष्ठाभावेऽपि छान्दसो विनो लुक् (पा०सू० ५. ३. ६५) सदा कर्मनिष्ठा इत्यर्थः। तथा धीराः धीमन्तः धीर्विद्यते येषां ते धीराः कर्मण्यण् (पा०सू० ३.२. १)। यच्च मनः अपूर्वम् न विद्यते पूर्वमिन्द्रियं यस्मात्तदपूर्वम् इन्द्रियेभ्यः पूर्वं मनसः सृष्टेः। यद्वा अपूर्वमनपरमबाह्यमित्युक्तेरपूर्वमात्मरूपमित्यर्थः। यच्च यक्षं यष्टुं शक्तं यज्ञम्। यजतेरौणादिकः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सन्प्रत्ययः 'ञ्नित्यादिर्नित्यम्' (पा०सू० ६. १. १७) इत्याद्युदात्तं पदम् । यच्च प्रजायन्ते इति प्रजास्तासां प्राणिमात्राणामन्तः शरीरमध्ये आस्ते इतरेन्द्रियाणि बहिःष्ठानि मनस्त्वन्तरिन्द्रियमित्यर्थः । तत् तादृशं मे मनः शिवसंकल्पमस्त्विति ध्याख्यातम् ॥

शब्दा०—येन=जिस मन से, कर्माणि=काम, अपसः=कर्मनिष्ठ, काम करने की आदतवाले मनुष्य, मनीषिणः=मेधावी पुरुष, यज्ञे=यज्ञ में, कृण्वन्ति=करते हैं, विदथेषु=ज्ञान होने पर, धीराः= बुद्धिमान् पुरुष, यत्=जो मन, अपूर्वम्=जिसके पहिले कोई इन्द्रिय नहीं होती अर्थात् सब इन्द्रियों से पहिले उत्पन्न, यक्षम्=यज्ञ करने में समर्थ, अथवा सब इन्द्रियों से पहिले उत्पन्न होने के कारण पूज्य, अन्तः=शरीर के भीतर, प्रजानाम्=प्रजा के, प्राणिमात्र के, तत्=वह, मे=मेरा, मनः=मन, शिवसंकल्पम्=शुभ संकल्पवाला, अस्तु=हो ।

हि० अ०—जिस मन से कर्मनिष्ठ बुद्धिमान् मेधावी पुरुष यज्ञ में (यज्ञ संबन्धी हविरादि पदार्थों का) ज्ञान होने पर कर्म करते हैं, जो सब इन्द्रियों से पहिले उत्पन्न होता है और यज्ञ करने में समर्थ है, और जो प्राणिमात्र के शरीर के भीतर रहता है, वह मेरा मन शुभ संकल्पवाला हो ।

Trans.—May that mind of mine through which sober and intelligent men devoted to the performance of religious rights do their work in a sacrifice on knowing the oblations etc., connected with it, which comes in existence before other organs do, which is capable of performing sacrifices and which is present in the body of all living beings, be of auspicious resolution.

यत् । प्रज्ञानमिति प्र । ज्ञानम् । उत । चेतः । धृतिः । च । यत् । ज्योतिः । अन्तः । अमृतम् । प्रजास्विति प्र । जासु ॥ यस्मात् । न । ऋते । किम् । चन । कर्म । क्रियते । तत् । मे । मनः । शिवसङ्कल्पमिति शिव । सङ्कल्पम् । अस्तु ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

म० भा०—यत् मनः प्रज्ञानं विशेषेण ज्ञानजनकम् प्रकर्षेण ज्ञायते येन तत् प्रज्ञानम्। 'करणाधिकरणयोश्च' (पा०सू० ३.३.११७) इति करणे ल्युट्-प्रत्ययः। उत अपि यत् मनः चेतः चेतयति सम्यक् ज्ञापयति तच्चेतः। 'चिती संज्ञाने' अस्मात् ण्यन्तादसुन्प्रत्ययः। सामान्यविशेषज्ञानजनकमित्यर्थः। यच्च मनो धृतिर्धैर्यरूपम्। मनस्येव धैर्योत्पत्तेर्मनसि धैर्यमुपचर्यते कार्यकारणयोरभेदात्। यच्च मनः प्रजासु जनेषु अन्तर्वर्तमानं सत् ज्योतिः प्रकाशकं सर्वेन्द्रियाणाम्। उक्तमपि पुनरुच्यते आदरार्थम्। 'अभ्यासे भूयांसमर्थं मन्यन्ते' (निरु० १.४२) इति यास्कोक्तेः। यच्चामृतममरणधर्मि आत्मरूपत्वात्। यस्मान्मनसः ऋते यन्मनोविना किंचन किमपि कर्म न क्रियते जनैः। सर्वकर्मसु प्राणिनां मनः पूर्वं प्रवृत्तेर्मनःस्वास्थ्यंविना कर्माभावादित्यर्थः। 'अन्यारादितरर्ते' (पा०सू० २. ३.२९) इत्यादिना यस्मादिति ऋतेयोगे पञ्चमी। तन्मे मन इति व्याख्यातम्॥

शब्दा० यत्=जो मन, प्रज्ञानम्=विशेष ज्ञान का साधन है, उत=और, चेतः=सामान्य ज्ञान करानेवाला है, धृतिः=धैर्य रूप है, च=और, यत्=जो, ज्योतिः=प्रकाशक, अन्तः=भीतर, अमृतम्=अमर, प्रजासु=प्राणियों में, यस्मात्=जिससे, न=नहीं, ऋते=बिना, किम्=कुछ, चन=भी, कर्म=काम, क्रियते=किया जाता है, तत्=वह, मे=मेरा, मनः=मन, शिवसंकल्पम्=शुभ संकल्पवाला, अस्तु=हो।

हि० अ० जो मन विशेष ज्ञान और सामान्य ज्ञान का साधन है, जो धैर्य रूप है, जो प्राणियों के भीतर (सब इन्द्रियों को प्रेरित करनेवाली) अमर ज्योति है, और जिसके बिना कोई काम नहीं किया जा सकता, वह मेरा मन शुभ संकल्पवाला हो।

Trans.—May that mind of mine which is the instrument of gaining special and general knowledge, which is steadiness itself, which is the immortal light in living beings (that directs the external organs to their respective objects) and without which no work is possible, be of auspecious resolution.

येन। इदम्। भूतम्। भुवनम्। भविष्यत्। परिगृहीतमितिपरि। गृहीतम्। अमृतेन। सर्वम्॥ येन। यज्ञः। तायते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तहोतेतिसप्त। होता। तत्। मे। मनः। शिवसङ्कल्पमिति शिव। सङ्कल्पम्। अस्तु ॥४॥

सा० भा०—येन मनसा इदं सर्वं परिगृहीतम् परितः सर्वतो ज्ञातम्। इदं किंभूतम्। भूतकालसंबन्धि वस्तु। भुवनं भवतीति भुवनम्। भवतेः क्यु-प्रत्ययः वर्तमानकालसंबन्धि। भविष्यत् 'लृटः सद्वा' (पा०सू० ३.३.१४) इति शतृप्रत्ययः 'तौ सत्' (पा०सू० ३.२.१२७) इत्युक्तेः त्रिकालसंबद्धवस्तुषु मनः प्रवर्तत् इत्यर्थः। श्रोत्रादीनि तु प्रत्यक्षमेव गृह्णन्ति। कीदृशेन येन। अमृतेन शाश्वतेन। मुक्तिपर्यन्तं श्रोत्रादीनि नश्यन्ति मनस्त्वनश्वरमित्यर्थः। येन च मनसा यज्ञोऽग्निष्टोमादिः तायते विस्तार्यते। 'तनोतेर्यकि' (पा०सू० ६.४.४४) इत्याकारः। कीदृशो यज्ञः। सप्तहोता सप्तहोतारो देवानामाह्वातारो होतृ-मैत्रावरुणादयो यत्र स सप्तहोता। अग्निष्टोमे सप्तहोतारो भवन्ति। तन्मे मन इति व्याख्यातम्।

शब्दा०—येन=जिस मन के द्वारा, इदम्=यह, भूतम्=भूतकाल का, भुवनम्=वर्तमान काल का, भविष्यत्=भविष्यत् काल का, परिगृहीतम्=जाना जाता है, अमृतेन=अमर मन के द्वारा, सर्वम्=संसार का सब वस्तु-जात, येन=जिस मन के द्वारा, यज्ञः=यज्ञ, तायते=किया जाता है, सप्त-होता=सात होतावाला अग्निष्टोम, तत्=वह, मे=मेरा, मनः=मन, शिवसंकल्पम्=शुभ संकल्पवाला, अस्तु=हो।

हि० अ० - जिस अमर मन के द्वारा इस संसार में भूत, भविष्यत् और वर्तमान काल के सब पदार्थ जाने जाते हैं, और जिसके द्वारा सात होतावाला अग्निष्टोम यज्ञ किया जाता है, वह मेरा मन शुभ संकल्पवाला हो।

Trans.—May that mind of mine which is immortal, by which every thing is known in this world in present, past and future, and by which the Agniṣṭoma sacrifice, presided over by seven priests, is performed, be of auspicious resolution.

Notes—तायते—√*tan* to stretch+यक्; 'अ' in initial 'त' of the root is lengthened ('तनोतेर्यकि' Pāṇ. VI.4.44.).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्मिन् । ऋचः । साम । यजूंषि । यस्मिन् । प्रतिष्ठिता । प्रति-स्थितेति प्रति । स्थिता । रथनाभाविवेति रथनाभौ । इव । आराः ॥ यस्मिन् । चित्तम् । सर्वम् । ओतमित्या । उतम् । प्रजानामितिप्र । जानाम् । तत् । मे । मनः । शिवसङ्कल्पमिति-शिव । सङ्कल्पम् । अस्तु ॥५॥

सा० भा०—यस्मिन् मनसि ऋचः प्रतिष्ठिताः । यस्मिन् साम सामानि प्रतिष्ठितानि । यस्मिन् यजूंषि प्रतिष्ठितानि । मनसः स्वास्थ्ये एव वेदत्रयी-स्फूर्तेर्मनसि शब्दमात्रस्य प्रतिष्ठितत्वम् 'अन्नमयं हि सोम्य मनः' इति छान्दोग्ये मनस एव स्वास्थ्ये वेदोच्चारणशक्तिः प्रतिपादिता । तत्र दृष्टान्तः । रथनाभौ आराः इव । यथा आराः रथचक्रनाभौ मध्ये प्रतिष्ठितास्तद्वच्छब्दजालं मनसि । किंच प्रजानां सर्वं चित्तं ज्ञानम् सर्वपदार्थविषयिज्ञानं यस्मिन् मनसि ओतं प्रोतं निक्षिप्तं तन्तुसन्ततिः पटे इव सर्वं ज्ञानं मनसि निहितम् । मनःस्वास्थ्ये एव ज्ञानोत्पत्तिर्मनोवैयग्र्ये च ज्ञानाभावः । तन्मे मम मनः शिवसंकल्पं शान्त-व्यापारमस्तु ॥

शब्दा०—यस्मिन्=जिस मन में, ऋचः=ऋचाएँ, साम=सामगान, यजूंषि=यजु, यस्मिन्=जिस में, प्रतिष्ठिताः=प्रतिष्ठित हैं, रथनाभौ =रथचक्र की नाभी में, इव=समान, अराः=तिल्लियाँ, यस्मिन्= जिसमें, चित्तम्=ज्ञान, सर्वम्=सर्व पदार्थविषयक, ओतम्=प्रोत है। प्रजानाम्=प्रजा का, तत्=वह, मे=मेरा, मनः=मन, शिवसंकल्पम्= शुभ संकल्पवाला, अस्तु=हो।

हि० अ०—रथचक्र की नाभी में तिल्लियों की तरह जिस मन में ऋचाएँ, साम और यजु प्रतिष्ठित होते हैं, जिसमें प्राणियों का सर्व पदार्थविषयक ज्ञान निहित है वह मेरा मन शुभ संकल्पवाला हो।

Trans.—May that mind of mine in which the Ṛks, the Sāmans and the yajuṣ are set up like the spokes in the nave of a wheel and in which all knowledge of living beings is woven, be of auspecious resolution.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Notes—रथनाभाविवाराः—Here simile has been given to explain the relation of mind with Ṛks etc. यस्मिन् चित्तम् —From this and the previous verses it appears that the Nyāya theory of knowledge is acceptable to the white Yajurveda. According to this theory, all knowledge passes to the mind through sense organs, and from there to the soul.

सुषारथिः । सुसारथिरितिसु । सारथिः । अश्वानिवेत्यश्वान् । इव । यत् । मनुष्यान् । नेनीयते । अभीशुभिरित्यभीशु । भिः । वाजिनऽइवेतिवाजिनः । इव ॥ हृत्प्रतिस्थमितिहृत् । प्रतिस्थम् । यत् । अजिरम् । जविष्ठम् । तत् । मे । मनः । शिवसङ्कल्पमिति-शिव । सङ्कल्पम् । अस्तु ॥६॥

सा० भा०—यत् मनो मनुष्यान्नरान्नेनीयते अत्यर्थमितस्ततो नयति । नयतेः क्रियासमभिहारे यङ् । मनःप्रेरिता एव प्राणिनः प्रवर्तन्ते । मनुष्यग्रहणं प्राणिमात्रोपलक्षकम् । तत्र दृष्टान्तः । सुसारथिः अश्वानिव शोभनः सारथिर्यन्ता यथा कशया अश्वान् नेनीयते । द्वितीयो दृष्टान्तः । अभीशुभिर्वाजिन इव यथा सुसारथिरभीशुभिः प्रग्रहैः वाजिनोऽश्वान्नेनीयत इत्यनुषङ्गः । रश्मिभिर्नियच्छतीत्यर्थः । उपमाद्वयम् । प्रथमायां नयनं द्वितीयायां नियमनम् । तथा मनः प्रवर्तयति नियच्छति च नरानित्यर्थः । यच्च मनः हृत्प्रतिष्ठं हृदि प्रतिष्ठा स्थितिर्यस्य तत् हृद्येव मन उपलभ्यते । यच्च मनः अजिरं जरारहितम् बाल्ययौवन स्थाविरेषु मनसस्तदवस्थत्वात् । यच्च जविष्ठम् अतिजववद्वेगवत् जविष्ठम् 'न वै वातात्किंचनाशीयोऽस्ति न मनसः किंचनाशीयोऽस्ति' इति श्रुतेः । तन्म इत्युक्तम् ॥६॥

शब्दा०—सुषारथिः=अच्छा सारथी, अश्वान्=घोड़ों को, इव=समान, यत्=जो मन, मनुष्यान्=मनुष्यों को, नेनीयते=अत्यन्त इधर उधर ले जाता है, अभीशुभिः=लगामों से, वाजिनः=घोड़ों को, इव=समान, हृत्प्रतिष्ठम्=हृदय में स्थित, यत्=जो मन, अजिरम्=जरा रहित, जविष्ठम्=अतिशय वेगवान्, तत्=वह, मे=मेरा, मनः=मन शिवसंकल्पम्=शुभ संकल्पवाला, अस्तु=हो ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हि० अ० –जैसे अच्छा सारथी घोड़ों को इधर उधर प्रेरित करता है और लगामों से उन्हें अपने वश में रखता है उसी प्रकार जो मन प्राणियों को बार-बार इधर उधर प्रेरित करता है और अपने वश में रखता है, जो हृदय में स्थित है, जो जरा से रहित और अत्यन्त वेगवान् है, वह मेरा मन शुभ संकल्प-वाला हो।

